। अर्हम् ।

श्रेष्ठि-देवचन्द्र-लालभाई-जैन-पुस्तकोद्धारे ग्रन्थाङ्कः १०८

श्रीहरिभद्रसूरिकृतवृत्त्यनुसारेण भट्टारक श्रीज्ञानसागरसूरिविरचिता श्रुतकेवलिश्रीभद्रबाहुस्वामिसूत्रितनिर्युक्तियुत—

श्रीमदावश्यकसूत्रनिर्युक्तेरवचूर्णिः

(द्वितीयो विभागः) ।

प्रकाशक.—मोतीचन्द मगनभाई चोकसी—मेनेजींग ट्रस्टी

संशोधक—सिद्धान्तमहोदधि आचार्य श्रीमद्विजयप्रेमसूरीश्वरजी पट्टप्रभावक, व्याख्यान वाचस्पति आचार्य श्रीमद्विजय-रामचन्द्रसूरीश्वरशिष्यः पंन्यास श्री मानविजयः

इदं पुस्तकं भावनगरपुर्यां श्री महोदय मुद्रणालये पटेल हिंमतलाल देवजीभाई तथा राजनगरे नवप्रभात मुद्रणालये श्री मणीलाल छगनलाल द्वारा मुद्रयित्वा प्रकाशितम्

वीर संवत् २४९१ }
विक्रम संवत् २०२१ }

वेतनम् रुप्यकत्रयम्

{ क्राइष्ट सन् १९६५
{ प्रतयः ५००

इदं पुस्तकं श्रेष्ठि देवचन्द्र लालभाई-जैन पुस्तकोद्धारक संस्थायाः मेनेर्जींग ट्रस्टी मोतीचंद मगनभाई चोकसी इत्यनेन भावनगरपुर्यां महोदयमुद्रणालये पटेल हिंमतलाल देवजीभाई तथा राजनगरे नवप्रभात मुद्रणालये शाह मणीलाल छगनलाल द्वारा मुद्रापितम्। अस्य पुनर्मुद्रणाद्याः सर्वेऽप्यधिकारा एतद्भाण्डागारकार्यवाहकैरायत्तीकृताः।

Printed by Himatlal Devjibhai Patel at the Mahodaya Printing Press, Bhavnagar and by Manilal Chhaganlal Shah, at the Navprabhat Printing Press, Ahmedabad.

Published by the Hon Managing Trustee Motichand Maganbhai Choksi for Sheth Devachand Lalbhai Jain Pustakodhar Fund, at Sheth Devchand Lalbhai Boarding House for Shree Ratna Sagar Jain Boarding, Badekhan Chaklà, Gopipura, Surat.

SHETH DEVCHAND LALBHAI JAIN PUSTAKODHAR FUND SERIES NO. 108

SHREEMAD AVASHYAK SUTRA

COMENTRY (AVCHURNI)

BY

SHREE GYAN SAGAR SURI

SECOND PART

PRICE THREE RUPEES

Vikram Samvat 2021 *Vir Samvat 2491* *Christian 1965*

THE BOARD OF TRUSTEES

卐

सम्पादकीय निवेदन

श्रीमद् आवश्यक निर्युक्ति अवचूर्णिना सम्पादननुं कार्य श्रेष्ठि देवचंद लालभाई जैन पुस्तकोद्धार फंडना ट्रस्टीओ तरफथी मने सोंपवामां आव्युं हतुं ते ग्रन्थ विशालकाय होवाथी तेने बे भागमां प्रगट करवानुं नक्की करवामां आव्युं हतुं त्यार पछी तेना प्रथम भागनुं सम्पादन कार्य पूर्ण थवाथी सदरहु संस्था तरफथी विक्रम संवत २०२१ मां सदरहु संस्था तरफथी प्रथम भाग प्रगट करवामां आव्यो त्यार पछी एना बीजा भागनुं सम्पादन पूर्ण थयुं छे, अने ते पण आ संस्था तरफथी सीरीझ नं. १०८ तरीके प्रगट करवामां आवे छे.

प्रथम भागना सम्पादकीय निवेदनमां आ ग्रन्थनो प्रारम्भ, ईतिहास, ग्रन्थकार परिचय, हस्तलिखित प्रति परिचय विगेरे जणावेल होवाथी अत्रे कंई विशेष जणाववानुं नहि होवाथी तत्संबंधी कंई पण लखेल नथी.

आ बीजा भागमां आवश्यक सूत्रना बीजा चतुर्विंशति अध्ययनथी छेल्ला छट्ठा पच्चक्खाण अध्ययन सुधीनी निर्युक्तिनी अवचूर्णि आपवामां आवी छे.

प्रथम भागनी जेम आ बीजा भागमां पण हस्तलिखित प्रतोना असंगत पाठोने सुधारीने आवा ( ) कोष्टकमां मुकेला छे अने त्रुटक पाठोने उमेरीने आवा [ ] कोष्टकमां मुकेला छे

संशोधनमां पूरती काळजी राखवा छतां पण छपाईने आवेल फरमाओने फरी तपासतां दृष्टिदोषथी असावधानताथी मतिमान्द्यथी के प्रेसदोषथी रही गयेल क्षतिओनुं प्रमार्जन करी शुद्धि पत्रक तैयार करी आ साथे दाखल

करवामां आवेल छे, ते मुजब वांचनारे प्रथम सुधारी लेवुं. आटली काळजी राखवा छतां पण जे कंई क्षतिओ मारा मतिमान्द्यादिना दोषे रहा जवा पामी होय तेने क्षन्तव्य गणी सुधारी लेवा विद्वद् जनोने मारी विनंति छे.

आ ग्रन्थनुं सम्पादन जे केवळ ज्ञानभक्तिना हेतुथी करवामां आवेल छे ते हेतुने लक्ष्यमां राखी पूज्य साधु-साध्वी महाराजाओ आ ग्रन्थनुं पठन पाठन मनन करी चारित्रनी विशुद्ध आराधना करी परमपदना भागी बनो एज अभ्यर्थना.

मुक्तिद्वार जैन उपाश्रय
दशा पोरवाड सोसायटी, अमदावाद नं. ७
वि. स. २०२१ फागण, शुक्ल पूर्णिमा

मानविजय

प्रकाशकीय निवेदन

श्रीमद् आवश्यक निर्युक्ति उपर भट्टारक श्रीमद् ज्ञानसागरसूरि कृत अवचूर्णिनो प्रथम भाग अमारी संस्था तरफथी प्रकाशित कर्या पछी थोडा ज समयमां एनो आ वीजो भाग प्रकाशित करतां अमोने अपूर्व आनंद थाय छे. आ वीजा विभागमां आवश्यक सूत्रना वीजा चतुर्विंशति अध्ययनथी छट्ठा प्रत्याख्यान अध्ययन सुधीना अध्ययनोनो निर्युक्ति उपर अवचूर्णि आपवामां आवी छे.

आ वीजा भागने पण प्रथम भागनी माफक सदरहु संस्थानो सीरीझ नंबर १०८ आपवामां आवेल छे.

आ वीजा भागनुं सम्पादन पण सिद्धान्त महोदधि आचार्य श्रीमद् विजयप्रेमसूरीश्वरजी महाराजना पट्टप्रभावक व्याख्यान वाचस्पति आचार्य श्रीमद् विजयरामचंद्रसूरीश्वरजी महाराजना शिष्य पन्यास श्री मानविजयजी महाराजे करी आपेल छे. तेथी सदरहु संस्था तरफथी एओश्रीनो सादर आभार मानवामां आवे छे.

आवश्यक सूत्रनो पूज्य साधुमहाराजो तथा साध्वी महाराजो तथा सुश्रावको अने सुश्राविकाओने वन्ने वखत रात्रि दिवसमां लागेला अतिचारोनी आलोचना माटेना प्रतिक्रमणमां उपयोग होवाथी ते सूत्र उपर पूर्वाचार्योए छए अध्ययनो उपर तथा छुटा छुटा एकेक अध्ययन उपर पण निर्युक्ति भाष्य चूर्णि टीका दीपिका अवचूर्णि विगेरे अनेक ग्रन्थोनी रचना करेल छे. जेनी मळी शकेल यादी आ साथे परिशिष्ट नंबर-१ मां आपवामां आवी छे. तथा छए

अध्ययनोनो निर्युक्ति उपर श्री तिलकाचार्य कृत लघुवृत्ति जे अद्यापि अमुद्रित छे, तेनो आद्य अने अंत भाग पण आ साथेना परिशिष्ट नंबर-२ मां आपवामां आवेल छे. एज,

ली .

मोतीचंद मगनलाल चोकसी
मेनेजींग ट्रस्टी

शुद्धिपत्रकम्

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
१	३	०युत	युत–
१	४	०सूत्रावचूर्णि.	०सूत्रनिर्युक्तेरवचूर्णि
४	५	ऊर्द्धव०	ऊर्द्ध्वं०
१३	१२	रागादिमत्व०	रागादिमत्त्व०
२४	८	०प्रमाण	०प्रमाण
२५	३	दृष्टपूर्व	दृष्टपूर्वे
२७	२१	०सङ्कल्प	०सङ्कल्प·
३४	४	०कतृक	०कर्त्तृकं
३६	६	चारित्रणैव	चारित्रेणैव
,,	१३	०प्रसिधि०	०प्रसिद्धि०
४६	८	०रिंगिय	रिंगिय
४८	१२	सर्पिडिय	सर्पिडिय
४९	७	सड	सढ
५३	७	क्षमाणा	क्षामणा
६७	४	उक्को	उक्को
७२	७	०सानमिति	०सायमिति
७३	४	शूलादि,	शूलादि,
८०	१३	अनर्घ्या०	अनर्घ्या०
८४	११	०नवा०	०नवाततनुवा०
८५	१	शास्वतं	शाश्वत
८६	५	सव्वं	सव्व
९३	१	सर्व०	सर्वं०
९५	१०	०कानिर्युक्ति	कानिर्युक्ति. (काविधिं)
९८	८	नु	तु
,,	१३	०मध्यजघ०	०मध्यमजघ०
९९	१३	०माक्षेत्रे	०मार्दक्षेत्रे

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
११३	९	कलेवरे	कलेवरे
११६	९	वनीकादि०	वनीपकादि०
११८	७	अज्जावय०	अज्जायव०
१२०	९	अपसत्थासु	अपसत्थासु
१२१	७	विसहि०	वसहि०
,,	१४	किचण	किंचण
१२८	१	प्रमार्जना	प्रमार्जना
,,	२	२५,	१७,
१३२	१	गृह्णति	गृह्णाति
,,	२	०कमादिषु	०क्रमादिषु
,,	६	०रजस.	०रजसा
१३३	१०	मृत्कृष्ट०	मुत्कृष्ट०
१४४	१२	यक्षाया	यक्षायाः
१५५	८	वार्ध्द्रके	वार्द्धके
१६६	१	उत्सग०	उत्सर्ग०

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
१७५	५	श्वा	श्वा
,,	,,	०र्मास	०मास
१७७	९	तावत्स्या०	तावत्स्वा०
१७९	२	चतुर्विशति०	चतुर्विशति०
१८८	६	०तयोद्वा,	०तयोर्द्वौ,
१८९	१०	ग्नहणा०	ग्रहणा०
१९१	४	तदुपर्वेक·	तदुपर्येकः
१९२	५	पठ्ठक	पट्टकं
१९५	२	अत्येण०	अत्येण०
१९८	५	०गोत्तरास्त	०गोचरास्त
१९९	६	०त्सर्गाणा	०त्सर्गाणा
२०६	८	उपययश्च	उपचयश्च
२०८	६	हयरहवि	इयरहवि
२१३	६	०दप्पधिकृव	०दप्यधिकृतं
२१४	१०	थर्म्म०	धर्म्म०

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
२२०	९	ययार्ह	यथार्ह
,,	१०	व्युत्सृजव	व्युत्सृजत
२२१	४	स्थापवेत्	स्थापयेत्
,,	८	धर्म्य	धर्म्मं
२२४	६	०निसर्गोद्गा०	निसर्गोद्गा०
२२५	५	जाह–	आह–
२२७	१	किइडम्म०	किइकम्म०
,,	५	०कत्तृक–	०कर्त्तृक।
२२८	६	मदसध्द्वा	मदसद्धा
२३२	१०	शाठ्य०	शाठ्य०
२३३	६	स्यत्,	स्यात्,
२३४	८	वियिद्वार–	विधिद्वार
२४३	११	गृहात्य०	गृहात्य०

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
२५१	१०	सरदार०	सदार०
२५३	७	०घठित	०घटित
२५४	१०	साडी०	साडीकम्मे भाडी०
२५६	४	मोहोद्वीपक	मोहोद्दीपक
,,	९	सामाश्अमि	सामाइअमि
२५७	३	०श्रायको	०श्रावको
,,	४	०च्छिनत्वान्	०च्छिन्नत्वात्
२५८	१३	नरक	नरक
,,	,,	नृतिः	वृत्ति.
२५९	२	सुवाणुवाए	रूवाणुवाए
२६०	६	प्रमार्जन	प्रमार्जन
,,	,,	निष्ठयूत	निष्ठ्यूत–
,,	१२	स्वत्रत्य०	स्वकृत्य०

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
२६२	४	०वकाशिंके	०वकाशिके
२६४	२	०वृत्त्ये न	०वृत्त्येन
,,	८	कोडिसहिय	कोडिसहिय
२६५	११	द्वावाकरौ	द्वावाकारौ
२८४	२	परिण्णायित	परिणायित.
२८५	३	मणिकर०	मणिकार०
,,	८	अगृहीतव्ये	अग्रहीतव्ये
,,	१०	गृहीतव्ये	ग्रहीतव्ये

卐

अर्हं

श्रीहरिभद्रसूरिकृतवृत्त्यनुसारेण भट्टारकश्रीज्ञानसागरसूरिविरचिता
श्रुतकेवलीश्रीभद्रबाहुस्वामिसूत्रितनिर्युक्तियुत

श्रीमदावश्यकसूत्रावचूर्णिः।

अथ चतुर्विंशतिस्तवाख्यं द्वितीयमध्ययनम्

नामनिष्पन्ने निक्षेपे चतुर्विंशतिस्तवाध्ययनमिति । चतुर्विंशतिस्तवाध्ययनशब्दाः प्ररूप्याः, तथा चाह—

चउवीसइत्थयस्स उ णिक्खेवो होइ णामणिप्फण्णो। चउवीसइस्स छक्को थयस्स उ चउविहो होइ।१०६९

स्तवस्य चतुर्विधः, तुशब्दादध्ययनस्य च ॥ १०६९ ॥ आद्यद्वारमाह—

नामं ठवणा दविए खित्ते काले तहेव भावे अ। चउवीसइस्स एसो निक्खेवो छव्विहो होइ ॥१९०॥ (भा०)

नामचतुर्विंशतिर्जीवादेश्चतुर्विंशतिरिति नाम चतुर्विंशतिशब्दो वा, स्थापनाचतुर्विंशतिश्चतुर्विंशतीनां केषाञ्चित्स्थापना,

द्रव्यचतुर्विंशतिश्चतुर्विंशतिर्द्रव्याणि, क्षेत्रचतुर्विंशतिश्चतुर्विंशतिः क्षेत्राणि भरतादीनि, कालचतुर्विंशतिश्चतुर्विंशतिः समयादयः, भावचतुर्विंशतिश्चतुर्विंशतिभाव[सं]योगाः । इह सचित्तद्विपदद्रव्यरूपमनुष्यचतुर्विंशत्याधिकारः ॥ १९० ॥ स्तवमाह—

नामं ठवणा दविए भावे अ थयस्स होइ निक्खेवो । दवथओ पुप्फाई संतगुणुक्कित्तणा भावे ॥१९१॥ भा०

कारणे कार्योपचारात् द्रव्यस्तवः पुष्पादिः ॥ १९१ ॥

दवथओ भावथओ दवथओ बहुगुणत्ति बुद्धि सिआ ।
अनिउणमइवयणमिणं छज्जीवहिअं जिणा बिंति ॥ १९२ ॥ (भाष्यम्)

द्रव्यस्तवो भावस्तव इत्यत्र द्रव्यस्तवो बहुगुण इत्येवं चेद् बुद्धिः स्यादेवं चेन्मन्यसे इत्यर्थः, अनिपुणमतिवचनमिदं, किमित्यत आह–षड्जीवहितं जिना ब्रुवते, प्रधानं मोक्षसाधनमिति गम्यते ॥ १९२ ॥ किं षड्जीवहितमित्यत आह—

छज्जीवकायसंजमु दवथए सो विरुज्झई कसिणो । तो कसिणसंजमविऊ पुप्फाईअं न इच्छंति ।१९३। भा०

षड्जीवनिकायानां संयमः–संघट्टादित्यागो हितं, स 'द्रव्यस्तवे' पुष्पादिसमभ्यर्चनरूपे विरुध्यते, 'कृत्स्नः' सम्पूर्णः, कृत्स्नसंयमविद्वांसः साधवः, पुष्पादिकं द्रव्यस्तवं ॥ १९३ ॥

अकसिणपवत्तगाणं विरयाविरयाण एस खलु जुत्तो । संसारपयणुकरणो दवथए कूवदिट्ठंतो ।१९४। भा०

अकृत्स्नं प्रवर्त्तयन्तीति, संयममिति सामर्थ्यगम्यं, अकृत्स्नप्रवर्त्तकास्तेषां, संसारप्रतनुकरणः–संसारक्षयकारकः, कूपदृष्टान्तः, यथा कूपे खन्यमाने जलनिर्गमे तृडादिनाशस्तेषामन्ये लोकाः सुखिनः स्युः, एवं द्रव्यस्तवेऽपि ॥ १९४ ॥

अध्ययनशब्दोऽन्यत्रोक्त एव, सूत्रानुगमे [सूत्रं]—

लोगस्सुज्जोयगरे धम्मतित्थयरे जिणे। अरिहंते कित्तइस्सं चउवीसं पि केवली ॥ १ ॥ (सूत्रम्)

सूत्रे लोकस्योद्योतकरानिति यदुक्तं तत्र लोकमाह—

नामं १ ठवणा २ दविए ३ खित्ते ४ काले ५ भवे अ ६ भावे अ ७ ।
पज्जवलोगे अ ८ तहा अट्ठविहो लोगणिक्खेवो ॥ १०७० ॥

द्रव्यलोकमाह—

जीवमजीवे रूवमरूवी सपएसमप्पएसे अ । जाणाहि दव्वलोगं णिच्चमणिच्चं च जं दव्वं ॥ १९५ ॥ भा०

जीवाऽजीवौ द्विभेदौ रूप्यरूपिभेदात्, तत्र कर्मपरिगता रूपिणः–संसारिणः, अन्येऽरूपिणः–सिद्धाः, अजीवास्त्वरूपिणो धर्माधर्माकाशाः, रूपिणोऽण्वादयः, एतौ च सप्रदेशाप्रदेशौ, जीवः कालादेशेन नियमात्सप्रदेशः, लब्ध्यादेशेन तु सप्रदेशोऽप्रदेशो वा, एवं धर्मादिषु त्रिषु परापरनिमित्तं पक्षद्वयं वाच्यं, परमाणुर्द्रव्यतोऽप्रदेशः, द्व्यणुकादयः सप्रदेशाः, नित्यानित्यं च यद्द्रव्यं, चशब्दादभिलाप्यादिसमुच्चयः ॥ १९५ ॥ जीवाजीवयोर्नित्यानित्यतामेवाह—

गइ १ सिद्धा २ भविआया ३ अभविअ ४-१ पुग्गल १ अणागयद्धा य २ ।
तीअद्ध ३ तिन्नि काया ४-२ जीवा १ जीव २ ट्ठिई चउहा ॥ १९६ ॥ (भाष्यम्)

प्राग्व्याख्याता (सामायिकवद् व्याख्या कार्या) ॥ १९६ ॥

आगासस्स पएसा उड्ढं च अहे य तिरियलोए अ । जाणाहि खित्तलोगं अणंत जिणदेसिअं सम्मं ।१९७भा०

आकाशस्य प्रदेशाः-प्रकृष्टा देशाः प्रदेशास्तान्, ऊर्द्ध्वलोकेऽधोलोके तिर्यग्लोके च जानीहि क्षेत्रलोकं, क्षेत्रमेव लोक्यत इति लोकः अनन्तमा(मलोका)काशप्रदेशापेक्षया ॥ १९७ ॥

समयावलिमुहुत्ता दिवसमहोरत्तपक्खमासा य ।संवच्छरजुगपलिआ सागरओसप्पिपरिअट्टा ।१९८ भा०

'परावर्त्तः' पुद्गलपरावर्त्तः ॥ १९८ ॥ उक्तः काललोकः, [अधुना भवलोकमभिधित्सुराह—]

णेरइअदेवमणुआ तिरिक्खजोणीगया य जे सत्ता । तंमि भवे वट्टंता भवलोगं तं विआणाहि ॥१९९॥भा०

नारकादयो ये सत्त्वाः तस्मिन् भवे वर्त्तमाना यदनुभावमनुभवन्ति भवलोकं तं ॥ १९९ ॥

ओदइए १ ओवसमिए २ खइए अ ३ तहा खओवसमिए अ ४ ।
परिणामि ५ सन्निवाए अ ६ छव्विहो भावलोगो उ ॥ २०० ॥ (भाष्यम्)

उदयेन निर्वृत्तः औदयिकः, कर्मण इति गम्यते ॥ २०० ॥ ' ओदइअखओवसमे परिणामेकेको(कु) गइचउकेवि । खयजोगेणवि चउरो तदभावे उवसमेणंपि ॥ १ ॥ उवसमसेढी एको केवलिणोऽवि य तहेव सिद्धस्स । अविरुद्धसंन्निवाइयभेया एमेव पण्णरस ॥ २ ॥ '

तिव्वो रागो अ दोसो अ उइन्ना जस्स जंतुणो । जाणाहि भावलोअं अणंतजिणदेसिअं सम्मं ।२०१। भा०

तीव्रो रागश्च द्वेषश्च, एतावुदीर्णौ यस्य जन्तोः, तं प्राणिनं तेन भावेन लोकयत्वाज्ञानीहि भावलोकं अनन्तजिनदेशितं सम्यक् ॥ २०१ ॥

दव्वगुण १ खित्तपज्जव २ भवाणुभावे अ ३ भावपरिणामे । जाण चउव्विहमेअं पज्जवलोगं समासेणं ।२०२भा०

द्रव्यगुणाः—रूपादयः, तथा क्षेत्रस्य पर्यायाः—अगुरुलघवो भरतादिभेदा वा, भवस्य नारकादेरनुभावः—तीव्रतमदुःखादिः, भावस्य जीवाजीवरूपस्य (वसम्बन्धिनः) परिणामस्तेन तेनाज्ञानाद् ज्ञानं नीललोहिता(नीलाल्लोहितमित्या)दिप्रकारेण भवनं, चतुर्विधमेनमोघतः पर्यायलोकं ॥ २०२ ॥ यदुक्तं द्रव्यस्य गुणा इत्यादि तदाह—

वन्नरसगंधसंठाणफासट्ठाणगइवन्नभेए अ । परिणामे अ बहुविहे पज्जवलोगं विआणाहि ॥ २०३॥ भा०

वर्णः कृष्णादिः रसश्च तिक्तादिः पञ्चधा, गन्धः द्विधा, संस्थानं परिमण्डलादि पञ्चधा, स्पर्शः कर्कशादिरष्टधा, स्थानं—अवगाहरूपं, तदाश्रयप्रदेशभेदादनेकधा, गतिः—इलिकागत्यादिर्द्विधा, वर्णादिभेदा एकगुणकृष्णादयः, अनेन द्रव्यगुणा

इति व्याख्यातं । परिणामांश्च बहुविधान् जीवाजीवगोचरान्, अनेनान्त्यद्वारं, शेषं स्वयं ज्ञेयं ॥२०३॥ लोकपर्यायशब्दानाह—

आलुक्कइ अ पलुक्कइ लुक्कइ संलुक्कई अ एगट्ठा । लोगो अट्ठविहो खलु तेणेसो वुच्चई लोगो ॥१०७१॥

आलोक्यत इत्यालोकः, प्रलोक्यत इति प्रलोकः, लोक्यत इति लोकः, संलोक्यत इति संलोकः, एते एकार्थिकाः । लोकोऽष्टविधः खल्वित्यत्राऽऽलोक्यत,इत्यादि योज्यं ॥ १०७१ ॥ उद्योतमाह—

दुविहो खलु उज्जोओ नायवो दवभावसंजुत्तो । अग्गी दव्वुज्जोओ चंदो सूरो मणी विज्जू ॥१०७२॥

द्रव्यभावसंयुक्तो द्रव्योद्योतो भावोद्योतश्च ॥ १०७२ ॥

नाणं भावुज्जोओ जह भणियं सवभावदंसीहिं । तस्स उवओगकरणे भावुज्जोअं विआणाहि ॥१०७३॥

ज्ञानं भावोद्योतः, यथा भणितं सर्वभावदर्शिभिः, तथा यज्ज्ञानं, सम्यग्ज्ञानमित्यर्थः, तदपि नाविशेषेणोद्योतः किन्तु तस्य-ज्ञानस्योपयोगकरणे सति ॥ १०७३ ॥ येनोद्योतेन लोकस्योद्योतकरा जिनास्तेनैव युक्तानाह—

लोगस्सुज्जोअगरा दव्वुज्जोएण न हु जिणा हुंति । भावुज्जोअगरा पुण हुंति जिणवरा चउवीसं ॥१०७४॥

दव्वुज्जोउज्जोओ पगासई परिमियंमि खित्तंमि । भावुज्जोउज्जोओ लोगालोगं पगासेइ ॥ १०७५ ॥

द्रव्योद्योतोद्योतः-द्रव्योद्योतप्रकाशः ॥ १०७५ ॥ करं प्राप्तमपि धर्मतीर्थकरानित्यत्र वक्ष्यमाणत्वात्मुक्त्वा धर्ममाह—

लोकपर्यायाः नि० गा० १०७१
द्रव्य-भावोद्योतौ नि० गा० १०७१-१०७५

दुह दव्वभावधम्मो दव्वे दव्वस्स दव्वमेवऽहवा । तित्ताइसभावो वा गम्माइत्थी कुलिंगो वा ॥ १०७६ ॥

धर्मो द्विधा-द्रव्यधर्मो भावधर्मश्च, द्रव्यद्वारे, द्रव्यस्य धर्मो द्रव्यधर्मो, अनुपयुक्तस्य मूलोत्तरगुणानुष्ठानं, द्रव्यमेव वा धर्मो धर्मास्तिकायः, तिक्तादिर्वा द्रव्यस्वभावो द्रव्यधर्मः, गम्यादिधर्मः स्त्रीविषयः, केषाञ्चिन्मातुलदुहिता गम्या केषाञ्चिन्नेत्यादि, कुतीर्थिकधर्मो द्रव्यधर्मः ॥ १०७६ ॥

दुह होइ भावधम्मो सुअचरणे जा सुअंमि सज्झाओ । चरणंमि समणधम्मो खंतीमाई भवे दसहा ।१०७७

श्रुतधर्मश्चारित्रधर्मश्च ॥ १०७७ ॥ तीर्थमाह—

नामं ठवणातित्थं दव्वतित्थं च भावतित्थं च । एक्केक्कंपि अ इत्तोऽणेगविहं होइ णायव्वं ॥ १०७८ ॥

दाहोवसमं तण्हाइछेअणं मलपवाहणं चेव । तिहि अत्थेहि निउत्तं तम्हा तं दव्वओ तित्थं ॥१०७९॥

द्रव्यतीर्थं मागधवरदामादि बाह्यदाहादेरेव तत उपशमसद्भावात्, त्रिभिरर्थैर्निश्चयेन युक्तं नियुक्तं ॥ १०७९ ॥ भावतीर्थमधिकृत्याह—

कोहंमि उ निग्गहिए दाहस्स पसमणं हवइ तित्थं । लोहंमि उ निग्गहिए तण्हाए छेअणं होइ ॥१०८०॥

क्रोध एव निगृहीते दाहस्योपशमनं भवति तथ्यं ॥ १०८० ॥

अट्ठविहं कम्मरयं बहुएहि भवेहिं संचिअं जम्हा । तवसंजमेण धुवइ तम्हा तं भावओ तित्थं॥१०८१॥

तत्-प्रवचनं भावतस्तीर्थं ॥ १०८१ ॥

दंसणनाणचरित्तेसु निउत्तं जिणवरेहिं सव्वेहिं । तिसु अत्थेसु निउत्तं तम्हा तं भावओ तित्थं ॥१०८२॥

दर्शनज्ञानचारित्रेषु नियुक्तं-नियोजितं जिनवरैः ॥ १०८२ ॥ करमाह—

नामकरो १ ठवणकरो २ दव्वकरो ३ खित्त ४ काल ५ भावकरो ६ ।
एसो खलु करगस्स उ निक्खेवो छव्विहो होइ ॥ १०८३ ॥

द्रव्यकरमाह—

गोमहिसुट्टिपसूणं छगलीणंपि अ करा मुणेयव्वा । तत्तो अ तणपलाले भुसकट्ठंगारपलले य ॥१०८४॥

सिउंबरजंघाए बलिवद्द(भ)इकए घए अ चम्मे अ । चुल्लगकरे अ भणिए अट्ठारसमाकरुप्पत्ती ॥१०८५॥

गोकरस्तद्याचनमेव तद्वारेण वा रूपकाणामित्येवं सर्वत्र । शीताकरः-भोगः क्षेत्रपरिणामोद्भव इत्यन्ये, देवताबल्यर्थ-मर्थार्थनं बलिकरः, भद्रा बलीवर्दास्तेषां करः, अष्टादशमकर उत्पत्तिकरः स्वकल्पनाशिल्पनिर्मितः शतरूपकादिः ॥१०८४-८५ ॥ क्षेत्रकरादीनाह—

खित्तंमि जंमि खित्ते काले जो जंमि होइ कालंमि। दुविहो अ होइ भावे पसत्थु तह अप्पसत्थो अ ॥१०८६॥

यो यस्मिन् क्षेत्रे शुल्कादिः ॥ १०८६ ॥

कलहकरो डमरकरो असमाहिकरो अनिव्वुइकरो अ। एसो उ अप्पसत्थो एवमाई मुणेअव्वो ॥१०८७॥

वाचिकः कलहः, कायवाग्मनोभिस्ताडनादिगहनं डमरं, असमाधिरस्वास्थ्यनिबन्धना सा कायादिचेष्टा ॥ १०८७ ॥

अत्थकरो अ हिअकरो कित्तिकरो गुणकरो जसकरो अ।
अभयकर निव्वुइकरो कुलगर तित्थकरंतकरो ॥ १०८८ ॥

ओघत एव विद्यादिरर्थः, कर्मक्षयोपशमादिभावतस्तत्करणशीलोऽर्थकरः, एवं हितादिष्वपि, अन्तः कर्मणः संसारस्य वा ॥ १०८८ ॥ उक्तो भावकरः, अथ जिनाद्याह—

जियकोहमाणमाया जियलोहा तेण ते जिणा हुंति। अरिणो हंता रयं हंता अरिहंता तेण वुच्चंति ॥१०८९॥

कीर्त्तयिष्यामीत्याद्याह—

कित्तेमि कित्तणिज्जे सदेवमणुआसुरस्स लोगस्स। दंसणनाणचरित्ते तवविणओ दंसिओ जेहिं ॥१०९०॥

कीर्त्तयिष्यामि नामभिर्गुणैश्च, गुणानाह—'दंसणे'त्यादि, तप एव कर्म्मविनयनात्तपोविनयः ॥ १०९० ॥

चउवीसंति य संखा उसभाईआ उ भण्णमाणा उ। अविसद्दग्गहणा पुण एरवयमहाविदेहेसुं ॥ १०९१ ॥

ऐरवतमहाविदेहेषु ये तद्ग्रहोऽपि ज्ञेयः ॥ १०९१ ॥

कासिणं केवलकप्पं लोगं जाणांति तह य पासंति। केवलचरित्तनाणी तम्हा ते केवली हुंति ॥ १०९२ ॥

'कृत्स्नं' संपूर्णं, 'केवलकल्पं' केवलोपमं, 'लोकं' पञ्चास्तिकायात्मकं ॥१०९२॥ यदुक्तं 'कीर्त्तयिष्यामीति' तदाह—

उसभमजिअं च वंदे संभवमभिणंदणं च सुमइं च। पउमप्पहं सुपासं जिणं च चंदप्पहं वंदे ॥ २ ॥

सुविहिं च पुप्फदंतं सीअल सिज्जंस वासुपुज्जं च। विमलमणंतं च जिणं धम्मं संतिं च वंदामि ॥ ३ ॥

कुंथुं अरं च मल्लिं वंदे मुणिसुवयं नमिजिणं च। वंदामि रिट्ठनेमिं पासं तह वद्धमाणं च ॥४॥ (सूत्राणि)

ऊरूसु उसभलंछण उसभं सुमिणंमि तेण उसभजिणो।
अक्खेसु जेण अजिआ जणणी अजिओ जिणो तहा ॥ १०९३ ॥

ऊरुद्वये ऋषभं स्वप्ने पूर्वमपश्यन्माता, अक्षेषु देवी अजिता राज्ञा ॥ १०९३ ॥

अभिसंभूआ सासत्ति संभवो तेण वुच्चई भयवं। अभिणंदई अभिक्खं सक्को अभिणंदणो तेण ॥ १०९४ ॥

गर्भगते शस्यान्यधिकमभिसम्भूतानि, गर्भप्रभृति शक्रोऽभीक्ष्णमभिनन्दति ॥ १०९४ ॥

जणणी सव्वत्थ विणिच्छएसु सुमइत्ति तेण सुमइजिणो।
पउमसयणंमि जणणीइ डोहलो तेण पउमाभो ॥ १०९५ ॥

द्वयोः सपत्न्योर्मृतपतिकयोर्व्यवहारे देव्योक्तं मम पुत्रो जातो यौवनस्थो युवयोर्विवादच्छेत्ता, पुत्रमाता नेच्छति ज्ञातं, पद्मशयनीयो दोहदो देवतया अपूरि, पद्मवर्णश्च ॥ १०९५ ॥

गब्भगए जं जणणी जाय सुपासा तओ सुपासजिणो। जणणीए चंदपियणंमि डोहलो तेण चंदाभो। १०९६

चन्द्रवर्णश्च ॥ १०९६ ॥

सव्वविहीसु अ कुसला गब्भगए तेण होइ सुविहिजिणो। पिउणो दाहोवसमो गब्भगए सीयलो तेणं।१०९७

सर्वविधिषु विशेषतः कुशला जननी, पितुर्दाहोपशमो देवीकरस्पृष्टस्याभूत् ॥ १०९७ ॥

महरिहसिज्जारुहणंमि दोहलो तेण होइ सिज्जंसो। पूएइ वासवो जं अभिक्खणं तेण वसुपुज्जो ॥१०९८॥

परम्परागतदेवतापरिगृहीतशय्यारोहणे देव्या दोहदे, तत्रोपविष्टाया(यां) आरस्य देवता गता, श्रेयो जातं तेन प्राकृतत्वात् श्रेयांस इति। गर्भगते जनन्या वासवः पूजां करोति ॥ १०९८ ॥

विमलतणुबुद्धि जणणी गब्भगए तेण होइ विमलजिणो ।
रयणविचित्तमणंतं दामं सुमिणे तओऽणंतो ॥ १०९९ ॥

मातुः शरीरं बुद्धिश्चातीव विमला जाता, रत्नविचित्रमनन्तमतिमहाप्रमाणं दाम स्वप्ने जनन्या दृष्टं ॥ १०९९ ॥

गब्भगए जं जणणी जाय सुधम्मत्ति तेण धम्मजिणो।जाओ असिवोवसमो गब्भगए तेण संतिजिणो ११००
थूहं रयणविचित्तं कुंथुं सुमिणंमि तेण कुंथुजिणो। सुमिणे अरं महरिहं पासइ जणणी अरो तम्हा। ११०१

स्तूपं रत्नविचित्रं कुस्थमत्युचमहाप्रदेशस्थं स्वप्ने दृष्ट्वा प्रतिबुद्धा। माता सर्वरत्नमयमतिसुन्दरमरं स्वप्ने पश्यति॥ ११०१

वरसुरहिमल्लसयणंमि डोहलो तेण होइ मल्लिजिणो ।जाया जणणी जं सुव्वयात्ति मुणिसुव्वओ तम्हा ११०२

मातुः सर्वर्तुकवरसुरभिकुसुममाल्यशयनीये दोहदो जातो देवतया अपूरि ॥ ११०२ ॥

पणया पच्चंतनिवा दंसियमित्ते जिणंमि तेण नमी। रिट्ठरयणं च नेमिं उप्पयमाणं तओ नेमी ॥ ११०३ ॥

प्रत्यन्तनृपैः पुरे रुद्धे देव्या अट्टालके आरोढुं श्रद्धा जाता आरूढा च, दृष्टा ततस्ते प्रणताः। मात्रा रिष्टरत्नमयो महानेमिरुत्पतन् स्वप्ने दृष्टः ॥ ११०३ ॥

सप्पं सयणे जणणी तं पासइ तमसि तेण पासजिणो। वड्ढइ नायकुलंति अ तेण जिणो वद्धमाणुत्ति।११०४

एवं मए अभिथुआ विहुयरयमला पहीणजरमरणा। चउवीसंपि जिणवरा तित्थयरा मे पसीयंतु ॥५॥
कित्तियवंदियमहिआ जेए लोगस्स उत्तमा सिद्धा। आरुग्गबोहिलाभं समाहिवरमुत्तमं दिंतु ।६। (सूत्रम्)

अभिष्टवकीर्त्तनैकार्थिकान्याह—

थुइथुणणवंदणनमंसणाणि एगट्ठिआणि एआणि ।
कित्तण पसंसणावि अ विणयपणामे अ एगट्ठा ॥ ११०५ ॥

स्तुतिः स्तवनं वन्दनं नमस्करणं, तथा कीर्त्तनप्रशंसे विनयप्रणामौ ॥ ११०५ ॥ उत्तमा इत्याह—

मिच्छत्तमोहणिज्जा नाणावरणा चरित्तमोहाओ। तिविहतमा उम्मुक्का तम्हा ते उत्तमा हुंति ॥११०६॥

यदुक्तमारोग्यबोधिलाभमित्यादि तत्राह—

आरुग्गबोहिलाभं समाहिवरमुत्तमं च मे दिंतु। किं नु हु निआणमेअं ति ?, विभासा इत्थ कायव्वा ।११०७

किमिति परप्रश्ने, नु वितर्के, हु तत्समर्थने, निदानमेतत् ?, गुरुराह–विभाषा–विषयविभागव्यवस्थापनेन व्याख्या अत्र कर्त्तव्या, नेदं निदानं, कर्मबन्धहेत्वभावात्, मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवो, न च मुक्तिप्रार्थनायाममीषां सम्भवः ॥ ११०७ ॥ आह–यद्यारोग्यादिप्रदातारः स्युस्तदा रागादिमत्वप्रसङ्गः, अथ न, ततस्तद्दानविकला एवं जानान-

२

स्यापि प्रार्थनायां मृषावाददोषः, नेत्याह—

भासा असच्चमोसा नवरं भत्तीइ भासिआ एसा। न हु खीणपिज्जदोसा दिंति समाहिं च बोहिं च ११०८।

भाषाऽसत्यामृषेयं वर्त्तते, याञ्चारूपत्वात्, आह—वीतरागत्वादारोग्यादिदानविकलाश्च ते, तत्किमनया ?, उच्यते, सत्यं, भक्त्या भाषितैषा, अन्यथा नैव क्षीणप्रेमद्वेषा ददति ॥ ११०८ ॥

जं तेहिं दायव्वं तं दिन्नं जिणवरेहिं सव्वेहिं। दंसणनाणचरित्तस्स एस तिविहस्स उवएसो ॥ ११०९ ॥

यत्तैर्दातव्यं तद्दत्तं, आरोग्यादिप्रसाधक एष त्रिविधस्योपदेशः ॥ ११०९ ॥ आह—ततः साम्प्रतं तद्भक्तिः क्वोपयुज्यते ?, उच्यते—

भत्तीइ जिणवराणं खिज्जंती पुव्वसंचिआ कम्मा। आयरिअनमुक्कारेण विज्जा मंता य सिज्झंति ॥१११०॥

दृष्टान्तमाह—आचार्यनमस्कारेण विद्या मन्त्राश्च सिद्ध्यन्ति, तद्भक्तिमतः ॥१११०॥ अतः साध्वी तद्भक्तिरित्याह—

भत्तीइ जिणवराणं परमाए खीणपिज्जदोसाणं। आरुग्गबोहिलाभं समाहिमरणं च पावंति ॥११११॥

जिनभक्तिमात्रादेव [पुनः] बोधिलाभो भविष्यत्येव, किमनेन दुष्करानुष्ठानेनेतिवादिनमधिकृत्योपदेशमाह—

लद्धिल्लिअं च बोहिं अकरिंतोऽणागयं च पत्थंतो। दच्छिसि जह तं विब्भल! इमं च अन्नं च चुक्किहिसि१११२

लब्धां च वर्त्तमानकाले बोधिमकुर्वन्, अनागतां चायत्यामन्यां च प्रार्थयन्, द्रक्ष्यसि यथा त्वं हे विह्वल !–जड ! इमां

प्रार्थनायां
आक्षेप-
परिहारौ
नि. गा०
११०८-
१११२

च अन्यां च बोधिमधिकृत्य 'चुक्किहिसि'त्ति भ्रश्यसि ॥ १११२ ॥

लद्धिल्लिअं च बोहिं अकरिंतोऽणागयं च पत्थंतो । अन्नंदाइं बोहिं लब्भिसि कयरेण मुल्लेण ? ॥ १११३ ॥

तथा लब्धामकुर्वन् अनागतां च प्रार्थयन् 'अन्नंदाइं'ति असूयायां, बोधिं लप्स्यसि कतरेण मूल्येन ? ॥ १११३ ॥ तस्मात्सति बोधिलाभे तपःसंयमानुष्ठानपरेण भाव्यं [तपःसंयमोद्यमवतश्चैत्यादिषु कृत्याविराधकत्वात्, तथा चाह—]

चेइयकुलगणसंघे आयरियाणं च पवयणसुए य । सव्वेसुवि तेण कयं तवसंजमुज्जमंतेणं ॥ १११४ ॥

सर्वेष्वपि तेन कृतं कृत्यमिति गम्यते, तपःसंयमोद्यमवता साधुना, तत्र चैत्यान्यर्हतां, कुलं–विद्याधरादि, गणः–कुलसमुदायः ॥ १११४ ॥

चंदेसु निम्मलयरा आइच्चेसु अहिअं पयासयरा । सागरवरगंभीरा सिद्धा सिद्धिं मम दिसंतु । ७ (सूत्रम्)

अवयवमाह—

चंदाइच्चगहाणं पहा पयासेइ परिमिअं खित्तं । केवलिअनाणलंभो लोगालोगं पगासेइ ॥ ॥१११५॥

ग्रहा अङ्गारकादयः ॥ १११५ ॥ नयाः पूर्ववत् ॥ इति चतुर्विंशतिस्तवनिर्युक्त्यवचूर्णिः ॥

इति श्रीचतुर्विंशतिस्तवाध्ययनं सभाष्यनिर्युक्त्यवचूर्णिकं समाप्तम् ॥

अथ तृतीयं वन्दनाध्ययनम् ॥

नामनिष्पन्ने निक्षेपे वन्दनाध्ययनमिति, तत्र वन्दनस्य पर्यायशब्दानाह—

वंदणचिइकिइकम्मं पूयाकम्मं च विणयकम्मं च । कायव्वं कस्स व केण वावि काहे व कइखुत्तो ? ॥१११६॥

कुशलकर्मणश्चयनं चितिः, कारणे कार्योपचाराद्रजोहरणाद्युपधिसंहतिः, कृतिः—अवनामादिकरणं, वन्दनचितिकृतय एव कर्म—क्रिया, कर्मशब्दः प्रत्येकं योज्यः, पूजा—प्रशस्तमनोवाक्कायचेष्टा, आह—वन्दनं कर्त्तव्यं कस्य वा केन वापि कदा वा कतिकृत्वो वा ? ॥ १११६ ॥

कइओणयं कइसिरं कइहिं च आवस्सएहि परिसुद्धं । कइदोसविप्पमुक्कं किइकम्मं कीस कीरइ वा?१११७

कत्यवनतं तद्वन्दनं कर्त्तव्यं, कतिशिरः, कतिभिर्वा आवश्यकैः परिशुद्धं, कतिदोषविप्रमुक्तं, कृतिकर्म, 'किंस'त्ति किमिति वा क्रियते । तत्र वन्दनकर्मादीनि द्विधा-द्रव्यतो भावतश्च ॥ १११७॥ द्रव्यभावभेदप्रचिकटयिषया दृष्टान्तानाह—

सीयले खुड्डुए कण्हे सेवए पालए तहा । पंचेते दिट्ठंता किइकम्मे होंति णायव्वा ॥ १११८ ॥

एकस्य राज्ञः पुत्रः शीतलः प्रव्राजितः, तस्य भगिनी अन्यराज्ञे दत्ता, सा स्वसुतचतुष्कस्य शीतलाचार्यप्रशंसां करोति । पुत्राः स्थविरान्ते प्रव्रज्य बहुश्रुता गुरुमापृच्छ्य मातुलवन्दनाय एकस्मिन्पुरे श्रुत्वा गताः । मध्ये प्रवेष्टुकामश्राद्धाय कथ-

वन्दन-पर्यायाः कस्य वन्दनं कर्त्तव्य-मित्यादि दृष्टान्ताश्च नि० गा० १११६-१११८

द्रव्यभाव-
वन्दने
दृष्टान्ताः
केषां वन्दनं
न कर्त्तव्यं
नि० गा०
१०१९

यित्वा विकाले बहिर्देवकुले स्थिताः, रात्रौ तेषां ज्ञानं, प्रगेऽनिवृत्त्या मातुलाऽऽगमनं, पूर्वं कषायतो द्रव्यवन्दनं, ज्ञाते भाववन्दनतः शीतलस्यापि केवलज्ञानं । एकः क्षुल्लकः सल्लक्षण आचार्यैः कालं कुर्वद्भिः पदे स्थापितो गीतार्थसाधूनां मूले पठति, सोऽन्यदा मोहनीयोदयाद्भग्नपरिणामः साधूषु भिक्षां गतेषु बहिर्भूमिमिषादेकदिशा गच्छन् वने तिलकबकुलादिषु सत्स्वपि शमीपूजनकं जनं दृष्ट्वा पूज्यैः पूजितोऽयमिति च श्रुत्वा शमीज्झुकखरसमोऽहं, कुतो मे श्रामण्यं ?, रजोहरणादिचितिगुणेन मां पूजयन्तीति विमृश्याऽऽगतः साधूनामालोचितवान्, तस्य पूर्वं द्रव्यचितिः पश्चाद्भावचितिः । कृष्णवासुदेवस्य श्रीनेम्यागमने सर्वसाधून् द्वादशावर्त्तवन्दनेन वन्दमानस्य भावकृतिकर्म, वीरकस्य द्रव्यकृतिकर्म । एकस्य राज्ञो द्वौ सेवकौ, ग्रामसीमनिमित्तं राजकुलं गच्छन्तौ पथि साधुं दृष्ट्वा ध्रुवा सिद्धिरित्येको भावेन वन्दितवान् अपरस्तूद्घट्टनं कुर्वन् व्यवहारे जितः, [तस्य द्रव्यपूजा इतरेण] भावपूजा कृता । श्रीनेमिः प्रथमं वन्दितः पालकेन द्रव्यतः, शाम्बेन भावतः ॥ १११८ ॥ यदुक्तं वन्दनं कर्त्तव्यं कस्य वेति, तत्र येषां न कर्त्तव्यं तानाह—

असंजयं न वंदिज्जा मायरं पियरं गुरुं । सेणावइं पसत्थारं रायाणं देवयाणि य ॥ १११९ ॥

असंयताः—अविरतास्तान्न वन्देत, कान् ? मातरं तथा पितरं गुरुं—पितामहादिलक्षणं, असंयतमिति सर्वत्र योजनीयं, सेनापतिं—गणराजं प्रशास्तारं—धर्मपाठकादिलक्षणं, राजानं—बद्धमुकुटं दैवतानि च न वन्देत ॥ १११९ ॥ अथ यस्य वन्दनं कर्त्तव्यं स उच्यते—

समणं वंदिज्ज मेहावी संजयं सुसमाहियं । पंचसमिय तिगुत्तं अस्संजमदुगुंछगं ॥ ११२० ॥

संयतं क्रियायां प्रयत्नवन्तं, सुसमाहितं दर्शनादिषु, असंयमजुगुप्सकं ॥ ११२० ॥ इत्थम्भूतमेव वन्देत न पार्श्वस्थादीन्, [तथा चाह—]

पंचण्हं किइकम्मं मालामरुएण होइ दिट्ठंतो । वेरुलियनाणदंसणणीयावासे य जे दोसा ॥ ११२१ ॥

पञ्चानां कृतिकर्म न कर्तव्यं, पार्श्वस्थादीनां यथोक्तश्रमणगुणविकलत्वात्, तथा संयता अपि ये पार्श्वस्थादिभिः सार्द्धं संसर्गं कुर्वन्ति तेषामपि कृतिकर्म न कार्यं, आह–कुतोऽयमर्थोऽवगम्यते ?, उच्यते, मालामरुकाभ्यां भवति दृष्टान्त इति वचनात्, 'वेरुलिअ'त्ति संसर्गजदोषत्यागाय वैडूर्यदृष्टान्तो भविष्यति, 'नाण' त्ति दर्शनचारित्राऽऽसेवनसामर्थ्यविकला एवमाहुः–ज्ञानिन एव कृतिकर्म कार्यं, 'कामं चरणं भाव' इत्यादि, 'दंसण'त्ति ज्ञानचरणविकला एवमाहुः–दर्शनिन एव, 'जह नाणेण'मित्यादि, अन्ये नित्यवासादि प्रशंसन्ति, परे चैत्याद्यालम्बनं कुर्वन्ति, तदत्र नित्यावासे ये दोषाः चशब्दात्केवलज्ञानदर्शनपक्षे च [चैत्यभक्ति] आर्यिकालाभविगतिपरिभोगपक्षे च ते वक्तव्याः ॥ ११२१ ॥ पञ्च स्वरूपत आह—

पासत्थो ओसन्नो होइ कुसीलो तहेव संसत्तो । अहछंदोऽविय एए अवंदणिज्जा जिणमयंमि ॥ १ ॥ (प्र०)

[इयमन्यकर्तृकीगाथा], 'सो पासत्थो दुविहो सव्वे देसे य होइ णायव्वो । सव्वंमि णाणदंसणचरणाणं जो उ पासंमि ॥ १ ॥ देसंमि य पासत्थो सिज्जायरऽभिहड रायपिंडं वा । णिययं च अग्गपिंडं भुंजति णिक्कारणेणं च ॥ २ ॥ कुलणिस्साए विहरइ

ठवणकुलाणि य अकारणे विसइ। संखडिपलोयणाए गच्छइ तह संथवं कुणई ॥ ३ ॥ ओसन्नोऽवि य दुविहो सबे देसे य तत्थ सव्वंमि। उउबद्धपीढफलगो ठवियगभोई य णायव्वो ॥ ४ ॥' सामाचार्यसेवनेऽवसन्नवदवसन्नः, 'ठविअगभोई' त्ति स्थापनापिण्डभोजी ॥ १-४ ॥ देशावसन्नस्तु—'आवस्सगसज्झाए पडिलेहणझाणभिक्खऽभत्तट्ठे। आगमणे णिग्गमणे ठाणे य णिसीयणतुअट्टे ॥ ५ ॥ आवस्सयाइयाइं ण करे करेइ अहवावि हीणमधियाइं। गुरुवयणबलाइ तथा भणिओ एसो य ओसन्नो ॥ ५-६ ॥' 'गुरुवयणबलाइ' त्ति गुरुणा शिक्षित आलजालानि जल्पति ॥ ६ ॥ 'गोणो जहा वलंतो भंजइ समिलं तु सोऽवि एमेव। गुरुवयणं अकरेंतो बलाई कुणइ व उस्सोढं ॥ ७ ॥' 'गोणो' त्ति गौः गलिः, 'कुणई व उस्सोढं' ति गच्छादिनिष्कासनभयात् यद्वा त्वत्समीपे किमहमेवैकोऽस्मि येन पुनः पुनर्मामेवाकारयतेत्याद्यसूयावाक्यमुक्त्वा करोति ॥ ७ ॥ 'तिविहो होइ कुसीलो णाणे तह दंसणे चरित्ते य। एसो अवंदणिज्जो पन्नत्तो वीयरागेहिं ॥ ८ ॥ णाणे णाणायारं जो उ विराहेइ कालमाईयं। दंसणे दंसणायारं चरणकुसीलो इमो होइ ॥ ९ ॥ कोउय भूईकम्मे पसिणापसिणे णिमित्तमाजीवे। कक्ककुरुए य लक्खण उवजीवइ विज्जमंताई ॥ १० ॥ सोभग्गाइणिमित्तं परेसि ण्हवणाइ कोउयं भणियं। जरियाइ भूइदाणं भूईकम्मं विणिद्दिट्ठं ॥ ११ ॥ सुविणयविज्जाकहियं आइंखणिघंटियाइकहियं वा। जं सासइ अन्नेसिं पसिणापसिणं हवइ एयं ॥ १२ ॥' शुभाशुभं पृष्टः, स्वप्नविद्यां पृच्छति, तत्कथितं तेषां कथयति, अथवा आख्यायिकादेवता मन्त्रेणाहूता घण्टिकाद्वारेण शुभाशुभं कथयति तच्च देवतोक्तं अन्येषां कथयति इति प्रश्नाप्रश्नः ॥ १२ ॥ 'तीयाइभावकहणं होइ णिमित्तं इमं तु आजीवं। जाइकुलसिप्पकम्मे तवगणसुत्ताइ सत्तविहं ॥ १३ ॥' आहाराद्यर्थं जातिकुलशिल्पकर्मगुणैर्दायक-

तुल्यमात्मानमाख्याति तपः[गण]सूत्रांश्च प्रकटयति स जात्याद्याजीवः ॥ १३ ॥ 'कक्ककुरुगा य माया णियडिए जं भणंति तं भणियं । थीलक्खणाइ लक्खण विज्जामंताइया पयडा ॥ १४ ॥' 'कक्ककुरुगा य माय'त्ति कोऽर्थः निकृत्या परेषां भेदवचनं ॥ १४ ॥ संसत्तो य इदाणीं सो पुण गोभत्तलंदए चेव । उच्चिट्ठमणुच्चिट्ठं जं किंची छुब्भई सव्वं ॥ १५ ॥' संसक्तवत्संसक्तः, पार्श्वस्थादिकं तपस्विनं वाऽऽसाद्य सन्निहितदोषगुणः, गोभक्तकलन्दके यथा 'छुब्भई'त्ति क्षिप्यते सर्वं ॥ १५ ॥ एमेव य मूलुत्तरदोसा य गुणा य जत्तिआ केइ । ते तम्मिवि सन्निहिया संसत्तो भण्णई तम्हा ॥ १६ ॥ रायविदूसगमाई अहवावि णडो जहा उ बहुरूवो । अहवावि मेलगो जो हलिद्दरागाइ बहुवण्णो ॥ १७ ॥ एमेव जारिसेणं सुद्धमसुद्धेण वाऽवि संमिलइ । तारिसओ च्चिय होति संसत्तो भण्णई तम्हा ॥ १८ ॥ सो दुविकप्पो भणिओ जिणेहि जियरागदोसमोहेहिं । एगो उ संकिलिट्ठो असंकिलिट्ठो तहा अण्णो ॥ १९ ॥ पंचासवप्पवत्तो जो खलु तिहि गारवेहि पडिबद्धो । इत्थिगिहिसंकिलिट्ठो संसत्तो संकिलिट्ठो उ ॥ २० ॥ पासत्थाईएसुं संविग्गेसुं च जत्थ मिलती उ । तहि तारिसओ भवई पिअधम्मो अहव इयरो उ ॥ २१ ॥' एषोऽसंक्लिष्टः ॥ 'उस्सुत्तमायरंतो उस्सुत्तं चेव पन्नवेमाणो । एसो उ अहाछंदो इच्छाछंदोत्ति एगट्ठा ॥ २२ ॥' अथाच्छन्दोऽपि यथाछन्दो यथेच्छयैवागमनिरपेक्षं प्रवर्त्तते यः स अथाच्छन्दः—' उस्सुत्तमणुवदिट्ठं सच्छंदविगप्पियं अणणुवाइ । परतत्ति पवत्तिति णेओ इणमो अहाछंदो ॥ २३ ॥ सच्छंदमइविगप्पिय किंची सुहसायविगइपडिबद्धो । तिहिगारवेहिं मज्जइ तं जाणाही अहाछंदं ॥ २४ ॥' स्वच्छन्दमत्या किञ्चिदालम्बनं विकल्प्य सुखस्वादविकृतिप्रतिबद्धः ॥ २४ ॥

पासत्थाई वंदमाणस्स नेव कित्ती न निज्जरा होइ । कायकिलेसं एमेव कुणई तह कम्मबंधं च ॥११२२॥

पार्श्वस्थाद्यवन्द्यस्वरूपम् अवन्द्यवन्दने दोषाः नि० गा० ११२२

कीर्तिः—अहोऽयं पुण्यभागित्येवंलक्षणा, 'एवमेव' मुधैव करोति, कर्मबन्धं च, चशब्दादाज्ञाभङ्गादींश्च दोषानवाप्नुते ॥ ११२२ ॥

एवं वन्दमानस्य दोषा उक्ताः, अथ तेषामेव गुणाधिक[वन्दन] प्रतिषेधमकुर्वतामपायानाह—

जे बंभचेरभट्ठा पाए उड्डुंति बंभयारीणं । ते होंति कुंटमंटा बोही य सुदुल्लहा तेसिं ॥ ११२३ ॥

भ्रष्टब्रह्मचर्याः, ब्रह्मचर्यशब्दो मैथुनविरतिवाचकः, तथौघतः संयमवाचकश्च, ब्रह्मचारिणां वन्दमानानां, भवन्ति कोण्टमण्टाः कृच्छ्रेण मानुषत्वमाप्ताः ॥ ११२३ ॥

सुट्ठुतरं नासंती अप्पाणं जे चरित्तपब्भट्ठा । गुरुजण वंदाविंती सुसमण जहुत्तकारिं च ॥ ११२४ ॥

'गुरुजनं' गुणस्थसाधुवर्गं, शोभनाः श्रमणा यस्मिन् स तथा तं, यथोक्तकारिणं च ॥ ११२४ ॥ तथा गुणवन्तोऽपि ये पार्श्वस्थादिभिः सह संसर्गं कुर्वन्ति तेऽपि न वन्दनीयाः, किमित्यत आह—

असुइट्ठाणे पडिया चंपगमाला न कीरई सीसे । पासत्थाईठाणेसु वट्टमाणा तहा अपुज्जा ॥११२५॥

पार्श्वस्थादिस्थानेषु वर्त्तमानाः साधवस्तथा 'अपूज्याः' अवन्दनीयाः, पार्श्वस्थादीनां स्थानानि—वसतिनिर्गमनभूम्यादीनि, चम्पकप्रियः कुमारश्चम्पकमालया शिरस्थया अश्वारूढो यान् अशुचिपतितां ज्ञात्वा स्थानदोषेण मुमोच ॥ ११२५ ॥ दृष्टान्तान्तरमाह—

अवन्द्यवन्दने दोषाः संसर्गजा दोषगुणाः नि० गा० ११२३-११२५

पक्कणकुले वसंतो सउणीपारोऽवि गरहिओ होइ । इय गरहिया सुविहिया मज्झि वसंता कुसीलाणं ।११२६

पक्कणकुले गर्हितकुले वसन् शकुनीपारगोऽपि गर्हितः स्यात् , शकुनीशब्देन चतुर्दश विद्यास्थानानि, एकस्य द्विजातेः पञ्च पुत्राः शकुनीपारगाः, तत्रैको मरुको दासीसङ्गान्मद्यादिप्रसङ्गी ज्ञात्वा पित्रा स निर्वासितः, एवं यावच्चतुर्थः, पञ्चमः पुत्रो नेच्छति, तेन मरुकेण स गृहस्वामी चक्रे, इतरे चत्वारोऽपि बहिष्कृताः ॥ ११२६ ॥ ' मालामरुए 'त्ति गयं, वैडूर्यपदं व्याख्यायते, तत्राह–कः पार्श्वस्थादिसंसर्गमात्राद्गुणवतो दोषः ?–

जो जारिसेण मित्तिं करेइ अचिरेण (सो)तारिसो होइ । कुसुमेहिं सह वसंता तिलावि तग्गंधया होंति ।१

सुचिरंपि अच्छमाणो वेरुलिओ कायमणीयउम्मीसो । नोवेइ कायभावं पाहण्णगुणेण नियएणं ॥११२७॥

काचमणिकोन्मिश्रः ॥ ११२७ ॥ अत्राह आचार्यः—

भावुगअभावुगाणि य लोए दुविहाणि होंति दव्वाणि । वेरुलिओ तत्थ मणी अभावुगो अन्नदव्वेहिं ॥११२८

भाव्यन्ते–प्रतियोगिना स्वगुणैरात्मभावमापाद्यन्ते इति भाव्यानि, प्राकृतत्वाद् भावुकानि ॥ ११२८ ॥ स्यान्मतिः– जीवोऽप्येवम्भूत एव भविष्यति, तदसत् , यतः—

जीवो अणाइनिहणो तब्भावणभाविओ य संसारे । खिप्पं सो भाविज्जइ मेलणदोसाणुभावेणं ॥११२९॥

' तद्भावनाभावितश्च ' पार्श्वस्थाद्याचरितप्रमादादिभावनाभावितश्च, मीलनदोषानुभावेन ॥ ११२९ ॥ एतदर्थप्रति-

पादको दृष्टान्तोऽप्यस्त्येव—

अंबस्स य निंबस्स य दुण्हंपि समागयाइं मूलाइं। संसग्गीइ विणट्ठो अंबो निंबत्तणं पत्तो ॥ ११३० ॥

तिक्तनिम्बोदकवासितायां भूमौ अम्बवृक्ष उत्पन्नः, पुनस्तत्राम्रस्य निम्बस्य च द्वयोरपि 'समागते' एकीभूते मूले ॥ ॥ ११३० ॥ पुनरप्याह–नन्वेतदपि सप्रतिपक्षं—

सुचिरंपि अच्छमाणो नलथंभो उच्छुवाडमज्झंमि। कीस न जायइ महुरो? जइ संसग्गी पमाणं ते ॥११३१

नलस्तम्बो वृक्षविशेषः ॥ ११३१ ॥ आचार्यः–विहितोत्तरमेतत्–'भावुग०' इत्यादि, अत्रापि च केवली अभाव्यः पार्श्वस्थादिभिः, सरागास्तु भाव्याः, आह–तैः सहालापमात्रतायां क इव दोषः ?, उच्यते—

ऊणगसयभागेणं बिंबाइं परिणमंति तब्भावं। लवणागराइसु जहा वज्जेह कुसीलसंसग्गिं ॥११३२॥

ऊनश्चासौ शतभागश्च ऊनशतभागः, तेन तावता अंशेन प्रतियोगिना सह सम्बद्धानि बिम्बानि–काष्टेष्टिकाद्विपदचतुष्पदादीनि परिणमन्ति तद्भावं लवणीभवन्तीत्यर्थः ॥ ११३२ ॥ पुनरपि संसर्गिदोषमाह—

जह नाम महुरसलिलं सायरसलिलं कमेण संपत्तं। पावेइ लोणभावं मेलणदोसाणुभावेणं ॥११३३॥

मधुरसलिलं–नदीपयः ॥ ११३३ ॥

एवं खु सीलवंतो असीलवंतेहिं मीलिओ संतो। पावइ गुणपरिहाणिं मेलणदोसाणुभावेणं ॥११३४॥

अशीलवद्भिः–पार्श्वस्थादिभिः ॥ ११३४ ॥ अतः—

खणमवि न खमं काउं अणाययणसेवणं सुविहियाणं । हंदि समुद्दमइगयं उदयं लवणत्तणमुवेइ ॥११३५॥

लोचननिमेषमात्रः कालः क्षणस्तं न क्षमं–न योग्यं, अतो व्यवस्थितमिदं–ये पार्श्वस्थादिभिः सार्द्धं संसर्गं कुर्वन्ति तेऽपि न वन्दनीयाः, सुविहिता एव वन्द्या इति ॥ ११३५ ॥ अत्राह—

सुविहिय दुविहियं वा नाहं जाणामि हं खु छउमत्थो । लिंगं तु पूययामी तिगरणसुद्धेण भावेणं ॥११३६॥

सुविहितं वा पार्श्वस्थादिकं नाहं जानामि, लिङ्गं–रजोहरणादिधरणरूपं ॥ ११३६ ॥ आचार्य आह—

जइ ते लिंग पमाणं वंदाही निण्हवे तुमे सवे । एए अवंदमाणस्स लिंगमवि अप्पमाणं ते ॥ ११३७ ॥

निह्नवान् जमालिप्रभृतीन्, एतान् [द्रव्य] लिङ्गयुक्तानप्यवन्दमानस्य लिङ्गमप्यप्रमाण तव ॥ ११३७ ॥ इत्थमुक्तेऽनभिनिविष्ट एव जिज्ञासयाह नोदकः—

जइ लिंगमप्पमाणं म नज्जई निच्छएण को भावो ?। दट्ठूण समणलिंगं किं कायवं तु समणेणं ? ॥११३८॥

कस्य को भावः ? यतोऽसंयता अपि लब्ध्याद्यर्थं संयतवच्चेष्टन्ते, संयता अपि कारणतोऽसंयतवत्, एवं दृष्ट्वा श्रमणलिङ्गं किं पुनः कर्त्तव्यं श्रमणेन ? ॥ ११३८ ॥ आहाचार्यः—

संसर्गजा
दोषगुणाः
११३५-
११३८

अप्पुव्वं दट्ठूणं अब्भुट्ठाणं तु होइ कायव्वं । साहुम्मि दिट्ठपुव्वे जहारिहं जस्स जं जोग्गं ॥ ११३९ ॥

अपूर्वं, साधुमिति गम्यते, दृष्ट्वा, अभ्युत्थानं–आसनत्यागलक्षणं, तुशब्दाद्दण्डकादिग्रहणं च, दृष्टपूर्वास्तु द्विधा–उद्यतविहारिणः शीतलविहारिणश्च, तत्रोद्यतविहारिणि साधौ दृष्टपूर्वे यथार्हमभ्युत्थानवन्दनादि यस्य बहुश्रुतादेर्यद्योग्यं तत्कर्त्तव्यं, यः पुनः शीतलविहारी न तस्याभ्युत्थानवन्दनादि उत्सर्गतः किञ्चित्कार्यम् ॥११३९॥ कारणतः शीतलविहारिगतविधिमाह–

मुक्कधुरासंपागडसेवीचरणकरणपब्भट्ठे । लिंगावसेसमित्ते जं कीरइ तं पुणो वोच्छं ॥ ११४० ॥

मुक्ता धूः–संयमधूर्येन, सम्प्रकटं मूलोत्तरगुणजालं सेवितुं शीलमस्येति सम्प्रकटसेवी, इत्थम्भूते 'लिङ्गावशेषमात्रे' केवलद्रव्यलिङ्गयुक्ते यत् क्रियते कारणमाश्रित्य तद्वक्ष्ये ॥ ११४० ॥

वायाइ नमोक्कारो हत्थुस्सेहो य सीसनमणं च । संपुच्छणऽच्छणं छोभवंदणं वंदणं वावि ॥ ११४१ ॥

निर्गमभूम्यादौ दृष्टस्य वाचाऽभिलापः क्रियते, गुरुतरपुरुषकार्यापेक्षं वा तस्यैव नमस्कारः क्रियते, एवमभिलापनमस्कारगर्भो हस्तोच्छ्रयश्च क्रियते, 'सम्प्रच्छनं' कुशलं भवत इत्यादि, 'अच्छणं'ति तद्बहुमानस्तत्सन्निधौ आसनं कञ्चित्कालं, एष बहिर्दृष्टस्य विधिः, कारणात्तत्प्रतिश्रयमपि गम्यते, तत्राप्येष एव विधिः, नवरं 'छोभवंदणं'ति छोभवन्दनं क्रियते, वन्दनं वा परिशुद्धं ॥ ११४१ ॥ एतच्च वाङ्नमस्कारादि नाऽविशेषेण क्रियते, किं तर्हि ?—

परियायपरिसपुरिसे खित्तं कालं च आगमं नच्चा । कारणजाए जाए जहारिहं जस्स जं जुग्गं ॥११४२॥

३

लिङ्गे अपूर्वसाधौ कृत्यं लिङ्गे कारणिकं वन्दनं च नि० गा० ११३९-४२

स्यापि पुण्यफलस्याभाव एव प्राप्तः, उच्यते तस्य तीर्थकरगुणाध्यारोपेण प्रवृत्तेर्नाभावः॥ ११४९ ॥ तथा चाह—

नियमा जिणेसु उ गुणा पडिमाओ दिस्स जे मणे कुणइ। अगुणे उ वियाणंतो कं नमउ मणे गुणं काउं?११५०

अगुणानेवाऽविद्यमानगुणानेव विजानन् पार्श्वस्थादीन् कं मनसि कृत्वा गुणं नमस्कारं करोतु तान् ? स्यादेतदन्यसाधुसम्बन्धिनं तेष्वध्यारोपमुखेन कृत्वा नमस्करोतु, न, तेषां सावद्यकर्मयुक्ततयाऽध्यारोपविषयलक्षणविकलत्वात् ॥११५०॥ आह च—

जइ वेलंबगलिंगं जाणंतस्स नमओ हवइ दोसो। निद्धंधसमिय नाऊण वंदमाणे धुवो दोसो ॥११५१॥

विडम्बकलिङ्गं, भाण्डादिकृतं, 'दोषः' प्रवचनहीलनादिलक्षणः, 'निद्धंधसं' प्रवचनोपघातनिरपेक्षं पार्श्वस्थादिकमिति ज्ञात्वा वन्दमाने दोषः ॥ ११५१ ॥ एवं न लिङ्गमात्रमकारणतोऽवगतसावद्यक्रियं नमस्क्रियते इति स्थितं, भावलिङ्गमपि द्रव्यलिङ्गरहितमित्थमेव, भावलिङ्गगर्भं तु द्रव्यलिङ्गं नमस्क्रियते, रूपकदृष्टान्तश्चात्र—

रुप्पं टंकं विसमाहयक्खरं नवि रूवओ छेओ। दुण्हंपि समाओगे रूवो छेयत्तणमुवेइ ॥ ११५२ ॥

रूपं शुद्धाशुद्धभेदं, टङ्कं विषमाहताक्षरं—विपर्यस्तनिविष्टाक्षरं, नैव रूपकश्छेकः असंव्यवहारिक इत्यर्थः, द्वयोरपि शुद्धरूपसमाहताक्षरटङ्कयोः समायोगे सति रूपकश्छेकत्वमुपैति। अत्र चतुर्भङ्गी—रूपमशुद्धं टङ्कं विषमाहताक्षरं १, रूपमशुद्धं टङ्कं समाहताक्षरं २, रूपं शुद्धं टङ्कं विषमाहताक्षरं ३, रूपं शुद्धं टङ्कं समाहताक्षरं ४। अत्र रूपकल्पं भावलिङ्गं टङ्ककल्पं द्रव्य-

लिङ्गं, आद्यभङ्गतुल्याश्चरकादयः, अशुद्धोभयलिङ्गत्वात् , द्वितीयभङ्गतुल्याः पार्श्वस्थादयः, तृतीयभङ्गतुल्याः प्रत्येकबुद्धा अन्तर्मुहूर्त्तमात्रं कालमगृहीतद्रव्यलिङ्गाः, चतुर्थभङ्गतुल्याः साधवस्त एव वन्द्याः ॥११५२॥ रूपकदृष्टान्ते दार्ष्टान्तिकयोजनामाह—

रुप्पं पत्तेयबुद्धा टंकं जे लिंगधारिणो समणा। दव्वस्स य भावस्स य छेओ समणो समाओगे ॥११५३॥

द्रव्यस्य भावस्य च छेकः श्रमणः, ममायोगे ॥ ११५३ ॥ उक्तं वैडूर्यद्वारं, ज्ञानद्वारे कश्चिदाह—'जं अण्णाणी कम्मं खवेइ बहुयाहिं वासकोडीहिं । तं णाणी तिहि गुत्तो खवेइ ऊसासमित्तेणं ॥ १ ॥ सुई जहा ससुत्ता ण णासई कयवरंमि पडियावि । जीवो तहा ससुत्तो ण णस्सइ गओऽवि ससारे ॥ २ ॥ णाणं गिण्हइ णाणं गुणेइ णाणेण कुणइ किच्चाणं । भव-समारसमुद्दं णाणी णाणे ठिओ तरइ ॥ ३ ॥'

कामं चरणं भावो तं पुण नाणसहिओ समाणेई । न य नाणं तु न भावो तेण र णाणिं पणिवयामो । ११५४

काममनुमतं, यदुत चरणं भावः, भावशब्दो भावलिङ्गोपलक्षणार्थः, तत्पुनर्ज्ञानमहितः समापयति–निष्ठां नयति, न च ज्ञानं तु न भावः, भाव एव, तेन कारणेन, 'र' इति पूरणे, ज्ञानिनं प्रणमामः ॥ ११५४ ॥

तम्हा ण बज्झकरणं मज्झ पमाणं न यावि चारित्तं। नाणं मज्झ पमाणं नाणे अ ठिअं जओ तित्थं ११५५

'बाह्यकरणं' पिण्डविशुद्ध्यादिकं, ज्ञाने च स्थित यतस्तीर्थं, तस्यागमरूपत्वात् ॥ ११५५ ॥ सम्यग्दर्शनमपि ज्ञानायत्तोदयमेव, तथा चाह—

नाऊण य सब्भावं अहिगमसंमंपि होइ जीवस्स। जाईसरणनिसग्गुग्गयावि न निरागमा दिट्ठी ॥११५६॥

सतां भावः सद्भावस्तं, अधिगमात्–जीवादिपदार्थपरिच्छेदलक्षणात्सम्यक्त्वं–श्रद्धानलक्षणमधिगमसम्यक्त्वम्, अपिशब्दाच्चारित्रमपि, जीवस्य, नैसर्गिकमाश्रित्याह–जातिस्मरणात् सकाशान्निसर्गेण–स्वभावेनोद्गता–जातिस्मरणनिसर्गोद्गता, असावपि न निरागमा दृष्टिः, यतो मत्स्यादीनामपि जिनप्रतिमाद्याकारमत्स्यदर्शनाज्जातिमनुस्मृत्य भूतार्थालोचनपराणा(रिणाम)मेव नैसर्गिकं सम्यक्त्वमुपजायते, भूतार्थालोचनं च ज्ञानं, तस्माज्ज्ञानिन एव कृतिकर्म कार्यमिति स्थितम् ॥११५६॥ आहाचार्यः—

नाणं सविसयनिययं न नाणमित्तेण कज्जनिप्फत्ती। मग्गण्णू दिट्ठंतो होइ सचिट्ठो अचिट्ठो य ॥११५७॥

स्वविषये नियतं स्वविषयनियतं, स्वविषयोऽस्य प्रकाशनमेव, मार्गज्ञोऽत्र दृष्टान्तः, सचेष्टोऽचेष्टश्च, यथा पाटलिपुत्रमार्गज्ञो जिगमिषुश्रेष्टदेशप्राप्तिलक्षणं कार्यं गमनचेष्टोद्यत एव साधयति न चेष्टाविकलः, एवं ज्ञानी शिवमार्गमवगच्छन्नपि संयमक्रियोद्यत एव तत्प्राप्तिरूपं कार्यं साधयति ॥ ११५७ ॥ दृष्टान्तान्तरमाह—

आउज्जनट्टकुसलावि नट्टिया तं जणं न तोसेइ। जोगं अजुंजमाणी निंदं खिंसं च सा लहइ ॥११५८॥

आतोद्यानि–मृदङ्गादीनि, तैः करणभूतैर्नृत्तं तस्मिन्कुशला, अपिशब्दाद्रङ्गजनपरिवृताऽपि 'तं जनं' रङ्गजनं, योगमयुञ्जन्ती कायादिव्यापारमकुर्वती रङ्गजनान्न किञ्चिद्द्रव्यजातं लभते इति गम्यते, तत्समक्षं एव या हीलना सा निन्दा,

परोक्षं तु खिंसा ॥ ११५८ ॥

इय लिंगनाणसहिओ काइयजोगं न जुंजई जो उ। न लहइ स मुक्खसुक्खं लहइ य निंदं सपक्खाओ ११५९

नर्त्तकीतुल्यः साधुः, आतोद्यतुल्यं द्रव्यलिङ्गं, नृत्तज्ञानतुल्यं ज्ञानं, योगव्यापारतुल्यं चरणं, रङ्गपरितोषतुल्यः सङ्घपरितोषः, दानलाभतुल्यः सिद्धिसुखलाभः ॥ ११५९ ॥ पुनरपि दृष्टान्तमाह—

जाणंतोऽवि य तरिउं काइयजोगं न जुंजइ नईए। सो वुज्झइ सोएणं एवं नाणी चरणहीणो ॥११६० ॥

स पुमान् ' उह्यते ' ह्रियते ' श्रोतसा—पयःप्रवाहेण तस्मादुभययुक्तस्यैव कृतिकर्म कार्यम् ॥ ११६० ॥ अपरस्त्वाह—

गुणाहिए वंदणयं छउमत्थो गुणागुणे अयाणंतो । वंदिज्जा गुणहीणं गुणाहियं वावि वंदावे ॥ ११६१ ॥

उत्सर्गतो गुणाधिके साधौ वन्दनं कर्त्तव्यमिति शेषः, अयं चार्थः श्रमणं वन्देतेत्यादिना सिद्धः, गुणहीने तु प्रतिषेधः पञ्चानां कृतिकर्मेत्यादिना, च्छद्मस्थस्तत्त्वतो गुणागुणानात्मान्तरवर्त्तिनो अजानानो वन्देत वा गुणहीनं, गुणाधिकं चापि वन्दापयेत्, तस्मादलं वन्दनेन ॥ ११६१ ॥ व्यवहारनयमतेन गुणाधिकत्वपरिज्ञानकारणान्याहाचार्यः—

आलएणं विहारेणं ठाणाचंकमणेण य । सक्को सुविहिओ नाउं भासावेणइएण य ॥ ११६२ ॥

आलयः सुप्रमार्जितादिलक्षणः स्त्र्यादिरहितो वा तेन, नागुणवत एवंविध आलयः स्यात्, विहारः—मासकल्पादिः, स्थानमूर्ध्वस्थानं, चङ्क्रमणं गमनं, भाषावैनयिकेन आलोच्य भाषणेनाचार्यादिविनयकरणेन च ॥ ११६२ ॥ पुनः परः—

आलएणं विहारेणं ठाणेचंकमणेण य । न सक्को सुविहिओ नाउं भासावेणइएण य ॥ ११६३ ॥

उदायिनृपमारकादिभिर्व्यभिचारात् ॥ ११६३ ॥ किञ्च—

भरहो पसन्नचंदो सब्भिंतरबाहिरं उदाहरणं । दोसुप्पत्तिगुणकरं न तेसि बज्झं भवे करणं ॥११६४॥

साभ्यन्तरबाह्यं, आभ्यन्तरं भरतस्तस्य बाह्यकरणरहितस्यापि केवलमुत्पन्नं, बाह्यं प्रसन्नचन्द्रस्तस्योत्कृष्टबाह्यकरणवतोऽप्यन्तःकरणविकलस्याधः सप्तमनरकप्रायोग्यबन्धः, एवं दोषोत्पत्तिगुणकरं न तयोर्बाह्यमभूत्करणं, दोषोत्पत्तिकृद्भरतस्य नाभूदशोभनं बाह्यं करणं, प्रसन्नचन्द्रस्य गुणकरं नाभूत् शोभनमपि, तस्मादान्तरमेव करणं प्रधानं न च तदालयादिना ज्ञातुं शक्यमतस्तूष्णीभावः श्रेयान् ॥ ११६४ ॥ एतद्वादिनामपायमाहाचार्यः—

पत्तेयबुद्धकरणे चरणं नासंति जिणवरिंदाणं । आहच्चभावकहणे पंचहि ठाणेहि पासत्था ॥११६५॥

प्रत्येकबुद्धाः–पूर्वभवाभ्यस्तोभयकरणा भरतादयस्तेषां करणं तस्मिन्, आन्तरे एव फलसाधके मति जडाश्चरणं नाशयन्ति जिनवरेन्द्राणाम् सम्बन्धि आत्मनोऽन्येषां च, 'आहच्चभावकहणे' त्ति कादाचित्कभावकथने–बाह्यकरणरहितैरेव भरतादिभिः केवलमुत्पादितमित्यादिलक्षणे, पञ्चभिः स्थानैः पारम्पर्येण करणभूतैः पार्श्वस्थाः ॥१२६५॥ यतश्च—

उम्मग्गदेसणाए चरणं नासिंति जिणवरिंदाणं । वावन्नदंसणा खलु न हु लब्भा तारिसा दट्ठुं ॥११६६॥

उन्मार्गदेशनया अनया चरणं नाशयन्ति जिनवरेन्द्राणां सम्बन्धिभूतं आत्मनो अन्येषां चातो व्यापन्नदर्शनाः–विनष्ट-

सुविहितत्वज्ञानकारणानि नि० गा० ११६३–६६

सम्यग्दर्शना निश्चयतः, नैव कल्पन्ते तादृशा द्रष्टुमपि ॥ ११६६ ॥ गतं ज्ञानद्वारं, दर्शनमतोऽवलम्ब्याह—

जह नाणेणं न विणा चरणं नादंसणिस्स इय नाणं। न य दंसणं न भावो तेन र दिट्ठिं पणिवयामो ।११६७।

यथा ज्ञानेन विना न चरणं, किन्तु सहैव, नादर्शनिन एवं ज्ञानं, ' दिट्ठि 'ति दर्शनिनं प्रणमामः ॥ ११६७ ॥ स्यादेतत्–सम्यक्त्वज्ञानयोर्युगपद्भावादुपकार्योपकारकभावानुपपत्तिरित्यसत्, यतः—

जुगवंपि समुप्पन्नं सम्मत्तं अहिगमं विसोहेइ। जह कायगमंजणाई जलदिट्ठीओ विसोहेंति ॥११६८॥

समुत्पन्नं सम्यक्त्वं ज्ञानेन सहाधिगमं–ज्ञानं विशोधयति–विमलीकरोति यथा काचकाञ्जने जलदृष्टी विशोधयतः, कचको वृक्षस्तस्येदं काचक फलं, अञ्जनं–सौवीरादि ॥ ११६८ ॥

जह जह सुज्झइ सलिलं तह तह रूवाइं पासई दिट्ठी। इय जह जह तत्तरुई तह तह तत्तागमो होइ ११६९

शुद्ध्यति सलिलं काचकफलसंयोगात् तथा तथा ' रूपाणि ' तद्गतानि पश्यति द्रष्टा, एवं यथा यथा ' तत्त्वरुचिः ' सम्यक्त्वलक्षणा संजायते तथा तथा तत्त्वावगमस्तत्त्वपरिच्छेदः स्यात्, एवमुपकारकं सम्यक्त्वं ज्ञानस्य ॥ १२६९ ॥

कारणकज्जविभागो दीवपगासाण जुगवजम्मेवि। जुगवुप्पन्नंपि तहा हेऊ नाणस्स सम्मत्तं ॥ ११७० ॥

यथा कारणकार्यविभागो दीपप्रकाशयोर्युगपज्जन्मनि, युगपदुत्पन्नमपि तथा ' हेतुः ' कारणं ज्ञानस्य सम्यक्त्वं, तस्मादर्शनिन एव कृतिकर्म कार्यम् ॥ ११७० ॥ आहाचार्यः—

दर्शनपक्षः
नि० गा०
११६७–
७०

नाणस्स जइवि हेऊ सविसयनिययं तहावि सम्मत्तं। तम्हा फलसंपत्ती न जुज्जए नाणपक्खेव ॥१॥ प्र०
जइ तिक्खरुईवि नरो गंतुं देसंतरं नयविहूणो। पावेइ न तं देसं नयजुत्तो चेव पाउणइ ॥ २ ॥ (प्र०)
इय नाणचरणहीणो सम्मदिट्ठीवि मुक्खदेसं तु। पाउणइ नेय(व) नाणाइसंजुओ चेव पाउणइ ॥३॥ (प्र०)

इदमन्यकर्तृकं गाथात्रयं, स्वविषयनियतं, स्वविषयश्चास्य तत्त्वरुचिरेव, फलसम्प्राप्तिर्न युज्यते मोक्षसुखप्राप्तिर्न घटते, स्वविषयनियतत्वादेव, असहायत्वादित्यर्थः, ज्ञानपक्ष इव, यथा ज्ञानपक्षे मार्गज्ञादिभिर्दृष्टान्तैरसहायस्य ज्ञानस्य फलासाधकत्वमुक्तम् एवमत्रापि ज्ञेयं, दिङ्मात्रमाह—यथा 'तीक्ष्णरुचिरपि' तीव्रश्रद्धोऽपि पुरुषो गन्तुं देशान्तरं—देशान्तरगमने 'नयविहीनो' ज्ञानगमनक्रियालक्षणनयशून्यः, प्राप्नोति न तं देशं—गन्तुमिष्टं ॥ १—३ ॥ एवमप्युक्ते ये यानि चासदालम्बनानि वदन्ति तदेतदाह—

धम्मनियत्तमईया परलोगपरम्मुहा विसयगिद्धा। चरणकरणे असत्ता सेणियरायं ववइसंति ॥११७१॥

धर्मनिवृत्तमतयः श्रेणिकराजानं व्यपदिशन्त्यालम्बनम् ॥ ११७१ ॥

ण सेणिओ आसि तया बहुस्सुओ, न यावि पन्नत्तिधरो न वायगो ।
सो आगमिस्साइ जिणो भविस्सइ, समिक्ख पन्नाइ वरं खु दंसणं ॥ ११७२ ॥

प्रज्ञप्तिधरः-भगवतीवेत्ता, न वाचकः-पूर्वधरः, तथापि स दर्शनादेवायत्यामागामिनि काले, अतः समीक्ष्य प्रज्ञया दर्शनविपाकं, वरं दर्शनमेवाङ्गीकृतम् ॥ ११७२ ॥ अतः—

भट्ठेण चरित्ताओ सुट्ठुयरं दंसणं गहेयव्वं । सिज्झंति चरणरहिया दंसणरहिया न सिज्झंति ॥११७३॥

असहायदर्शनपक्षे दोषानाह—

दसारसीहस्स य सेणियस्सा, पेढालपुत्तस्स य सच्चइस्स ।
अणुत्तरा दंसणसंपया तया, विणा चरित्तेणऽहरं गइं गया ॥ ११७४ ॥

'दशारसिंहस्य' कृष्णस्य अनुत्तरा क्षायिकी सम्पत्तदा, 'अधरां गतिं' नरकगतिं गताः ॥ ११७४ ॥ किञ्च—

सव्वाओवि गईओ अविरहिया नाणदंसणधरेहिं । ता मा कासि पमायं नाणेण चरित्तरहिएणं ॥११७५॥

सर्वा अपि नारकादिगतयो अविरहिता ज्ञानदर्शनधरैः, न च नरगतिव्यतिरेकेणान्यासु मुक्तिश्चारित्राभावात्तस्मान्मा कार्षीः प्रमादं, ज्ञानेन चारित्ररहितेन ॥ ११७५ ॥ इतश्च चारित्रमेव प्रधानं, नियमेन चारित्रयुक्त एव सम्यक्त्वसद्भावात्, आह च—

सम्मत्तं अचरित्तस्स हुज्ज भयणाइ नियमसो नत्थि । जो पुण चरित्तजुत्तो तस्स उ नियमेण सम्मत्तं ११७६

सम्यक्त्वमचारित्रस्य प्राणिनो भवेद्भजनया कदाचित्स्यात् कदाचिन्न, नियमेन नास्ति प्रभूतानां चारित्ररहितानां मिथ्यादृष्टित्वात् ॥ ११७६ ॥ किञ्च—

जिणवयणबाहिरा भावणाहिं उवट्टणं अयाणंता । नेरइयतिरियएगिंदिएहि जह सिज्झई जीवो ॥११७७॥

जिनवचनबाह्या ज्ञानदर्शनभावनाभ्यामेव सकाशान्मोक्षमिच्छन्तीति शेषः, 'उद्वर्त्तनामजानानाः' नारकतिर्यगेकेन्द्रियेभ्यो यथा सिध्यति जीवस्तथा अजानानाः, नारकास्तिर्यञ्चश्च ज्ञानदर्शनसहिता अपि एकेन्द्रियाश्च तद्रहिता मनुष्यभवं प्राप्य चारित्रेणैव सिद्ध्यन्तीत्यर्थः, उद्वर्त्तनाकारणवैकल्यं सूचयति ॥ ११७७ ॥ चारित्रमेव समर्थयति—

सुट्ठुवि सम्मद्दिट्ठी न सिज्झई चरणकरणपरिहीणो । जं चेव सिद्धिमूलं मूढो तं चेव नासेइ ॥ ११७८ ॥

यदेव सिद्धिमूलं–चरणकरणं मूढस्तदेव नाशयति अनासेवनया ॥ ११७८ ॥ केवलदर्शनपक्षः कस्य स्यादित्याह—

दंसणपक्खो सावय चरित्तभट्ठे य मंदधम्मे य । दंसणचरित्तपक्खो समणे परलोगकंखिम्मि ॥११७९॥

दर्शनपक्षः 'श्रावके' अप्रत्याख्यानकषायोदयवति स्यात्, चारित्रभ्रष्टे च मन्दधर्मे च पार्श्वस्थादौ, दर्शनचारित्रपक्षः श्रमणे परलोकाकाङ्क्षिणि, दर्शनग्रहणे ज्ञानमपि गृहीतं ज्ञेयं ॥ ११७९ ॥

पारंपरप्पसिद्धी दंसणनाणेहिं होइ चरणस्स । पारंपरप्पसिद्धी जह होइ तहऽन्नपाणाणं ॥ ११८० ॥

पारम्पर्येण प्रसिद्धिः–स्वरूपसत्ता सा दर्शनज्ञानाभ्यां सकाशात् स्याच्चरणस्य, अतस्त्रितयमप्यस्तु, पारम्पर्यप्रसिधिर्यथा

स्यात्तथा अन्नपानयोर्लोकेऽपि प्रतीतैव, तथा चान्नार्थी स्थालीन्धनाद्यपि गृह्णाति पानार्थी च द्राक्षाद्यपि अतस्त्रितयमपि प्रधानं ॥ ११८० ॥

जम्हा दंसणनाणा संपुण्णफलं न दिंति पत्तेयं। चारित्तजुया दिंति उ विसिस्सए तेण चारित्तं ॥११८१॥

विशिष्यते तेन चारित्रं ॥ ११८१ ॥ आह–विशिष्यतां चारित्रं, किन्तु—

उज्जममाणस्स गुणा जह हुंति ससत्तिओ तवसुएसुं। एमेव जहासत्ती संजममाणे कहं न गुणा ? ॥११८२॥

उद्यच्छतस्तपःश्रुतयोः गुणास्तपोज्ञानावाप्त्यादयो यथा स्युः, संयमं पृथिव्यादिसंरक्षणादिलक्षणं कुर्वति सति साधौ कथं न गुणाः ?, गुणा एवेत्यर्थः ॥ ११८२ ॥ उच्यते—

अणिगूहंतो विरियं न विराहेइ चरणं तवसुएसुं। जह संजमेऽवि विरियं न निगूहिज्जा न हाविज्जा ॥ ११८३

अनिगूहयन् वीर्यं तपःश्रुतयोर्न विराधयति चरणं, यदि संयमेऽपि उपयोगादिरूपतया न निगूहयेन्मातृस्थानेन हापयेत्संयमं, स्यादेव संयमगुणाः ॥ ११८३ ॥

संजमजोएसु सया जे पुण संतविरियावि सीयंति। कह ते विसुद्धचरणा बाहिरकरणालसा हुंति ? ११८४

कथं ते विशुद्धचरणाः स्युः ? बाह्यकरणालसाः सन्तः–प्रत्युपेक्षणादिबाह्यचेष्टारहिताः ॥ ११८४ ॥

आलंबणेण केणइ जे मन्ने संयमं पमायंति। न हु तं होइ पमाणं भूयत्थगवेसणं कुज्जा ॥ ११८५ ॥

४

एवमहं मन्ये संयमं 'प्रमादयन्ति' परित्यजन्ति, नैतदालम्बनमात्रं स्यात्प्रमाणं, किन्तु भूतार्थगवेषणं कुर्यात्, यद्यपुष्ट-
मालम्बनमविशुद्धचरणा एव ते, अथ पुष्टं विशुद्धचरणाः ॥ ११८५ ॥ आह परः-आलम्बनात्को विशेषः ?, उच्यते—

सालंबणो पडंतो अप्पाणं दुग्गमेऽवि धारेइ । इय सालंबणसेवा धारेइ जइं असढभावं ॥ ११८६ ॥

द्रव्या(भावा)लम्बनमपुष्टं ज्ञानाद्यनुपकारकं तद्विपरीतं तु पुष्टं, तथा चाह—'काहं अछित्तिं अदुवा अहीहं, तवोवहाणेसु
य उज्जमिस्सं । गणं व णीईइ व हु सारविस्सं सालंबसेवी समुवेइ मुक्खं' ॥ १ ॥ सालम्बनसेवा यतिमशठभावं ॥ ११८६ ॥

आलंबणहीणो पुण निवडइ खलिओ अहे दुरुत्तारे । इय निक्कारणसेवी पडइ भवोहे अगाहंमि ॥११८७॥

भवौघेऽगाधे ॥ ११८७ ॥ गतं दर्शनद्वारं, 'नीयावासे 'त्ति—

जे जत्थ जया भग्गा ओगासं ते परं अविंदंता । गंतुं तत्थऽचयंता इमं पहाणंति घोसंति ॥ ११८८ ॥

ये साधवः शीतलविहारिणो यत्रानित्यवासादौ यदा भग्ना निर्विण्णाः 'अवकाशं' स्थानमालम्बनं परमन्यदलभमानाः
गन्तुं 'तत्र' शोभने स्थानेऽशक्नुवन्तो यदस्माभिरङ्गीकृतं साम्प्रतकालमाश्रित्येदमेव प्रधानं घोषयन्ति ॥११८८॥ तदाह—

नीयावासविहारं चेइयभत्तिं च अज्जियालाभं । विगईसु य पडिबंधं निद्दोसं चोइया बिंति ॥ ११८९ ॥

नित्यवासेन विहारस्तं, नित्यवासकल्पमित्यर्थः, चैत्यभक्तिं, चशब्दात् कुलकार्यादिपरिग्रहः, आर्यिकाभ्यो लाभस्तं,
क्षीराद्या विगतयस्तासु प्रतिबन्धं निर्दोषं नोदिता अन्येनोद्यतविहारिणा ब्रुवते ॥ ११८९ ॥ कथमित्याह—

जाहेवि य परितंता गामागरनगरपट्टणमडंता । तो केइ नीयवासी संगमथेरं ववइसंति ॥ ११९० ॥

परिश्रान्ताः केऽपि नित्यवासिनः संगमस्थविरमाचार्यं व्यपदिशन्ति आलम्बनतया ॥ ११९० ॥ कथं—

संगमथेरायरिओ सुट्ठु तवस्सी तहेव गीयत्थो । पेहित्ता गुणदोसं नीयावासे पवत्तो उ ॥ ११९१ ॥

ओमे सीसपवासं अप्पडिबंधं अजंगमत्तं च । न गणंति एगखित्ते गणंति वासं निययवासी ॥ ११९२ ॥

'ओमे' दुर्भिक्षे 'शिष्यप्रवासं' शिष्यगमनं, तथा तस्यैवाप्रतिबन्धं 'अजङ्गमत्वं च' वृद्धत्वं, चशब्दात्तत्रैव क्षेत्रे विभागभजनं च, नित्यवासिनः ॥ ११९२ ॥ चैत्यद्वारमाह—

चेइयकुलगणसंघे अन्नं वा किंचि काउ निस्साणं । अहवावि अज्जवयरं तो सेवंती अकरणिज्जं ॥११९३॥

कृत्वा निश्रां—आलम्बनं, मा भूच्चैत्यादिव्यवच्छेदोऽतोऽस्माभिरसंयमोऽङ्गीकृतः, आर्यवैरं कृत्वा निश्रां ॥ ११९३ ॥

चेइयपूया किं वयरसामिणा मुणियपुव्वसारेणं । न कया पुरियाइ ? तओ मुक्खंगं सावि साहूणं ॥११९४॥

वैरस्वामिनमालम्बनं कुर्वाणा इदं नेक्षन्ते—

ओहावणं परेसिं सतित्थउब्भावणं च वच्छल्लं । न गणंति गणेमाणा पुव्वुच्चियपुप्फमहिमं च ॥ ११९५ ॥

अपभ्राजनं परेषां—शाक्यादीनां स्वतीर्थोद्भावनं च दिव्यपूजाकरणेन तथा 'वात्सल्यं' श्रावकाणां, एतन्न गणयन्ति

आलम्बनानि गणयन्तः, तथा पूर्वाविचितैः-प्राग्गृहीतैः पुष्पैर्महिमा-यात्रा तां च न गणयन्ति ॥ ११९५ ॥

अज्जियलाभे गिद्धा सएण लाभेण जे असंतुट्ठा । भिक्खायरियाभग्गा अन्नियपुत्तं ववइसंति ॥ ११९६ ॥

कथं—

अन्नियपुत्तायरिओ भत्तं पाणं च पुप्फचूलाए । उवणीयं भुंजंतो तेणेव भवेण अंतगडो ॥ ११९७ ॥

गयसीसगणं ओमे भिक्खायरियाअपच्चलं थेरं । न गणंति सहावि सढा अज्जियलाहं गवेसंता ॥११९८॥

गतः शिष्यगणोऽस्य तं, सहाः-समर्था अपि शठाः ॥ ११९८ ॥ विगतिद्वारमाह—

भत्तं वा पाणं वा भुत्तूणं लावलवियमविसुद्धं । तो अवज्जपडिच्छन्ना उदायणरिसिं ववइसंति ॥ ११९९ ॥

'लावलवियं'ति लौल्योपेतं, अविशुद्धं विगतिसम्पर्कदोषात्, ततः केनापि नोदिताः सन्तोऽवद्यप्रतिच्छन्ना उदायनर्षिं व्यपदिशन्ति, वीतभये उदायननृपो जामेयदत्तराज्यः प्रव्रजितो रोगोत्पत्तौ वैद्योक्तः दध्ना आत्मानं यापयन् अमात्यपरावर्त्तितमतिजामेयेन तत्राऽऽगतो विषमिश्रदध्ना देवतायां प्रमत्तायां मारितः सिद्धः, ऋषिघातरुष्टया देवतया तत्र पांशुवृष्टिं कृत्वा सेनापल्यां शय्यातरः कुम्भकारो राजा चक्रे, ततः कुम्भकारपुरं जातं ॥ ११९९ ॥

सीयललुक्खाऽणुचियं वएसु विगईगएण जावितं । हट्ठावि भणंति सढा किमासि उदायणो न मुणी? १२००

शीतलरुक्षमन्नमिति गम्यते, तस्यानुचितः, राजप्रव्रजितत्वात् रोगाभिभूतत्वाच्च, तं 'व्रजेषु' गोकुलेषु विगतिगतेन

यापयन्तं, समर्था अपि भणन्ति शठाः—[किं] उदायनो न मुनिः ?, मुनिरेव विगतिभोगे सत्यपि ॥ १२०० ॥ अन्ये सूत्रादीन्येवालम्बनानि कृत्वा सीदन्ति—

सुत्तत्थबालवुड्ढे य असहुदव्वाइआवईओ या । निस्साणपयं काउं संथरमाणावि सीयंति ॥ १२०१ ॥

सूत्रं निश्रापदं कृत्वा यथा अहं पठामि किं ममान्येन ?, एवं बालत्वं वृद्धत्वं असहत्वं, एवं द्रव्यापदं–दुर्लभमिदं द्रव्यं, तथा क्षेत्रापदं–क्षुल्लकमिदं क्षेत्रं, कालापदं–दुर्भिक्षं वर्त्तते, भावापदं–ग्लानोऽहमित्यादि निश्राणां पदं कृत्वा संस्तरन्तोऽपि सीदन्ति ॥ १२०१ ॥

आलंबणाण लोगो भरिओ जीवस्स अजउकामस्स । जं जं पिच्छइ लोए तं तं आलंबणं कुणइ ॥१२०२॥

अयतितुकामस्य ॥ १२०२ ॥

जे जत्थ जया जइया बहुस्सुया चरणकरणपब्भट्ठा । जं ते समायरंती आलंबण मंदसड्ढाणं ॥१२०३॥

चरणकरणप्रभ्रष्टाः सन्तो यत्ते समाचरन्ति पार्श्वस्थादिरूपं तदालम्बनं मन्दश्रद्धानां स्यात् ॥ १२०३ ॥

जे जत्थ जया जइया बहुस्सुया चरणकरणसंपन्ना । जं ते समायरंती आलंबण तिव्वसड्ढाणं ॥१२०४॥

यत्ते समाचरन्ति भिक्षुप्रतिमादि ॥ १२०४ ॥ तस्मात् स्थितमिदं–पश्वानां कृतिकर्म न कर्त्तव्यं, निगमयन्नाह—

दंसणनाणचरित्ते तवविणए निच्चकालपासत्था । एए अवंदणिज्जा जे जसघाई पवयणस्स ॥१२०५॥

दर्शनज्ञानचारित्राणां तपोविनययोः सर्वकालपार्श्वस्थाः, नित्यकालग्रहणमित्वरप्रमादव्यवच्छेदार्थम् ॥ १२०५ ॥
एतद्वन्दनेऽपायानाह—

किइकम्मं च पसंसा सुहसीलजणम्मि कम्मबंधाय। जे जे पमायठाणा ते ते उववूहिया हुंति ॥१२०६॥

कृतिकर्म प्रशंसा च, 'सुखशीलजने' पार्श्वस्थजने कर्मबन्धाय, यतस्ते पूज्या एव वयमिति निरपेक्षतराः स्युः, तानि तान्युपबृंहितानि स्युः, तत्प्रत्ययश्च बन्धः ॥ १२०६ ॥

दंसणनाणचरित्ते तवविणए निच्चकालमुज्जुत्ता। एए उ वंदणिज्जा जे जसकारी पवयणस्स ॥ १२०७ ॥

किइकम्मं च पसंसा संविग्गजणंमि निज्जरट्ठाए। जे जे विरईठाणा ते ते उववूहिया हुंति ॥ १२०८ ॥

व्याख्याता पञ्चानां कृतिकर्मेत्यादिद्वारगाथा, अथ वन्दनीयान् आचार्यादिभेदत आह—

आयरिय उवज्झाए पवत्ति थेरे तहेव रायणिए। एएसिं किइकम्मं कायव्वं निज्जरट्ठाए ॥ १२०९ ॥

आचार्यः सूत्रार्थोभयवेत्ता, यथोचितं साधून् प्रवर्त्तयतीति प्रवर्त्तकः, सीदमानान् साधून् मोक्षमार्गे एव स्थिरीकरोति स्थविरः, गणावच्छेदकोऽत्रानुपात्तोऽपि ज्ञेयः, एषामूनपर्यायाणामपि कृतिकर्म कर्त्तव्यं । 'सुत्तत्थविऊ लक्खणजुत्तो गच्छस्स मेढिभूओ य। गणतत्तिविप्पमुक्को अत्थं भासेइ आयरिओ ॥ १ ॥' गणतप्त्या—गच्छचिन्तया विप्रमुक्तः, न तु सूत्रं, यतः— 'एकग्गया य झाणे वुड्ढी तित्थयरअणुकिती गरुआ। आणाहिज्जमिइ गुरू कयरिणमुक्खा न वाएइ ॥ २ ॥' ध्याने सूक्ष्मार्थरूपे

योग्या-
योग्य-
वन्दने
गुणदोषाः
के वन्द्याश्च
नि० गा०
१२०६-
१२०९

एकाग्रता सूत्रार्थोन्मीलनाद्बुद्धिरुपजायते, तीर्थकरानुकृतिर्यतस्तेऽपि सूत्रं न भाषन्ते गणतप्तिं च न कुर्वन्ति, तीर्थकृतामेवाज्ञा-पालनमाज्ञास्थैर्यमिति यदाचार्यैरर्थ एव भाषणीयः, कृतऋणमोक्षश्च तेन पूर्वमनेके साधवः सूत्रमध्यापिताः ॥ २ ॥ 'सम्मत्त-णाणसंजमजुत्तो सुत्तत्थतदुभयविहिन्नू । आयरियठाणजुग्गो सुत्तं वाए उवज्झाओ ॥ ३ ॥' किं निमित्तं ?–'सुत्तत्थेसु थिरत्तं रिणमुक्खो आयतीयऽपडिबंधो । पाडिच्छामोहजओ सुत्तं वाए उवज्झाओ ॥ ४ ॥' आयत्यामाचार्यपदाभ्यासेऽप्रतिबन्धो-ऽत्यन्ताभ्यस्ततया सूत्रस्यानुवर्त्तनं स्यात्, 'पाडिच्छ'त्ति प्रतीच्छकाः सूत्रवाचनादानेनानुगृहीताः स्युः, मोहजयश्च कृतः स्यात् ॥ ४ ॥ 'तवसंजमजोगेसुं जो जोगो तत्थ तं पवत्तेइ । असहुं च नियत्तेई गणतत्तिल्लो पवत्ती उ ॥ ५ ॥ थिरकरणा पुण थेरो पवत्तिवावारिएसु अत्थेसुं । जो जत्थ सीयइ जई संतबलो तं थिरं कुणइ ॥ ६ ॥ उद्धावणापहावणखित्तोवधिमग्गणासु अविसाई । सुत्तत्थतदुभयविऊ गणवच्छो एरिसो होइ ॥ ७ ॥' गच्छकार्ये उत्पन्ने उत्प्राबल्येन धावनं उद्धावनं आत्मानुग्रह-बुद्ध्या तत्करणे प्रवृत्तिः, शीघ्रं च तस्य कार्यस्य निष्पादनं–प्रधावनं ॥ ७ ॥ १२०९ ॥ गतं कस्येति द्वारं, अथ केनेति द्वारे केन कृतिकर्म कार्यं ?, केन न ?, तत्र मातापित्रादिरनुचित इत्याह—

मायरं पियरं वावि जिट्ठगं वावि भायरं । किइकम्मं न कारिज्जा सव्वे राइणिए तहा ॥ १२१० ॥

अपिशब्दान्मातामहादिग्रहः, सर्वान् रत्नाधिकान् पर्यायज्येष्ठान्, आलोचनप्रत्याख्यानसूत्रार्थेषु तु कारयेत्, सागारिका-ध्यक्षं तु यतनया कारयेत्, एष प्रव्रजितानां विधिः, गृहस्थांस्तु कारयेत् ॥ १२१० ॥ उचितमाह—'विअडणपच्चक्खाणे सुयंमि रायणियावि हु करंति । मज्झिल्ले न करंती सो चेव करेइ तेसिं तु ॥ १ ॥' [बृहत्कल्प गा. ४५००]

पंचमहव्वयजुत्तो अणलस माणपरिवज्जियमईओ । संविग्गनिज्जरट्ठी किइकम्मकरो हवइ साहू ॥१२११॥

'अणलस 'त्ति आलस्यरहितः, मानपरिवर्जितमतिः ॥ १२११ ॥ गतं केनेति, कदा कृतिकर्म कर्त्तव्यं कदा न ?, तत्र–

वक्खित्तपराहुत्ते अ पमत्ते मा कया हु वंदिज्जा । आहारं च करिंतो नीहारं वा जइ करेइ ॥ १२१२॥

व्याक्षिप्तं धर्मकथादिना, पराङ्मुखं, प्रमत्तं क्रोधादिप्रमादेन ॥ १२१२ ॥ कदा तर्हि वन्देतेत्याह—

पसंते आसणत्थे य, उवसंते उवट्ठिए । अणुन्नवित्तु मेहावी किइकम्मं पउंजए ॥ १२१३ ॥

'प्रशान्तं' व्याक्षेपरहितं, 'आसनस्थं' निषद्यागतं, उपशान्तं-क्रोधादिरहितं, 'उपस्थितं' छन्देनेत्यभिधानेन प्रत्युद्यतं, एवम्भूतं सन्तमनुज्ञाप्य ॥१२१३॥ कतिकृत्वोद्वारे प्रत्यहं नियतान्यनियतानि च वन्दनानि स्युरित्युभयस्थानान्याह–

पडिक्कमणे सज्झाए काउस्सग्गावराहपाहुणए । आलोयणसंवरणे उत्तमट्ठे य वंदणयं ॥ १२१४ ॥

प्रतिक्रमणे सामान्यतो वन्दनं स्यात्, तथा 'स्वाध्याये' वाचनादिलक्षणे, 'कायोत्सर्गे' यो विगतिपरिभोगायाऽऽचाम्लविसर्जनार्थं क्रियते, 'अपराधे' गुरुविनयलङ्घनरूपे, यतस्तं वन्दित्वा क्षामयति, पाक्षिकवन्दनान्यपराधे पतन्ति, 'प्राघूर्णके' ज्येष्ठे समागते, तथाऽऽलोचनायां विहारापराधभेदभिन्नायां, 'संवरणं' भुक्तेः प्रत्याख्यानं, अथवाऽभक्तार्थं गृह्णतः संवरणं तस्मिन्, 'उत्तमार्थे वा' अनशनसंलेखनायां वन्दनं ॥ १२१४ ॥ इत्थं सामान्येन नियतानियतस्थानानि वन्दनान्युक्तानि, अथ नियतस्थानवन्दनसङ्ख्यामाह—

कदा कतिकृत्वः वन्दनं कार्यम्
नि. गा० १२११-१४

चत्तारि पडिक्कमणे किइकम्मा तिन्नि हुंति सज्झाए। पुव्वण्हे अवरण्हे किइकम्मा चउदस हवंति॥१२१५

चत्वारि प्रतिक्रमणे, त्रीणि भवन्ति स्वाध्याये, प्रातिक्रमणिकानि चत्वारि प्रसिद्धान्येव, सज्झाए [पुण] वंदित्ता पट्ठवेइ पढमं, पट्ठविए पवेदयंतस्स बिइअं, पच्छा उद्दिट्ठं समुद्दिट्ठं पढइ, उद्देससमुद्देसवंदणाणमिहेवंऽतब्भावो, तओ कालवेलाए वंदिउं पडिक्कमइ, एयं तइअं। एवं पूर्वाह्णे सप्त, अपराह्णे अपि सप्तैव, अनुज्ञावन्दनानां स्वाध्यायवन्दनेष्वेवान्तर्भावात्। एतानि ध्रुवाणि प्रत्यहं चतुर्दश भवन्ति अभक्तार्थिकस्य, इतरस्य [तु] प्रत्याख्यानवन्दनेनाधिकानि स्युः ॥ १२१५ ॥ कत्यवनतमित्याद्यद्वारार्थमाह—

दोओणयं अहाजायं किइकम्मं बारसावयं। चउसिरं तिगुत्तं च दुपवेसं एगनिक्खमणं ॥ १२१६ ॥

द्वे अवनते यस्मिन् तद् द्व्यवनतं, यदा प्रथममेव 'इच्छामि खमासमणो! वंदिउं जावणिज्जाए निसीहिआए'त्ति उक्त्वा छन्दोऽनुज्ञापनायावनमति, द्वितीयमपि तथैव, यथाजातं रजोहरण [मुखवस्त्रिका]चोलपट्टकमात्रया श्रमणो जातः, रचितकरपुटस्तु योन्या निर्गतः, एवम्भूत एव वन्दते, तदव्यतिरेकाच्च यथाजातं, द्वादश आवर्त्ताः—सूत्राभिधानगर्भाः कायव्यापारविशेषा यस्मिन् तत्तथा, प्रथमप्रविष्टस्य षट्, पुनः प्रविष्टस्यापि षट्, एतच्चापान्तरालद्वारद्वयमाद्यद्वारोपलक्षितं ज्ञेयं। 'कतिशिर'इत्याह 'चउसिर'मित्यादि, चतुःशिरः, प्रथमप्रविष्टस्य क्षामणाकाले शिष्याचार्यशिरोद्वयं, निष्क्रम्य प्रविष्टस्य तथैव, अत्र द्वारत्रयं कतिशिरोद्वारेणोपलक्षितं ज्ञेयं ॥ १२१६ ॥ कतिभिर्वाऽऽवश्यकैः परिशुद्धमित्याह—

कति कृतिकर्माणि वन्दने आवर्त्ताश्च नि० गा० १२१५-१६

अवणामा दुन्नऽहाजायं, आवत्ता बारसेव उ। सीसा चत्तारि गुत्तीओ, तिन्नि दो य पवेसणा ॥१२१७॥
एगनिक्खमणं चेव, पणवीसं वियाहिया। आवस्सगेहिं परिसुद्धं, किइकम्मं जेहि कीरई ॥ १२१८ ॥

एभिरावश्यकैः परिशुद्धं कार्यं ॥ १२१७-१२१८ ॥

किइकम्मंपि करिंतो न होइ किइकम्मनिज्जराभागी। पणवीसामन्नयरं साहू ठाणं विराहिंतो ॥१२१९॥

पञ्चविंशतेरावश्यकानां ॥ १२१९ ॥

पणवीसा[आवस्सग]परिसुद्धं किइकम्मं जो पउंजइ गुरूणं। सो पावइ निव्वाणं अचिरेण विमाणवासं वा ॥

पञ्चविंशत्यावश्यकशुद्धं ॥ १२२० ॥ कतिदोषविप्रमुक्तमित्याह—

अणाढियं च थद्धं च पविद्धं परिपिंडियं। टोलगइ अंकुसं चेव तहा कच्छभरिंगियं ॥ १२२१ ॥

अनादृतमनादरं सम्भ्रमरहितं वन्दते १, 'स्तब्धं' जात्यादिस्तब्धो वन्दते २, 'प्रविद्धं' वन्दनं ददेव नश्यति ३, 'परिपिण्डितं' प्रभूतानेकवन्दनेन वन्दते, आवर्त्तान् व्यञ्जनाभिलापान् वा व्यवच्छिन्नान् कुर्वन् ४, 'टोलगति' तिड्डवत् उत्प्लुत्य २ विसंस्थूलं वन्दते ५, 'अङ्कुशं' रजोहरणमङ्कुशवत् करद्वयेन गृहीत्वा वन्दते ६, 'कच्छभरिंगिअं'ति कच्छपवत् रिङ्गन्वन्दते ॥ १२२१ ॥

मच्छुवत्तं मणसा पउट्ठं तह य वेइयाबद्धं । भयसा चेव भयंतं, मित्ती गारवकारणा ॥ १२२२ ॥

'मत्स्योद्वृत्तं' एकं वन्दित्वा मत्स्यवत् द्रुतं द्वितीयं साधुं द्वितीयपार्श्वे रेचकावर्त्तेन परावर्त्तते ८, मनसा प्रदुष्टं, वन्द्यो हीनः कैनचिद्गुणेन, तमेव च मनसि कृत्वा साभ्यूयो वन्दते ९, वेदिकाबद्धं जानुनोरुपरि हस्तौ निवेश्याऽधो वा पार्श्वयोर्वा उत्सङ्गे वा एकं वा जानुं करद्वयान्तः कृत्वा वन्दते १०, 'भयसा चेव'त्ति भयेन वन्दते मा गच्छादिभ्यो निर्द्धाटयिष्यति ११, 'भयंतं'ति भजमानं वन्दते, 'भजत्ययं मामतो भक्तं भजस्वेति तदार्यवृत्तं' १२, 'मित्ती'त्ति मैत्रीनिमित्तं १३, 'गारवे'ति गौरवनिमित्तं, विदन्तु मां यथा सामाचारीकुशलोऽयं १४, 'कारण'त्ति ज्ञानादिव्यतिरिक्तं कारणमाश्रित्य वन्दते, वस्त्रादि मे दास्यतीत्यादि १५ ॥ १२२२ ॥

तेणियं पडिणियं चेव रुट्ठं तज्जियमेव य । सढं च हीलियं चेव तहा विपलिउंचियं ॥ १२२३ ॥

स्तैन्यं परेभ्य आत्मानं गूहयन् स्तेन इव वन्दते, मा मे लाघवं भविष्यति १६, 'प्रत्यनीकं' आहारादिकाले वन्दते १७, क्रोधोध्मातो वन्दते क्रोधाध्मातं वा १८, 'तर्जितं' न कुप्यसि नापि प्रसीदसि काष्ठशिव इवेत्यादि तर्जयन्नङ्गुल्यादिभिर्वा तर्जयन् वन्दते १९, 'शठं' शाठ्येन विश्रम्भार्थं वन्दते, ग्लानादिव्यपदेशं वा कृत्वा न सम्यग्वन्दते २०, 'हीलितं' हे गणिन्! वाचक! किं भवता वन्दितेनेत्यादि हीलयित्वा वन्दते २१, विपलिकुञ्चितमर्द्धवन्दित एव देशादिकथाः करोति २२ ॥ १२२३ ॥

वन्दने दोषाः नि० गा० १२२२-२३

दिट्ठमदिट्ठं च तहा सिंगं च करमोअणं। आलिट्ठमणालिट्ठं, ऊणं उत्तरचूलियं ॥ १२२४ ॥

दृष्टादृष्टं तमसि व्यवहितो वा न वन्दते, दृष्टस्तु वन्दते २३, शृङ्गमुत्तमाङ्गैकदेशेन वन्दते २४, करं मन्यमानो वन्दते न निर्जरार्थं २५, मोचनं नान्यथा मोक्षः, एतेन पुनर्दत्तेन मोक्ष इति वन्दते २६, 'आश्लिष्टानाश्लिष्टं' अत्र चतुर्भङ्गी रजोहरणं कराभ्यामाश्लिषति शिरश्च एष शुद्धः, रजोहरणं न शिरः २, शिरो न रजोहरणं ३, उभयमपि न ४, शेषेषु त्रिषु प्रकृतवन्दनावतारः २७, 'ऊनं' व्यञ्जनाभिलापावश्यकैरसम्पूर्णं वन्दते २८, 'उत्तरचूडं' वन्दित्वा पश्चान्महता शब्देन मस्तकेन वन्दे इति भणति ॥ १२२४ ॥

मूयं च ढड्डरं चेव चुडुलिं च अपच्छिमं। बत्तीसदोसपरिसुद्धं किइकम्मं पउंजई ॥ १२२५ ॥

'मूकं' आलापकाननुच्चारयन् वदन्ते ३०, 'ढड्डरं' महता शब्देनोच्चारयन् वन्दते ३१, 'चुडुलि'त्ति उल्मुक इव पर्यन्ते गृहीत्वा रजोहरणं भ्रमयन् वन्दते, अपश्चिममिदमित्यर्थः ३२, ॥ १२२५ ॥ आयकरणमित्याद्या एकोनविंशतिगाथाः प्रक्षिप्ताः—'आयरकरणं आढा तव्विवरीयं अणाढियं होइ। दव्वे भावे थद्धो चउभंगो दव्वओ भइओ ॥१॥ पविद्धमणुवयारं जं अप्पिंतो णिजंतिओ होइ। जत्थ व तत्थ व उज्झइ कियकिच्चोवक्खरं चेव ॥ २॥ संपिंडियं व वंदइ परपिंडियवयणकरणओ वावि। टोलोव्व उप्फिडंतो ओसक्कहिसक्कणे कुणइ ॥ ३ ॥ उवगरणे हत्थंमि व घेत्तु निवेसेइ अंकुसं बिंति। ठिउवट्टरिंगणं जं तं कच्छवरिंगियं जाण ॥ ४ ॥ उट्ठिंतो निवेसिंतो उव्वत्तइ मच्छउव्व जलमज्झे। वंदिउकामो वऽन्नं झसो व परियत्तए तुरियं

॥ ५ ॥ अप्पपरपत्तिएणं मणप्पओसो य वेइयापणगं । तं पुण जाणूवरि जाणुहिट्ठाओ जाणुबाहिं वा ॥ ६ ॥ कुणइ करे जाणुं वा एगयरं ठवइ करजुयलमज्झे । उच्छंगे करइ करे मयं तु निज्जूहणाईयं ॥ ७ ॥ भयइ व भयइस्सइत्ति य इअ वंदइ ण्होरयं निवेसंतो । एमेव य मित्तीए गारवसिक्खावणीओऽहं ॥ ८ ॥ नाणाइतिगं मोत्तुं कारणमिहलोयसाहयं होइ । पूया-गारवहेऊं नाणग्गहणेवि एमेव ॥ ९ ॥ हाउं परस्स दिट्ठिं वंदंते तेणियं हवइ एयं । तेणो विव अप्पाणं गूहइ ओभावणा मा मे ॥ १० ॥ आहारस्स उ काले नीहारस्सावि होइ पडिणीयं । रोसेण धमधमंतो जं वंदइ रुट्ठमेयं तु ॥ ११ ॥ नवि कुप्पसि न पसीयसि कट्ठसिवो चेव तज्जियं एयं । सीसंगुलिमाईहिं य तज्जेइ गुरुं पणिवयंतो ॥ १२ ॥ वीसंभट्ठाणमिणं सब्भावजढे सढं भवइ एयं । कवडंति कइयवंति य सढयावि य हुंति एगट्ठा ॥ १३ ॥ गणिवायगजिट्ठज्जत्ति हीलिउं किं तुमे पणमिऊण ? । दरवंदियंमिवि कहं करेइ पलिउंचियं एयं ॥ १४ ॥ अंतरिओ तमसे वा न वंदई वंदई उ दीसंतो । एवं दिट्ठमदिट्ठं लिंगं पुण मुद्धपासेहिं ॥ १५ ॥ करमिव मन्नइ दिंतो वंदणयं आरहंतिय करोत्ति । लोइयकराउ मुक्का न मुच्चिमो वंदणकरस्स ॥ १६ ॥ आलिद्धमणालिद्धं रयहरणसिरेहिं होइ चउभंगो । वयणकरेहिं ऊणं जहन्नकालेवि सेसेहिं ॥ १७ ॥ दाऊण वंदणं मत्थएण वंदामि चूलिया एसा । मूयव्व सद्दरहिओ जं वंदइ मूयगं तं तु ॥ १८ ॥ ढड्ढरसरेण जो पुण सुत्तं घोसेइ ढड्ढरं तमिह । चूडलिं व गिण्हिऊणं रयहरणं होइ चूडलिं तु ॥ १९ ॥ '' ' अप्पितो ' त्ति यद्वन्दनं ददानोऽनियन्त्रितः स्यात् , झष इव मत्स्यवत् , ' भयइ ' भजति भजिष्यतीति वा, ' ण्होरयं ' मौल्यभावं चिन्तयन् , ' पच्छपणइस्स ' त्ति पश्चाद्याचिष्ये ॥ ११२५ ॥

किइकम्मंपि करिंतो न होइ किइकम्मनिज्जराभागी । बत्तीसामन्नयरं साहू ठाणं विराहिंतो ॥ ११२६ ॥

द्वात्रिंशद्दोषाणामन्यतरत् ॥ १२२६ ॥

बत्तीसदोसपरिसुद्धं किइकम्मं जो पउंजइ गुरूणं । सो पावइ निव्वाणं अचिरेण विमाणवासं वा ॥१२२७॥

आवस्सएसु जह जह कुणइ पयत्तं अहीणमइरत्तं । तिविहकरणोवउत्तो तह तह से निज्जरा होइ ॥१२२८॥

'आवश्यकेषु' अवनतादिषु दोषत्यागलक्षणेषु च यथा यथा करोति प्रयत्नं ॥ १२२८ ॥ किमिति क्रियते इति द्वारे वन्दनकरणकारणान्याह—

विणओवयार माणस्स भंजणा पूअणा गुरुजणस्स । तित्थयराण य आणा सुयधम्माराहणाऽकिरिया१२२९

विनय एवोपचारो विनयोपचारः कृतः स्यात्, स एव किमर्थं ? मानस्य भञ्जना—विनाशस्तदर्थः, मानभञ्जेन च पूजना गुरुजनस्य कृता स्यात्, तीर्थकराणां चाज्ञानुपालिता स्यात्, तथा श्रुतधर्माराधना कृता स्यात्, 'अकिरिय'त्ति पारम्पर्येणाक्रिया स्याद्यतोऽक्रियः सिद्धः ॥ १२२९ ॥

विणओ सासणे मूलं विणीओ संजओ भवे । विणयाउ विप्पमुक्कस्स, कओ धम्मो कओ तवो ? ॥१२३०॥

शासने विनयो मूलमतो विनीतः संयतो भवेत् ॥ १२३० ॥ अतो विनयोपचारार्थं कृतिकर्म क्रियते इति स्थितं, आह— विनय इति कः शब्दार्थः ?, उच्यते—

जम्हा विणयइ कम्मं अट्ठविहं चाउरंतमुक्खाए । तम्हा उ वयंति विऊ विणउत्ति विलीनसंसारा ।१२३१।

वन्दनफलं
वन्दन-
कारणानि
च
नि० गा०
१२२७-
१२३१

यस्माद्विनयति-विनाशयति कर्म, चतुरन्तमोक्षाय-संसारविनाशायेति विद्वांसो वदन्ति ॥ १२३१ ॥ व्याख्याता द्वारगाथा, अत्रान्तरेऽध्ययनशब्दार्थो वाच्यः पूर्ववत् , गतो नामनिष्पन्नो निक्षेपः, सूत्रालापकनिष्पन्ननिक्षेपे सूत्रं—

' इच्छामि खमासमणो ! वंदिउं जावणिज्जाए निसीहियाए अणुजाणह मे मिउग्गहं निसीहि, अहोकायं कायसंफासं, खमणिज्जो भे किलामो, अप्पाकिलंताणं बहुसुभेण भे दिवसो वइक्कंतो ?, जत्ता भे ? जवणिज्जं च भे ? खामेमि खमासमणो ! देवसियं वइक्कमं, आवस्सियाए पडिक्कमामि खमासमणाणं देवसिआए आसायणाए तित्तीसण्णयराए जंकिंचि मिच्छाए मणदुक्कडाए वयदुक्कडाए कायदुक्कडाए कोहाए माणाए मायाए लोभाए सव्वकालियाए सव्वमिच्छोवयाराए सव्वधम्माइक्कमणाए आसायणाए जो मे अइयारो कओ तस्स खमासमणो ! पडिक्कमामि निन्दामि गरिहामि अप्पाणं वोसिरामि ॥ (सूत्रम्)

सूत्रस्पर्शिकां गाथामाह—

इच्छा य अणुन्नवणा अव्वाबाहं च जत्त जवणा य । अवराहखामणावि य छट्ठाणा हुंति वंदणए ॥ १२३२ ॥

तत्रेच्छामाह—

वन्दनक-सूत्रम् वन्दनके षट् स्थानानि नि० गा० १२३२

णामं ठवणादविए खित्ते काले तहेव भावे य । एसो खलु इच्छाए णिक्खेवो छविहो होइ ॥ १२३३ ॥

द्रव्येच्छा सचित्तादिद्रव्याभिलाषः, अनुपयुक्तस्य वेच्छामीत्येवं भणतः, क्षेत्रेच्छा मगधादिक्षेत्राभिलाषः, कालेच्छा रजन्यादिकालाभिलाषः, भावेच्छा द्विधा—प्रशस्ता ज्ञानाद्यभिलाषः, अप्रशस्ता स्त्र्याद्यभिलाषः । अत्र विनेयभावेच्छयाधिकारः, क्षमादीनां तु पदानां यथासम्भवं निक्षेपादि वक्तव्यं, विस्तरभयादत्र नोक्तं ॥ १२३३ ॥

नामं ठवणा दविए खित्ते काले तहेव भावे य । एसो उ अणुण्णाए णिक्खेवो छविहो होइ ॥१२३४॥

द्रव्यानुज्ञा लौकिकी लोकोत्तरा कुप्रावचनिकी च, [लौकिकी] सचित्तादिद्रव्यभेदात्रिधा, अश्वभूषितयुवतिवैडूर्याद्यनुज्ञा, लोकोत्तरा—केवलशिष्यसोपकरणशिष्यवस्त्राद्यनुज्ञा, एवं कुप्रावचनिक्यपि, एवं क्षेत्रकालानुज्ञे विज्ञेये (क्षेत्रानुज्ञा या यस्य यावतः क्षेत्रस्य यत्र वा क्षेत्रे व्याख्यायते क्रियते वा, एवं कालानुज्ञापि), भावानुज्ञा आचाराद्यनुज्ञा, भावानुज्ञयाऽधिकारः ॥ १२३४ ॥ अत्रान्तरे गाथायामनुपात्तस्याप्यवग्रहस्य निक्षेपः—

णामं ठवणा दविए खित्ते काले तहेव भावे य । एसो उ उग्गहस्सा णिक्खेवो छविहो होइ ॥१२३५॥

सचित्तादिद्रव्यावग्रहणं द्रव्यावग्रहः, क्षेत्रावग्रहो यो यत्क्षेत्रमवगृह्णाति, तत्र च समन्ततः सक्रोशं योजनं, कालावग्रहो यो यं कालमवगृह्णाति, वर्षासु चत्वारो मासान्, ऋतुबद्धे मासं, भावावग्रहो ज्ञानाद्यवग्रहः प्रशस्तः [इतरस्तु क्रोधाद्यवग्रहः] अथवा अवग्रहः पञ्चधा—' देविंदरायगिहवइ सागरिसाधम्मिउग्गहो तह य । पंचविहो पण्णत्तो अवग्गहो वीयरागेहिं ॥ १ ॥ '

अत्र भावावग्रहेण साधर्मिकावग्रहेण चाधिकारः—' आयप्पमाणमित्तो चउदिसिं होइ उग्गहो गुरुणो । अणणुण्णातस्स सया ण कप्पए तत्थ पइसरिउं ॥ २ ॥ ' ततश्च तमनुज्ञाप्य प्रविशतीत्याह—

बाहिरखित्तंमि ठिओ अणुन्नवित्ता मिउग्गहं फासे । उग्गहखेत्तं पविसे जाव सिरेणं फुसइ पाए ॥१२३६॥

बहिःक्षेत्रे स्थितोऽनुज्ञाप्य मितावग्रहं स्पृशेत् रजोहरणेन, ततश्चावग्रहक्षेत्रं प्रविशेत् , यावत् [शिरसा] स्पृशेत्पादान् ॥ १२३६ ॥ अव्याबाधं द्रव्यतः खड्गाद्याघातव्याबाधाकारणविकलस्य, भावतः सम्यग्दृष्टेः चारित्रवतः, यात्रा द्रव्यतस्तापमादीनां स्वक्रियोत्सर्पणा, भावतः साधूनां, यापना द्रव्यत औषधादिना कायस्य, भावतस्तु इन्द्रियनोइन्द्रियोपशमेन, क्षमाणा द्रव्यतः कलुषाशयस्यैहिकापायभीरोः, भावतः संवेगापन्नस्य सम्यग्दृष्टेः, आह च—

अवाबाहं दुविहं दव्वे भावे य जत्त जवणा य । अवराहखामणावि य सवित्थरत्थं विभासिज्जा ॥१२३७॥

एवं शेषेष्वपि निक्षेपादि वक्तव्यं, इत्थं वन्दमानस्य प्रायशो विधिरुक्तः ॥ १२३७ ॥ अथ वन्द्यस्याह—

छंदेणऽणुजाणामि तहत्ति तुज्झंपि वट्टई एवं । अहमवि खामेमि तुमे वयणाइं वंदणारिहस्स ॥ १२३८ ॥

अहमपि क्षमयामि त्वां ॥ १२३८ ॥

तेणावि पडिच्छियव्वं गारवरहिएण सुद्धहियएण । किइकम्मकारगस्सा संवेगं संजणंतेणं ॥ १२३९ ॥

" तेण ' वन्दनार्हेण, एवं प्रत्येष्टव्यं ॥ १२३९ ॥ चालनामाह—

आवत्ताइसु जुगवं इह भणिओ कायवायवावारो। दुण्हेगया व किरिया जओ निसिद्धा अउ अजुत्तो ॥१२४०

आवर्त्तादिषु युगपदुक्तः कायवाग्व्यापारः, तथा च सत्येकदा क्रियाद्वयप्रसङ्गः, द्वयोरेकदा च क्रिया यतो निषिद्धा, उपयोगद्वयाभावात्, अतोऽयुक्तः स व्यापारः, ततश्च सूत्रं पठित्वा कायव्यापार कार्यः, उच्यते—

भिन्नविसयं निसिद्धं किरियादुगमेगया ण एगंमि। जोगतिगस्स वि भंगियसुत्ते किरिया जओ भणिया१२४१

विलक्षणवस्तुविषयं क्रियाद्वयं निषिद्धमेकदा, यथा—उत्प्रेक्षते सूत्रार्थं [नयादि] गोचरमटति च, अविलक्षणविषया तु योगत्रयक्रियाप्यविरुद्धा, यथोक्तं—'भंगिअसुअं गुणंतो वट्टइ तिविहेऽवि ज्झाणं('जोगं')मि'इत्यादि ॥१२४१॥ गतं प्रत्यवस्थानं—

सीसो पढमपवेसे वंदिउमावस्सिआए पडिक्कमिउं। बितियपवेसंमि पुणो वंदइ किं? चालणा अहवा॥१२४२

अथवा जानतापि मया चालना क्रियते इत्यध्याहारः ॥ १२४२ ॥ गुरुराह—

जह दूओ रायाणं णमिउं कज्जं निवेइउं पच्छा। विसज्जिओवि वंदिय गच्छइ साहूवि एमेव ॥ १२४३ ॥

इदं प्रत्यवस्थानं ॥ १२४३ ॥

एयं किइकम्मविहिं जुंजंता चरणकरणमुवउत्ता। साहू खवंति कम्मं अणेगभवसंचियमणंतं ॥१२४४॥

युञ्जानाः ॥१२४४॥ उक्तोऽनुगमः, 'नायंमि'इत्यादिनयवक्तव्यता यथा सामायिकाध्ययनेऽत्रैवोक्ता तथा अत्रापि ज्ञेया।

॥ इति वन्दनाध्ययननिर्युक्त्यवचूर्णिः ॥ ३ ॥

अथ चतुर्थं प्रतिक्रमणाध्ययनम्

नामनिष्पन्ने निक्षेपे प्रतिक्रमणाध्ययनमिति, तत्र शुभयोगेभ्योऽशुभयोगान्तरं क्रान्तस्य शुभेष्वेव प्रतीपं प्रतिकूलं वा क्रमणं प्रतिक्रमणं । यथा च (इह च यथा) करणात् कर्मकर्त्रोः सिद्धिरेवं प्रतिक्रमणादपि प्रतिक्रामकप्रतिक्रान्तव्यसिद्धिरित्यतस्त्रितयमप्याह—

पडिकमणं पडिकमओ पडिकमियव्वं च आणुपुव्वीए । तीए पच्चुप्पन्ने अणागए चेव कालंमि ॥१२४५॥

आनुपूर्व्या अतीते 'प्रत्युत्पन्ने' वर्त्तमानेऽनागते काले प्रतिक्रमणादि योज्यं, आह—प्रतिक्रमणमतीतविषयं, 'अईअं पडिक्कमामि' इतिवचनात्, कथमिह कालत्रये ?, उच्यते, प्रतिक्रमणशब्दोऽशुभयोगनिवृत्तिमात्रार्थो गृह्यते ॥ १२४५ ॥ प्रतिक्रामकस्वरूपमाह—

जीवो उ पडिक्कमओ असुहाणं पावकम्मजोगाणं । झाणपसत्थाजोगा जे ते ण पडिक्कमे साहू ॥१२४६॥

जीवः सम्यग्दृष्टिरुपयुक्तः प्रतिक्रामको अशुभानां पापकर्मयोगानां, ध्यानं च प्रशस्तयोगौ च ध्यानप्रशस्तयोगा ये तानधिकृत्य न प्रतिक्रामति साधुः, मनोयोगप्राधान्यख्यापनार्थं पृथग् ध्यानग्रहणं ॥ १२४६ ॥ प्रतिक्रमणशब्दार्थपर्यायैराह—

पडिकमणं पडियरणा परिहरणा वारणा नियत्ती य । निंदा गरिहा सोही पडिकमणं अट्ठहा होइ ।१२४७।

तच्चत उक्तं, भेदत आह—

णामं ठवणा दविए खित्ते काले तहेव भावे य । एसो पडिकमणस्सा णिक्खेवो छव्विहो होइ ॥ १२४८॥

द्रव्यप्रतिक्रमणमनुपयुक्तस्य सम्यग्दृष्टेर्लब्ध्यादिनिमित्तं वा उपयुक्तस्य वा निह्नवस्य, क्षेत्रप्रतिक्रमणं यस्मिन् क्षेत्रे व्यावर्ण्यते यतो वा प्रतिक्रम्यते खिलादेः, कालप्रतिक्रमणं यदुभयकालं प्रतिक्रम्यते, भावप्रतिक्रमणं प्रशस्तं मिथ्यात्वादेः, तेनाधिकारः ॥ १२४८ ॥ प्रति २ तेषु २ अर्थेषु चरणं-गमनं तेन २ आसेवनाप्रकारेणेति प्रतिचरणा तामाह—

णामं ठवणा दविए खित्ते काले तहेव भावे य । एसो पडियरणाए णिक्खेवो छव्विहो होइ ॥ १२४९॥

द्रव्यप्रतिचरणा अनुपयुक्तस्य सम्यग्दृष्टेस्तेषु तेष्वर्थेष्वाऽऽचरणीयेषु चरणं तेन २ प्रकारेण लब्ध्यादिनिमित्तं वा इत्यादि, क्षेत्रप्रतिचरणा यत्र क्षेत्रे सा व्याख्यायते क्रियते वा क्षेत्रस्य वा प्रतिचरणा, यथा शालिगोपिकाद्याः शालिक्षेत्रादीनि प्रतिचरन्ति, कालप्रतिचरणा यस्मिन् काले सा व्याख्यायते क्रियते वा कालस्य वा प्रतिचरणा कालप्रतिचरणा, यथा साधवः प्रादोषिकं वा प्राभातिकं वा कालं प्रतिचरन्ति, भावप्रतिचरणा सम्यग्दर्शनज्ञानचारित्रप्रतिचरणा प्रशस्ता, तया इहाधिकारः, प्रतिक्रमणपर्यायता चास्या यतः शुभयोगेषु प्रति २ (प्रतीपं) क्रमणं-प्रवर्त्तनं प्रतिक्रमणमुक्तं, प्रतिचरणाप्येवम्भूतैव ॥ १२४९ ॥ परिहरणा सर्वप्रकारैर्वर्जना, तामाह—

णामं ठवणा दविए परिरय परिहार वज्जणाए य । अणुगह भावे य तहा अट्ठविहा होइ परिहरणा॥१२५०॥

द्रव्यपरिहरणा हेयं विषयमधिकृत्य अनुपयुक्तस्य सम्यग्दृष्टेरित्यादि कण्टकादिपरिहरणा वा, परिरयपरिहरणा गिरिसरित्परिरयपरिहरणा, परिहारपरिहरणा लौकिकी मात्रादिपरिहरणा, लोकोत्तरा पार्श्वस्थादिपरिहरणा, वर्जनापरिहरणा लौकिकी इत्वरा प्रसूतसूतकादिपरिहरणा, यावत्कथिका डोम्बादिपरिहरणा, लोकोत्तरा इत्वरा शय्यातरपिण्डादिपरिहरणा, यावत्कथिका तु राजपिण्डादिपरिहरणा, अनुग्रहपरिहरणा अक्खोडभंगपरिहरणा, अक्खोडं[1] खिलं क्षेत्रं तस्य ये प्रथमं भङ्गं कुर्वन्ति तेषामनुग्रहेण राजा करं परिहरतीत्यनुग्रहपरिहरणा, भावपरिहरणा प्रशस्ता क्रोधादिपरिहरणा, तया इहाधिकारः । प्रतिक्रमणमशुभयोगपरिहरणैव ॥ १२५० ॥ वारणा–निषेधना तामाह—

णामं ठवणा दविए खित्ते काले तहेव भावे य । एसो उ वारणाए णिक्खेवो छव्विहो होइ ॥ १२५१ ॥

द्रव्यवारणा तापसादीनां हलकृष्टादिपरिभोगवारणा, अनुपयुक्तस्य सम्यग्दृष्टेर्वा देशनायामित्यादि, क्षेत्रवारणा तु यत्र क्षेत्रे वर्ण्यते क्रियते क्षेत्रस्य वाऽनार्यस्य, एवं कालवारणापि, कालस्य वा विकालादेर्वर्षासु वा विहारस्य, भाववारणा प्रशस्ता प्रमादवारणा, तयाधिकारः ॥ १२५१ ॥ निवृत्तिमाह—

नामं ठवणा दविए खित्ते काले तहेव भावे य । एसो य नियत्तीए णिक्खेवो छव्विहो होइ ॥ १२५२ ॥

द्रव्यनिवृत्तिस्तापसादीनां हलकृष्टादिनिवृत्तिरित्यादि यावत् प्रशस्तभावनिवृत्त्या इहाधिकारः ॥ १२५२ ॥ निन्दा

१ आस्फोटकाना यो भङ्गस्तस्य परिहरणा प्रतिलेखनाविधिविराधनापरिहरणेत्यर्थः ।

आत्माध्यक्षं तामाह—

णामं ठवणा दविए खित्ते काले तहेव भावे य । एसो खलु निंदाए णिक्खेवो छव्विहो होइ ॥१२५३॥

भावनिन्दा प्रशस्ता असंयमाद्याचरणविषया ॥ १२५३ ॥ गर्हा परसाक्षिकी तामाह—

नामं ठवणा दविए खित्ते काले तहेव भावे य । एसो खलु गरिहाए णिक्खेवो छव्विहो होइ ॥१२५४॥

द्रव्यगर्हा तापसादीनां स्वगुर्वालोचनादिना ॥ १२५४ ॥ शुद्धिः—विमलीकरणं तामाह—

नामं ठवणा दविए खित्ते काले तहेव भावे य । एसो खलु सुद्धीए निक्खेवो छव्विहो होइ ॥ १२५५ ॥

द्रव्यशुद्धिरनुपयुक्तस्य सम्यग्दृष्टेः वस्त्रसुवर्णादेर्वा जलक्षारादिभिः, क्षेत्रशुद्धिर्यत्र वर्ण्यते क्रियते वा क्षेत्रस्य वा कुलिकादिनाऽस्थ्यादिशल्योद्धरणं, एवं कालशुद्धिः, शङ्खादिभिर्वा कालस्य शुद्धिः क्रियते, भावशुद्धिः प्रशस्ता ज्ञानादेस्तया इहाधिकारः ॥ १२५५ ॥ अथ प्रतिक्रमणादिपदानां दृष्टान्तानाह—

अद्धाणे पासाए दुद्धकाय विसभोयणतलाए । दो कन्नाओ पइमारिया य वत्थे य अगए य ॥१२५६॥

अध्वानः १ प्रासादः २ दुग्धकायः ३ विषभोजनं तटाकं ४ द्वे कन्ये ५–६ पतिमारिका च ७ वस्त्रं चागदश्च ८ । तत्राध्वाने—नृपप्रासादार्थं दत्तसूत्रान्तर्गच्छद्ग्राम्यद्वयस्य निषिद्धस्य एको धृष्टत्वात्को दोष इति वदन् हतः, द्वितीयस्तैरेव पदैर्वलन् मुक्तः सुखी जातः, एवं द्रव्यप्रतिक्रमणं, भावे दृष्टान्तस्योपनयः—राजस्थानीयैरर्हद्भिः प्रासादस्तत्स्थानीयः संयमो रक्षणीय

निन्दा-
गर्हाशुद्धि-
निक्षेपाः
प्रतिक्रम-
णादीनां
दृष्टान्ताश्च-
नि० गा०
१२५३-
१२५६

इत्यादिष्टे ग्राम्यस्थानीयसाधुना एकेनातिक्रान्तः स दुःखभागी, यः प्रमादेनासंयमं गतः प्रतिनिवृत्तोऽकरणतया प्रतिक्रमति स शिवभागी १ । प्रतिचरणायां प्रासादेन दृष्टान्तः-कश्चिद्वणिगर्थसमृद्धः प्रासादोऽयं त्वया चिन्त्य इति भार्यायै उक्त्वा देशान्तरमगात्तया देहमण्डनादिपरया स शनैः शनैः पतितो न प्रतिचरितः, आगतेन वणिजा दृष्टा तथा सा निःसारिता यथा न दृष्टा, तेन पुनरन्यः प्रासादः कारितो .अन्या च भार्या आनीता, तया प्रतिचरितं दृष्ट्वा सा गृहस्वामिनी कृता, एसा द्रव्यप्रतिचरणा, भावे वणिक्स्थानीय आचार्यः प्रासादस्थानीयः संयम इत्यादि ज्ञेयं २ । दुग्धकायो-दुग्धघटकावडिः, एकः कुलपुत्रकस्तस्य द्वे भगिन्यौ अन्यग्रामयोर्वसतः, तस्य पुत्रीयाचनाय स्वस्रसुतकृते आयाते, तेनोचे-युवां यातं, पुत्रौ प्रेष्यतां यो दक्षस्तस्मै दास्ये सुतां, आगतौ तौ परीक्षायै गोकुले दुग्धाऽऽनयनाय प्रहितौ, तौ दुग्धघटौ भृत्वा कापोत्याऽऽदाय प्रतिनिवृत्तौ, तत्र द्वौ पन्थानौ, एकः परिहारेण समोऽपरः ऋजुर्विषमश्च, एकस्य ऋजुना प्रविष्टस्य प्रस्खल्यैकघटभङ्गे द्वितीयोऽपि भग्नः, द्वितीयस्य समेन गतस्य कन्या दत्ता, एषा द्रव्यपरिहरणा, भावे कुलपुत्रकस्थानीया अर्हन्तः, दुग्धं चारित्रं, कन्या सिद्धिः, गोकुलं मनुष्यभवः ३ । वारणायां विषभोजनतडागेन दृष्टान्तः-एको राजा परचक्रागमं ज्ञात्वा ग्रामेषु दुग्धदधिभोज्यादिषु वृक्षपुष्पफलादिषु विषयोगं कारितवान् , आगतेन राज्ञा तथा ज्ञाते घोषणया वारितं सैन्यं, ये वारिता(विरता)स्ते सुखिनोऽभूवन् , अपरे मृताः, भावे विषान्नपानसदृशा विषयाः ४ । द्वयोः कन्ययो राजसुताचित्रकरसुतयोर्मध्ये पूर्वं निवृत्तौ राजकन्यया दृष्टान्तः-एकः शालापतिस्तस्य शालायामेको धूर्त्तो मधुरस्वरेण गायति, तेन समं शालापतिपुत्री तत्सखी राजपुत्री च लग्ने द्वेऽपि यातः, पठितं केनापि—' जइ फुल्ला कणियारया चूयय ! अहिमासयंमि

घुट्टंमि । तुह न खमं फुल्लेउं जइ पच्चंता करिंति डमराइं॥ १ ॥' पुष्पिताः कुत्सितकर्णिकाराः—कार्णिकारकाः हे चूतक ! अधिकमासे घोषिते शब्दिते सति तव न क्षमं युक्तं पुष्पितुं, यदि प्रत्यनी(त्यन्त)का नीचकाः कुर्वन्ति डमरकान्यशोभनानि, ततः किं त्वयाऽपि कर्त्तव्यानि ?, नैवेत्यर्थः तत् श्रुत्वा राजपुत्री कुविन्दसुता यद्येवं करोति ततः किं मयापि कार्यमिति विमृश्य रत्नकरण्डको विस्मृत इति छद्मना वलिता तद्दिन एव सामन्तपुत्राय शरणागताय सा राज्ञा दत्ता, तेन च श्वसुरबलेन गोत्रिणो जित्वा स्वराज्यमाप्य सा पट्टराज्ञी कृता, भावे कन्यातुल्यः साधुः, धूर्त्ततुल्यो विषयासक्तः, गीततुल्याऽऽचार्येण समनुशिष्टोनिवृत्तः सुखी । यद्वा द्रव्यभावनिवृत्तौ क्वापि गच्छे एकः साधुस्तरुणो ग्रहणधारणसमर्थ इति सूरिप्रियः, सोऽन्यदाऽशुभकर्मोदयेन प्रतिगच्छन् शृणोति—'तरियव्वा य परिण्णा मरियव्वं वा समरे समत्थएणं । असरिसजणउल्लावा न हु सहियव्वा कुलपसूयएणं ॥ २ ॥' बुद्धः प्रतिनिवृत्तः ५ । निन्दायां चित्रकरसुता—केनापि राज्ञा बुद्धिमती चित्रकरसुता परिणीता तया बुद्धिप्रपञ्चेन नृपः स्वावासे षण्मासानानीतः । सपत्न्यश्छिद्राणि विलोकयन्ति, सा चापवरके प्रविश्य पुराणमणि(पुराणानि मणियुक्तानि) चीवराणि पुरः कृत्वा आत्मानं निन्दति—त्वं चित्रकरसुता एतत्ते पितृसत्कमित्यादि, सपत्नीभिर्नृपस्योक्तं—एषा तव कार्मणं करोतीति, राज्ञा दृष्टा तुष्टेन पट्टराज्ञी सा कृता, भावे साधुनाऽऽत्मा निन्दितव्यः ६ । द्रव्यगर्हायां पतिमारिका—कस्याप्यध्यापकस्य वृद्धविप्रस्य तरुणी भार्या नर्मदापरकूलवासिगोपे रता ज्ञात्वैकेन च्छात्रेणोचे—'दिवा बिभेषि काकानां (केभ्यः)रात्रौ तरति नर्मदां । कुतीर्थान्यपि जानासि जलजन्त्वक्षिरोधनं ॥ १ ॥' सा प्राह किं कुर्वे युष्मादृशा नेच्छन्ति, स उपचरितः प्राह—उपाध्यायाद्बिभेमि, सा विप्रं व्यापाद्योज्झनाय पिटके (पेटिकायां) क्षिप्त्वा अटव्यां गता व्यन्तर्या पिटकं

शिरस्येव स्तम्भितं, क्षुधाकुला तथैवागत्याह—पतिमारिकाया(यै)भिक्षा दीयतामित्यादि। बहुकाले गते साध्वीरालोक्य पादेषु पतन्त्यास्तस्याः पिटकं पतितं, व्रतिनी जाता ७। शुद्धौ वस्त्रागदौ, तत्र वस्त्रदृष्टान्तः—राजगृहे श्रेणिकेन क्षौमयुगलं रजकस्य समर्पितं, कौमुदीक्षणे तेन भार्याद्वयस्य दत्तं, कौमुद्यां च श्रेणिकाभयौ प्रच्छन्नं हिण्डन्तौ स्तः, श्रेणिकेन दृष्ट्वाऽभिज्ञाय ताम्बूलेन सिक्तं, रजकेन क्षारादिभिः शोधितं, आनायितेऽर्पितं सद्भावपृच्छायामुक्तं रजकेन, स सत्कृतः, एवं साधुना शीघ्रमाचार्यस्यालोचयितव्यं, तेनापि शुद्धिः कार्या। अगदो यथा नमस्कारे, एवं साधुनापि निन्दाऽगदेनातिचारविषमपसारयितव्यं ८ ॥१२५६॥ उक्तान्येकार्थिकानि, अथ यथा साधुना इयं शुद्धिः कार्या तथाऽऽह—

आलोवणमालुंचन वियडीकरणं च भावसोही य। आलोइयंमि आराहणा अणालोइए भयणा ॥१२५७

यथा मालाकारः स्वारामस्य द्विसन्ध्यमवलोकनं करोति, दृष्ट्वा कुसुमानामालुञ्चनं ग्रहणं करोति, ततो विकटीकरणं—विकसितमुकुलितादीनां भेदेन विभजनं, चशब्दात्पश्चाद् ग्रन्थनं, ततोऽभिलषितार्थलाभो भावशुद्धिश्च चित्तप्रसादरूपा स्यात्। एवं साधुरपि कायोत्सर्गे दैवसिकातिचारस्यावलोकनं करोति, पश्चादालुञ्चनं—स्पष्टबुद्ध्याऽपराधग्रहणं, ततो विकटीकरणं—गुरुलघ्वपराधविभजनं, तत आलोचनाप्रतिसेवनानुलोमेन ग्रन्थनं, तथा यथाक्रमं गुरोर्निवेदनं करोति, एवं कुर्वतो भावशुद्धिः स्यात्। इत्थमालोचिते आराधना, अनालोचिते 'भजना' कदाचित्स्यात्कदाचिन्न, 'आलोअणापरिणओ सम्मं संपट्ठिओ गुरुसगासं। जइ अंतरावि कालं करिज्ज आराहओ तहवि ॥१॥' कदाचिन्न 'लज्जाइ गारवेण य (इड्डीए गारवेणं)' इत्यादि॥ १२५७॥ इत्थमालोचनाप्रकारेणोभयकालं नियमत एवाद्यान्त्यार्हत्तीर्थे साधुना शुद्धिः कार्या, मध्यमार्हत्तीर्थेषु

शुद्धौ मालाकार-दृष्टान्तः नि० गा० १२५७

चातिचारवतैवेत्याह—

सपडिक्कमणो धम्मो पुरिमस्स य पच्छिमस्स य जिणस्स ।
मज्झिमयाण जिणाणं कारणजाए पडिक्कमणं ॥ १२५८ ॥

'कारणजाते' अपराध एवोत्पन्ने ॥ १२५८ ॥

जो जाहे आवन्नो साहू अन्नयरंमि ठाणंमि । सो ताहे पडिक्कमई मज्झिमयाणं जिणवराणं ॥ १२५९ ॥

यः साधुर्यदाऽऽपन्नोऽन्यतरस्मिन् स्थाने प्राणातिपातादौ स तदैव प्रतिक्रामति ॥ १२५९ ॥ आह—किमयमेव भेदः प्रतिक्रमणकृतः उतान्योऽप्यस्ति ?, अस्तीत्याह—

बावीसं तित्थयरा सामाइयसंजमं उवइसंति । छेओवट्ठावणयं पुण वयंति उसभो य वीरो य ॥ १२६० ॥

यदैव सामायिकमुच्चार्यते तदैव व्रतेषु स्थाप्यते, च्छेदोपस्थापनिकं, आद्यान्त्यार्हत्तीर्थे प्रव्रजितमात्रः सामायिकसंयतः स्यात्, षड्जीवनिकायावगमे व्रतेषु स्थाप्यते ॥ १२६० ॥ यदुक्तं—सप्रतिक्रमणो धर्मस्तत्प्रतिक्रमणं दैवसिकादिभेदेनाह—

पडिकमणं देसियं राइयं च इत्तरियमावकहियं च । पक्खियचाउम्मासिय संवच्छर उत्तिमट्ठे य ।१२६१।

'इत्वरं' स्वल्पकालिकं दैवसिकाद्येव, 'यावत्कथिकं' यावज्जीविकं व्रतादिलक्षणं, दैवसिकेनैव शोधिते सत्यात्मनि पाक्षिकादि किमर्थं ?, उच्यते—'जह गेहं पइदियहंपि सोहियं तहवि पक्खसंधीए । सोहिज्जइ सविसेसं एवं इहयंपि णायवं ॥१॥'

चतु-
र्विंशति-
तीर्थकर-
तीर्थेषु
प्रतिक्रमण-
भेदः
संयम-
भेदश्च कति
प्रतिक्रम-
णानि
नि० गा०
१२५८-
१२६१

'उत्तमार्थे च' भक्तप्रत्याख्याने प्रतिक्रमणं भवति निवृत्तिरूपत्वात्तस्य ॥ १२६१ ॥ यावत्कथिकं प्रतिक्रमणमाह—

पंच य महव्वयाइं राईछट्ठाइ चाउजामो य । भत्तपरिण्णा य तहा दुण्हंपि य आवकहियाइं ॥ १२६२ ॥

पञ्च महाव्रतानि रात्रिभोजननिवृत्तिषष्ठानि आद्यान्तिमार्हत्तीर्थे, चातुर्यामश्च निवृत्तिधर्म्म एव भक्तपरिज्ञा च, चशब्दादिङ्गिनीमरणादिग्रहः, द्वयोरप्याद्यान्तिमार्हतोः, चशब्दात् मध्यमानां च यावत्कथिकान्येतानि ॥ १२६२ ॥ इत्थं यावत्कथिकमनेकधोक्तं इत्वरमपि दैवसिकादिभेदमुक्तमेव, पुनरित्वरमाह—

उच्चारे पासवणे खेले सिंघाणए पडिक्कमणं । आभोगमणाभोगे सहस्सकारे पडिक्कमणं ॥ १२६३ ॥

'खेले' श्लेष्मणि 'सिङ्घानके' नासिकोद्भवे श्लेष्मणि व्युत्सृष्टे सति सामान्येन प्रतिक्रमणं स्यात्, अयं पुनर्विशेषः—'उच्चारं पासवणं भूमीए वोसिरित्तु उवउत्तो । वोसिरिऊण य तत्तो इरियावहियं पडिक्कमइ ॥ १ ॥ वोसिरइ मत्तगे जइ तो न पडिक्कमइ मत्तगं जो उ । साहू परिट्ठवेई णियमेण पडिक्कमे सो उ ॥ २ ॥ खेलं सिंघाणं वाऽपडिलेहिय अप्पमज्जिउं तह य । वोसिरिय पडिक्कमई तं पिय मिच्छुक्कडं देइ ॥ ३ ॥, प्रत्युपेक्षणादिविधिविवेके तु न ददाति, तथा आभोगेऽनाभोगे सहसात्कारे सति योऽतिचारस्तस्य प्रतिक्रमणं—'आभोगे जाणंतेण जोऽइयारो कओ पुणो तस्स । जायम्मिवि अणुतावे पडिक्कमणेऽजाणया इयरो ॥ ४ ॥, आभोगेन जानता सहसात्कारेणातिचारे सति प्रतिक्रमणं तस्यैवानुपातेऽनुस्मरणे जाते पुनर्द्वितीयवेलायां प्रतिक्रमणं, अजानता इतरोऽनाभोगः, [अनाभोग] सहसात्कारं इत्थं—'पुव्विं अपासिऊणं छूढे पायंमि जं पुणो पासे । ण य

तरइ णियत्तेउं पायं सहसाकरणमेयं ॥ ५ ॥' तस्मिंश्च सति प्रतिक्रमणं ॥ १२६३ ॥ इदं पुनः प्राकरणिकं–'पडिलेहेउं पमज्जिय भत्तं पाणं च वोसिरेऊणं। वसहीकयवरमेव उ णियमेण पडिकमे साहू ॥ १ ॥ हत्थसया आगंतुं गंतुं च मुहुत्तगं जहिं चिट्ठे। पंथे वा वच्चंतो णदिसंतरणे पडिकमइ ॥ २ ॥' गतं प्रतिक्रमणद्वारं, अथ प्रतिक्रान्तव्यं पञ्चधा, तदाह—

मिच्छत्तपडिक्कमणं तहेव अस्संजमे पडिक्कमणं। कसायाण पडिक्कमणं जोगाण य अप्पसत्थाणं ।१२६४।
संसारपडिक्कमणं चउविहं होइ आणुपुव्वीए । भावपडिक्कमणं पुण तिविहं तिविहेण नेयव्वं ॥ १२६५ ॥

मिथ्यात्वप्रतिक्रमणं प्रतिक्रान्तव्यं वर्त्तते, यदाभोगानाभोगसहसाकारैर्मिथ्यात्वं गतस्तस्य प्रतिक्रान्तव्यमित्यर्थः, तथा असंयमे प्रतिक्रमणं, असंयमः प्राणातिपातादिरूपः प्रतिक्रान्तव्यो वर्त्तते ॥ १२६४ ॥ संसारप्रतिक्रमणं चतुर्विधं, अयमर्थः–नारकायुषो ये हेतवो महारम्भादयस्तेष्वाभोगानाभोगसहसाकारैर्यद्वर्त्तितमन्यथा वा प्ररूपितं तस्य प्रतिक्रान्तव्यं, एवं तिर्यग्नरामरेष्वपि, नवरं शुभनरामरायुर्हेतुभ्यो मायाद्यनासेवनादिभ्यो न प्रतिक्रान्तव्यं, भावप्रतिक्रमणं [त्रिविधं] त्रिविधेनैव नेतव्यं, अयमर्थः–' मिच्छत्ताइ न गच्छइ ण य गच्छावेइ णाणुजाणेई । जं मणवइकाएहिं तं भणियं भावपडिक्कमणं ॥ १ ॥' मनसा न गच्छति–चिन्तयति यथा शोभनः शाक्यादिधर्म्मः, वाचा नाभिधत्ते, कायेन न तैः सह निष्प्रयोजनं संसर्गं करोति, तथा ' न य गच्छावेइ 'त्ति मनसा न चिन्तयति–कथमेष तच्चन्निकादिः स्यात् ?, वाचा न प्रवर्त्तयति यथा बौद्धादिर्भव, कायेन न बौद्धादीनामर्प्पयति, तथा नानुजानयति, कश्चिद् बौद्धादिः स्यात्तं मनसाऽनुमोदयति, वाचा न सुष्ठु

कृतमिति भणति, कायेन [न] नखच्छोटिकादि दत्ते, एवमसंयमादिष्वपि विभाषा ॥ १२६५ ॥ कषायप्रतिक्रमणे ज्ञातमुच्यते— द्वौ संयतौ स्वर्गतौ, सङ्केतं कृत्वा एकश्च्युतो नागदेवताराधनाज्जातः श्रेष्ठिगृहे, नागदत्त इति नाम कृतं, यौवने द्विसप्तति-कलाकुशलो गन्धर्वकलाप्रियत्वाद्गन्धर्वनागदत्तो भण्यते, ततः स गारुडी जातो बहुमित्रयुतो हिण्डति, इतो देवो रजोहरणादि-विनाऽव्यक्तलिङ्गेन चतुःसर्प्पकरण्डिक आगात्, स्वजनादिसमक्षमुक्तवान्—

गंधव्वनागदत्तो इच्छइ सप्पेहि खिल्लिउं इहयं । तं जइ कहिंवि खज्जइ इत्थ हु दोसो न कायव्वो ॥१२६६॥

'खाद्यते' भक्ष्यते ॥ १२६६ ॥ यथा चतसृष्वपि दिक्षु मण्डलेषु स्थापितानां सर्प्पाणां माहात्म्यमसावकथयत् तथा आह—

तरुणदिवायरनयणो विज्जुलयाचंचलग्गजीहालो । घोरमहाविसदाढो उक्का इव पज्जलियरोसो ।१२६७।

तरुणदिवाकरनयनो रक्ताक्षः, विद्युल्लतेव चञ्चलाग्रजिह्वा यस्य स तथा, उल्केव–चुडुलीव प्रज्वलितो रोषो यस्य ॥१२६७॥

डक्को जेण मणूसो कयमकयं न याणई सुबहुयंपि । अदिस्समाणमच्चुं कह घिच्छसि तं महानागं ? १२६८

अदृश्यमानोऽयं करण्डकस्थो मृत्युर्वर्त्तते ॥ १२६८ ॥ अयं च क्रोधसर्प्पः, क्रोधमन्वितश्च तरुणदिवाकरनयन एव स्यात्, इत्यादि योजना ज्ञेया ॥

मेरुगिरितुंगसरिसो अट्ठफणो जमलजुगलजीहालो । दाहिणपासंमि ठिओ माणेण वियट्टई नागो ॥ १२६९

मेरुगिरेस्तुङ्गानि–उच्छ्रितानि तैः सदृश उच्छ्रित इत्यर्थः, अष्टफणः, जात्यादीनि द्रष्टव्यानि, यमं–मृत्युं लाति–लगयतीति

यमला, यमला-युग्मा जिह्वा यस्य स तथा, दक्षिणपार्श्वे स्थितः दक्षिणदिग्न्यासस्तु दाक्षिण्यवत उपरोधतो मानप्रवृत्तेः, 'मानेन' हेतुभूतेन व्यावर्त्तते नागः ॥ १२६९ ॥

डक्को जेण मणुसो थद्धो न गणेइ देवरायमवि। तं मेरुपव्वयनिभं कह घिच्छसि तं महानागं ? ॥ १२७० ॥

अयं च मानसर्पः ॥ १२७० ॥

सललियविल्लहलगई सत्थिअलंछणफणंकिअपडागा। मायामइआ नागी नियडिकवडवंचणाकुसला १२७१

सललिता वेल्लहा (हला) गतिर्यस्याः सा तथा, स्वस्तिकलाञ्छनेनाङ्किता फणापताका यस्याः सा तथा, च्छन्दोभङ्गभयादित्थं पाठः, निकृतिः-आन्तरो विकारः, कपटं-वेषपरावर्त्तादिः, आभ्यां या वञ्चना तस्यां कुशला ॥ १२७१ ॥

तं च सि वालग्गाही अणोसहिबलो अ अपरिहत्थो य ।
सा य चिरसंचियविसा गहणंमि वणे वसइ नागी ॥ १२७२ ॥

इयमेवम्भूता नागी त्वं च 'व्यालग्राही' सर्प्पग्रहणशीलो अनौषधीबलश्च अपरिहत्थश्चादक्षः गहने-सङ्कुले वने-कार्यजाले वसति ॥ १२७२ ॥

होही ते विणिवाओ तीसे दाढंतरं उवगयस्स। अप्पोसहिमंतबलो न हु अप्पाणं चिगिच्छिहिसि॥१२७३

त्वं अल्पौषधिमन्त्रबलः, अतो नैवात्मानं चिकित्सिष्यसि ॥ १२७३ ॥ इयं मायानागी ॥

उत्थरमाणो सव्वं महालओ पुन्नमेहनिग्घोसो । उत्तरपासंमि ठिओ लोहेण विहयइ नागो ॥ १२७४ ॥

' उत्थरमाणो 'त्ति अभिभवन् ' सर्वं ' वस्तु, महालयः, सर्वत्रानिवारितत्वात् , उत्तरदिग्न्यासस्तु सर्वोत्तरो लोभ इति ख्यापनार्थः, लोभेन हेतुभूतेन व्यावर्त्तते रुष्यति वा नागः ॥ १२७४ ॥

उक्को जेण मणुसो होइ महासागरुव्व दुप्पूरो । तं सव्वविससमुदयं कह घिच्छसि तं महानागं ॥ १२७५ ॥

गृहीष्यसि त्वं ॥ १२७५ ॥ अयं लोमसर्प्पः ॥

एए ते पावाही चत्तारि वि कोहमाणमयलोभा । जेहि सया संतत्तं जरियमिव जयं कलकलेइ ॥१२७६॥

यैः सन्तप्तं सत् ज्वरितमिव जगत् कलकलायति भवाब्धौ क्वथयति ॥ १२७६ ॥

एएहिं जो खज्जइ चउहिवि आसीविसेहि पावेहिं । अवसस्स नरयपडणं णत्थि सि आलंबणं किंचि ।१२७७

तस्याऽवशस्य सतो नरकपतनं स्यात् ॥ १२७७ ॥ एवमुक्त्वा मुक्ताः, स दष्टः पतितः मित्रदत्तौषधैर्न गुणः, तस्य स्वजनः पादयोः पतित उज्जीवनाय, देवः प्राह—

एएहिं अहं खइओ चउहिवि आसीवीसेहि पावेहिं । विसनिग्घायणहेउं चरामि विविहं तवोकम्मं ।१२७८

सेवामि सेलकाणणसुसाणसुन्नघररुक्खमूलाइं । पावाहीणं तेसिं खणमवि न उवेमि वीसंभं ॥ १२७९ ॥

काननानि—दूरवर्त्तिवनानि, ' पापाहीनां ' पापसर्पाणां न उपैमि विश्रम्भं ॥ १२७८–१२७९ ॥

अच्चाहारो न सहे अइनिद्धेण विसया उइज्जंति । जायामायाहारो तंपि पकामं न इच्छामि १२८०

' अत्याहारः ' प्रभूताहारः, ' विषयाः ' शब्दादयः उदीर्यन्ते, ततश्च यात्रामात्राहारः ॥ १२८० ॥

उस्सन्नकयाहारो अहवा विगईविवज्जियाहारो । जं किंचि कयाहारो अवउज्झियथोवमाहारो ॥१२८१॥

'ओसन्नं' प्रायशोऽकृताहारस्तिष्ठामि, उज्झितधर्म्मस्तोक आहारो यस्य स तथा ॥ १२८१ ॥ एवंक्रियायुक्तस्य गुणानाह—

थोवाहारो थोवभणिओ य जो होइ थोवनिद्दो य । थोवोवहिउवगरणो तस्स हु देवावि पणमंति ।१२८२।

एवं यदि करोति तत उत्तिष्ठति, स्वजनैर्मतं, देवः पूर्वाभिमुखः स्थित्वा भणति—

सिद्धे नमंसिऊणं संसारत्था य जे महाविज्जा । वोच्छामि दंडकिरियं सव्वविसनिवारणिं विज्जं ॥ १२८३ ॥

संसारस्थाश्च महाविद्याः—केवलिचतुर्दशपूर्वधरादयः, तांश्च नमस्कृत्य वक्ष्ये दण्डक्रियां विद्यां ॥ १२८३ ॥ सा चेयं—

सव्वं पाणाइवायं पच्चक्खाई मि अलियवयणं च । सव्वमदत्तादाणं अब्बंभ परिग्गहं स्वाहा ॥ १२८४ ॥

प्रत्याख्यात्येष महात्मेति ॥ १२८४ ॥ एवं भणित उत्थितः, न श्रद्दधाति, पुनः पतितः, तृतीयवेलायां मात्रादिं पृष्ट्वा तेनैव समं चलितः, वनान्तः पूर्वभवश्रवणात् प्रतिबुद्धः, प्रत्येकबुद्धो जातः, दीर्घपर्यायेण सिद्धः । उक्तं प्रतिक्रमणं, अत्रान्तरेऽध्ययनशब्दार्थः पूर्ववत्, सूत्रालापकनिष्पन्ने सूत्रं—

नागदत्तोदाहरणं नि० गा० १२८०-१२८४

करेमि भंते ! सामाइअं (सूत्रं) पूर्ववत्

चत्तारि मंगलं अरिहंता मंगलं सिद्धा मंगलं साहू मंगलं केवलिपण्णत्तो धम्मो मंगलं (सूत्रं)

चत्तारि लोगुत्तमा अरिहंता लोगुत्तमा सिद्धा लोगुत्तमा साहू लोगुत्तमा केवलिपण्णत्तो धम्मो लोगुत्तमो (सूत्रं)

चत्तारि सरणं पवज्जामि अरिहंते सरणं पवज्जामि सिद्धे सरणं पवज्जामि साहू सरणं पवज्जामि केवलिपण्णत्तं धम्मं सरणं पवज्जामि (सूत्रं)

इच्छामि पडिक्कमिउं जो मे देवसिओ अइआरो कओ काइओ वाइओ माणसिओ उस्सुत्तो उम्मग्गो अकप्पो अकरणिज्जो दुज्झाओ दुव्विचिंतिओ अणायारो अणिच्छियव्वो असमणपाउग्गो नाणे दंसणे चरित्ते सुए सामाइए तिण्हं गुत्तीणं चउण्हं कसायाणं पंचण्हं महव्वयाणं छण्हं जीवणिकायाणं सत्तण्हं पिंडेसणाणं अट्ठण्हं पवयणमाऊणं नवण्हं बंभचेरगुत्तीणं दसविहे समणधम्मे समणाणं जोगाणं जं खंडिअं जं विराहियं तस्स मिच्छामि दुक्कडं (सूत्रं)

मिथ्येति-प्रतिक्रमामि, अत्रेयं सूत्रस्पर्शिका गाथा—

पडिसिद्धाणं करणे किच्चाणमकरणे य पडिक्कमणं। असद्दहणे य तहा विवरीयपरूवणाए य ॥ १२८५ ॥

प्रतिषिद्धानामकालस्वाध्यायादीनां करणे, प्रतिक्रमणमिति योगः, कृत्यानां कालस्वाध्यायादीनां ॥ १२८५ ॥ अनया गाथया यथायोगं सर्वसूत्राण्यनुगन्तव्यानि, यथा-सामायिकसूत्रे प्रतिषिद्धौ रागद्वेषौ तयोः करणे, कृत्यस्तु तन्निग्रहस्तस्याकरणे, सामायिकं मोक्षहेतुरित्यश्रद्धाने, असमभावलक्षणं सामायिकमिति विपरीतप्ररूपणायां च प्रतिक्रमणं, एवं मङ्गलादिसूत्रेष्वप्यायोज्यं, [समाप्ता] प्रतिक्रमणनिर्युक्त्यवचूर्णिः ॥

पडिक्कमामि चउहिं झाणेहिं—अट्टेणं झाणेणं रुद्देणं झाणेणं धम्मेणं झाणेणं सुक्केणं झाणेणं (सूत्रम्)

एषामर्थो ध्यानशतकादवसेयः, अस्य च शास्त्रान्तरत्वान्नमस्कारमादावाह—

वीरं सुक्कज्झाणग्गिदड्ढकम्मिंधणं पणमिऊणं । जोईसरं सरण्णं झाणज्झयणं पवक्खामि ॥ १ ॥

जं थिरमज्झवसाणं तं झाणं जं चलं तयं चित्तं । तं होज्ज भावणा वा अणुपेहा वा अहव चिंता ॥ २ ॥

यत् स्थिरमध्यवसानं तद्ध्यानं, यत्तु चलं तच्चित्तं, तच्चित्तं भवेद्भावना ध्यानाभ्यासक्रिया, अनुप्रेक्षा अनु-पश्चाद्भावे प्रेक्षणं प्रेक्षा, सा च स्मृतिध्यानाद् भ्रष्टस्य चित्तचेष्टेत्यर्थः, अथवा चिन्ता योक्तप्रकारद्वयरहिता चिन्ता-मनश्चेष्टा सा चिन्ता ॥ २ ॥ ध्यानलक्षणमुक्त्वा ध्यानमेव कालस्वामिभ्यामाह—

अंतोमुहुत्तमेत्तं चित्तावत्थाणमेगवत्थुंमि । छउमत्थाणं झाणं जोगनिरोहो जिणाणं तु ॥ ३ ॥

अन्तर्मुहूर्त्तकालं चित्तावस्थानमेकस्मिन् वस्तुनि यत्तद् छद्मस्थानां ध्यानं, योगनिरोध एव जिनानां केवलिनां ध्यानं, न तु चित्तावस्थानं, चित्तस्यैवाऽभावात्, एतदुपरिष्टाद्वक्ष्यामः ॥ ३ ॥ छद्मस्थानामन्तर्मुहूर्त्तात्परतो यत्स्यात्तदाह—

अंतोमुहुत्तपरओ चिंता झाणंतरं व होज्जाहिं । सुचिरंपि होज्ज बहुवत्थुसंकमे झाणसंताणो ॥ ४ ॥

भिन्नमुहूर्त्तादूर्ध्वं चिन्ता प्रागुक्तस्वरूपा ध्यानान्तरं वा भवेद्भावनानुप्रेक्षात्मकं चेतः, सुचिरमपि कालं भवेद् बहुवस्तुसङ्क्रमे ध्यानसन्तानो ध्यानप्रवाहः, बहुवस्तूनि चात्मगतानि मनःप्रभृतीनि, परगतानि द्रव्यादीनि, तेषु सङ्क्रमः सञ्चरणं ॥ ४ ॥ इत्थं ध्यानस्य सामान्येन लक्षणमुक्त्वा विशेषत आह—

अट्टं रुद्दं धम्मं सुक्कं झाणाइ तत्थ अंताइं । निव्वाणसाहणाइं भवकारणमट्टरुद्दाइं ॥ ५ ॥

आर्त्तध्यानं चतुर्द्धा, तत्राद्यं भेदमाह—

अमणुण्णाणं सद्दाइविसयवत्थूण दोसमइलस्स । धणिअं विओगचिंतणमसंपओगाणुसरणं च ॥ ६ ॥

अमनोज्ञानां [शब्दादयः] विषया इन्द्रियगोचरा [वा] वस्तूनि च तेषां शब्दादिविषयवस्तूनां सम्प्राप्तानां सतां, 'धणियं' अत्यर्थं वियोगचिन्तनं—कथमेभिर्वियोगः स्यात् ?, अनेन वर्त्तमानकालग्रहः, तथा सति वियोगेऽसम्प्रयोगानुसमरणं, कथमेभिः सह सदैव सम्प्रयोगाभावः ?, अनेनानागतकालग्रहः, चशब्दात् पूर्वकालमपि वियुक्तासम्प्रयुक्तयोर्बहुमतत्वेनातीतकालग्रहः, किंविशिष्टस्य सत इदं वियोगचिन्तनादि ?, द्वेषमलिनस्य—तदाक्रान्तमूर्त्तेर्जन्तोः ॥ ६ ॥ द्वितीयमाह—

तह सूलसीसरोगाइवेयणाए व (वि) जोगपणिहाणं । तदसंपओगचिंता तप्पडियाराउलमणस्स ॥ ७ ॥

तथाऽत्यर्थमेव, शूलशिरोरोगादिवेदनाया वियोगप्रणिधानं, वियोगे दृढाध्यवसाय इति वर्त्तमानग्रहः; ' तदसम्प्रयोग-चिन्ता ' तस्याः–वेदनायाः कथञ्चिदभावे सति असम्प्रयोगचिन्ता, कथं ममाऽनयाऽऽयत्यां सम्प्रयोगो न स्यादिति; चिन्ता-ध्यानं इत्यनागतकालग्रहः; पूर्ववदतीतग्रहोऽपि ज्ञेयः; तत्प्रतीकारे–वेदनाप्रतीकारे चिकित्सायामाकुलं–व्यग्रं मनो यस्य स तथाविधस्तस्य, वियोगप्रणिधानाद्यार्त्तध्यानं ॥ ७ ॥ तृतीयमाह–

इट्ठाणं विसयाईण वेयणाए य रागरत्तस्स । अवियोगऽज्झवसाणं तह संजोगाभिलासो य ॥ ८ ॥

' इष्टानां ' मनोज्ञानां विषयादीनां आदिशब्दाद्वस्तुग्रहः; तथा वेदनायाश्चेष्टाया अवियोगाध्यवसानमिति वर्त्तमानग्रहः, तथा धणियं संयोगाभिलाषश्चायत्यां इत्यनागतग्रहः, रागोऽभिष्वङ्गस्तेन रक्तस्य जन्तोः ॥ ८ ॥ चतुर्थमाह—

देविंदचक्कवट्टित्तणाइं गुणरिद्धिपत्थणमईयं । अहमं नियाणचिंतणमण्णाणाणुगयमच्चंतं ॥ ९ ॥

देवेन्द्रचक्रवर्त्यादीनां गुणर्द्धयः, तत्र गुणाः–सुरूपादयः, ऋद्धिस्तु विभूतिः, तत्प्रार्थनात्मकं तदधमं–जघन्यं निदान-चिन्तनं, अहमनेन तपस्त्यागादिना देवेन्द्रः स्यामित्यादिरूपं, यस्मादज्ञानानुगतमत्यन्तं, नाज्ञानिनो विहाय सांसारिक-सुखेष्वन्येषामभिलाषः ॥ ९ ॥

एयं चउव्विहं रागद्दोसमोहंकियस्स जीवस्स । अट्टज्झाणं संसारवद्धणं तिरियगइमूलं ॥ १० ॥

संसारवर्द्धनमोघतः, तिर्यग्गतिमूलं विशेषतः ॥ १० ॥ आह–साधोरपि शूलाद्यभिभूतस्याऽसमाधानात्तत्प्रतीकारकरणे च

तद्विप्रयोगप्रणिधानापत्तेः, तथा तपःसंयमासेवने च सांसारिकदुःखवियोगप्रणिधानादार्त्तध्यानप्राप्तिः, अत्रोच्यते, रागादिवशवर्त्तिनः स्यादेव, न पुनरन्यस्य इत्याह च—

मज्झत्थस्स उ मुणिणो सकम्मपरिणामजणियमेयंति । वत्थुस्सभावचिंतणपरस्स सम्मं सहंतस्स ॥ ११ ॥

स्वकर्मपरिणामजनितमेतत्–शूलादि, इत्येवं वस्तुस्वभावचिन्तनपरस्य सम्यक्सहमानस्य सतः कुतोऽसमाधानम् ? अपि तु धर्म्यमनिदानं ॥ ११ ॥

कुणओ व पसत्थालंबणस्स पडियारमप्पसावज्जं । तवसंजमपडियारं च सेवओ धम्ममणियाणं ॥ १२ ॥

कुर्वतो वा प्रशस्तालम्बनस्य प्रतिकारमल्पसावद्यं, अल्पशब्दोऽभाववचनः स्तोकवचनो वा, धर्म्यमनिदानमेव, तथा तपःसंयमावेव प्रतिकारः सांसारिकदुःखानामिति गम्यते, तं च सेवमानस्य ' धर्म्यं ' धर्मध्यानमेव, अनिदानमिति क्रिया–विशेषणं, देवेन्द्रादिनिदानरहितं ॥ १२ ॥ आह–कथमार्त्तं संसारवर्द्धनं ?, उच्यते—

रागो दोसो मोहो य जेण संसारहेयवो भणिया । अट्टंमि य ते तिण्णिवि तो तं संसारतरुबीयं ॥ १३ ॥

अथ आर्त्तध्यायिनो लेश्या आह—

कावोयनीलकालालेस्साओ णाइसंकिलिट्ठाओ । अट्टज्झाणोवगयस्स कम्मपरिणामजणिआओ ॥ १४ ॥

' नातिसंक्लिष्टाः ' रौद्रध्यानलेश्यापेक्षया नात्यशुभानुभावाः स्युः ॥ १४ ॥ आर्त्तध्यायिनो लिङ्गान्याह—

तस्सऽक्कंदणसोयणपरिदेवणताडणाइं लिंगाइं । इट्ठाणिट्ठविओगाविओगवियणानिमित्ताइं ॥ १५ ॥

तस्यार्त्तध्यायिनः आक्रन्दनं महता शब्देन रोदनं, शोचनं त्वश्रुपूर्णनयनस्य दैन्यं, परिदेवनं क्लिष्टभाषणं ताडनं-उरः-शिरःकुट्टनकेशलुञ्चनादि, एतानि 'लिङ्गानि' चिह्नानि, अमूनि च इष्टानिष्टवियोगावियोगवेदनानिमित्तानि, इष्टवियोगनिमित्तानि तथानिष्टावियोगनिमित्तानि वेदनानिमित्तानि च ॥ १५ ॥ किञ्चान्यत्—

निंदइ य नियकयाइं पसंसइ सविम्हओ विभूईओ । पत्थेइ तासु रज्जइ तयज्जणपरायणो होइ ॥ १६ ॥

निन्दति निजकृतानि अल्पफलविफलानि कर्मशिल्पकलावाणिज्यादीनि, तथा प्रशंसति सविस्मयो विभूतीः परसम्पदः, तथा प्रार्थयते परविभूतीः, तासु प्राप्तासु, तदर्जनपरायणः स्यात्-ततश्चैवम्भूतोऽप्यार्त्तध्यायी ॥ १६ ॥ किञ्च—

सद्दाइविसयगिद्धो सद्धम्मपरम्मुहो पमायपरो । जिणमयमणवेक्खंतो वट्टइ अट्टंमि झाणंमि ॥ १७ ॥

जिनमतं-आगमरूपं, तदनपेक्षमाणः ॥ १७ ॥ आर्त्तध्यानं यदनुगतं यदनर्हं च स्यात्तदाह—

तदविरयदेसविरया पमायपरसंजयाणुगं झाणं । सबपमायमूलं वज्जेयव्वं जइजणेणं ॥ १८ ॥

तत् आर्त्तध्यानं अविरताः-मिथ्यादृष्टयः सम्यग्दृष्टयश्च, देशविरताः-श्रावकाः, प्रमादपरसंयतास्ताननुगच्छतीति, नैवाप्रमत्तसंयतानामिति भावः, यतिजनेन श्राद्धजनेन च ॥ १८ ॥ अथ रौद्रं चतुर्धा-हिंसानुबन्धि १ मृषानुबन्धि २ स्तेयानुबन्धि ३ विषयसंरक्षणानुबन्धि च ४, तत्राद्यमाह—

सत्तवहवेहबंधणडहणंकणमारणाइपणिहाणं । अइकोहग्गहघत्थं निग्घिणमणसोऽहमविबागं ॥ १९ ॥

सत्त्वाः-पञ्चेन्द्रियास्तेषां वधः-करकशलत्तादिभिः ताडनं, वेधः-आरादिभिः, बन्धनं रज्ज्वादिभिः, दहनं उल्मुकादिभिः,

अङ्कनं-लाञ्छनं श्वशृगालचरणादिभिः, मारणं-प्राणवियोजनमसिशक्त्यादिभिः, आदिशब्दादागाढपरितापनादिग्रहः, एतेषु प्रणिधानं-अकुर्वतोऽपि करणं प्रति दृढाध्यवसानं, रौद्रध्यानं, अतिक्रोधग्रहग्रस्तं, क्रोधग्रहणाच्च मानादयोऽपि गृह्यन्ते, निर्घृणमनसः सतः, अधमो नरकादिप्राप्तिलक्षणो विपाको यस्य तत्तथाविधं ॥ १९ ॥ द्वितीयमाह—

पिसुणासब्भासब्भूयभूयघायाइवयणपणिहाणं । मायाविणोऽइसंधणपरस्स पच्छन्नपावस्स ॥ २० ॥

पिशुनमनिष्टसूचकं, असभ्यं जकारमकारादि, असद्भूतं त्रिधा-अभूतोद्भावनं सर्वगत आत्मेत्यादि १, भूतनिह्नवो नास्त्यात्मेत्यादि २, गामश्वमित्यादि ब्रुवतोऽर्थान्तराभिधं ३, भूतघातादि छिन्द्धि भिन्द्धि व्यापादयेत्यादि, तत्र पिशुनादिवचनेष्वप्रवर्त्तमानस्यापि प्रवृत्तिं प्रति प्रणिधानं रौद्रध्यानं, मायाविनो वणिजादेः, तथाऽतिसन्धानपरस्य-परवञ्चनाप्रवृत्तस्य, तथा 'प्रच्छन्नपापस्य' कूटप्रयोगकारिणः ॥ २० ॥ तृतीयमाह—

तह तिव्वकोहलोहाउलस्स भूओवघायणमणज्जं । परदव्वहरणचित्तं परलोयावायनिरवेक्खं ॥ २१ ॥

तीव्रक्रोधलोभाकुलस्य जन्तोः, भूतानामुपहननं भूतोपहननं, अनार्यं, परद्रव्यहरणचित्तं, रौद्रध्यानं ॥ २१ ॥ चतुर्थमाह—

सद्दाइविसयसाहणधणसारक्खणपरायणमणिट्ठं । सव्वाभिसंकणपरोवघायकलुसाउलं चित्तं ॥ २२ ॥

शब्दादयश्च ते विषयाश्च ते, साधनं-कारणं, तच्च तद्धनं च, तत्संरक्षणे परायणं, तथाऽनिष्टं सतां, सर्वेषामभिशङ्कनेन-न विद्मः कः किं करिष्यतीत्यादिलक्षणेन, तस्मात्सर्वेषामुपघातः श्रेयानित्येवं परोपघातेन च, तथा कलुषाः-कषायास्तैराकुलं-व्याप्तं यत्तथा, चित्तं तत् रौद्रध्यानं ॥ २२ ॥

इय करणकारणाणुमइविसयमणुचिंतणं चउब्भेयं । अविरयदेसासंजयजणमणसंसेवियमहण्णं ॥ २३ ॥

एवं करणं स्वयमेव, कारणमन्यैः, कृतानुमोदनमनुमतिरेता एव विषयो यस्य तत्करणकारणानुमतिविषयं, 'अनुचिन्तनं' पर्यालोचनं, 'चतुर्भेदं' हिंसानुबन्ध्यादि, रौद्रध्यानं, अविरताः सम्यग्दृष्टयः, इतरे च देशसंयताः श्रावकास्त एव जनास्तेषां मनांसि तैः संसेवितं, अधन्यमश्रेयस्करणं ॥ २३ ॥

एयं चउविहं रागदोसमोहाउलस्स जीवस्स । रोद्दज्झाणं संसारवद्धणं नरयगइमूलं ॥ २४ ॥

कावोयनीलकाला लेसाओ तिव्वसंकिलिट्ठाओ । रोद्दज्झाणोवगयस्स कम्मपरिणामजणियाओ ॥ २५ ॥

तीव्रसङ्क्लिष्टाः ॥ २४–२५ ॥

लिंगाइं तस्स उस्सण्णबहुलनाणाविहामरणदोसा । तेसिं चिय हिंसाइसु बाहिरकरणोवउत्तस्स ॥ २६ ॥

'तस्य' रौद्रध्यायिनः, दोषशब्दः प्रत्येकं योज्यः, ततो हिंसानुबन्ध्यादीनामन्यतरस्मिन् प्रवर्त्तमान उत्सन्नमनुपरतं बाहुल्येन प्रवर्त्तत इत्युत्सन्नदोषः, सर्वेष्वपि चैवं प्रवर्त्तत इति बहुलदोषः, नानाविधेषु त्वक्तक्षणनयनोत्खननादिषु हिंसाद्युपायेषु असकृदप्येवं प्रवर्त्तत इति नानाविधः दोषः, महदापद्गतो [ऽपि स्वतः महदापद्गते]ऽपि च परे आमरणादसञ्जातानुताप इत्यामरणदोषः, तेष्वेव हिंसादिषु हिंसानुबन्ध्यादिषु बाह्यकरणोपयुक्तस्य सत उत्सन्नादिदोषलिङ्गानि, बाह्यकरणशब्देनेह वाक्कायौ गृह्येते, ततश्च ताभ्यामपि तीव्रं उपयुक्तस्य ॥ २६ ॥ किञ्च—

परवसणं अहिणंदइ निरवेक्खो निद्दओ निरणुतावो । हरिसिज्जइ कयपावो रोद्दज्झाणोवगयचित्तो ॥ २७ ॥

अभिनन्दति-बहु मन्यते, तथा निरपेक्षः-इहान्यभविकापायरहितः ॥२७॥ अथ धर्मध्यानाभिधित्सया द्वारगाथाद्वयमाह-

झाणस्स भावणाओ देसं कालं तहाऽऽसणविसेसं । आलंबणं कमं झाइयव्वयं जे य झायारो ॥ २८ ॥

तत्तोऽणुप्पेहाओ लेस्सा लिंगं फलं च नाऊणं । धम्मं झाइज्ज मुणी तग्गयजोगो तओ सुक्कं ॥ २९ ॥

भावनाः ज्ञानाद्याः ज्ञात्वेति योगः, 'आलम्बनं' वाचनादि, 'क्रमं' मनोनिरोधादि, ध्यातव्यमाज्ञादि ॥ २८ ॥ 'अनुप्रेक्षा' ध्यानोपरमकालभाविन्योऽनित्यत्वाद्यालोचनरूपाः, तत्कृतयोगः-धर्मध्यानकृताभ्यासः ॥ २९ ॥

पुव्वकयब्भासो भावणाहि झाणस्स जोग्गयमुवेइ । ताओ य नाणदंसणचरित्तवेरग्गजणियाओ ॥ ३० ॥

पूर्वं-ध्यानात् कृतोऽभ्यासः-आसेवनालक्षणो येन स तथाविधः, भावनाभिः ॥ ३० ॥

णाणे णिच्चब्भासो कुणइ मणोधारणं विसुद्धिं च । नाणगुणमुणियसारो तो झाइ सुनिच्चलमईओ ॥ ३१ ॥

ज्ञाने श्रुतज्ञाने, नित्यं-सदा, अभ्यासः-आसेवनालक्षणः, करोति, मनसो धारणम्-अशुभव्यापारनिरोधेनावस्थानं, तथा विशुद्धिं च सूत्रार्थयोः, चशब्दाद्भवनिर्वेदं च, एवं ज्ञानगुणेन ज्ञानमाहात्म्येन ज्ञातः सारो विश्वस्य येन स तथाविधः, सुनिश्चला-सम्यग्ज्ञानतोऽन्यथाप्रवृत्तिकम्परहिता मतिर्यस्य स तथाविधः ॥ ३१ ॥

संकाइदोसरहिओ पसमथेज्जाइगुणगणोवेओ । होइ असंमूढमणो दंसणसुद्धीए झाणंमि ॥ ३२ ॥

प्रशमादिना स्थैर्यादिना च गुणगणेनोपेतः प्रशमस्थैर्यादिगुणोपेतः, इत्थम्भूतः स्यादसम्मूढमनास्तत्त्वान्तरेऽभ्रान्तचित्तः ॥ ३२ ॥

नवकम्माणायाणं पोराणविणिज्जरं सुभायाणं । चारित्तभावणाए झाणमयत्तेण य समेइ ॥ ३३ ॥

चारित्रभावनया–सर्वसावद्ययोगनिवृत्तिरूपक्रियाभ्यासेन, ध्यानं नवकर्मानादानादि चायत्नेन समेति–प्राप्नोति ॥३३॥

सुविदियजगस्सभावो निस्संगो निब्भओ निरासो य । वेरग्गभावियमणो झाणंमि सुनिच्चलो होइ ॥ ३४ ॥

निराशंसश्च इहपरलोकाशाप्रमुक्तः, चशब्दात्क्रोधादिरहितश्च ॥ ३४ ॥ देश[द्वार]माह—

निच्चं चिय जुवइपसुनपुंसगकुसीलवज्जियं जइणो । ठाणं वियणं भणियं विसेसओ झाणकालंमि ॥ ३५ ॥

नित्यमेव, न केवलं ध्यानकाले, कुशीलाः–द्यूतकारादयः, स्थानं युवत्यादिव्यतिरिक्तशेषजनापेक्षया विगतजनं विजनं ॥३५॥

थिरकयजोगाणं पुण मुणीण झाणे सुनिच्चलमणाणं । गामंमि जणाइण्णे सुण्णे रण्णे व ण विसेसो ॥ ३६ ॥

स्थिराः–संहननधृतिभ्यां बलवन्तः, कृताः–अभ्यस्ताः योगाः–ज्ञानादिभावनादिव्यापारा यैस्ते स्थिरकृतयोगास्तेषां, ग्रामे जनाकीर्णे शून्येऽरण्ये वा ॥ ३६ ॥

तो नत्थ समाहाणं होज्ज मणोवयणकायजोगाणं । भूओवरोहरहिओ सो देसो झायमाणस्स ॥ ३७ ॥

आह–वाक्काययोगसमाधानमत्र क्वोपयुज्यते ?, उच्यते, तत्समाधानं मनोयोगोपकारकं, ध्यानमपि तदात्मकं स्यादेव, यथा–' एवंविहा गिरा मे वत्तव्वा एरिसि न वत्तव्वा । इअ वेआलिअवक्कस्स भासओ वाइअं झाणं ॥ १ ॥ ' तथा–' सुसमाहिअकरपायस्स अकज्जे कारणंमि जयणाए । किरिआकरणं जं तं काइअझाणं भवे जइणो ॥ २ ॥ ' भूतोपघातरहितः, भूतानि–पृथिव्यादीनि उपरोधः तत्संघट्टनादिलक्षणस्तेन रहितः यः, तथा अनृतादत्तादानमैथुनपरिग्रहाद्युपरोधरहितश्च स देशो

ध्यायत उचितः ॥ ३७ ॥

कालोऽवि सो च्चिय जहिं जोगसमाहाणमुत्तमं लहइ । न य दिवसनिसावेलाइनियमणं झाइणो भणियं ॥ ३८ ॥

कालोऽपि स एव ध्यानोचितः ॥ ३८ ॥ आसनमाह—

जच्चिय देहावत्था जिया ण झाणोवरोहिणी होइ । झाइज्जा तदवत्थो ठिओ निसण्णो निवण्णो वा ॥ ३९ ॥

यैव देहावस्था निषण्णादिरूपा जिताऽभ्यस्ता तथानुष्ठीयमाना, न ध्यानोपरोधिनी स्यात् नाधिकृतधर्म्मध्यानपीडाकारी स्यात्, 'स्थितः' कायोत्सर्गेण ईषन्नतादिना, निषन्नः उपविष्टो वीरासनादिना, निर्विन्नः शयितो दण्डायतादिना, वा विकल्पार्थे ॥ ३९ ॥ आह–किं देशकाला[सना]नामनियमः ?, उच्यते—

सव्वासु वट्टमाणा मुणओ जं देसकालचेट्ठासु । वरकेवलाइलाभं पत्ता बहुसो समियपावा ॥ ४० ॥

सर्वासु देशकालचेष्टासु, चेष्टा–देहावस्था, वर्त्तमाना मुनयो 'यद्' यस्मात्कारणात् प्रधानकेवलादिलाभं प्राप्ताः, आदेर्मनःपर्यायादिग्रहः, केवलवर्जं बहुशोऽनेकशः, शमितपापाः सन्तः ॥ ४० ॥

तो देसकालचेट्ठानियमो झाणस्स नत्थि समयंमि । जोगाण समाहाणं जह होइ तहा [प]यइयवं ॥ ४१ ॥

तस्माद् ॥ ४१ ॥ आलम्बनद्वारमाह—

आलंबणाइँ वायणपुच्छणपरियट्टणाणुचिंताओ । सामाइयाइयाइं सद्धम्मावस्सयाइं च ॥ ४२ ॥

वाचना–विनेयाय सूत्रार्थदानं, शङ्किते सूत्रादौ गुरुप्रच्छनं प्रश्नः, परावर्त्तनं पूर्वाधीतस्यैव सूत्रादेरभ्यासकरणं, अनुप्रेक्षा–

मनसैव विस्मरणादिनिमित्तं सूत्रानुस्मरणं, एतानि श्रुतधर्म्मानुगतानि वर्त्तन्ते, तथा सामायिकादीनि सद्धर्म्मावश्यकानि च, अमूनि चरणधर्म्मानुगतानि, सामायिकं प्रतीतं आदिशब्दात् मुखवस्त्रिकाप्रत्युपेक्षणादिसामाचारीपरिग्रहः, सन्ति च तानि चारित्रधर्म्मावश्यकादीनि चेति विग्रहः, आवश्यकानि–नियमतः करणीयानि ॥ ४२ ॥

विसमंमि समारोहइ दढदवालंबणो जहा पुरिसो । सुत्ताइकयालंबो तह झाणवरं समारुहइ ॥ ४३ ॥

दृढद्रव्यं रज्ज्वादि ॥ ४३ ॥ क्रमं धर्म्मस्य, लाघवार्थं शुक्लस्य चाह—

झाणपडिवत्तिकमो होइ मणोजोगनिग्गहाईओ । भवकाले केवलिणो सेसाण जहासमाहीए ॥ ४४ ॥

ध्यानस्य प्रतिपत्तिक्रमः परिपाटी, पूर्वं मनोनिग्रहस्ततो वाग्निग्रहस्ततः काययोगनिग्रहः, अयं क्रमः भवकाले शैलेश्यवस्थान्तर्गतकेवलिनः, शुक्ल एवायं क्रमः, शेषस्य धर्मध्यानप्रतिपत्तुर्यथासमाधिना यथैव स्वास्थ्यं स्यात्तथैव प्रतिपत्तिः ॥ ४४ ॥ ध्यातव्यं चतुर्धा–आज्ञाऽपायविपाकसंस्थानविचयभेदात्, तदेवाह–'आणा०' इयं गाथान्यकर्तृकी ॥ तत्राद्यमाह—

सुनिऊणमणाइणिहणं भूयहियं भूयभावणमहग्घं । अमियमजियं महत्थं महाणुभावं महाविसयं ॥ ४५ ॥

सुनैपुण्यं च सूक्ष्मद्रव्याद्युपदर्शकत्वात्तथा मत्यादिप्रतिपादकत्वाच्च, अनाद्यनिधनां द्रव्यार्थादेशात्, भूतहितां, भूताः-प्राणिनस्तेषां हितां पथ्यां ' सव्वे जीवा न हंतव्वा ' इत्यादि– ' भूतभावनां ' भूतं–सत्यं भाव्यतेऽनयेति भूतभावना–अनेकान्तपरिच्छेदात्मिका, भूतानां वा सत्त्वानां चिलातीपुत्रादीनामिव भावना–वासना यस्याः सा तथा तां, अनर्घ्यामविद्यमानमूल्यां,

१ इयं गाथा क्वापि न लब्धा अतो न दर्शिता ।

अथवा ऋणघ्नां-कर्म्मघ्नां, अनिय(अमि)तामपरिमितार्थां, यथा-' सव्वनईणं जा हुज्ज वालुअ सव्वुदहीण जं उदयं । इत्तोवि अणंतगुणो अत्थो इक्कस्स सुत्तस्स ॥ १ ॥ ' अमृतां वाऽमृतोपमां मृष्टां पथ्यां वा, यथा-' जिणवयणमोअगस्स उ रत्तिं व दिआ य खज्जमाणस्स । तित्तिं बुहो न वच्चइ सहस्सोवगूढस्स ॥ १ ॥' तथा-नरनिरयतिरिअसुरगणसंसारिअसव्वदुक्खरोगाणं । जिणवयणमेगमोसहमपवग्गदुहक्खयफलयं ॥ २ ॥ ' अमृतां सजीवां वा, उपपत्तिक्षमत्वेन, अजितां शेषप्रवचनाज्ञाभिरपराजितां, यथा-' जीवाइवत्थुचिंतणकोसल्लगुणेणऽणण्णसरिसेणं । सेसवयणेहिँ अजिअं जिणिंदवयणं महाविसयं ॥ १ ॥ ' महार्थां, पूर्वापराविरोधित्वादनुयोगद्वारात्मकत्वान्नयगर्भत्वाच्च, यद्वा महः पूजा तत्र तिष्ठतीति महस्था[तां,] यथा-' सव्वसुरासुरमाणुसजोइसवंतरसुपूइअं णाणं । जेणेह गणहराणं छुहंति चुन्ने सुरिंदावि ॥ १ ॥' महान्-प्रधानः सम्भू(प्रभू)तो वाऽनुभावः-सामर्थ्यादिलक्षणो यस्याः सा तथा तां, प्रधानत्वं चतुर्दशपूर्वविदः लब्धिसम्पन्नत्वात्, प्रभूतत्वं च [प्रभूतकार्यकरणाद्, उक्तं च-] ' पहू णं चउद्दसपुव्वी घडाओ घडसहस्सं करित्तए ' इत्यादि, परत्र यथा-' उववाओ लंतगंमि चउदसपुव्वीस्स होइ उ जहन्नो । उक्कोसो सव्वट्ठे सिद्धिगमो वा अकम्मस्स ॥१॥ ' महाविषयां, सर्वद्रव्य(व्यादि)विषयत्वात् ॥४५॥

झाइज्जा निरवज्जं जिणाणमाणं जगप्पईवाणं । अणिउणजणदुण्णेयं नयभंगपमाणगमगहणं ॥ ४६ ॥

' आज्ञां ' वचनलक्षणां, नया नैगमादयस्तथा भङ्गा भङ्गकाः, प्रमाणानि-द्रव्यादीनि, गमाश्चतुर्विंशतिदण्डकादयः किञ्चिद्विसदृशाः सूत्रमार्गा वा, तैर्गहना तां ॥ ४६ ॥

तत्थ य मइदोब्बलेणं तव्विहायरियविरहओ वावि । णेयगहणत्तणेण य णाणावरणोदएणं च ॥ ४७ ॥

' तत्र ' तस्यामाज्ञायां मतिदौर्बल्येन-बुद्धेः सम्यगर्थानवधारणेन, ज्ञेयं-धर्मास्तिकायादि, तद्गहनत्वेन च ॥ ४७ ॥

हेऊदाहरणसंभवे य सइ सुट्ठु जं न बुज्झेज्जा । सव्वण्णुमयमवितहं तहावि तं चिंतए मइमं ॥ ४८ ॥

कश्चन पदार्थं प्रति हेतूदाहरणासम्भवः तस्मिन् सति, तत्र हेतुः कारको व्यञ्जकश्च, उदाहरणं चरितकल्पितभेदं, तथापि-तदबोधकारणे सत्यनवगच्छन्नपि ' तत् '-मतं चिन्तयेन्मतिमान् ॥ ४८ ॥

अणुवकयपराणुग्गहपरायणा जं जिणा जगप्पवरा । जियरागदोसमोहा य णण्णहावादिणो तेणं ॥ ४९ ॥

रागोऽभिष्वङ्गो द्वेषोऽप्रीतिर्मोहोऽज्ञानं ॥ ४९ ॥ द्वितीयमाह—

रागद्दोसकसायासवादिकिरियासु वट्टमाणाणं । इहपरलोयावाओ झाइज्जा वज्जपरिवज्जी ॥ ५० ॥

रागद्वेषकषायाश्रवादिक्रियासु वर्त्तमानानामिहपरलोकापायान् ध्यायेद्वर्ज्यपरिवर्जी, वर्ज्यमकृत्यं तत्परिवर्जी-अप्रमत्तः, यथा-' रागः सम्पद्यमानोऽपि दुःखदो दुष्टगोचरः । महाव्याध्यभिभूतस्य अ(कु)पथ्यान्नाभिलाषवत् ॥ १ ॥ द्वेषः सम्पद्यमानोऽपि तापयत्येव देहिनं । कोटरस्थो ज्वलन्नाशु दावानल इव द्रुमं ॥ २ ॥ ' तथा-' दृष्टयादिभेदभिन्नस्य रागस्यामुष्मिकं फलं । दीर्घः संसार एवोक्तः सर्वज्ञैः सर्वदर्शिभिः ॥ ३ ॥ दोसानलसंसत्तो इहलोए चेव दुक्खिओ जीवो । परलोगंमि अ पावो पावइ निरयानलं तत्तो ॥ ४ ॥ मिच्छत्तमोहिअमई जीवो इहलोग एव दुक्खाइं । निरओवमाइं पावो पावइ पसमाइगुणहीणो ॥ ५ ॥ अज्ञानं खलु कष्टं क्रोधादिभ्योऽपि सर्वपापेभ्यः । अर्थं हितमहितं वा न वेत्ति येनावृतो लोकः ॥ ६ ॥ जीवा पाविंति इहं पाणवहादविरईए पावाए । निअसुअघायणमाई दोसे जणगरहिए पावा ॥ ७ ॥ परलोगंमिवि एवं आसवकिरिआहिं अज्जिए

कम्मे । जीवाणं चिरभवाया 'निरयाइगईभमंताणं ॥ ८ ॥ किरियासु वट्टमाणा काइगमाईसु दुक्खिआ जीवा । इह चेव य परलोगे संसारपवड्डगा भणिया ॥ ९ ॥' एवं रागादिक्रियासु वर्त्तमानानामपायान् ध्यायेत् ॥ ५० ॥ तृतीयमाह—

पयइठिइपएसाणुभावभिन्नं सुहासुहविहत्तं । जोगाणुभावजणियं कम्मविवागं विचिंतेज्जा ॥ ५१ ॥

प्रकृत्यादिभेदभिन्नं, शुभाशुभविभक्तं, योगानुभावजनितं, योगा मनोवचनकायाः, अनुभावो जीवगुण एव, स च मिथ्यात्वाविरतिप्रमादकषायास्तैर्जनितं ॥ ५१ ॥ चतुर्थमाह—

जिणदेसियाइँ लक्खणसंठाणासणविहाणमाणाइं । उप्पायट्ठिइभंगाइपज्जवा जे य दव्वाणं ॥ ५२ ॥

जिनदेशितानि लक्षणसंस्थानासनविधानमानानि, विचिन्तयेदिति वक्ष्यति षष्ठ्यां गाथायां, द्रव्याणामिति प्रतिपदमायोज्यं, तत्र लक्षणं धर्म्मास्तिकायादिद्रव्याणां गत्यादि, तथा संस्थानं परिमण्डलाद्यजीवानां, जीवशरीराणां च समचतुरस्रादि, कालस्य मनुष्यक्षेत्राकृतिः, सूर्यादिक्रियाऽभिव्यङ्ग्यो हि कालः किल मनुष्यक्षेत्र एव वर्त्तते, अतो य एवास्याकारः स एव कालस्योपचारतो विज्ञेयः, धर्म्माधर्म्मयोरपि लोकक्षेत्रापेक्षया भावनीयं, तथा आसनानि—आधारलक्षणानि धर्म्मास्तिकायादीनां लोकाकाशादीनि स्वस्वरूपाणि वा, तथा विधानानि धर्म्मादीनां, यथा—' धम्मत्थिकाए धम्मत्थिकायस्स देसे धम्मत्थिकायस्स पएसे ' इत्यादि, तथा मानानि धर्म्मादीनामेवात्मीयानि, तथा उत्पादस्थितिभङ्गादिपर्याया ये च द्रव्याणां—धर्म्मास्तिकायादीनां तान् विचिन्तयेत्, तत्र धर्म्मास्तिकायो विवक्षितसमयसम्बन्धरूपापेक्षयोत्पद्यते, तदनन्तरातीतसमयसम्बन्धरूपापेक्षया तु विनश्यति, धर्म्मास्तिकायद्रव्यात्मना तु नित्यः, आदिशब्दादगुरुलघ्वादिपर्यायपरिग्रहः ॥ ५२ ॥

पंचत्थिकायमइयं लोगमणाइणिहणं जिणक्खायं । णामाइमेयविहियं तिविहमहोलोयमेयाइं ॥ ५३ ॥

पञ्चास्तिकायमयं, अस्तिकायाः-धर्म्मास्तिकायादयस्तेषां चेदं स्वरूपं-'जीवानां पुद्गलानां च गत्युपग्रहकारणं। धर्म्मास्तिकायो ज्ञानस्य दीपश्चक्षुष्मतो यथा ॥ १ ॥ जीवानां पुद्गलानां च स्थित्युपष्टम्भकारणं । अधर्मः पुरुषस्येव तिष्ठासोरवनिस्समा (निर्यथा) ॥ २ ॥ जीवानां पुद्गलानां च धर्म्माधर्म्मास्तिकाययोः । बदराणां घटो यद्वदाकाशमवकाशदं ॥ ३ ॥ ज्ञानात्मा सर्वभावज्ञो भोक्ता कर्त्ता च कर्म्मणां । नानासंसारिमुक्ताख्यो जीवः प्रोक्तो जिनागमे ॥ ४ ॥ स्पर्शरसगन्धवर्णशब्दमूर्त्तस्वभावकाः । सङ्घातभेदनिष्पन्नाः पुद्गला जिनदेशिताः ॥ ५ ॥' जिनाख्यातमित्यादरख्यापनार्थत्वान्न पुनरुक्तं, उक्तं च-'अनुवादादरवीप्साभृशार्थविनियोगहेत्वसूयासु । ईषत्सम्भ्रमविस्मयगणनास्मरणेष्वपुनरुक्तम् ॥ १ ॥' तथा नामादिभेदभिन्नं 'नामं ठवणा दविए खित्ते काले भवे अ भावे अ । पज्जवलोगो अ तहा अट्ठविहो लोगनिक्खेवो ॥ १ ॥' अर्थः पूर्ववत्, क्षेत्रलोकमधिकृत्याह-त्रिविधमधोलोकादिभेदं ॥ ५३ ॥ तस्मिन्नेव क्षेत्रलोके इदं विचिन्तयेत्—

खिइवलयदीवसागरनरयविमाणभवणाइसंठाणं । वोमाइपइट्ठाणं नियय लोगट्ठिइविहाणं ॥ ५४ ॥

क्षितयो घर्म्माद्या ईषत्प्राग्भारावसाना अष्टौ भूमयः, वलयानि-घनोदधिघनवातात्मकानि घर्मादिसप्तपृथिवीपरिक्षेपीण्येकविंशतिः, द्वीपाः सागराश्चासङ्ख्येययाः, निरयाः-सीमन्तकाद्याः, विमानानि-ज्योतिष्कादिसम्बन्धीनि, भवनानि-असुरादिदशनिकायसम्बन्धीनि, आदिशब्दादसङ्ख्येयव्यन्तरनगरपरिग्रहः, एतेषां संस्थानं विचिन्तयेत्, तथा व्योम-आकाशं, आदिशब्दाद्वाय्वादिपरिग्रहः, व्योमादौ प्रतिष्ठानमस्येति तत्तथा, लोकस्थितिविधानं, विधानं प्रकारः, लोकस्य स्थितिर्मर्यादा

तद्विधानं, ' नियतं ' नित्यं शास्वतं चिन्तयेत् ॥ ५४ ॥

उवओगलक्खणमणाइनिहणमत्थंतरं सरीराओ । जीवमरूविं कारिं भोयं च सयस्स कम्मस्स ॥ ५५ ॥

अर्थान्तरं पृथग्भूतं शरीरात्-शरीरेभ्यः ॥ ५५ ॥

तस्स य सकम्मजणियं जम्माइजलं कसायपायालं । वसणसयसावयमणं मोहावत्तं महाभीमं ॥ ५६ ॥

'तस्य च' जीवस्य स्वकर्म्मजनितं, संसारसागरमिति वक्ष्यति, व्यसनशतश्वापदवन्तं, व्यसनानि-दुःखानि द्यूतादीनि वा ।५६।

अण्णाणमारुएरियसंजोगविजोगवीइसंताणं । संसारसागरमणोरपारमसुहं विचिंतेज्जा ॥ ५७ ॥

तस्स य संतरणसहं सम्मदंसणसुबंधणमणग्घं । णाणमयकण्णधारं चारित्तमयं महापोयं ॥ ५८ ॥

अज्ञानमारुतेनेरितः-प्रेरितः, संयोगवियोगवीचिसन्तानो यस्मिन् स तथा तं ॥ ५७ ॥ अनघं, ज्ञानमयः कर्ण्णधारः-निर्यामकविशेषो यस्मिन् स तथा तं, चारित्रात्मकं महापोतं विचिन्तयेत् ॥ ५८ ॥

संवरकयनिच्छिद्दं तवपवणाइद्धजइणतरवेगं । वेरग्गमग्गपडियं विसोत्तियावीइनिक्खोभं ॥ ५९ ॥

संवरेण कृतं निश्छिद्रं, तपःपवनेनाऽऽविद्धः-प्रेरितः जवनतरः-शीघ्रतरो वेगो यस्य स तथा तं, वैराग्यमार्गे पतितं-गतं, विस्रोतसिकाः-अपध्यानानि ॥ ५९ ॥

आरोढुं मुणिवणिया महग्घसीलंगरयणपडिपुन्नं । जह तं निव्वाणपुरं सिग्घमविग्घेण पावंति ॥ ६० ॥

मुनिवणिजः, पोत एव विशेष्यते-महार्घाणि शीलाङ्गानि-पृथिवीकायसमारम्भपरित्यागादीनि, तान्येव रत्नानि तैः

परिपूर्णस्तं, यथा तन्निर्वाणपुरं शीघ्रमविघ्नेन प्राप्नुवन्ति तथा विचिन्तयेत् ॥ ६० ॥

तत्थ य तिरयणविणिओगमइयमेगंतियं निरावाहं । साभावियं निरुवमं जह सोक्खं अक्खयमुवेंति ॥ ६१ ॥

तत्र च निर्वाणपुरे त्रिरत्नानि-ज्ञानादीनि, विनियोगश्चैषां क्रियाकरणं, ततः प्रसूतेः तदात्मकं, तथैकान्तिकमेकान्त-भावि, यथा सौख्यमक्षयमुपयान्ति-प्राप्नुवन्ति, क्रिया पूर्ववत् ॥ ६१ ॥

किं बहुणा ? सव्वं चिय जीवाइपयत्थवित्थरोवेयं । सव्वनयसमूहमयं झाएज्जा समयसब्भावं ॥ ६२ ॥

किं बहुना भाषितेन ? सर्वमेव जीवादिपदार्थविस्तरोपेतं, सर्वनयसमूहात्मकं ध्यायेत्समयसद्भावं-सिद्धान्तार्थं ॥ ६२ ॥ गतं ध्यातव्यं, अथ येऽस्य ध्यातारस्तानाह—

सव्वप्पमायरहिया मुणओ खीणोवसंतमोहा य । झायारो नाणधणा धम्मज्झाणस्स निद्दिट्ठा ॥ ६३ ॥

क्षीणोपशान्तमोहाश्च, चशब्दादन्ये वाऽप्रमादिनो ध्यातारो धर्म्मध्यानस्य ॥ ६३ ॥ लाघवार्थं शुक्लध्यानस्याप्याह—

एएच्चिय पुव्वाणं पुव्वधरा सुप्पसत्थसंघयणा । दोण्ह सजोगाजोगा सुक्काण पराण केवलिणो ॥ ६४ ॥

'एते एव' ये धर्म्मध्यानस्य ध्यातार उक्ताः, पूर्वयोः शुक्लध्यानभेदयोः पृथक्त्ववितर्कसविचारं एकत्ववितर्कमविचारं इत्यनयोर्ध्यातारः, अयं पुनर्विशेषः-पूर्वधराश्चतुर्दशपूर्वविदः, तदुपयुक्ताः, इदं च पूर्वधरविशेषणमप्रमादवतामेव ज्ञेयं, न क्षीण-मोहादीनां (निर्ग्रन्थानां), माषतुषमरुदेव्यादीनामपूर्वधराणामपि तदुपपत्तेः, 'सुप्रशस्तसंहननाः' आद्यसंहननयुक्ताः, इदमोघत एव विशेषणं, तथा द्वयोः शुक्लयोः परयोः सूक्ष्मक्रियानिवृत्तिव्युपरतक्रियाऽप्रतिपातिलक्षणयोर्यथासङ्ख्यं सयोगायोग-

केवलिनो ध्यातारः ॥ ६४ ॥ अनुप्रेक्षाद्वारमाह—

झाणोवरमेऽवि मुणी णिच्चमणिच्चाइभावणापरमो । होइ सुभावियचित्तो धम्मज्झाणेण जो पुव्विं ॥ ६५ ॥

धर्म्मध्यानोपरमेऽपि मुनिर्नित्यमनित्यादिचिन्तनापरमः स्यात्, अनित्यताऽशरणैकत्वसंसारानुगताश्चतस्रोऽनुप्रेक्षा भावयितव्या अनित्यादिचिन्तनापरमः स्यात्, सुभावितचित्तो धर्मध्यानेन यः कश्चित्पूर्वं ॥ ६५ ॥ लेश्याद्वारमाह—

होंति कमविसुद्धाओ लेसाओ पीयपम्हसुक्काओ । धम्मज्झाणोवगयस्स तिव्वमंदाइभेयाओ ॥ ६६ ॥

'क्रमविशुद्धाः' परिपाटिविशुद्धाः, अयमर्थः—पीतलेश्यायाः पद्मलेश्या विशुद्धा तस्या अपि शुक्ललेश्या, एताः परिणामविशेषास्तीव्रमन्दादिभेदाः ॥ ६६ ॥ लिङ्गमाह—

आगमउवएसाणाणिसग्गओ जं जिणप्पणीआणं । भावाणं सद्दहणं धम्मज्झाणस्स तं लिंगं ॥ ६७ ॥

आगमोपदेशाज्ञानिसर्गतः, तत्रागमः सूत्रं, तदनुसारेण कथनमुपदेशः, आज्ञा त्वर्थो, निसर्गः स्वभावः, तल्लिङ्गं, तत्त्वश्रद्धानेन लिङ्ग्यते धर्म्मध्यानी ॥ ६७ ॥ किञ्च—

जिणसाहूगुणकित्तणपसंसणाविणयदाणसंपण्णो । सुअसीलसंजमरओ धम्मज्झाणी मुणेयव्वो ॥ ६८ ॥

श्रुतं सामायिकादि, शीलं व्रतादिलक्षणं, संयमस्तु प्राणातिपातादिनिवृत्तिलक्षणः, एतेषु रतो धर्मध्यानी ज्ञातव्यः ॥६८॥ फलं शुक्लफलाधिकारे वक्ष्यति, उक्तं धर्म्मध्यानं, शुक्लस्यापि भावनादीनि द्वादश द्वाराणि स्युः, तत्र भावनादेशकालासनविशेषेषु न विशेष इत्यालम्बनादीन्याह—

अह खंतिमद्दवज्जवमुत्तीओ जिणमयप्पहाणाओ । आलंबणाइं जेहिं सुक्कज्झाणं समारुहइ ॥ ६९ ॥

अथेत्यासनविशेषानन्तर्ये क्षान्तिमार्दवार्जवमुक्तयः क्रोधादिपरित्यागरूपाः, जिनमतप्रधानाः कर्मक्षयहेतुतामधिकृत्य, ततश्चैता आलम्बनानि ॥ ६९ ॥ क्रमश्चाद्ययोर्द्वयोधर्मध्यान एवोक्तः, अत्र त्वयं विशेषः—

तिहुयणविसयं कमसो संखिविउ मणो अणुंमि छउमत्थो । झायइ सुनिप्पकंपो झाणं अमणो जिणो होइ ॥ ७० ॥

संक्षिप्य मनः, अणौ-परमाणौ, विधायेति शेषः, ध्यायति सुनिष्प्रकम्पोऽतीव निश्चलः ध्यानं शुक्लं, ततोऽपि प्रयत्नविशेषान्मनोऽपनीयाऽमना जिनः स्यात् चरमयोर्द्वयोर्ध्यातेति शेषः, तत्राप्याद्यस्यान्तर्मुहूर्त्तेन शैलेशीमप्राप्तः, तस्यां च द्वितीयस्य ॥७०॥ आह-कथं छद्मस्थस्त्रिभुवनविषयं मनः संक्षिप्याणौ धारयति ?, केवली वा ततोऽप्यपनयति ?, उच्यते—

जह सव्वसरीरगयं मंतेण विसं निरुंभए डंके । तत्तो पुणोऽवणिज्जइ पहाणयरमंतजोगेणं ॥ ७१ ॥

निरुध्यते निश्चयेन ध्रियते डङ्के, ततो डङ्कात् पुनरपनीयते प्रधानतरमन्त्रेण योगैर्वा औषधैः ॥ ७१ ॥ उपनयमाह—

तह तिहुयणतणुविसयं मणोविसं जोगमंतबलजुत्तो । परमाणुंमि निरुंभइ अवणेइ तओवि जिणवेज्जो ॥ ७२ ॥

त्रिभुवनतनुविषयं, मन्त्रयोगबलयुक्तो जिनवचनध्यानसामर्थ्यसंपन्नः, ततोऽपि परमाणोः जिनवैद्यः ॥ ७२ ॥ दृष्टान्तान्तरमाह—

उस्सारियेंधणभरो जह परिहाइ कमसो हुयासुव्व । थोविंधणावसेसो निव्वाइ तओऽवणीओ य ॥ ७३ ॥

अपसारितेन्धनभरः हुताशो, 'वा' विकल्पार्थः, स्तोकेन्धनावशेषः हुताशमात्रं स्यात्तथा निर्वाति, ततः स्तोकेन्धनाद-

पनीतश्च ॥ ७३ ॥

तह विसइंधणहीणो मणोहुयासो कमेण तणुयंमि । विसइंधणे निरुंभइ निव्वाइ तओऽवणीओ य ॥ ७४ ॥

क्रमेण 'तनुके' कृशे 'विषयेन्धने' अणौ निरुध्यते ॥ ७४ ॥ पुनर्दृष्टान्तोपनयावाह—

तोयमिव नालियाए तत्तायसभायणोदरत्थ वा । परिहाइ कमेण जहा तह जोगिमणोजलं जाण ॥ ७५ ॥

'नालिकायाः' घटिकायाः, तथा तप्तं च तदायसभाजनं च, तदुदरस्थं वा, योगिमनोजलं जानीहि ॥ ७५ ॥ केवली मनोयोगं निरुणद्धीत्युक्तं, शेषयोगनिरोधविधिमाह—

एवं चिय वयजोगं निरुंभइ कमेण कायजोगंपि । तो सेलेसोव्व थिरो सेलेसी केवली होइ ॥ ७६ ॥

एवमेव एभिरेव विषादिदृष्टान्तैर्वाग्योगं निरुणद्धि ॥ ७६ ॥ उक्तः क्रमः ध्यातव्यमाह—

उप्पायट्ठिइभंगाइपज्जयाणं जमेगवत्थुंमि । नाणानयाणुसरणं पुव्वगयसुयाणुसारेणं ॥ ७७ ॥

उत्पादस्थितिभङ्गादिपर्यायाणां यदेकस्मिन् द्रव्ये अण्वात्मादौ, नानानयैः-द्रव्यास्तिकादिभिरनुस्मरणं-चिन्तनं, पूर्वगत-श्रुतानुसारेण पूर्वविदः, मरुदेव्यादीनां त्वन्यथा ॥ ७७ ॥ तत्—

सवियारमत्थवंजणजोगंतरओ तयं पढमसुक्कं । होइ पुहुत्तवितक्कं सवियारमरागभावस्स ॥ ७८ ॥

सविचारं, विचारोऽर्थव्यञ्जनयोगसङ्क्रमः, अर्थो द्रव्यं, व्यञ्जनं शब्दो, योगो मनःप्रभृति, एतदन्तरतः-एतद्भे(तावद्भे)देन सविचारं, तकमेतत् प्रथमं शुक्लं नाम्ना पृथक्त्ववितर्कं सविचारं, पृथक्त्वेन-भेदेन विस्तीर्णभावेनान्ये वितर्कः-श्रुतं यस्मि-

स्तथा, स्यादरागभावस्य ॥ ७८ ॥

जं पुण सुणिप्पकंपं निवायसरणप्पईवमिव चित्तं । उप्पायठिइभंगाइयाणमेगंमि पज्जाए ॥ ७९ ॥

निवातशरणप्रदीप इव चित्तं, उत्पादस्थितिभङ्गादीनामेकस्मिन् पर्याये ॥ ७९ ॥ ततः—

अवियारमत्थवंजणजोगंतरओ तयं बितियसुक्कं । पुव्वगयसुयालंबणमेगत्तवितक्कमवियारं ॥ ८० ॥

अविचारं—असङ्क्रमं, अर्थव्यञ्जनयोगान्तरतः, तद् द्वितीयं शुक्लं स्यात्, 'एकत्ववितर्कमविचारं' एकत्वेनाभेदेन वितर्को व्यञ्जनरूपोऽर्थरूपो वा यस्य तत्तथा ॥ ८० ॥

निव्वाणगमणकाले केवलिणो दरनिरुद्धजोगस्स । सुहुमकिरियाऽनियट्टिं तइयं तणुकायकिरियस्स ॥ ८१ ॥

मोक्षगमनप्रत्यासन्नसमये केवलिनो मनोवाग्योगद्वये निरुद्धे सति अर्द्धनिरोध(रुद्ध)काययोगस्य 'सूक्ष्मक्रियाऽनिवर्ति' सूक्ष्मक्रियं च तदनिवर्ति च, प्रवर्द्धमानतरपरिणामान्न निवर्त्तते अनिवर्त्ति, तृतीयं ध्यानं, 'तनुकायक्रियस्य' तन्वी उच्छ्वासनिःश्वासादिलक्षणा कायक्रिया यस्य स तथाविधस्तस्य ॥ ८१ ॥

तस्सेव य सेलेसीगयस्स सेलोव्व णिप्पकंपस्स । वोच्छिन्नकिरियमप्पडिवाइ ज्झाणं परमसुक्कं ॥ ८२ ॥

इत्थं चतुर्विधं ध्यानमुक्त्वा तत्प्रतिबद्धमेव वक्तव्यताशेषमाह—

पढमं जोगे जोगेसु वा मयं बितियमेव जोगंमि । तइयं च कायजोगे सुक्कमजोगंमि य चउत्थं ॥ ८३ ॥

प्रथमं पृथक्त्ववितर्कं सविचारं, 'योगे' मनआदौ योगेषु वा सर्वेषु मतमिष्टं, तच्चागमिकश्रुतपाठिनः, द्वितीयमेकत्व-

वितर्कमविचारं, एकयोग एवान्यतरस्मिन् सङ्क्रमाभावात्, तृतीयं च सूक्ष्मक्रियानिवर्ति काययोगे, न [योगान्तरे], शुक्लमयोगिनि-शैलेशीकेवलिनि चतुर्थं व्युपरतक्रियाऽप्रतिपाति ॥ ८३ ॥ आह-शुक्लोपरिमभेदद्वयेऽमनस्कत्वात्केवलिनो ध्यानं च मनोविशेषः 'ध्यै चिन्ताया'मिति पाठात्, तदेतत्कथं स्यात्?, उच्यते—

जह छउमत्थस्स मणो झाणं भण्णइ सुनिच्चलो संतो। तह केवलिणो काओ सुनिच्चलो भन्नए झाणं ॥ ८४ ॥

यथा छद्मस्थस्य मनो ध्यानं भण्यते सुनिश्चलं सत्, तथा योगत्वाव्यभिचारात्केवलिनः कायः ॥ ८४ ॥ आह-चतुर्थे निरुद्धत्वादसावपि न स्यात्तत्र का वार्त्ता?, उच्यते—

पुव्वप्पओगओ चिय कम्मविणिज्जरणहेउतो यावि। सद्दत्थबहुत्ताओ तह जिणचंदागमाओ य ॥ ८५ ॥

चित्ताभावेवि सया सुहुमोवरयकिरियाइ भण्णंति। जीवोवओगसब्भावओ भवत्थस्स झाणाइं ॥ ८६ ॥

चित्ताभावेऽपि सति सूक्ष्मोपरतक्रियो भण्यते, सूक्ष्मग्रहणात् सूक्ष्मक्रियाऽनिवर्तिनो ग्रहणं, उपरतग्रहणाद् व्युपरतक्रियाऽप्रतिपातिनः, पूर्वप्रयोगादिति हेतुः, कुलालचक्रभ्रमणवत्, यथा तच्चक्रं भ्रमणनिमित्तदण्डादिक्रियाऽभावेऽपि भ्रमति तथाऽस्यापि मनःप्रभृतियोगोपरमेऽपि जीवोपयोगसद्भावतो भावमनसो भावाद्भवस्थस्य ध्याने, एवं शेषहेतवोऽपि योजनीयाः, विशेषस्तूच्यते-'कर्मविनिर्जरणहेतुतश्चापि' क्षपकश्रेणिवत् क्षपकश्रेण्यामिवास्य भवोपग्राहिकर्म्मनिर्जरेत्यर्थः, 'तथा शब्दार्थबहुत्वात्' यथा एकस्यैव हरिशब्दस्य शक्रशाखामृगादयोऽनेकार्थाः, एवं ध्यानशब्दस्यापि, 'ध्यै चिन्तायां' 'ध्यै काययोगनिरोधे', 'ध्यै अयोगित्वे' इत्यादि, तथा जिनचन्द्रागमाच्चैतदेवं ॥ ८५-८६ ॥ उक्तं ध्यातव्यं, ध्यातारः,

प्रागुक्ताः, अथानुप्रेक्षा आह—

सुक्कज्झाणसुभावियचित्तो चिंतेइ झाणविरमेऽवि । णिययमणुप्पेहाओ चत्तारि चरित्तसंपन्नो ॥ ८७ ॥

नियतमनुप्रेक्षाश्चतस्रः, चारित्रसम्पन्नस्तत्परिणामरहितस्य तदभावात् ॥ ८७ ॥ ताश्चैताः—

आसवदारावाए तह संसारासुहाणुभावं च । भवसंताणमणंतं वत्थूणं विपरिणामं च ॥ ८८ ॥

आश्रवद्वाराणि—मिथ्यात्वादीनि, तदपायान्—दुःखलक्षणान् , तथा संसाराशुभानुभावं, भवसन्तानमनन्तं भाविनं नारकाद्यपेक्षया, वस्तूनां विपरिणामं च, एताश्चतस्रोऽप्यपायाशुभानन्तविपरिणामानुप्रेक्षा आद्यभेदद्वयसङ्गता एव ज्ञेयाः ॥ ८८ ॥
अथ लेश्या आह—

सुक्काए लेसाए दो ततियं परमसुक्कलेस्साए । थिरयाजियसेलेसिं लेसाईयं परमसुक्कं ॥ ८९ ॥

सामान्येन शुक्लायां लेश्यायां 'द्वे' आद्ये, तृतीयं परमशुक्ललेश्यायां, लेश्यातीतं परमशुक्लं चतुर्थं ॥ ८९ ॥ लिङ्गद्वारमाह-

अवहासंमोहविवेगविउसग्गा तस्स होंति लिंगाइं । लिंगिज्जइ जेहिं मुणी सुक्कज्झाणोवगयचित्तो ॥ ९० ॥

अवधासम्मोहविवेकव्युत्सर्गाः 'तस्य' शुक्लध्यानस्य लिङ्गानि ॥ ९० ॥ भावार्थमाह—

चालिज्जइ बीभेइ व धीरो न परीसहोवसग्गेहिं । सुहुमेसु न संमुज्झइ भावेसु न देवमायासु ॥ ९१ ॥

चाल्यते ध्यानान्न परीषहोपसर्गैर्बिभेति वा धीरो न तेभ्य इत्यवधलिङ्गं ॥ ९१ ॥

देहविवित्तं पेच्छइ अप्पाणं तह य सव्वसंजोगे । देहोवहिवोसग्गं निस्संगो सव्वहा कुणइ ॥ ९२ ॥

देहविविक्तं पश्यत्यात्मानं तथा सर्वसंयोगान् इति विवेकलिङ्गं, देहोपधिव्युत्सर्गं निःसङ्गः सर्वथा करोतीति व्युत्सर्ग-लिङ्गं ॥ ९२ ॥ पूर्वं धर्म्मफलमाह—

होंति सुहासवसंवरविणिज्जरामरसुहाइं विउलाइं । झाणवरस्स फलाइं सुहाणुबंधीणि धम्मस्स ॥ ९३ ॥

शुभाश्रवः–पुण्याश्रवः, संवरो–अशुभकर्म्मागमनिरोधः, विनिर्जरा–कर्म्मक्षयः, अमरसुखानि च, 'शुभानुबन्धीनि' सुकुलप्रत्यायातिपुनर्बोधिलाभभोगप्रव्रज्या[केवलशैलेस्य]पवर्गानुबन्धीनि धर्मध्यानस्य ॥ ९३ ॥ शुक्लमधिकृत्याह—

ते य विसेसेण सुभासवादओऽणुत्तरामरसुहं च । दोण्हं सुक्काण फलं परिनिव्वाणं परिल्लाणं ॥ ९४ ॥

ते च विशेषेण शुभाश्रवादयोऽनुत्तरामरसुखं च द्वयोः शुक्लयोः फलमाद्ययोः, परिनिर्वाणं 'परिल्लाणं'ति चरमयोर्द्वयोः ॥ ९४ ॥ अथवा सामान्येनैवाह—

आसवदारा संसारहेयवो जं ण धम्मसुक्केसु । संसारकारणाइं तओ धुवं धम्मसुक्काइं ॥ ९५ ॥

संसारप्रतिपक्षतया च मोक्षहेतुर्ध्यानमित्याह—

संवरविणिज्जराओ मोक्खस्स पहो तवो पहो तासिं । झाणं च पहाणंगं तवस्स तो मोक्खहेऊयं ॥ ९६ ॥

तपः पन्थाः 'तयोः' संवरनिर्जरयोः, मोक्षहेतुस्तद्ध्यानं ॥ ९६ ॥ अमुमेवार्थं दृष्टान्तैराह—

अंबरलोहमहीणं कमसो जह मलकलंकपंकाणं । सोज्झावणयणसोसे साहेंति जलाणलाइच्चा ॥ ९७ ॥

मलकलङ्कपङ्कानां यथासङ्ख्यं, शोध्यपनयनशोषान् यथासङ्ख्यमेव साधयन्ति जलानलादित्याः ॥ ९७ ॥

तह सोज्झाइसमत्था जीवंवरलोहमेइणिगयाणं । झाणजलाणलसूरा कम्ममलकलंकपंकाणं ॥ ९८ ॥

शोष्यादिसमर्थाः ध्यानमेव जलानलसूर्याः, कर्मैव मलकलङ्कपङ्कास्तेषां ॥ ९८ ॥ किञ्च—

तापो सोसो मेओ जोगाणं झाणओ जहा निययं । तह तावसोसभेया कम्मस्सवि झाइणो नियमा ॥ ९९ ॥

योगानां ध्यानतो यथा नियतमवश्यं, तापो दुःखं, तत एव शोषो दौर्बल्यं, तत एव भेदो विदारणं वागादीनां, तथा तापादयः कर्मणोऽपि स्युर्ध्यायिनः ॥ ९९ ॥ किञ्च—

जह रोगासयसमणं विसोसणविरेयणोसहविहीहिं । तह कम्मामयसमणं झाणाणसणाइजोगेहिं ॥ १०० ॥

रोगाशयशमनं रोगनिदानचिकित्सा विशोषणविरेचनौषधविधिभिरभोजनादिप्रकारैः, तथा कर्मामयशमनं ध्यानानशनादिभियोगैः ॥ १०० ॥ किञ्च—

जह चिरसंचियमिंधणमनलो पवणसहिओ दुयं दहइ । तह कम्मेंधणममियं खणेण झाणाणलो डहइ ॥ १०१ ॥

कर्मेन्धनममितं ॥ १०१ ॥

जह वा घणसंघाया खणेण पवणाहया विलिज्जंति । झाणपवणावहूया तह कम्मघणा विलिज्जंति ॥ १०२ ॥

ध्यानपवनावधूताः ॥ १०२ ॥ इदमन्यदिहलोकफलं—

न कसायसमुत्थेहि य वाहिज्जइ माणसेहिं दुक्खेहिं । ईसाविसायसोगाइएहिं झाणोवगयचित्तो ॥ १०३ ॥

न बाध्यते न पीड्यते, प्रतिपक्षाभ्युदयोपलम्भजनितो मत्सरः ईर्ष्या, विषादः—वैक्लव्यं, आदेर्हर्षादिग्रहः ॥ १०३ ॥

सीयायवाइएहि य सारीरेहिं सुबहुप्पगारेहिं । झाणसुनिच्चलचित्तो न वहिज्जइ निज्जरापेही ॥ १०४ ॥

न बाध्यते, ध्यानसुखात्, अथवा न शक्यते चालयितुं निर्जरापेक्षी ॥ १०४ ॥ उक्तं फलं, उपसंहरन्नाह—

इय सवगुणाधाणं दिट्ठादिट्ठसुहसाहणं झाणं । सुपसत्थं सद्धेयं नेयं झेयं च निच्चंपि ॥ १०५ ॥

एवं सर्वगुणाधानं ध्येयं, नित्यमपि ॥ १०५ ॥ आह—एवं शेषक्रियालोपः प्राप्नोति, न, तदासेवनस्यापि तत्त्वतो ध्यानत्वात्, नास्ति काचिदसौ क्रिया या आगमानुसारेण क्रियमाणा साधूनां ध्यानं न स्यात् अपि तु ध्यानमेव, पंचु० ॥ समाप्ता ध्यानशतकावचूर्णिः ॥

पडिक्कमामि पंचहिं समिईहिं—ईरियासमिइए भासासमिइए एसणासमिइए आयाणभंड-मत्तनिक्खेवणासमिइए उच्चारपासवणखेलजल्लसिंघाणपारिट्ठावणियासमिइए (सूत्रम्)

पारिट्ठावणियविहिं वोच्छामि धीरपुरिसपण्णत्तं । जं णाऊण सुविहिया पवयणसारं उवलहंति ॥ १ ॥

अत्र पारिष्ठापनिकानिर्युक्तिः धीरपुरुषप्रज्ञप्तं, अर्थसूत्राभ्यां तीर्थकृद्गणधरप्ररूपितं, प्रवचनसारं पश्यन्ति (जानन्ति) ॥१॥

एगेंदियनोएगेंदियपारिट्ठावणिया समासओ दुविहा । एएसिं तु पयाणं पत्तेय परूवणं वोच्छं ॥ २ ॥

सा पारिष्ठापनिका ओघत एकेन्द्रियनोएकेन्द्रियपरिष्ठाप्यवस्तुभेदेन द्विधा स्यात्, आह च-[एकेन्द्रियाः-पृथिव्यादयः]

१ इयं गाथा क्वापि न प्राप्ता अतो न दर्शिता ।

नोएकेन्द्रियास्त्रसादयः, अनयोरेकेन्द्रियनोएकेन्द्रियलक्षणयोः प्रत्येकं ' प्ररूपणां ' स्वरूपकथनां वक्ष्ये ॥ २ ॥

पुढवी आउक्काए तेऊवाऊवणस्सई चेव । एगेंदिय पंचविहा तज्जाय तहा य अतज्जाय ॥ ३ ॥

एतेषां चैकेन्द्रियाणां पारिस्थापनिकी द्विधा–तज्जातपारिस्थापनिकी अतज्जातपारिस्थापनिकी च, अनयोर्भावार्थमग्रे वक्ष्यति ॥ ३ ॥ आह—

दुविहं च होइ गहणं आयसमुत्थं च परसमुत्थं च । एक्केकंपि य दुविहं आभोगे तह अणाभोगे ॥ ४ ॥

ग्रहणेऽतिरिक्तस्य परिस्थापना स्यात्तत्र पृथिव्यादीनां कथं ग्रहणं?, उच्यते–आत्मसमुत्थं स्वयमेव गृह्णतः, परसमुत्थं परस्माद् गृह्णतः, पुनरेकैकं द्विविधं–आभोगे सति तथानाभोगे ॥ ४ ॥ भावार्थोऽयं— *आय० ॥ १ ॥ आय० ॥ २ ॥ अह्यादिदष्टे साधुरहिना दष्टो विषं भक्षितं, विषस्फोटिका वा उत्थिता ॥ २ ॥ मग्गि० ॥ ३ ॥ अचित्तः पृथिवीकायः, प्रथमं परस्मान्मार्ग्यते, अलब्धे स्वयमानीयतेऽप्राप्तौ मिश्रो हलखनन(नोत्थ)कुड्यादिलग्नः, तस्याप्यप्राप्तौ सचित्तोऽप्यानीयते ॥ ३ ॥ आह—हल० ॥ ४ ॥ स्वयमानीयतेऽटवीतः, पथि वल्मीकदग्धक्षेत्रेभ्यः ॥ ४ ॥ मग्गि० ॥ ५ ॥ नवरमाशुकारिणि कार्ये नायं नियमः, तत्र यः प्राप्तः स आनीयते, एवमाभोगतः कार्ये लवणमपि लाति ॥ ५ ॥ आय० ॥ ६ ॥ अनाभोगतो ज्ञात्वा वा अजीवं गृह्णीयात्, मिश्रादिलवणमृत्तिकादि, खण्डेखण्डीकृते लवणे जिघृक्षते (क्षति) अखण्ड-

* एताः सप्तत्रिंशद्गाथाः क्वापि न लब्धा अतोऽत्र न लिखिता, किन्तु यथा अवचूर्णिकारेण तद्व्याख्या कृता तथैव दर्शिता, एवमग्रेऽपि यत्र मूलगाथानुपलब्धिस्तत्र तथैवावगन्तव्यम् ।

लवणं गृहीतं स्यात्, तत्तथै(त्रै)व त्यजेत् इत्यात्मसमुत्थं द्विविधं स्यात् ॥ ६ ॥ एए० ॥ ७ ॥ आभोगानाभोगाभ्यां द्विविधं ॥ ७ ॥ इत्थं०.॥ ८ ॥ कार्ये सिद्धे यद्यदीयमुद्धृत्तं तत्तस्यैव दातव्यं, तस्यानिच्छायां पृच्छेत्–कुत एतदानीतं ?, शिष्टे कथिते तत्र त्यजेत्, अशिष्टे वर्णादिभिर्ज्ञात्वा आकरे परिस्थापयेत् ॥ ८ ॥ वाघा० ॥ ९ ॥ व्याघाते भयविकालादिना तत्र गन्तुमशक्तौ मधुरे शुष्के कर्परदले कृत्वा परिस्थाप्यते, तस्याभावे वटपिप्पलादिपत्रे कृत्वा आबाधावर्जिते स्थाने ॥९॥ आया० ॥१०॥ विषकुम्भो रोगविशेषः स हन्तव्यः, विषस्फोटिका वा सेक्तव्या, विषं वा भक्षितं, मूर्च्छया वा पतितः, ग्लानो वा, एवमादिषु यतना इयं ॥ १० ॥ मग्गि० ॥ ११ ॥ अयं भावार्थः ॥ ११ ॥ अह्ठु० ॥ १२ ॥ अधुनोद्धृत्तं तत्कालनिष्पन्नं 'अट्ठिकराइ'त्ति तन्दुलोदकादि, क्षुद्रह्रदपुष्करादिभ्यः किञ्चिन्मिश्रमानीयते ॥ १२ ॥ मग्गि० ॥ १३ ॥ आतुरे कार्ये सचित्तमपि ॥ १३ ॥ आय० ॥ १४ ॥ अनाभोगतः कोङ्कणदेशे पानीयमम्बिलं चैकत्र वेदिकायां स्यात्, अविरतिका मार्गिता सती भणति इतो गृहाण, साधूना चाम्लधिया पानीयं, गृहीतं, ज्ञाते ॥ १४ ॥ इत्थ० ॥ १५ ॥ नादेयं नद्यां, कौपं कूपे, ताडागं तडागे क्षिपेत् ॥ १५ ॥ वड० ॥ १६ ॥ नदीजलं नद्यां, एवं तटाकादिष्वपि स्वस्वस्थाने शनैस्त्यजेत् यथा उज्जररिल्लिका न स्युः, पत्रादिषु पत्राभावे भाजनेन यतनया त्यजति ॥ १६ ॥ छिन्न० ॥ १७ ॥ च्छिन्नतटे अवटे कूपे पात्रं दवरकेण शिक्यके बध्वा मध्ये मुञ्चेत्, ईषदप्राप्ते जले मूलदवरकमुत्क्षिप्य जलं विगिञ्चेत् ॥ १७ ॥ वाघा० ॥ १८ ॥ व्याघाते भयादिना कूपगमनासामर्थ्ये [स]पतद्ग्रहं तज्जलं क्षीरद्रुमाधो व्युत्सृजति, पात्राभावे आर्द्रपृथिवीकायं मार्गित्वा तत्र परिस्थापयति, असति शुष्कमप्यार्द्रयित्वोष्णोदकेन क्षीरद्रुमाधस्तज्जलं निसृजेत् ॥१८॥ चिक्ख०

॥ १९ ॥ निर्व्याघाते चिक्खल्ले खड्डां कृत्वा पात्रनालकेन पात्रकण्ठकेन निमृज्य जलं च्छायां कुर्यात्, कण्टकादिभिश्च रक्षेत् ॥ १९ ॥ मीसि० ॥ २० ॥ प्रत्यनीकया मिश्रोऽप्कायो दत्तः च्छर्द्यते, साधोरनाभोगात् पूर्वगृहीते मिश्रे जले स्तोके परिणते भवति परिभोगः ॥ २० ॥ नवि० ॥ नापि परिणमेत यावता कालेन स्थण्डिलं गम्यते, परिणतोऽपि वा तत्र गतानां न भोगार्हः, किन्तु प्रति(परि)ष्ठाप्यः प्रवचनविधिना यतिना, तत्परिभोगेऽनवस्थादोषप्रसङ्गात् ॥ २१ ॥ आय० ॥ २२ ॥ शूलादिकृते, सर्पडङ्कदाहार्थं, स्फोटिकावातग्रन्थिअन्त्रवृद्धिउदरशूलादितापनार्थं वा, वसतौ वाऽहिः प्रविष्टः इत्यादि-कार्ये तेजस्कायस्य ग्रहणं, स एव विधिः, पूर्वमचित्तादि ग्रहणरूपः, अयं विशेषः ॥ २२ ॥ अचि० ॥ २३ ॥ कृते कार्ये यत आनीतस्तत्रैव क्षिप्यते, स्यान्न दद्यात्ततः ॥ सक० ॥ २४ ॥ स्वकाष्ठोद्भवेऽग्नौ, तदभावेऽन्यस्मिन्वा, तदभावे तज्जातकेन च्छारेण च्छाद्यते, पश्चादसदृशेनापि, दीपके तु विधिः (एवं) ॥ २४ ॥ उग्गा० ॥ २५ ॥ उद्गाल्यते तैलं वर्त्तिं निष्पीड्य यतनया, मल्लकसम्पुटे निर्जनं यथायुष्कं परिणमेत्पश्चात् ॥ २५ ॥ कज्जं० ॥ २६ ॥ ग्लानादिकार्ये मल्लकसम्पुट एव ध्रियते, अनाभोगेन श्लेष्ममल्लकलोचच्छारादिषु, स्वयमग्नेर्ग्रहणं, परं आभोगेन रक्षामिश्रमग्निं दद्यात्, अनाभोगेन पूपिकादिलग्नमग्निं दद्यात्, विधिना विवेकं कुर्यात् ॥ २६ ॥ आय० ॥ २७ ॥ 'बत्थिदइआइ'त्ति । बस्तिर्भस्त्रिका तया दृतिना वा कार्यः स्यात् ॥ २७॥ अचि० ॥ २८॥ अचित्तो मिश्रश्च वायुः कालाद्विज्ञेयः, एकैकोऽपि कालस्त्रिधा ॥उक्को० ॥२९॥ उत्कृष्टादिः उत्कृष्टमध्यजघन्यभेदः, तत्रोत्कृष्टे स्निग्धे शीतकाले बस्त्यादौ ध्मात्वा पूरिते प्रथमपौरुषी यावदचित्तः, द्वितीयस्यां मिश्रः, तृतीयस्यां सचित्तः ॥ २९ ॥ मज्झि० ॥ ३० ॥ मध्यमे शीते चतुर्थ्यां सचित्तः, मन्दे पञ्चम्यां सचित्तः ॥ ३० ॥

लुक्खे० ॥ ३१ ॥ रूक्षे काले उष्णे मन्दे मध्यमे उत्कृष्टे क्रमेण त्रीणि चत्वारि पञ्च चैव दिनानि वाच्यानि । एवं वस्तेर्दृतेर्वा पूर्वं ध्मातस्य एष एव कालविभागः ॥ ३१ ॥ ताहे० ॥ ३२ ॥ तदैव ध्मात्वा यो जले क्षिप्यते उत्तरणाय, स प्रथमे हस्तशतेऽचित्तो यावत्तृतीये सचित्तः । पूर्वमचित्तो मार्ग्यते, पश्चान्मिश्रः पश्चात्सचित्तोऽपि, अनाभोगेन एषोऽचित्त इति मिश्रसचित्तौ गृहीतौ, परोऽप्येवमेव जानन्नजानन्वा दद्यात् ॥ ३३ ॥ इत्थ० ॥ ३४ ॥ ज्ञाते सति सचित्ते तस्यैव, अनिच्छतोऽस्य अपवरके सकपाटे प्रविश्य शनैर्मुच्यते, तदभावे शालायां, तदभावे वनगहने मधुरे, पश्चात् सङ्घाटिका–बृहत्प्रमाणा प्रच्छादनपटी, तया प्रावृत्य यतनया मुच्यते, गृहसङ्घाटिकान्तरे वा, मान्यविराधनेति सचित्तादिवातस्य सर्वस्याप्येष परिष्ठापनविधिः ॥ ३३ ॥ आय० ॥ ३४ ॥ आभोगतो वनस्पतिकाये मूलादीनां ग्रहणं ग्लानादिकार्ये स्यात्, अनाभोगतो भक्ते लोट्टः पतितः, पिट्ठकं कुक्कुसा वा ॥ ३५ ॥ पुव्वु० ॥ ३६ ॥ अत्र स एव पौरुषीविभागः, दुष्कुट्टिते चिरमपि, परो राद्धचपलकमिश्राणि पीलुकानि कुरुच्छविकायां (क्षिप्रचट्टिकायां) वान्तः क्षिप्त्वा दद्यात्, अनाभोगेन वा कथञ्चिदचालितकणिकादि गृहीतं स्यात् ॥ ३६ ॥ एत्थ० ॥ ३७ ॥ प्रथमं परपात्रे पश्चात्स्वपात्रे त्याज्यं, संस्तारकादौ पनके जाते सति आर्द्रमाक्षेत्रे शुष्कं च शुष्कस्थाने 'विविचा' विगिञ्चेत्, शेषाण्याकराभावे मधुरभुवि, कर्परे पत्रे वा ॥ ३७ ॥ तज्जातातज्जातपरिस्थापनिकीलक्षणं—

तज्जायपरिट्ठवणा आगारमाईसु होइ बोद्धवा। अतज्जायपरिट्ठवणा कप्परमाईसु बोद्धवा ॥२०५ (भा०)

तज्जातीयपरिस्थापनिकी आकरादिषु परिष्ठापनं कुर्वतः स्यात्, आकराः पृथिव्याकराद्या दर्शिता एव ॥ २०५ ॥ गता

एकेन्द्रियपारिस्थापनिकी, अथ नोएकेन्द्रियपारिस्थापनिकीमाह—

नोएगिंदिएहिं जा सा सा दुविहा होइ आणुपुव्वीए । तसपाणेहिं सुविहिया ! नायव्वा नोतसेहिं च ॥ ५ ॥

सुविहित इति शिष्यामन्त्रणं, नोत्रसाः-आहारादयः, तैः करणभूतैः ॥ ५ ॥

तसपाणेहिं जा सा सा दुविहा होइ आणुपुव्वीए । विगलिंदियतसेहिं जाणे पंचिंदिएहिं च ॥ ६ ॥

'जाण'त्ति विजानीहि ॥ ६ ॥

विगलिंदिएहिं जा सा सा तिविहा होइ आणुपुव्वीए । बियतियचउरो यावि य तज्जाया तहा अतज्जाया ॥ ७ ॥

'बियतियचउरो यावि य'त्ति द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियांश्चाधिकृत्य, सा च प्रत्येकं द्विभेदा तज्जाते तुल्यजातीये या क्रियते सा तज्जाता, अन्या त्वतज्जाता ॥ ७ ॥ भावार्थोऽयं—बेइं० ॥ १ ॥ जलौकसो गण्डादिकार्ये गृहीताः पश्चात्तत्रैव त्यज्यन्ते, आभोगानाभोगाभ्यां संसक्ताः सक्तवो गृहीतास्तेषु भजना, यदि शोधिताः शुद्ध्यन्ति तदा कार्ये भोक्तव्या नो चेत्त्यक्तव्याः शीतलस्थाने ॥ १ ॥ संस० ॥ २ ॥ यत्र देशे सक्तवः संसक्ता एव लभ्यन्ते तत्र न गम्यते अशिवादौ गमने ते न गृह्यन्ते, कूरो मार्ग्यते, यदि स न स्यात्ततस्तद्दिनजाः सक्तवो गृह्यन्ते, तदभावे द्वित्रिदिनजाः प्रतिलेख्य ग्राह्याः । पानके संसक्ते सपतद्ग्रहं तत् विजने मुच्यते ॥ २ ॥ पाया० ॥ ३ ॥ द्वितीयपात्रस्याऽभावे प्रातिहारिकां अंबिलिं मार्गयेत्, अभावे शुष्कामंबिलिमार्द्रयित्वा क्षिप्यते, अभावे प्रतिश्रये प्रातिहारिकभाजने, त्रिकालं प्रतिलेखना कार्या, परिणतं २ त्यज्यते, सर्वेषु मृतेषु भाजनं प्रत्यर्प्यते, भाजनाभावेऽटव्यां छायायां चिखिल्ले गर्त्तायां निश्छिद्रं लिम्पित्वा पत्रनालेन यतनया प्रक्षिप्यते,

कण्टकैः पत्रैश्च पिधीयते ॥ ३ ॥ पायं० ॥ ४ ॥ तस्मिंश्च पात्रे अशीतपानकादि लाति, अवश्रावणादिना तद् घृष्यते एकं द्वे त्रीणि वा दिनानि, संसक्तपानकमसंसक्तं च नैकत्र धरति, गन्धेनापि संमज्यते, संसक्तं गृहीत्वा विराधनाभयान्न हिण्ड्यते न समुद्दिश्यते, ये च प्राणा दृष्टास्ते परिणतास्ततस्त्रिके प्रेक्षिते–साधुत्रयवीक्षिते शुद्धे भोगोऽनुज्ञातः ॥ ४ ॥ तक्का० ॥ ५ ॥ तक्रादीनामपि नवनीतेऽप्येवं, तन्मध्ये 'उंडि'त्ति एका पिण्डी क्षिप्यते न समुद्दिश्यते, यदि तत्काया द्वीन्द्रियाः प्रेक्षन्ते तदा त्याज्यन्ते, त्रीन्द्रियाणामपि विधिरेवमेव ज्ञेयः ॥ ५ ॥ कीडि० ॥ ६ ॥ कीटिकादिसंसक्तं अनाभोगगृहीतं विरलीकृत्य मुच्यते येन कीटिकादयः प्रयान्ति, उत्पूरो वा स्यात्ततस्तथैव त्यज्यते । संस्तारको मत्कुणैरुपदेहिकादिभिर्वा संसक्तस्त्यज्यते, त्रीन्द्रिया वान्यत्र यतनया संक्राम्यन्ते । लोचे षट्पदिकाः सप्तदिनान् श्राम्यन्ते, केशेभ्यः कृष्ट्वा वस्त्रे स्थाप्यन्ते, कारणं–तत् क्षालनादिकमासाद्यान्यत्राऽबाधे सञ्चार्यन्ते ॥ ६ ॥ चउ० ॥ ७ ॥ चक्षुषि दुष्यति अश्वमक्षिका 'बगाइ' अक्षरकर्षणाय गृहीता, कृते कार्ये त्यज्यते, स्नेहे पतिता मक्षिका रक्षया गुण्ड्यते, परहस्ते भक्ते पानके वा पतितायां मक्षिकायां तदनेषणीयं, संयतहस्ते तक्रादौ पतिता उद्धृत्य त्यज्यते, कोत्थलकारिका–भ्रमरी वस्त्रे पात्रे वा गृहं कुर्यात्तत्त्यज्यते, तत्खण्डं वा छित्त्वा परिष्ठाप्यते, तद्गृहमेव चान्यत्र सङ्क्राम्यते ॥ ७ ॥

पंचिंदिएहिं जा सा सा दुविहा होइ आणुपुव्वीए । मणुएहिं च सुविहिया ! नायव्वा नोयमणुएहिं ॥ ८ ॥

नोमनुजैश्च तिर्यग्भिः ॥ ८ ॥

मणुएहिं खलु जा सा सा दुविहा होइ आणुपुव्वीए । संजयमणुएहिं तह नायव्वाऽसंजएहिं च ॥ ९ ॥

संजयमणुएहिं जा सा सा दुविहा होइ आणुपुव्वीए। सचित्तेहिं सुविहिया! अचित्तेहिं च नायव्वा ॥ १० ॥

सचित्तैर्जीवद्भिरचित्तैश्च मृतैः ॥ ९-१० ॥ यथा च सचित्तसंयतानां ग्रहणपरिस्थापनिकासम्भवस्तथाह—

अणभोग कारणेण व नपुंसमाईसु होइ सचित्ता। वोसिरणं तु नपुंसे सेसे कालं पडिक्खिज्जा ॥ ११ ॥

अनाभोगेन कारणेन वाऽशिवादिलक्षणेन नपुंसकादिषु दीक्षितेषु सत्सु स्यात् सचित्तमनुष्यसंयतपरिस्थापनिका, आदिशब्दाज्जड्डादिग्रहणं, तत्र योऽनाभोगेन दीक्षितस्तस्मिन्नपुंसके व्युत्सृजनं कर्त्तव्यं, शेषकारणदीक्षितो जड्डादिर्वा, तत्र कालं यावता कारणसमाप्तिर्न स्यात्तावत्कालं प्रतीक्षेत, न तावद् व्युत्सृजेत् ॥ ११ ॥ तत्रानेकभेदं कारणमाह—

असिवे ओमोयरिए रायदुट्ठे भए व आगाढे। गेलन्ने उत्तिमट्ठे नाणे तवदंसणचरित्ते ॥ १२ ॥

एतेष्वशिवादिषु उपकुरुते यो नपुंसकादिरसौ दीक्ष्यते, उक्तं च—'रायदुट्ठभएसु ताणट्ठ निवस्स वाऽभिगमणट्ठा। वेज्जो वा सयं तस्स व तप्पिस्सइ गिलाणस्स ॥ १ ॥' राजद्विष्टे राज्ञि द्वेषिणि, भये च प्रत्यनीकादेस्त्राणार्थं, नृपस्य वाभिगमनार्थमावर्जनार्थं, वैद्यो वा स क्लीबः स्वयं, तस्य वशयातस्य वातादिभग्नशरीरस्य ग्लानस्य वा रोगार्त्तस्य 'तप्पिस्सइ'त्ति उपकरिष्यति ॥ १ ॥ 'गुरुणोव्व अप्पणो वा णाणाई गिण्हमाणि तप्पिहिई। अचरणदेसा णिन्ते तप्पे ओमासिवेहिं वा ॥ २ ॥' गुरोरात्मनो वा ज्ञानादि गृह्णतो वा, अचरणदेशान्निर्याति साधुवर्गे उपकरिष्यति, अवमाशिवेषु वा ॥ २ ॥ 'एएहिं कारणेहिं आगाढेहिं तु जो उ पव्वावे। पंडाई सोलसयं कए उ कज्जे विगिंचणया ॥ ३ ॥' दुवि० ॥ ४ ॥ ॥ ३-४ ॥ अज्जा० ॥ ५ ॥ जानतोऽजानतश्च प्रज्ञापना द्वयोरपि क्रियते यथा तत्र प्रव्रज्या न युज्यते, अतो गृहस्थ एव साधूनामुपकुरु यदीच्छसि, ततो

न दीक्षा, अनिच्छतः कार्ये च दीक्षमाणस्यायं विधिः—

कडिपट्टए य छिहली कत्तरिया भंडु लोय पाढे य । धम्मकहसन्निराउल ववहारविकिंचणं कुज्जा ॥ १३ ॥

कडिपट्टं चास्य कुर्यात् शिखां च, अनिच्छतः कर्त्तरिकया केशापनयनं, 'भंडु'त्ति मुण्डनं वा लोचं वा, पाठं च विपरीतं धर्म्मकथाः संज्ञिनः कथयेत् राजकुले व्यवहारं, इत्थं विगिश्चनं-त्यागं कुर्यात् । भावार्थोऽयं-'कडिपट्टभंडछिहली कीरति णवि धम्म अम्ह चेवासी । कत्तरि खुरेणऽणिच्छे, हाणी एकेक जा लोउ ॥ १ ॥' कहिपट्टमनिच्छति भणन्त्यन्ये अस्माकमपि प्रथमं कृत आसीत् ॥ १ ॥ सिह० ॥ २ ॥ कर्त्तर्या भद्रकरणं, अनिच्छति लोचोऽपि क्रियते कार्ये ॥ २ ॥ पाठो० ॥ ३ ॥ पाठो द्विविधशिक्षा, तत्र ग्रहणशिक्षायां ग्राह्यते परमतानि, आसेवनाशिक्षायां चरणकरणं तथा न ग्राह्यते ॥ ३ ॥ किन्तु-' विआरगोयरे थेरसंजुत्तो रत्ति दूरि तरुणाणं । गाहेइ ममंपि तत्तो थेर अजत्तेणं गाहिंति ॥ ४ ॥' विचार-गोचरयोः स्थविरसंयुतो याति, रात्रौ दूरे तरुणानां क्रियते ॥ ४ ॥ ' वेरग्गकहा विसयाणां निंदणा उट्ठनिसियणे गुत्ता । चुक्कखलितंमि बहुसो सरोसमिव तज्जए तरुणा ॥ ५ ॥' सरोषमिव तर्जयन्ति तरुणा विपरिणामाय ॥ ५ ॥ 'कतकज्जा से धम्मं कहिंति मुंचाहि लिंगमेयंति । मा हण दुएवि लोए अणुव्वता तुज्झ नो दिक्खा ॥ ६ ॥' धर्म्मकथाः पाठयन्ति वा कृत-कार्यास्तस्य धर्म्ममाख्यान्ति मा वधीः पर(द्वय)मपि लोकं, अणुव्रतानि तत्र योग्यानि, न दीक्षा ॥ ६ ॥ एवं प्रज्ञापितोऽपि यदा नेच्छति तदा—' सण्णि खरकम्मितो वा भेसेइ कओ इहेस संविग्गो ?। ते सासती रायकुले यदि सो ववहारमग्गिज्जा ॥ ७ ॥' संज्ञिनः-स्वजनाः (श्राद्धाः) खल(र)कर्म्मिकास्तलारक्षास्तेषां प्रज्ञापना क्रियते, तथा ते भेषयन्ति तैः प्रज्ञापितो यदि

याति ततो लट्ठं-भव्यं ॥७॥ 'एएहिं दिक्खिओ हं साहिज्ज लोगो ण याणते कोति । जइ एतेहिं दिक्खितो हं तो ते चिंति ण दिक्खेमो ॥ ८ ॥ ' अथ कदाचित् स नरेन्द्रस्य कथयेत् एते मां दीक्षयित्वा निःसारयन्ति, राजकुले स यद्यज्ञात एतैर्दीक्षित इति ततः प्रतिषेधः क्रियते एष गृही न दीक्षित इति, अथ लिङ्गं दर्शयति ततो भण्यते स्वयं गृहीतलिङ्गोऽयं साधूनां चोलपट्टशिखादेरभावात् ॥ ८ ॥ अथ स भणति—

अज्झाविओ मि एएहिं चेव पडिसेहो, किंचऽहीतं ?, तो । छलियकहाइं कहइ कत्थ जई कत्थ छलियाइं ? ॥ १४ ॥

अध्यापितोऽहमेतैरित्युक्ते प्रतिषेधः कार्यो वाच्यं च किं वाधीतं ? छलितकथादिकर्षणे, क्व यतयः?, क्व च्छलितादयः ?॥१४॥

पुव्वावरसंजुत्तं वेरग्गकरं संततमविरुद्धं । पोराणमद्धमागहभासानिययं हवइ सुत्तं ॥ १५ ॥

जे सुत्तगुणा वुत्ता तव्विवरीयाणि गाहए पुव्विं । निच्छिण्णकारणाणं सा चेव विगिंचणे जयणा ॥ १६ ॥

निस्तीर्णकारणानां सा चैव यतना ॥ १६ ॥ ज्ञातेऽन्यदेशे गत्वा त्यजनं, अन्ये तु श्रीगृहोदाहरणं भणंति-यथा राजन् ! युष्माकं श्रीगृहे यश्छुकति तस्य भवन्तः किं कुर्वन्ति ? राजा-तं निष्कासनादिदण्डेन दण्डयामः, तर्ह्यस्माकमप्यसौ ज्ञानादिरूपं श्रीगृहं विनाशयतीति वयं त्यजाम इत्युक्त्वा त्यज्यते अथ बहुस्वजनो राजवल्लभो वा त्यक्तुं न शक्यते तत्रेयं यतना—

कावालिए सरक्खे तव्वण्णियवसहलिंगरूवेणं । वेडुंबगपव्वइए कायव्व विहीए वोसिरणं ॥ १७ ॥

वृषभो गीतार्थः कापालिकरूपेण तमपि तद्वेषं लात्वा निर्याति, सरजस्कलिङ्गरूपेणेत्यर्थः । ' तवण्णिय'त्ति भिक्षुलिङ्गरूपेण इत्थं ' वेडुंबगपव्वइए 'त्ति नरेन्द्रादिविशिष्टकुलोद्भवो वेडुंबगो भण्यते, तस्मिन् प्रव्रजिते कर्त्तव्यं विधिनोक्तेन व्युत्सृजनं

॥ १७ ॥ भावार्थोऽयं—

निववल्लभबहुपक्खंमि वावि तरुणवसहामिणं बेंति । भिन्नकहाओ भट्ठाण घडइ इह वच्च परतित्थी ॥ १८ ॥

इदं ब्रुवते भिन्नकथातो भ्रष्टानां घटते भवान्, परतीर्थी त्वं इतिकारणाद् व्रज ॥ १८ ॥ स प्राह—

तुमए समगं आमंति निग्गओ भिक्खमाइलक्खेणं । नासइ भिक्खुकमाइसु छोढूण तओवि विपलाइ ॥ १९ ॥

त्वया सहाहं निर्गतोऽस्मि, क्व यामीति, ततो भिक्षादिलक्ष्मणा नश्यति भिक्षुकापालिकादिषु क्षिप्त्वा ॥ १९ ॥

तिविहो य होइ जड्डो भासा सरीरे य करणजड्डो य । भासाजड्डो तिविहो जलमम्मण एलमूओ य ॥ २० ॥

जलमूको यथा जले मग्ने भाषमाणो बुडबुडारावं करोति, न किमप्यवबुद्ध्यते, ईदृग्यस्य शब्दः स जलमूकः । एडको यथा बुब्बुएइ स एलमूकः, मम्मणो यस्य वाक् स्खलति, तस्य कदाचिद्दीक्षा स्यान्मेधागुणतः, ईदृशो ध्वनिः मम्मणस्य नेतरयोर्जडमूकैडमूकयोः ॥ २० ॥ यतः—

दंसणनाणचरित्ते तवे य समिईसु करणजोए य । उवदिट्ठंपि न गेण्हइ जलमूओ एलमूओ य ॥ २१ ॥

णाणायट्ठा दिक्खा भासाजड्डो अपच्चलो तस्स । सो य बहिरो य नियमा गाहण उड्डाह अहिगरणे ॥ २२ ॥

ज्ञानाद्यर्थं दीक्षा, भाषाजड्डश्चाऽप्रत्यलोऽसमर्थः, तस्य ज्ञानादिकृत्यस्य ग्राहणे उड्डाहाधिकरणे ॥ २१-२२ ॥

तिविहो सरीरजड्डो पंथे भिक्खे य होइ वंदणए । एएहिं कारणेहिं जड्डस्स न कप्पइ दिक्खा ॥ २३ ॥

पथि भिक्षायां वन्दनके च, एतैर्वक्ष्यमाणैः ॥ २३ ॥

अद्धाणे पलिमंथो भिक्खायरियाए अपरिहत्थो य । दोसा सरीरजड्डे गच्छे पुण सो अणुण्णाओ ॥ २४ ॥

पलिमन्थो विमर्दः, भिक्षाचर्यायां अपरिहस्तोऽदक्षः, अनुज्ञातः कारणान्तरेण ॥ २४ ॥ तत्र शरीरजड्डेऽन्येऽप्येते दोषाः—

उड्डुस्सासो अपरक्कमो य गेलन्नलाघवग्गिमहिउदए । जड्डस्स य आगाढे गेलण्ण असमाहिमरणं च ॥ २५ ॥

ऊर्ध्वोच्छ्वासः स स्यात्, अपराक्रमश्च, ग्लानत्वमलाघवं अग्निरधिकउये (अग्नौ अहौ उदके च पलायितुमक्षमः) ॥२५॥

सेएण कक्खमाई कुच्छे ण धुवणुप्पिलावणा पाणा । नत्थि गलओ य चोरो निंदिय मुंडाइवाए य ॥ २६ ॥

स्वेदेन कक्षादीनां कुत्सनं स्यात्, धावनोत्प्लावने प्राणा द्वीन्द्रियादयो विनश्यन्ति, नास्ति न युज्यते क्षालनगलनः स्वेदवतः, ततो निषिद्धस्याचरणे चौरः निन्दिता, अमी मुण्डा इत्यादि प्रवादश्च स्यात्, अतो देहजड्डो व्रतायोग्यः ॥२६॥

इरियासमिई भासेसणा य आयाणसमिइगुत्तीसु । नवि ठाइ चरणकरणे कम्मुदएणं करणजड्डो ॥ २७ ॥

करणजड्ड इन्द्रियचपलः ॥ २७ ॥

एसोवि न दिक्खिज्जइ उस्सग्गेणमह दिक्खिओ होज्जा । कारणगएण केणइ तत्थ विहिं उवरि वोच्छामि ॥ २८ ॥

अथ दीक्षितः स्यात् कारणगतेन केनापि ॥ २८ ॥

मोत्तुं गिळाणकज्जं दुम्मेहं पडियरइ जाव छम्मासा । एक्केके छम्मासा जस्स व दट्ठुं विगिंचणया ॥ २९ ॥

योऽसौ मम्मणमूकः, कदाचित् प्रव्राज्यते गुणदोषा वालोच्य, ग्लानकार्ये चिरमपि धार्यते, तद्विना दुर्मेधसं पाठयेत् यावत् षण्मासान्, एकैके कुले गणे सङ्घे षण्मासान् यावत्परिचर्यते । 'जस्स व दट्ठुं विगिंचणया.' जड्डत्वस्य स्या (यं प्राप्य जाड्यं

नश्ये)स्तस्यैवार्प्यते सः, अथवा यस्य दृष्ट्वा लष्टः स्यात्तस्य सोऽर्प्यते, न स्यात्ततो विगिंचणया ॥ २९ ॥ शरीरजङ्गः परिचर्यते यावज्जीवमपि—

जो पुण करणे जड्डो उक्कोसं तस्स होंति छम्मासा । कुलगणसंघनिवेयण एवं तु विहिं तहिं कुज्जा ॥ ३० ॥

कुलगणसङ्घानां निवेदनं कुर्यात्, एवं विधि–धर्म्मकथादिना प्रतिबोध्य त्यागरूपं कुर्यात् ॥ ३० ॥ एषा सचित्तमनुष्यसंयतपारिष्ठापनिका, अथाचित्तसंयतपारिष्ठापनविधिरुच्यते—

आसुक्कारगिलाणे पच्चक्खाए व आणुपुव्वीए । अच्चित्तसंजयाणं वोच्छामि विहीए वोसिरणं ॥ ३१ ॥

आशु–शीघ्रं करणं–कारोऽचित्तीकरणं आशुकारः, तद्धेतुत्वादहिविषविशुचिकादयस्तैर्यः खल्वचित्तीभूतः, ग्लानो मन्दश्च सन् यः, 'प्रत्याख्याते वानुपूर्व्या' [करण] शरीरपरिकर्मकरणानुक्रमेण भक्ते वा प्रत्याख्याते सति योऽचित्तीभूतः, एतेषामचित्तसंयतानां वक्ष्ये व्युत्सृजनं ॥ ३१ ॥

एव य कालगयंमी मुणिणा सुत्तत्थगहियसारेणं । न हु कायव्व विसाओ कायव्व विहीए वोसिरणं ॥ ३२ ॥

एवं च कालगते साधौ ॥ ३२ ॥ अधिकृतविधिमाह—

पडिलेहणा[1] दिसा[2] णंतए[3] य काले दिया य राओ[4] य ।
कुस[5]पडिमा पाणगाणियत्तणे[6] य तणसीसउवगरणे ॥ १२८६ ॥

उट्ठाणणामगहणे[12] पयाहिणे[13] काउसग्गकरणे[14] य । खमणे[15] य असज्झाए[16] तत्तो अवलोयणे[17] चेव ॥ १२८७ ॥

' पडिलेहण 'त्ति प्रत्युपेक्षणा महास्थण्डिलस्य कार्या, ' दिस 'त्ति दिग्भागनिरूपणा च ' णंतए य 'त्ति गच्छमपेक्ष्य सदौपग्रहिकं नन्तकं मृताच्छादनसमर्थं वस्त्रं धारणीयं, चशब्दात्तथाविधं काष्ठं च ग्राह्यं, काले दिवा च रात्रौ मृते सति यथोचितं लाञ्छनादि कर्त्तव्यं, नक्षत्राण्यालोच्य कुशप्रतिमाद्वयं एका वा कार्या न वा, उपघातरक्षार्थं पानकं गृह्यते, ' निअत्तणे य 'त्ति कथञ्चित् स्थण्डिलातिक्रमे परिभ्रम्यागन्तव्यं, न तेनैव पथा, समानि तृणानि दातव्यानि, ग्रामं यतः शिरः कार्यं, चिह्नार्थं रजोहरणाद्युपकरणं मुच्यते ॥ १२८६ ॥ उत्थाने सति शबस्य ग्रामत्यागादिकार्यं, यदि कस्यचित्सर्वेषां वा नाम गृह्णाति ततो लोचादि कार्यं, परिष्ठाप्य प्रदक्षिणा न कार्या, स्वस्थानादेव प्रतिनिवर्त्तितव्यं, परिष्ठापिते सत्यागम्य कायोत्सर्गकरणं, रत्नाधिकादौ मृते क्षपणं चाऽस्वाध्यायश्च कार्यः, न सर्वस्मिन्, ततोऽन्यदिने परिज्ञानायाऽवलोकनं कार्यं ॥ १२८७ ॥ अथ प्रतिद्वारमवयवार्थ उच्यते, तत्राद्यद्वारमाह—

जहियं तु मासकप्पं वासावासं च संवसे साहू । गीयत्था पढमं चिय तत्थ महाथंडिले पेहे ॥ १ ॥ (प्र०)

संवसन्ति 'साधवः' गीतार्थाः प्रथममेव तत्र महास्थण्डिलानि मृतोज्झनस्थानानि प्रत्युपेक्षन्ते त्रीण्येव ॥१॥ दिग्द्वारमाह—

दिसा अवरदक्खिणा य अवरा य दक्खिणा पुवा । अवरुत्तरा य पुवा उत्तरपुव्वुत्तरा चेव ॥ ३३ ॥

पउरन्नपाणपढमा बीयाए भत्तपाण ण लहंति । तइयाए उवहीमाई नत्थि चउत्थीए सज्झाओ ॥ ३४ ॥

पंचमियाए असंखडि छट्ठीए गणविभेयणं जाण । सत्तमिए गेलन्नं मरणं पुण अट्ठमी बिंति ॥ ३५ ॥

अवरदक्खिणाए दिसाए महाथंडिल्लं पेहिअव्वं, इमे गुणाः—भत्तपाणउवगरणसमाही भवइ, एकैकस्यां दिशि त्रीणि २ प्रतिलेख्यानि, आसन्ने मध्ये दूरे, कदाचित्कुत्रापि व्याघातः, क्षेत्रं कृष्टं, उदकेन वा प्लावितं, हरितकायो वा जात इत्यादि, पढमदिसाए विज्जमाणीए जइ दक्खिणदिसाए पडिलेहिंति तो इमे दोसा—भत्तपाणे न लहंति, अलहंते जं विराहणं पावइ तं पावंति, व्याघाते द्वितीया प्रतिलेख्यते, द्वितीयस्यां सत्यां यदि तृतीयामपरां—पश्चिमां प्रतिलेखयन्ति, तत उपकरणं न लभन्ते, एवं चतुर्थी दक्षिणापूर्वा, तस्यां स्वाध्यायं न कुर्वन्ति ॥ ३३–३४ ॥ पञ्चमी अपरोत्तरा तस्यां कलहः, षष्ठी पूर्वा तस्यां गणभेदः चारित्रभेदो वा, सप्तमी उत्तरा तस्यां ग्लानत्वं, अष्टमी पूर्वोत्तरा तस्यामन्यमपि मारयति, आद्यदिगभावे द्वितीया प्रतिलेख्या, तस्यां स एव गुणो यः प्रथमायां, एवं शेषास्वपि ज्ञेयं ॥ ३५ ॥ ‘ णंतए य ’त्ति द्वारमाह—

पुव्वं दव्वालोयण पुव्विं गहणं च णंतकट्ठस्स । गच्छंमि एस कप्पो अनिमित्ते होउवक्कमणं ॥ ३६ ॥

पूर्वं तिष्ठन्त एव साधवः तृणडगलच्छारादिद्रव्यमालोकयन्ति, पूर्वं ग्रहणमनन्तकस्य मृताच्छादनीयवस्त्रस्य, तदा (था) तद्वहनयोग्यस्य काष्ठस्य, गच्छे एष कल्पः—अनिमित्ते—अकस्माद्भवत्युपक्रमणं—मरणं, तन्निमित्तमेतद्धार्यं, त्रीणि जघन्यतोऽनन्तकानि धार्यन्ते, एकमधः प्रस्तरणाय एकं परिधानाय, एकमुपरि, उत्कर्षतो गच्छं ज्ञात्वा बहून्यपि ॥ ३६ ॥ ‘ काले दिया य राओ य ’त्तिद्वारमाह—

सहसा कालगयंमी मुणिणा सुत्तत्थगहियसारेण । न विसाओ कायव्वो कायव्व विहीइ वोसिरणं ॥ ३७ ॥

जं वेलं कालगओ निक्कारण कारणे भवे निरोहो । छेयणबंधणजग्गणकाइयमत्ते य हत्थउडे ॥ ३८ ॥

यस्यां वेलायां कालगतो दिवा वा रात्रौ वा स तस्यामेव नेतव्यो निष्कारणे, कारणं तु रात्रौ स्तेनभयं स्यात्, स वा साधुस्तत्र प्रसिद्धः, स्वजना वा तस्य तत्र स्युः, आचार्यो वा अनशनी स्यात्, ततो रात्रौ न नीयते, दण्डिक आयाति निर्याति वा, इत्यादिना दिवसेऽपि कदाचिन्न नीयते, एवं कारणेन निरुद्धस्यायं विधिः—'छेयण' इत्यादि, च्छेदनमङ्गुष्ठाङ्गुल्योर्विचाले बन्धनं पादाङ्गुष्ठादिषु, जागरणं बालादीनपसार्य गीतार्थाः कुर्वन्ति, जाग्रद्भिः कायिकीमात्रको न परिष्ठाप्यते, 'हत्थउडे'त्ति यद्युत्तिष्ठति ततो मात्रकात् हस्तपुटे कायिकीं कृत्वा सिञ्चन्ति ॥ ३८ ॥

अन्नाविट्ठसरीरे पंता वा देवया उ उट्ठेज्जा । काइयं डब्बहत्थेण मा उट्ठे बुज्झ गुज्झया ! ॥ ३९ ॥

यद्यच्छित्वाऽबद्ध्वा तच्छरीरं जाग्रति स्वपन्ति वा तदान्याविष्टं—सामान्येन व्यन्तराधिष्ठितशरीरं स्यात्, प्रान्ता वा प्रत्यनीका देवता तत्प्रविश्योत्तिष्ठेत्, अथ कदाचिज्जागरतामप्युत्तिष्ठति तदा कायिकया वामहस्तेन सिञ्चन्ति, इदं च वदन्ति मा उत्तिष्ठ, बुद्ध्यस्व गुह्यक ! ॥ ३९ ॥

वित्तासेज्ज हसेज्ज व भीमं वा अट्टहास मुंचेज्जा । अभीएणं तत्थ उ कायव विहीए वोसिरणं ॥ ४० ॥

कदाचिद्वित्रासयेत् हसेद्वा, तत्राऽभीतेन च्छेदनादिविधिना व्युत्सर्जनं कर्त्तव्यं ॥ ४० ॥ 'कुसपडिम'त्ति द्वारमाह—

दोन्नि य दिवड्ढखेत्ते दब्भमया पुत्तला उ कायवा । समखेत्तंमि उ एक्को अवड्ढऽभीए ण कायव्वो ॥ ४१ ॥

द्वौ च सार्द्धक्षेत्रे—पञ्चचत्वारिंशन्मुहूर्त्ते, क्षेत्रे इति गम्यते, दर्भमयौ पुत्तलकौ कर्त्तव्यौ अकरणे अन्यौ द्वौ कर्षति,

समक्षेत्रे त्रिंशन्मुहूर्त्ते चैकः, अन्यथैकं कर्षति, अपार्द्धे पञ्चदशमुहूर्त्तेऽभीचिनक्षत्रे च न कर्त्तव्यः पुत्तलकः ॥ ४१ ॥

तिण्णेव उत्तराइं पुणव्वसू रोहिणी विसाहा य । एए छ नक्खत्ता पणयालमुहुत्तसंजोगा ॥ ४२ ॥

अस्सिणिकित्तियमियसिर पुस्सो मह फग्गुहत्थ चित्ता य । अणुराह मूल साढा सवणधणिट्ठा य भद्दवया ॥ ४३ ॥

तह रेवइत्ति एए पन्नरस हवंति तीसइमुहुत्ता । नक्खत्ता नायव्वा परिट्ठवणविहीय कुसलेणं ॥ ४४ ॥

सयभिसया भरणीओ अद्दा अस्सेस साइ जेट्ठा य । एए छ नक्खत्ता पनरसमुहुत्तसंजोगा ॥ ४५ ॥

'पाणग'त्ति (यं'ति) द्वारमाह—

सुत्तत्थतदुभयविऊ पुरओ घेत्तूण पाणय कुसे य । गच्छइ य जउड्डाहो परिट्ठवेऊण आयमणं ॥ ४६ ॥

सूत्रार्थतदुभयविद्गीतार्थोऽसंसृष्टपानकं कुशांश्च चतुरङ्गुलाधिकहस्तप्रमाणान्, तदभावे केसराणि चूर्णानि वा गृहीत्वा पुरतो व्रजति, स्थण्डिलाभिमुखः, परिष्ठाप्य सागारिके सति हस्तपादादि शौचं कुर्वन्ति, आचमनग्रहणेन यथा २ उड्डाहो न स्यात्तथा तथा कार्यं ॥ ४२–४६ ॥ निवर्त्तनद्वारमाह—

थंडिलवाघाएणं अहवावि अणिच्छिए अणाभोगा । भमिऊण उवागच्छे तेणेव पहेण न नियत्ते ॥ ४७ ॥

स्थण्डिलस्य व्याघात उदकहरितादिना अनाभोगादतिक्रान्ते वा स्थण्डिले भ्रान्त्वा प्रदक्षिणामकुर्वद्भिरुपागन्तव्यं स्थण्डिले, तेनैव वा न निवर्त्तनं कार्यं, कदाचिदुत्तिष्ठेत्स उत्थितश्चाभिमुखमेव धावति ग्रामं प्रति तस्माद्भ्रान्त्वा स्थण्डिले गन्तव्यं ॥ ४७ ॥ नियत्तणि(त्तण)त्ति द्वारमाह—

कुसमुट्ठी एगाए अव्वोच्छिण्णाइ एत्थ धाराए । संथारं संथरेज्जा सव्वत्थ समो उ कायव्वो ॥ ४८ ॥

यदा स्थण्डिलं प्रमार्जितं स्यात्तदा कुशमुष्ट्या एकया अव्युच्छिन्नया धारया संस्तारकः क्रियते सर्वत्र समः ॥ ४८ ॥

विसमा जइ होज्ज तणा उवरि मज्झे व हेट्ठओ वावि । मरणं गेलण्णं वा तिण्हंपि उ निद्दिसे तत्थ ॥ ४९ ॥

उवरिं आयरियाणं मज्झे वसहाण हेट्ठि भिक्खूणं । तिण्हंपि रक्खणट्ठा सव्वत्थ समा उ कायव्वा ॥ ५० ॥

सर्वत्र समानि तृणानि प्रत(स्त)रितव्यानि ॥ ४९–५० ॥

जत्थ य नत्थि तणाइं चुण्णेहिं तत्थ केसरेहिं वा । कायव्वोऽत्थ ककारो हेट्ठ तकारं च बंधेज्जा ॥ ५१ ॥

चूर्णैर्दर्भाणां नागकेसरैर्वा, तदभावे गोरपालेवा(प्रलेपा)दिभिः वाऽव्युच्छिन्नया धारया कत इत्यक्षरं कर्त्तव्यं ॥ ५१ ॥ सीसत्तिद्वारमाह—

जाए दिसाए गामो तत्तो सीसं तु होइ कायव्वं । उट्ठेंतरक्खणट्ठा एस विही से समासेणं ॥ ५२ ॥

यस्यां दिशि ग्रामस्ततः शिरः कर्त्तव्यं, उपाश्रयादपि कर्षद्भिः पूर्वं पादा निःसार्यन्ते, उत्तिष्ठतो रक्षणार्थं, चेदुत्तिष्ठेत्तथैव बहिर्मुखो गच्छेत् ॥ ५२ ॥ ' उवगरण 'त्ति द्वारमाह—

चिण्हट्ठा उवगरणं दोसा उ भवे अचिंधकरणंमि । मिच्छत्त सो व राया व कुणइ गामाण वहकरणं ॥ ५३ ॥

चिह्नार्थं मुखवस्त्रिका रजोहरणं चोलपट्टकश्चेत्युपकरणं परिष्ठाप्यमाने स्थाप्यं, अचिह्नकरणे स साधुर्मिथ्यात्वं व्रजेत्, राजा वा श्रुत्वा (केना)प्युपद्रुत इति ग्रामवधं कुर्यात् ॥ ५३ ॥ ' उट्ठाणे 'त्ति—

वसहि निवेसण साही गाममज्झे य गामदारे य । अंतरउज्जाणंतर निसीहिया उट्ठिए वोच्छं ॥ ५४ ॥

वसहिनिवेसणसाही गामद्धं चेव गाम मोत्तब्बो । मंडलकंडुदेसे निसीहिआ चेव रज्जं तु ॥ ५५ ॥

यदि कडेवरं नीयमानं वसतावेवोत्तिष्ठति तदा वसतिरुपाश्रयो मोक्तव्यः, निवेशनमेकद्वारं वृत्तिपरिक्षिप्तं, अनेक-गृहं फलिहकं, तत्रोत्थिते तत्त्याज्यं, ' साही ' गृहपङ्क्तिस्तस्यां सैव, ग्राममध्ये ग्रामार्द्धं, ग्रामद्वारे ग्रामः, ग्रामोद्यानयोरन्तरे मण्डलं-देशान्तर्गतो देशः, उद्याने काण्डं, मण्डलान्महत्तर, उद्यानस्य नैषेधिक्याश्चान्तरे देशः, नैषेधिक्यामुत्तिष्ठति राज्यं मोक्तव्यं, परिष्ठाप्य तत्र गीतार्था मुहूर्त्तं तिष्ठन्ति, कदाचिदुत्तिष्ठेत् । तत्र यदि नैषेधिक्यामुत्तिष्ठति तत्रैव च पतति, तदा उपाश्रयो मोक्तव्यः, एव यावद्वसतौ प्रविश्य पतति राज्यं ॥ ५४-५५ ॥ तथा चाह—

वच्चंतो जो उ कमो कलेवरपवेसणंमि वोच्चत्थो । नवरं पुण णाणत्तं गामद्दारंमि बोद्धवं ॥२०६॥ (भा०)

व्रजति कलेवरे यः क्रम उक्तस्तत्प्रवेशेऽपि विपर्यस्तः स एव, ग्रामद्वारे न पुनर्नानात्वं, कोऽर्थः—उभयथापि ग्रामस्त्याज्यो नात्र विपर्ययः, निर्यूढो यदि द्वितीयवारमेति तदा द्वे राज्ये मोक्तव्ये, तृतीयवारायां त्रीणि, ततः परं बहुशोऽपि त्रीण्येव ॥२०६॥

असिवाइकारणेहिं तत्थ वसंताणं जस्स जो उ तवो । अभिगहियाणभिगहिओ सा तस्स उ जोगपरिवुड्ढी ॥ ५६ ॥

अथाशिवादिभिर्बहिर्न गच्छन्ति ततस्तत्रैव वसतां यद्यस्य तपोऽभिगृहीतमनभिगृहीतं वास्ति तेन योगपरिवृद्धिः कार्या, नमस्कारसहितवता पौरुषी, तद्वता पुरिमार्द्ध इत्यादि ॥ ५६ ॥ ' नामगहणे 'त्ति द्वारमाह—

गिण्हइ णामं एगस्स दोण्हमहवावि होज्ज सवेसिं । खिप्पं तु लोयकरणं परिण्णगणभेयबारसमं ॥ ५७ ॥

यावतां स नाम गृह्णाति तावतां क्षिप्रं लोचकरणं, ' परिण्ण 'त्ति प्रत्याख्यानं द्वादशदशमाष्टमानि दीयन्ते, गणभेदश्च गणान्निर्यान्ति ॥ ५७ ॥ ' पयाहिणे 'त्ति द्वारमाह—

जो जहियं सो तत्तो नियत्तइ पयाहिणं न कायवं । उट्ठाणाई दोसा विराहणा बालवुड्ढाई ॥ ५८ ॥

यो यतः स तत एव निवर्त्तते, प्रायः कृतप्रदक्षिण उत्तिष्ठेत् , विराधना बालवृद्धादीनां, यतः स यदभिमुखः स्थापितस्तत एव धावति ॥ ५८ ॥ काउसग्गकरणे य 'त्तिद्वारमाह—

उट्ठाणाई दोसा उ होंति तत्थेव काउसग्गंमि । आगम्मुवस्सयं गुरुसगासे विहीए उस्सग्गो ॥ ५९ ॥

तत्रैव स्थण्डिलोपान्ते कायोत्सर्गो न क्रियते, उत्थानादिदोषसम्भवात् , तत आगम्य चैत्यगृहे विपर्यस्तं देवान् वन्दित्वाऽऽचार्यपार्श्वेऽविधिपारिष्ठापनिकायाः कायोत्सर्गः क्रियते ॥५९॥ आय० । आयं० ॥ गाथाद्वयमन्यकृतमव्याख्यातं च, क्षपणास्वाध्याये आह—

खमणे य असज्झाए राइणिय महाणिणाय नियगा वा । सेसेसु नत्थि खमणं नेव असज्झाइयं होइ ॥ ६० ॥

क्षपणमस्वाध्यायश्च, ' रायणिओ 'त्ति आचार्यः, महाणिणाय'त्ति महाजनज्ञातः निजका वा तत्र स्युः, एतेषु क्रियते ॥ ६० ॥ ' अवलोयणे 'त्ति द्वारमाह—

अवरज्जुयस्स तत्तो सुत्तत्थविसारएहिं थिरएहिं । अवलोयण कायवा सुहासुहगइनिमित्तट्ठा ॥ ६१ ॥

नं दिसि विकड्डियं खलु सरीरयं अक्खुयं तु संविक्खे । तं दिसि सिवं वयंती सुत्तत्थविसारया धीरा ॥ ६२ ॥

अपरेद्युर्द्वितीयदिने तस्य मृतदेहस्यावलोकनं कर्त्तव्यं, शुभाशुभज्ञानार्थं गतिज्ञानार्थं च तद्विलोक्यते आचार्यस्य महर्द्धेस्त-पोवतो वा ॥ ६१ ॥ यस्यां दिशि तत् कृष्टं तस्यां दिशि सुभिक्षं सुखविहारं च वदन्ति, अथ तत्रैव तिष्ठेदक्षतं ततस्तस्मिन् प्रदेशे शिवं, यावन्ति च दिनानि तदक्षतं तिष्ठति, तावन्ति वर्षाणि तत्र शिवं ॥ ६२ ॥ व्यवहारतो गतिमाह—

एत्थ य थलकरणे विमाणिओ जोइसिओ वाणमंतर समंमि । गड्डाए भवणवासी एस गई से समासेण ॥ ६३ ॥

इदं च सम्यग्दृष्टिदेवतादि कुर्यादिति सम्भाव्यते ॥ ६३ ॥

एसा उ विही सवा कायवा सिवंमि जो जहिं वसइ । असिवे खमण विवड्डी काउस्सग्गं च वज्जेज्जा ॥ ६४ ॥

एष विधिर्द्वारगाथाद्वयोक्तः कर्त्तव्यः शिवे प्रान्तदेवताकृतोपसर्गवर्जिते काले यः साधुर्यस्मिन् क्षेत्रे वसति, अशिवे क्षपणमविधिकायोत्सर्गं च वर्जयेत्, योगवृद्धिः क्रियते, येन च संस्तारकेण बहिर्नीयते स खण्डीकृत्य परिष्ठाप्यते, उच्चारादि-मात्रकास्त्यज्यन्ते ॥ ६४ ॥ उक्तार्थोपसंहारमाह—

एसो दिसाविभागो नायवो दुविहदवहरणं च । वोसिरणं अवलोयण सुहासुहगईविसेसो ॥ ६५ ॥

एष दिग्विभागो ज्ञातव्यः, अथेयं संयत(अचित्त)संयतपरिष्ठापनविधिं प्रति दिक्प्रदर्शनमित्यर्थः, 'द्विविधद्रव्यग्रह-(व्यहर)णं च' पूर्वकाले गृहीतं वस्त्रादि तथा पश्चाद्गृहीतं कुशादि ज्ञातव्यं, 'व्युत्सर्जनं' संयतशरीरस्य, 'अवलोकनं' द्वितीये दिने शुभाशुभगतिविशेषश्च एषा अचित्तसंयतपरिष्ठापनिका ॥ ६५ ॥

अस्संजयमणुएहिं जा सा दुविहा य आणुपुव्वीए । सचित्तेहिं सुविहिया ! अचित्तेहिं च नायवा ॥ ६६ ॥

तत्र सचित्तासंयतमनुष्यपरिष्ठापनिकासम्भवः कथं ?, आह—

कप्पट्ठगरूयस्स य वोसिरणं संजयाण वसहीए । उदयपह बहुसमागम विपज्जहालोयणं कुज्जा ॥ ६७ ॥

काचिदविरतिका प्रत्यनीकतया उड्डाहार्थं काचिदनुकम्पया दुर्भिक्षे संयतानां वसतावपत्यस्य व्युत्सर्जनं करोति, तत्र को विधिः ?, दिने २ वसतिर्वृषभैर्विलोक्या, प्रत्यूषे प्रदोषे मध्याह्नेऽर्द्धरात्रे च, यदि मुञ्चन्ती दृष्टा तदा बोलः क्रियते, यथा लोको मिलति, यज्ञानानि तत्करोतु, अथ न दृष्टा तदा परिष्ठाप्यते उदकपथे जनसमागमस्थाने वा चतुष्पथे वा, दूरस्थस्त्यक्त्वा-वलोकनं कुर्यात्, यथा मार्जारादिना न मार्यते, केनापि दृष्टेऽपसरति ॥ ६७ ॥ अचित्तासंयतपारिष्ठापनिकामाह—

पडिणीयसरीरछुहणे वणीमगाईसु होइ अचित्ता । तोवेक्खकालकरणं विप्पजहविगिंचणं कुज्जा ॥ ६८ ॥

प्रत्यनीकः कोऽपि वनीकादिशरीरं तत्र क्षिपेत्, वनीपको वा तत्राऽऽगत्य मृतः, उद्बन्धनं वा कश्चित् कुर्यात्, दृष्टे बोलः क्रियते, नोपेक्षेत, रात्रौ यत्र कस्यापि गृहं नास्ति तत्र 'विप्पजहविगिंचणं'ति मृग(त)त्यागं कुर्यात्, तदुपधेरपि विवेकः ॥६८॥

णोमणुएहिं जा सा तिरिएहिं सा य होइ दुविहा उ । सचित्तेहि सुविहिआ ! अचित्तेहिं च नायव्वा ॥ ६९ ॥

चाउलोयगमाईहिं जलचरमाईण होइ सचित्ता । जलथलखहकालगए अचित्ते विगिंचणं कुज्जा ॥ ७० ॥

तन्दुलोदकादौ मत्स्यो मण्डूकी वा स्यात्, सा जलाज्जले नीत्वा क्षिप्यते, तक्रादौ पुतरकादयः पूर्ववत्, जलस्थलखचरा वा शुकंतिकादि(काकादि)मुखात् पतिता विजने त्यज्यन्ते ॥ ७० ॥

णोतसपाणेहिं जा सा दुविहा होइ आणुपुव्वीए। आहारंमि सुविहिआ! नायवा नोअआहारे ॥ ७१ ॥

नोआहार उपकरणादिः ॥ ७१ ॥

आहारंमि उ जा सा सा दुविहा होइ आणुपुव्वीए। जाया चेव सुविहिया! नायव्वा तह अजाया य ॥ ७२ ॥

दोषात् परित्यागार्हा आहारविषया सा जाता, अतिरिक्तनिरवद्याहारपरित्यागविषया अजाता ॥७२॥ तत्र जातां स्वयमेवाह—

आहाकम्मे य तहा लोहविसे आभिओगिए गहिए। एएण होइ जाया वोच्छं से विहीए वोसिरणं ॥ ७३ ॥

आधाकर्म्मणि तथा लोभाद् गृहीते विषकृते गृहीते आभियोगिके—वशीकरणाय मन्त्राभिसंस्कृते गृहीते सति, मक्षिकाव्यापत्तिचेतोऽन्यथात्वादिलिङ्गतश्च ज्ञाते, एतेनाधाकर्मादिना दोषेण भवति जाता परिष्ठापनिका, वक्ष्येऽस्या विधिना व्युत्सर्जनं ॥७३॥

एगंतमणावाए अचित्ते थंडिल्ले गुरुवइट्ठे। छारेण अक्कमित्ता तिट्ठाणं सावणं कुज्जा ॥ ७४ ॥

भस्मना सम्मिश्र्य 'तिट्ठाणं सावणं कुज्ज' त्ति सामान्येन तिस्रो वाराः श्रावणं कुर्यात्—अमुकदोषदुष्टमिदं व्युत्सृजामि ३, विशेषतस्तु विषकृताभियोगिकापकारकस्यैष विधिः, न त्वाधाकर्मादेः, तद्वतं तु प्रसङ्गेनेहैव भणिष्यामि ॥ ७४ ॥ अजातपारिष्ठापनिकामाह—

आयरिए य गिलाए पाहुणए दुल्लहे सहसलाहे। एसा खलु अज्जाया वोच्छं से विहीए वोसिरणं ॥ ७५ ॥

आचार्ये सत्यधिकं गृहीतं किञ्चित्, एवं ग्लाने प्राघूर्णके दुर्लभे वा विशिष्टद्रव्ये सहसा लाभे सत्यतिरिक्तग्रहणसम्भवस्तस्य पारिष्ठापनिकाऽजाता ॥ ७५ ॥

एगंतमणावाए अच्चित्ते थंडिले गुरुवइट्ठे । आलोए तिण्णि पुंजे तिट्ठाणं सावणं कुज्जा ॥ ७६ ॥

आलोके प्रकाशे त्रीन् पुञ्जान् कुर्यात्, अत एव मूलगुणदुष्टे त्वेकं, उत्तरगुणदुष्टे तु द्वौ, साध्वाद्यागमसम्भावनायां ॥७६॥

णोआहारंमी जा सा सा दुविहा होइ आणुपुव्वीए । उवगरणंमि सुविहिया ! नायव्वा नोयउवगरणे ॥ ७७ ॥

सुविहिताः इत्यामन्त्रणं सर्वत्र ज्ञेयं नोउपकरणं श्लेष्मादि ॥ ७७ ॥

उवगरणंमि उ जा सा सा दुविहा होइ आणुपुव्वीए । जाया चेव सुविहिया ! नायव्वा तह अजाया य ॥ ७८ ॥

उपकरणं च वस्त्रादि ॥ ७८ ॥

जाया य वत्थपाए वंका पाए य चीवरं कुज्जा । अज्जावयत्थपाए बोच्चत्थे तुच्छपाए य ॥ १ ॥ (प्र०)

जाता वस्त्रे पात्रे च वक्तव्या, प्रेरकाभिप्रायो वस्त्रे मूलगुणादिदुष्टानि वक्रीकृत्य परिष्ठापना, पात्रे च चीवरं कुर्यात्, अजाता च वक्तव्या-वस्त्रे पात्रे च ' वोच्चत्थे तुच्छपाए 'त्ति प्रेरकाभिप्रायो वस्त्रं विपर्यस्तमृजु स्थाप्यते पात्रं च तुच्छं-रिक्तं स्थाप्यते, सिद्धान्तं तु वक्ष्यामः, इयं चान्यकर्तृकी गाथा ॥ १ ॥

दुविहा जायमजाया अभिओगविसे य सुद्धऽसुद्धा य । एगं च दोण्णि तिण्णि य मूलुत्तरसुद्धजाणट्ठा ॥ ७९ ॥

आभियोगिका विषकृता, अशुद्धा शुद्धा च, तत्र शुद्धा जाता, अयं च प्रागतिदिष्टः सिद्धान्तः-मूलगुणाशुद्धे एको ग्रन्थिः पात्रे च रेखा, उत्तरगुणाशुद्धे द्वौ, शुद्धे त्रयः, एतेन विधिना एकान्तानापाते वस्त्रादि त्यजेत्, सामाचारी त्वेवं-जाता नाम

यद्वस्त्रं पात्रं वा मूलोत्तरगुणाशुद्धं अभियोगादिकृतं वा, तत्खण्डीकृत्य त्याज्यं, श्रावणा तथैव ॥ ७९ ॥

नोउवगरणे जा सा चउव्विहा होइ आणुपुव्वीए । उच्चारे पासवणे खेले सिंघाणए चेव ॥ ८० ॥

विधिमाह—

उच्चारं कुव्वंतो छायं तसपाणरक्खणट्ठाए । कायदुयदिसाभिग्गहेय दो चेवऽभिगिण्हे ॥ ८१ ॥

यस्योचारः संसक्तः स तं कुर्वन् च्छायां कुर्यात्, कायौ द्वौ, त्रसस्थावररूपौ, सुप्रतिलेखितसुप्रमार्जिते व्युत्सृजन् रक्षति, दिगभिग्रहः–' उभे मूत्रपरीषे च दिवा कुर्यादुदङ्मुखः । रात्रौ दक्षिणतश्चैव तस्य आयुर्न हीयते ॥ १ ॥ ' द्वे एव दिशावभिगृह्णन्ति, द्वयोर्दिशोर्मूत्रपुरीषे न कार्ये ॥ ८१ ॥

पुढविं तसपाणसमुट्ठिएहिं एत्थं तु होइ चउभंगो । पढमपयं पसत्थं सेसाणि उ अप्पसत्थाणि ॥ ८२ ॥

समुत्थितपृथिवीत्रसप्राणेषु स्थण्डिलेषु चतुर्भङ्गी–प्रतिलेखयति प्रमार्जयति स्थावरास्त्रसाश्च रक्षिताः १, प्रतिलेखयति न प्रमार्जयति स्थावरा रक्षिता न त्रसाः २, न प्रतिलेखयति प्रमार्जयति त्रसा रक्षिता न स्थावराः ३, न प्रतिलेखयति न प्रमार्जयति द्वयेऽपि त्यक्ताः ४, डगलकग्रहणेऽपि चतुर्भङ्गी तथैव ॥ ८२ ॥ अथ शिष्यानुशास्तिरूपां समाप्तिमाह—

गुरुमूलेवि वसंता अनुकूला जे न होंति उ गुरूणं । एएसिं तु पयाणं दूरंदूरेण ते होंति ॥ ८३ ॥

पदानामुक्तलक्षणानां ॥ ८३ ॥ इति पारिष्ठापनिकानिर्युक्त्यवचूर्णिः ।

पडिक्कमामि छहिं लेसाहिं–किण्हलेसाए नीललेसाए काउलेसाए तेउलेसाए पम्हलेसाए सुक्कलेसाए

अथ लेश्यादीनां स्वरूपमाह सङ्ग्रहणिकारः–जह जंबुतरुवरेगो सुपक्कफलभरियनमियसालग्गो । दिट्ठो छहिं पुरिसेहिं ते बिंती जंबु भक्खेमो ॥ १ ॥ किह पुण ? ते बेंतेको आरुहमाणाण जीवसंदेहो । तो छिंदिऊण मूले पाडेमुं ताहे भक्खेमो ॥ २ ॥ बितिआह एद्दहेणं किं छिण्णेणं तरूण अम्हंति । साहा महल्ल छिंदह तइओ बेंती पसाहाओ ॥ ३ ॥ गोच्छे चउत्थओ उण पंचमओ बेंति गेण्ह फलाइं । छट्ठो बेंती पडिया एएच्चिय खाह घेत्तुं जे ॥ ४ ॥ दिट्ठंतस्सोवणओ जो बेंति तरूवि छिन्न मूलाओ । सो वट्टइ किण्हाए सालमहल्ला उ नीलाए ॥ ५ ॥ हवइ पसाहा काऊ गोच्छा तेऊ फला य पम्हाए । पडियाए सुक्कलेसा अहवा अण्णं उदाहरणं ॥ ६ ॥ चोरा गामवहत्थं विणिग्गया एगो बेंति घाएह । जं पेच्छह सवं दुपयं च चउप्पयं वावि ॥ ७ ॥ बिइओ माणुस पुरिसे य तइओ साउहे चउत्थे य । पंचमओ जुज्झंते छट्ठो पुण तत्थिमं भणइ ॥ ८ ॥ एक्कं ता हरह धणं बीयं मारेह मा कुणह एवं । केवल हरह धणंती उवसंहारो इमो तेसिं ॥ ९ ॥ सवे मारेहत्ती वट्टइ सो किण्हलेस-परिणामो । एवं कमेण सेसा जा चरमो सुक्कलेसाए ॥ १० ॥ आदिल्लतिण्णि एत्थं अपसत्था उवरिमा पसत्था उ । अपसत्थासु वट्टिय न वट्टियं जं पसत्थासु ॥ ११ ॥ एसऽइयारो एयासु होइ तस्स य पडिक्कमामित्ति । पडिकूलं वट्टामी जं भणियं पुणो न सेवेमि ॥ १२ ॥ द्वादशगाथा अन्यद(त्र) व्याख्याताः ।

पडिक्कमामि सत्तहिं भयठाणेहिं, अट्ठहिं मयठाणेहिं, नवहिं बंभचेरगुत्तीहिं, दसविहे समण-धम्मे, एगारसहिं उवासगपडिमाहिं (सूत्रम्)

इहपरलोयादाणमकम्हाआजीवमरणमसिलोए । जाईकुलबलरूवे तवईसरीए सुए लाहे ॥ १ ॥

इहपरलोकभयं, तत्र मनुष्यादेः सजातीयादन्यस्मान्मनुष्यादेरेव सकाशाद् भयमिहलोकभयं, विजातीयात्तिर्यग्देवादेः सकाशाद्भयं परलोकभयं, आदानं–धनं तदर्थं चौरादिभ्यो यद्भयं तदादानभयं, अकस्मादेव बाह्यनिमित्तानपेक्ष्य(क्षं) राज्यादौ भयमकस्माद्भयं, आजीविकाभयं निर्द्धनः कथं दुर्भिक्षादावात्मानं धारयिष्यामीति, मरणाद्भयं मरणभयं, ' असिलोग 'त्ति अश्लाघाभयं एवं क्रियमाणे, महदपयशः इति तद्भयान्न प्रवर्त्तते । कश्चिद्राजादिः प्रव्रजितो जातिमदं करोति, एवं कुलबलरूपतपऐश्वर्यश्रुतलाभेष्वपि योज्यं ॥ १ ॥

विसहिकहंनिसिज्जिंदियँ कुड्डंतरपुव्वकीलियँपणीएँ । अइमायाहारविभूसणा य नव बंभचेरंगुत्तीओ ॥ १ ॥

ब्रह्मचारिणा तद्गुप्त्यनुपालनपरेण न स्त्रीपशुपण्डकसंसक्ता वसतिरासेवितव्या, न स्त्रीणामेकाकिनां कथा कथनीया, उत्थितानामन्तर्मुहूर्त्तं तदासने नोपवेष्टव्यं, न स्त्रीणामिन्द्रियाण्यालोकनीयानि, न स्त्रीणां कुड्यान्तरितानां मोहसंसक्तानां क्वणितध्वनिः श्रोतव्यः, न पूर्वक्रीडितानुस्मरणं कार्यं, न प्रणीतं स्निग्धं भोक्तव्यं, नातिमात्राहारोपभोगः कार्यः, न विभूषणा कार्या ।१।

खंती य मद्दवज्जव मुत्ती तवसंजमे य बोद्धव्वे । सच्चं सोयं आकिंचणं च बंभं च जइधम्मो ॥ १ ॥

क्षान्तिमार्दवार्जवमुक्तयः क्रोधादिपरित्यागाः, तपो द्वादशविधं, संयमश्च विरतिलक्षणः, सत्यं प्रतीतं, शौचं संयमं प्रति निरुपलेपता, आकिञ्चन्यं कञ्चनादिरहितता, ब्रह्म च ब्रह्मचर्यं । अन्ये त्वेवं पठन्ति–' खंती मुत्ती अज्जव मद्दव तह लाघवे तवे चेव । संयम चिआगऽकिंचण बोद्धव्वे बंभचेरे अ ॥ १ ॥ ' अत्र लाघवं अप्रतिबद्धता, त्यागः–संयतेभ्यो वस्त्रादिदानं ॥ १ ॥

सप्त भयस्थानानि-
अष्ट मदस्थानानि-
नव ब्रह्मचर्यस्थानानि
दशविधश्रमणधर्मः ।

दंसणवयसामाइय पोसहपडिमा अबंभ सच्चित्ते । आरंभपेसउद्दिट्ठ वज्जए समणभूए य ॥ १ ॥

दर्शनप्रतिमा, एवं व्रतसामायिकपौषधप्रतिमा अब्रह्मसच्चित्तआरम्भप्रेष्यउद्दिष्टवर्जकः, श्रमणभूतश्च, तत्र प्रतिमायां चतुष्पर्व्यां रात्रौ कायोत्सर्गः कार्यः, प्राक्तनप्रतिमाविधिश्च, अब्रह्मवर्जकप्रतिमायां मैथुनं त्याज्यं, आद्यायां मासो यावदेकादश्यामेकादशमासाः ॥१॥ अथैतत्स्वरूपं व्यक्त्याह—'सम्मद्दंसणसंकाइसल्लपामुक्कसंजुओ जो उ । सेसगुणविप्पमुक्को एसा खलु होंति पडिमा उ ॥ १ ॥ बिइया पुण वयधारी सामाइयकडो य तइयया होइ । होइ चउत्थी चउद्दसि अट्ठमिमाईसु दियहेसु ॥ २ ॥ पोसह चउविहंपी पडिपुण्णं सम्मं जो अणुपाले । पंचमि पोसहकाले पडिमं कुणएगराईयं ॥ ३ ॥ असिणाणवियडभोई पगासभोइत्ति जं भणिय होइ । दिवसओ न रत्ति भुंजे मउलिकडो कच्छ णवि रोहे ॥ ४ ॥ दिय बंभयारि राई परिमाणकडे अपोसहीएसुं । पोसहिए रत्तिंमि य नियमेणं बंभयारी य ॥ ५ ॥ इय जाव पंच मासा विहरइ हु पंचमा भवे पडिमा । छट्ठीए बंभयारी ता विहरे जाव छम्मासा ॥ ६ ॥ सत्तम सत्त उ मासे णवि आहारे सचित्तमाहारं । जं जं हेट्ठिल्लाणं तं तो परिमाण सव्वंपि ॥ ७ ॥ आरंभसयंकरणं अट्ठमिया अट्ठमास वज्जेइ । नवमा णव मासे पुण पेसारंभे विवज्जेइ ॥ ८ ॥ दसमा पुण दस मासे उद्दिट्ठकयंपि भत्त नवि भुंजे । सो होई छुरमुंडो छिहलिं वा धारए जाहिं ॥ ९ ॥ जं निहियमत्थजायं पुच्छंति नियाण नवरि सो आह । जइ जाणे तो साहे अह नवि तो बेंति नहि जाणे ॥ १० ॥ खुरमुंडो लोओ वा रयहरणपडिग्गहं च गेण्हित्ता । समणब्भूओ विहरे णवरिं सण्णायगा उवरिं ॥ ११ ॥ ममिकारअवोच्छिन्ने वच्चइ सण्णायपल्लि दट्ठुं जे । तत्थवि साहुव्व जहा गिण्हइ फासुं तु आहारं ॥ १२ ॥ एसा एक्कारसमा इक्कारसमासियासु एयासु । पण्णवणतहअसद्दहाणभावाउ

अइयारो ॥ १३ ॥' इत्याद्यास्त्रयोदशगाथा अन्यकर्तृक्यः ॥ १ ॥

बारसहिं भिक्खुपडिमाहिं, तेरसहिं किरियाठाणेहिं, चोद्दसहिं भूयगामेहिं, पन्नरसहिं परमाहंमिएहिं, सोलसहिं गाहासोलसएहिं, सत्तरसविहे संजमे, अट्ठारसविहे अबंभे, एगूणवीसाए नायज्झयणेहिं, वीसाए असमाहिठाणेहिं (सूत्रम्)

मासाई सत्तंता पढमाबितिसत्त[सत्त]राइदिणा । अहराई एगराई भिक्खूपडिमाण बारसगं ॥ १ ॥

मासाद्याः सप्तान्ताः, प्रथमा एकमासिकी, एवं यावत्सप्तमी सप्तमासिकी, 'प्रथमाद्वित्रिसप्त[सप्त]रात्रिदिवा' प्रथमा सप्तरात्रिकी, द्वितीया सप्तरात्रिकी, तृतीया सप्तरात्रिकी, अहोरात्रिकी, एकरात्रिकी, इदं भिक्षुप्रतिमानां द्वादशकं, आसां भावार्थो दशाभ्यो ज्ञेयः, किञ्चित्स्वरूपं च द्वादशभिरिमाभिर्गाथाभिरन्यकर्तृकीभिर्ज्ञेयं–' पडिवज्जइ संपुण्णो संघयणधिइजुओ महासत्तो । पडिमाउ जिणमयंमी सम्मं गुरुणा अणुण्णाओ ॥ १ ॥ गच्छे च्चिय निम्माओ जा पुव्वा दस भवे असंपुण्णा । नवमस्स तइयवत्थुं होइ जहन्नो सुयाभिगमो ॥ २ ॥ वोसट्ठचत्तदेहो उवसग्गसहो जहेव जिणकप्पी । एसण अभिग्गहीया भत्तं च अलेवयं तस्स ॥ ३ ॥ गच्छा विणिक्खमित्ता पडिवज्जे मासियं महापडिमं । दत्तेगभोयणस्सा पाणस्सवि एग जा मासं ॥ ४ ॥ पच्छा गच्छमईए एव दुमासि तिमासि जा सत्त । नवरं दत्तीवुड्ढी जा सत्त उ सत्तमासीए ॥ ५ ॥ तत्तो य अट्ठमीया हवइ हु पढमसत्तराइंदी । तीय चउत्थचउत्थेणऽपाणएणं अह विसेसो ॥ ६ ॥ उत्ताणगपासल्लीणसज्जीवावि ठाणे

ठाइत्ता । सह उवसग्गे घोरे दिवाई तत्थ अविकंपो ॥७॥ दोच्चावि एरिसच्चिय बहिया गामाइआण नवरं तु । उक्कुडलगंडसाई डंडाइतिउव ठाइत्ता ॥ ८ ॥ तच्चाएवि एवं नवरं ठाणं तु तस्स गोदोही । वीरासणमहवावी ठाइज्ज व अंबखुज्जो वा ॥ ९ ॥ एमेव अहोराई छट्ठं भत्तं अपाणयं णवरं । गामनयराण बहिया वग्घारियपाणिए ठाणं ॥ १० ॥ एमेव एगराई अट्ठमभत्तेण ठाण बाहिरओ । ईसीपब्भारगए अणिमिसनयणेगदिट्ठीए ॥ ११ ॥ साहट्टु दोवि पाए वग्घारियपाणिठायई ठाणं । वाघारि लंबियभुओ सेस दसासुं जहा भणियं ॥ १२ ॥' इत्यादि ॥ १ ॥

अट्ठाणट्ठा हिंसाऽकम्हा दिट्ठी य मोसऽदिण्णे य । अब्भत्थमाणमेत्ते मायालोहेरियावहिया ॥ १ ॥

अर्थाय क्रिया १, अनर्थाय क्रिया २, हिंसायै क्रिया ३, योऽन्यं हन्तुं शरादि मुञ्चति परमन्यं हन्ति सा अकस्मात्क्रिया ४, मित्रमप्यमित्रमिति अचौरमपि चौरमिति वा भ्रान्त्या हन्तीति दृष्टिविपर्यासक्रिया ५, मृषाक्रिया ६, अदत्तादानक्रिया ७, निर्हेतुकं दौर्मनस्यं अध्यात्मक्रिया ८, मानक्रिया ९, मित्रादिष्वपि स्वल्पेऽप्यपराधे तीव्रतरदण्डकरणं अमित्रक्रिया १०, मायाक्रिया ११, लोभक्रिया १२, ईर्याक्रिया १३ ॥ १ ॥ एतत्स्वरूपं च किञ्चिद्विशेषत इमाभिः सप्तदशभिरन्यकर्तृकीभिर्गाथाभिर्ज्ञेयं—,तसथावरभूएहिं जो दंडं निसिरई हु कज्जंमि । आय परस्स व अट्ठा अट्ठादंडं तयं बेंति ॥ १ ॥ जो पुण सरडाईयं थावरकायं च वणलयाईयं । मारेत्तुं छिंदिऊण व छड्डे एसो अणट्ठाए ॥ २ ॥ अहिमाइ वेरियस्स व हिंसिंसु हिंसइव हिंसिहिई । जो दंडं आरभइ हिंसादंडो भवे एसो ॥ ३ ॥ अन्नट्ठाए निसिरइ कंडाइ अन्नमाहणे जो उ । जो व नियंतो सस्सं छिंदिज्जा सालिमाई य ॥ ४ ॥ एस अकम्हादंडो दिट्ठिविवज्जासओ इमो होइ । जो मित्तममित्तंती काउं घाएइ अहवावि

॥ ५ ॥ गामाईघाएसु व अतेण तेणंति वावि घाएज्जा । दिट्ठिविवज्जासे सो किरियाठाणं तु पंचमयं ॥ ६ ॥ आयट्ठा णायगाइण वावि अट्ठाए जो मुसं वयइ । सो मोसपच्चईओ दंडो छट्ठो हवइ एसो ॥ ७ ॥ एमेव आयणायगअट्ठा जो गेण्हइ अदिन्नं तु । एसो अदिन्नवत्ती अज्झत्थीओ इमो होइ ॥ ८ ॥ नवि कोवि किंचि भणई तहविहु हियएण दुम्मणो किंपि । तस्सऽज्झत्थी संसइ चउरो ठाणा इमे तस्स ॥ ९ ॥ कोहो माणो माया लोहो अज्झत्थकिरिय एवेसो । जो पुण जाइमयाई अट्ठविहेणं तु माणेणं ॥ १० ॥ मत्तो हीलेइ परं खिंसइ परिभवइ माणवत्तेसा । मायपिइनायगाईण जो पुण अप्पेवि अवराहे ॥ ११ ॥ तिव्वं दंडं करेइ डहणंकणबंधतालणाईयं । तं मित्तदोसवत्ती किरियाठाणं हवइ दसमं ॥ १२ ॥ एक्कारसमं माया अण्णं हिययंमि अण्ण वायाए । अण्णं आयरई या स कम्मुणा गूढसामत्थो ॥ १३ ॥ मायावत्ती एसा तत्तो पुण लोहवत्तिया इणमो । सावज्जारंभपरिग्गहेसु सत्तो महंतेसु ॥ १४ ॥ तह इत्थी कामेसुं गिद्धो अप्पाणयं च रक्खंतो । अण्णेसिं सत्ताणं वहबंधणमारणं कुणइ ॥ १५ ॥ एसो उ लोहवित्ती इरियावहियं अओ पवक्खामि । इह खलु अणगारस्सा समिईगुत्तीसुगुत्तस्स ॥ १६ ॥ सययं तु अप्पमत्तस्स भगवओ चक्खुपम्हंपि । निवयइ ता सुहुमा वि हु इरियावहिया किरिय एसा ॥ १७ ॥' इत्यादि ।

एगिंदियसुहुमियरा सण्णियर पणिंदिया य सबीतिचऊ । पज्जत्तापज्जत्ताभेएणं चोद्दसग्गामा ॥ १ ॥

एकेन्द्रियाः पृथिव्यादयः सूक्ष्मेतराः, सूक्ष्मा बादराश्चेत्यर्थः, संज्ञीतराः संज्ञिनोऽसंज्ञिनश्च पञ्चेन्द्रियाः, सह द्वीन्द्रिय-[त्रीन्द्रिय]चतुरिन्द्रियैः एते हि पर्याप्तापर्याप्तभेदेन चतुर्दशभूतग्रामाः । एतानेव गुणस्थानद्वारेण [आह]—

मिच्छद्दिट्ठी सासायणे य तह सम्ममिच्छदिट्ठी य । अविरयसम्मद्दिट्ठी विरयाविरए पमत्ते य ॥ १ ॥

तत्तो य अप्पमत्तो निर्यट्टिअनियट्टिबायरे सुहुमे । उवसंतखीणमोहे होइ सजोगी अजोगी य ॥ २ ॥

कश्चिद्भूतग्रामो मिथ्यादृष्टिः, तथा सह ईषत्तत्त्वश्रद्धानरसास्वादनेन वर्त्तते इति सास्वादनः २, सम्यग्मिथ्यादृष्टिः ३, अविरतसम्यग्दृष्टिः ४, विरताविरतः श्रावकग्रामः ५, प्रमत्तः प्रमत्तसंयतग्रामः ६, ततश्चाप्रमत्तसंयतग्रामः ७, क्षपकश्रेण्याद्यन्तर्गतो जीवग्रामो [क्षीणदर्शनसप्तकः] निवृत्तिबादरः ८, लोभखण्डवेदनं यावदनिवृत्तिबादरः ९, लोभाणून् वेदयन् सूक्ष्मसम्परायः १०, उपशान्तमोहः श्रेणिपरिसमाप्तावन्तर्मुहूर्त्तं यावदुपशान्तवीतरागः ११, क्षीणवीतरागश्च स्यात् १२, सयोगीभवस्थकेवलिग्रामः १३, अयोगी च निरुद्धयोगः १४ ॥ १-२ ॥ अथ परमाधार्मिकानाह—

अंबे अंबरिसी चेव, सामे अ सबले इय । रुद्दोवरुद्दकाले य, महाकालेत्ति आवरे ॥ १ ॥
असिपत्ते धणुं कुंभे, वालु वेयरणी इय । खरस्सरे महाघोसे, एए पन्नरसाहिया ॥ २ ॥

एतत्स्वरूपं सूत्रकृन्निर्युक्तिगाथाभ्यो ज्ञेयं, ताश्चेमाः पञ्चदश—'धाडेंति पहावेंति य हणंति विंधंति तह निसुंभंति । मुंचंति अंबरतले अंबा खलु तत्थ नेरइया ॥ १ ॥ ओहयहए य तहियं निस्सण्णे कप्पणीहिं कप्पंति । विदलियचडुलयछिन्ने अंबरिसा तत्थ नेरइए ॥ २ ॥ साडणपाडणतुत्तण(तोदण) विंधण(बंधण)रज्जूतल(लय)प्पहारेहिं । सामा नेरइयाणं पवत्तयंती अपुण्णाणं ॥ ३ ॥ अंतगयफेफ(यकीक)साणि य हियर्य कालेज्ज फुप्फुसे चुण्णे । सबला नेरइयाणं पवत्तयंती अपुण्णाणं ॥४॥ असिसत्तिकुंततोमरसूलतिसूलेसु सुइचिइयासु । पोएंति रुद्दकम्मा नरयपाला तहिं रोद्दा ॥ ५ ॥ भंजंति अंगमंगाणि ऊरू बाहू सिराणि करचरणे । कप्पंति कप्पणीहिं उवरुद्दा पावकम्मरए ॥ ६ ॥ मीरासु सुंडएसु य कंडूसु पयणगेसु य पयंति ।

कुंभीसु य लोहीसु य पयंति काला उ नेरइया ॥ ७ ॥ कप्पिंति कागिणीमंसगाणि छिंदंति सीहपुच्छाणि । खायंति य नेरइए महाकाला पावकम्मरए ॥ ८ ॥ हत्थे पाए ऊरू बाहू य सिरं च अंगुवंगाणि । छिंदंति पगामं तु असिनेरइया उ नेरइए ॥ ९ ॥ कण्णोट्ठनासकरचरणदसणथणपूअऊरुबाहूणं । छेयणभेयणसाडण असिपत्तधणूहिं पाडिंति ॥ १० ॥ कुंभीसु य पइणीसु अ लोहीसु कंडुलोहकुंभीसु । कुंभी उ नरयपाला हणंति पाइंति नरएसु ॥ ११ ॥ तडतडतडस्स भुंजति भज्जणे कलंबुवालुयापट्ठे । वालुयगा नेरइया लोलेंति अंबरतलंमि ॥ १२ ॥ वसपूयरुहिरकेसट्ठिवाहिणी कलकलंतजउसोत्तं । वेयरणिनिरयपाला नेरइए ऊ पवाहंति ॥ १३ ॥ कप्पंति करगतेहिं कप्पंति परोप्परं परसुएहिं । संवलियमारुहंती खरस्सरा तत्थ नेरइए ॥ १४ ॥ भीए य पलायंते समंतओ तत्थ ते निरुंभंति । पसुणो जहा पसुवहे महघोसा तत्थ नेरइए ॥ १५ ॥ इत्याद्याः ॥

समयो वेयालीयं उवसग्गपरिण्णथीपरिण्णा य । निरयविभत्तीवीरत्थओ य कुसीलाण परिहासा ॥ १ ॥
वीरियधम्मसमाही मग्गसमोसरणं अहेतहं गंथो । जमईयं तह गाहासोलसमं होइ अज्झयणं ॥ २ ॥

एतानि सूत्रकृताङ्गाद्यश्रुतस्कन्धाध्ययनानि ॥ १-२ ॥

पुढविदगअगणिमारुयवणस्सइबितिचउपणिंदिअजीवो । पेहुप्पेहपमज्जण परिट्ठवण मणोवईकाए ॥ १ ॥

पृथिव्यादीनां संघट्टादि न करोति ९, अजीवसंयमः पुस्तकचर्मपञ्चकादीनामनुपयोगो यतनया परिभोगो वा हिरण्यादित्यागो वा १०, प्रेक्षासंयमः स्थानादि यत्र करोति तत्र चक्षुषा प्रेक्ष्य रजोहरणादिना प्रमार्ज्य च कुर्यात् ११, उपेक्षासंयमो व्यापाराव्यापारविषयतया द्वेधा-तत्र सदनुष्ठाने सीदतः साधूनुपेक्षेत-प्रेरयेदित्यर्थः, गृहिणस्तु आरम्भे सीदत उपेक्षेत न

व्यापारयेत् १२, प्रमार्जनासंयमः पथि पादयोर्वसत्यादेश्च विधिना प्रमार्जनं १३, अविशुद्धभक्तोपकरणादित्यागः परिष्ठापना-
संयमः १४, अकुशलानां मनोवाक्कायानां निरोधः कुशलानां च उदीरणा मनोवाक्कायसंयमः १५, एतदेवाह—' पुढवाइयाण
जाव य पंचेंदियसंजमो भवे तेसिं । संघट्टणाइ न करे तिविहेणं करणजोएणं ॥ १ ॥ अज्जीवेहिवि जेहिं गहिएहिं असंजमो
हवइ जइणो । जह पोत्थदूसपणए तणपणए चम्मपणए य ॥ २ ॥ गंडी कच्छवि मुट्ठी संपुडफलए तहा छिवाडी य । एवं
पोत्थयपणयं पण्णत्तं वीयराएहिं ॥ ३ ॥ बाहल्लपुहुत्तेहिं गंडीपोत्थो उ तुल्लगो दीहो । कच्छवि अंते तणुओ मज्झे
पिहुलो मुणेयव्वो ॥ ४ ॥ चउरंगुलदीहो वा वट्टागिइ मुट्ठिपोत्थओ अहवा । चउरंगुलदीहोच्चिय चउरस्सो वावि विण्णेओ ॥ ५ ॥
संपुडओ दुगमाई फलगावोच्छं छिवाडिमेत्ताहे । तणुपत्तूसियरूवो होइ छिवाडी बुहा बेंति ॥ ६ ॥ दीहो वा हस्सो वा जो
पिहुलो होइ अप्पबाहुल्ले । तं मुणियसमयसारा छिवाडिपोत्थं भणंतीह ॥ ७ ॥ दुविहं च दूसपणयं समासओ तंपि होइ नायव्वं ।
अप्पडिलेहिपणयं दुप्पडिलेहं च विण्णेयं ॥ ८ ॥ अप्पडिलेहियदूसे तूली उवहाणगं च नायव्वं । गंडुवहाणालिंगणि मसूरए चेव
पोत्तमए ॥ ९ ॥ पल्हवि कोयवि पावार णवयए तहा य दाढिगालीओ । दुप्पडिलेहियदूसे एयं बीयं भवे पणगं ॥ १० ॥
पल्हवि हत्थुत्थरणं कोयवओ रूयपूरिओ पडओ । दढिगालि धोयपोत्ती सेस पसिद्धा भवे भेया ॥ ११ ॥ तणपणयं पुण भणियं
जिणेहिं जियरायदोसमोहेहिं । साली वीही कोद्दवरालग रण्णेतणाइं च ॥ १२ ॥ अलएलगाविमहिसी मिगाणमइणं च पंचमं
होइ । तलिगा खल्लग वज्झे कोसग कत्ती य बीयं तु ॥ १३ ॥ अह विअडहिरन्नाई ताइ न गिण्हइ असंजमो साहू । ठाणाइ
जत्थ चेते पेहपमज्जित्तु तत्थ करे ॥ १४ ॥ एसा पेहुवपेहा पुणो य दुविहा उ होइ नायव्वा । वावारावावारे वावारे जह उ

गामस्स ॥ १५ ॥ एसो उविक्खगो हू अवावारे जहा विणस्संतं । किं एयं नु उवेक्खसि दुविहाए वेत्थ अहिगारो ॥ १६ ॥ वावारुवेक्ख तहियं संभोइय सीयमाण चोएइ । चोएई इयरंपी पावयणीयंमि कज्जंमि ॥ १७ ॥ अवावार उवेक्खा नवि चोएइ गिहिं तु सीयंतं । कम्मेसु बहुविहेसु संजम एसो उवेक्खाए ॥ १८ ॥ पाए सागारिएसुं अपमज्जित्तावि संजमो होइ । ते चेव पमज्जंते असागारिए संजमो होइ ॥ १९ ॥ पाणेहिं संसत्तं भत्तं पाणमहवावि अविसुद्धं । उवगरणपत्तमाई जं वा अइरित्त होज्जाहि ॥ २० ॥ तं परिठवणविहीए अवहट्टु संजमो भवे एसो । अकुसलमणवइरोहे कुसलाण उदीरणं जं तु ॥ २१ ॥ मणवइसंजम एसो काए पुण जं अवस्सकज्जंमि । गमणागमणं भवई तओवउत्तो कुणइ संमं ॥ २२ ॥ तवज्जं कुम्मस्सव सुसमाहियपाणिपायकायस्स । हवई य कायसंजमो चिट्ठंतस्सेव साहुस्स ॥२३॥' इत्याद्याश्च त्रयोविंशतिगाथा अन्यकर्तृक्यः ।

ओरालियं च दिव्वं मणवइकाएण करणजोएणं अणुमोयणकारवणे करणेणऽट्ठारसाबंभं ॥ १ ॥

मूलतो द्विधाऽब्रह्म-औदारिकं तिर्यग्मनुष्याणां दिव्यं च भवनवास्यादीनां, मनोवाक्कायकरणं त्रिधा, योगेन त्रिविधेनैवानुमोदनकारणकरणेन निरूपितं अब्रह्माष्टादशधा, इयं भावना-औदारिकं स्वयं न करोति मनसा २ नान्येन कारयति मनसा ३, कुर्वन्तं नानुमोदते मनसा ३, ९, एवं वैक्रियमपि १८ ।

उक्खित्तणाए संघाडे अंडे कुम्मे य सेलए । तुंबे य रोहिणी मल्ली मागंदी चंदिमा इय ॥ १ ॥

दावद्दवे उदगणाए मंडुक्के तेयली इय । नंदिफले अवरकंका ओयन्ने सुंसु पुंडरिया ॥ २ ॥

दवदवचारिऽपमज्जिय[3] दुपमज्जियऽइरित्तसिज्जआसणिए । राइणियपरिभासिय थेर[6]ऽभूओवघाई य ॥ १ ॥

संजलणकोहणो पिट्ठिमंसिएऽभिक्खमोहारी । अहिकरणकरोईरणं अकालसज्झायकारी या ॥ २ ॥

ससरक्खपाणिपाए सद्दकरो कलहझंझकारी य । सूरप्पमाणभोती वीसइमे एसणासमिए ॥ ३ ॥

समाधिश्चेतसः स्वास्थ्यं मोक्षमार्गावस्थितिर्न समाधिरसमाधिस्तस्य स्थानान्याश्रयास्तान्युच्यन्ते–द्रुतं २ चारित्वं प्रपतनादिनात्मनोऽन्यसत्त्वानां चासमाधिकारणत्वादसमाधिस्थानं, एवमन्यत्रापि ज्ञेयं १, अप्रमार्जितस्थाननिषीदनादि २, दुःप्रमार्जितस्थानादि ३, अतिरिक्तशय्या ४, अतिरिक्तासनसेवनं ५, रत्नाधिकः–आचार्योऽन्यो वा श्रुतपर्यायादिभिर्वृद्ध-स्तस्य ' परिभासी 'ति परिभवकारी ६, स्थविराः–आचार्या गुरवस्तान् ज्ञानादिभिरुपहन्ति स्थविरोपघाती ७, भूतोपघाती अनर्थमेकेन्द्रियोपघाती ८, ' संजलण 'त्ति मुहूर्त्ते २ रुष्यति ९, ' कोहण 'त्ति सकृत् क्रुद्धः स्यात् १०, ' पिट्ठमंसिए 'त्ति पराङ्मुखस्यावर्ज्ञां भणति ११, अभीक्ष्णमभ्याख्यानोदाहारी यथा दासस्त्वं चौरो वा अभीक्ष्णं, यद्वा शङ्कितं तन्निशङ्कितं भणति एवमेवेति १२, ' अहिगरणकरोदीरण 'त्ति अधिकरणादि करोति अन्यान् कलहयति यन्त्रादीनि वोदीरयति १३, अकाले स्वाध्यायकारी च १४, ॥ २ ॥ सह सरजस्केन ससरजस्कः, अस्थण्डिलात् स्थण्डिलं सङ्क्रामन्न ' प्रमार्जयति, ससरजस्कपाणिभ्यां भिक्षां गृह्णन्ति, अथवा अनन्तरहि(न्तर्हि)तायां पृथिव्यां निषीदनादि कुर्वीत ससरजस्कपाणिपादः १५, शब्दकरोऽसङ्खडशब्दं करोति, विकालेऽपि महता शब्देनोल्लपति १६, ' कलहकरे 'ति तत्करोति येन कलहः स्यात् १७, झंझा–गणभेदस्तत्कारी १८, सूरप्रमाणभोजी उदितादारभ्यास्तं यावद्भोजी १९, एषणाअसमितोऽनेषणां न परिहरति ॥ २० ॥

एक्कवीसाए सबलेहिं, बावीसाए परीसहेहिं, तेवीसाए सूयगडज्झयणेहिं, चउवीसाए देवेहिं, पंचवीसाए भावणाहिं, छवीसाए दसाकप्पववहाराणं उद्देसणकालेहिं, सत्तावीसविहे अणगार-चरित्ते अट्ठावीसविहे आयारप्पकप्पे, एगूणतीसाए पावसुयपसंगेहिं, तीसाए मोहणियठाणेहिं, एगतीसाए सिद्धाइगुणेहिं, बत्तीसाए जोगसंगहेहिं (सूत्रम्)

तं जह उ हत्थकम्मं कुव्वंते मेहुणं च सेवंते। राइं च भुंजमाणे आहाकम्मं च भुंजंते ॥ १ ॥ तत्तो य रायपिंडं कीयं पामिच्च अभि-हडं छेज्जं। भुंजंते सबले ऊ पच्चक्खियऽभिक्खभुंजइ य ॥ २ ॥ छम्मासब्भंतरओ गणा गणं संकमं करेंते य। मासब्भंतर तिण्णि य दगलेवा ऊ करेमाणो ॥ ३ ॥ मासब्भंतरओ वा माइठाणाइं तिन्नि करेमाणे। पाणाइवायउट्टिं कुव्वंते मुसं वयंते य ॥ ४ ॥ गिण्हंते य अदिण्णं आउट्टि तह अणंतरहियाए। पुढवीय ठाणसेज्जं निसिहियं वावि चेतेइ ॥ ५ ॥ एवं ससणिद्धाए ससरक्खाचित्तमंतसिललेलुं। कोलावासपइट्ठा कोलघुणा तेसि आवासो ॥ ६ ॥ संडसपाणसबीओ जाव उ संताणए भवे तहियं। ठाणाइ चेयमाणो सबले आउट्टियाए उ ॥ ७ ॥ आउट्टि मूलकंदे पुप्फे य फले बीयहरिए य। भुंजंते सबलेए तहेव संवच्छरस्संतो ॥ ८ ॥ दस दगलेवे कुव्वं तह माइट्ठाण दस य वरिस्संतो। आउट्टिय सीउदगं वग्घारियहत्थमत्ते य ॥ ९ ॥ दव्वीए भायणेण व दीयंतं भत्तपाणं घेत्तूणं। भुंजइ सबलो एसो इगवीसो होइ नायव्वो ॥ १० ॥

इत्यादि गाथा दश, शबलचारित्रनिमित्तत्वात्करकर्मकरणादयः क्रियाविशेषाः शबला उच्यन्ते, तद्यथा—हस्तकर्म स्वयं

कुर्वन् परेण वा कारयन् शबलः १, एवमतिक्रमव्यतिक्रमातिचारैर्मैथुनं सालम्बनः सेवमानः २, रात्रिभोजनं दिवा गृह्णाति दिवा भुङ्क्ते इत्यादि चतुर्भङ्ग्यामतिक्रमादिषु शबलः सालम्बनो दोषो यतनया ३ आधाकर्म ४ राजपिण्ड ५ क्रीत ६ प्रामित्य ७ अभ्याहृत ८ आच्छेद्यभोजी ९ अभीक्ष्णं प्रत्याख्याय २ भुञ्जानः १० षण्मासान्तर्गणाद्गणसङ्क्रमं कुर्वन् अन्यत्र ज्ञानाद्यर्थात् मासान्तस्त्रीन् १२ दकलेपानुत्तरन् अथवा त्रीणि मातृस्थानानि प्रच्छादनादीनि कुर्वन् १३, 'आउट्टि' उपेत्य पृथिव्यादिप्राणातिपातं कुर्वन् १४ मृषां वदन् १५ अदत्तं गृह्णन् १६ अनन्तर्हितायां सचित्तायां पृथिव्यां स्थानं कायोत्सर्गः शय्यां शयनं नैषेधिकीं निषदनं कुर्वन् सस्निग्धोदकेन ससरस्का[सरजस्कः] पृथिवीरजसः 'चित्तमंतसिला' सचेतना शिलेत्यर्थः, 'लेलू' सचेतनो लेष्टुः कोलाः घुणाः तेषामावासः, घुणखइयं कट्ठं, तत्थ ठाणाइं करेमाणे सबले, एवं सह अंडाईहिं जं तत्थवि ठाणाइ चेएमाणो सबले १८ आउट्टिआए मूलाई भुंजंते सबले १८ वरिसस्संतो दस दगलेवे दस य माइट्ठाणाइं कुणमाणे सबले १९-२०, सीउदगवग्घारिअहत्थमत्तेण गलंतेणंति मन्नइ, एवं दब्बीए गलंतीए भायणेण व दिज्जंतं घेत्तूण भुंजमाणे सबले २१ एवं दशानुसारेण शबलस्वरूपमुक्तं, सङ्ग्रहणिकारस्त्वेवमाह—

> वरिसंतो दस मासस्स तिन्नि दगलेवमाइठाणाइं । आउट्टिया करेंतो वहालियादिण्णमेहुण्णे ॥ १ ॥
> निसिभत्तकम्मनिवपिंडकीयमाई अभिक्खसंवरिए । कंदाइ भुंजंते उदउल्लहत्थाइ गहणं च ॥ २ ॥
> सचित्तसिलाकोले परविणिवाई ससिणिद्ध ससरक्खो । छम्मासंतो गणसंकमं च करकंममिइ सबले ॥ ३ ॥

व्याख्या पूर्वोक्तानुसारेण कार्या, नवरमचिरावनौ नवीनपृथिव्यां स्थानं ॥ १-३ ॥

एक-विंशतिः शबलाः

खुहापिवासासीउण्हं दंसाचेलारइत्थीओ । चरियानिसीहिया सेज्जा अक्कोसवहजायणा ॥ १ ॥

अलाभरोगतणफासा मलसक्कारपरीसहा । पण्णा अण्णाणसंमत्तं इइ बावीस परीसहा ॥ २ ॥

'दंम'त्ति दंशमशकादिभिर्दश्यमानोऽपि न ततः स्थानादपगच्छेन्न च तान्निवारयेत्, 'अचेल'त्ति अमहाधनमूल्यानि खण्डितानि जीर्णानि च वासांसि धारयेत्, 'अरइ'त्ति विहरतस्तिष्ठतो यद्यरतिरुत्पद्यते तथापि धर्म्मारामरतेनैव भवितव्यं, 'इत्थीउ'त्ति न स्त्रीणामङ्गादिचेष्टाश्चिन्तयेत्, 'चरिय'त्ति निर्ममत्वः प्रतिमासं चर्यामाचरेत्, 'निसीहिय'त्ति निषद्या-वसतिः स्त्र्यादिवर्जितां तां सेवेत, शय्यासंस्तारको मृदुकठिनादिभेदेनोच्चावचस्तत्र नोद्विजेत्, आक्रोशो-अनिष्टवचस्तत् श्रुत्वा न कुप्येत्, वधस्ताडनं पाणिपार्ष्ण्यादिभिस्तत्सम्यक् सहेत, परुषकुशदर्भादितृणस्पर्शं सम्यक् सहेत, 'सकारपरीषहे'त्ति सत्कारो-भक्तपानवस्त्रादीनां परतो योगः, पुरस्कारः सद्भूतगुणोत्कीर्त्तनादि, तत्रासत्कारितोऽपुरस्कृतो वा न द्वेषं यायात्, प्रज्ञा-बुद्ध्यतिशयस्तत्प्राप्तौ न गर्वमुद्वहेत्, 'अन्नाण'त्ति कर्मविपाकजादज्ञानान्नोद्विजेत्, असंमत्तं असम्यक्त्वपरीषहोऽहमुत्कृष्टतपास्तथापि धर्म्माधर्म्मात्मदेवनारकादिभावान्नेक्षे अतो मृषा समस्तमेतदिति, तत्रैवमालोचयेत्-समस्ति परं सम्यग्ज्ञानाद्यभावान्नेक्ष्यते ॥ १-२ ॥

पुडरीयकिरियट्ठाणं आहारपरिण्णपच्चक्खाणकिरिया य । अणगारअद्दनालंद सोलसाइ च तेवीसं ॥ १ ॥

अमूनि सूत्रकृताङ्गाध्ययनानि ॥ १ ॥

भवणवणजोइवेमाणिया य दस अट्ठपंचएगविहा । इइ चउवीसं देवा केइ पुण बेंति अरिहंता ॥ १ ॥

इरियासमिए सया जए उवेह भुंजेज्ज व पाणभोयणं । आयाणनिक्खेवदुगुंछ संजए समाहिए संजमए मणोवई ॥ १ ॥ अहस्ससच्चे अणुवीइ भासए जे कोहलोहभयमेव वज्जए । स दीहरायं समुपेहिया सिया मुणी हु मोसं परिवज्जए सया ॥ २ ॥ सयमेव उ उग्गहजायणे घडे मतिमं निसम्म सइ भिक्खु उग्गहं । अणुण्णविय भुंजिज्ज पाणभोयणं जाइत्ता साहंमियाण उग्गहं ॥ ३ ॥ आहारगुत्ते अविभूसियप्पा इत्थिं निज्झाइ न संथवेज्जा । बुद्धो मुणी खुड्डकहं न कुज्जा धम्माणुपेही संवए बंभचेरं ॥ ४ ॥ जे सद्दरूवरसगंधमागए फासे य संपप्प मणुण्णपावए । गिहीपदोसं न करेज्ज पंडिए स होइ दंते विरए अकिंचणे ॥ ५ ॥

इर्यासमितता प्रथमा भावना सदा यत उपयुक्तः सन्, 'उवेह' त्ति अवलोक्य भुञ्जीत च पानभोजनमिति द्वितीया, आदाननिक्षेपौ–पात्रादेर्ग्रहणमोक्षौ आगमप्रसिद्धौ जुगुप्सते–करोति आदाननिक्षेपजुगुप्सकः इति तृतीया, संयतः साधुः समाहितः सन् 'संजमए मणोवइ' त्ति अदुष्टं मनः प्रवर्त्तयेदिति चतुर्थी, एवं वाचमपि पञ्चमी इत्याद्यव्रतभावनाः ॥ १ ॥ अहास्यात्सत्यो हास्यपरित्यागादित्यर्थः, हास्यादनृतपरित्यागादित्यर्थः, हास्यादनृतमपि ब्रूयात् १, अनुविचिन्त्य–पर्यालोच्य भाषेत २, यः क्रोधं लोभं भयमेव वा त्यजेत्, स दीर्घरात्रं–मोक्षं समुपेक्ष्य–सामीप्येन दृष्टा स्यात् मुनिरेवं मृषां परिवर्जयेत् सदा, द्वितीयव्रतभावनाः ॥ २ ॥ स्वयमेव प्रभुं प्रभुसंदिष्टं वा अधिकृत्यावग्रहयाच्ञायां प्रवर्त्ततेऽनुविचिन्त्यान्यथा अदत्तं गृह्णीयात् १, 'घडे मइमं निसम्म' त्ति तत्रैव तृणाद्यनुज्ञापनायां चेष्टेत मतिमानाकर्ण्य प्रतिग्रहप्रदातृवचनं २, सदा भिक्षुरवग्रहं स्पष्टमर्यादयानुज्ञाप्य भजेत ३, अनुज्ञाप्य गुरुमन्यं वा भुञ्जीत पानभोजनं ४, याचित्वा साधर्मिकाणामवग्रहं स्थानादि कार्यं ५, तृतीयव्रतभावनाः ॥ ३ ॥ आहारगुप्तः स्यान्नातिमात्रं स्निग्धं वा भुञ्जीत १, अविभूषितात्मा स्यात् २,

स्त्रियं न निरीक्षेत ' न संथविज्ज 'त्ति न स्त्र्यादिसंसक्तां वसतिं सेवेत ४, बुद्धो मुनिः क्षुद्रकथां न कुर्यात् स्त्रीकथां स्त्रीणां चेति ५, धर्मानुप्रेक्षी संधत्ते ब्रह्मचर्यचतुर्थव्रतभावनाः ॥ ४ ॥ यः शब्दरूपरसगन्धानागतान् स्पर्शांश्च संप्राप्य मनोज्ञ-पापकान्-इष्टानिष्टान् गृद्धिं प्रद्वेषं न कुर्यात् पण्डितः, स भवति दान्तो विरतोऽकिञ्चनः, पञ्चममहाव्रतभावनाः ५ ॥ ५ ॥

अथ भाष्यगाथाभिर्द्वादशभिरेता एवाह—पणवीस भावणाओ पंचण्ह महव्वयाणमेयाओ। भणियाओ जिणगणहर-पुज्जेहिं नवर सुत्तंमि ॥ १ ॥ इरियासमिइ पढमा आलोइयभत्तपाणभोई य। आयाणभंडनिक्खेवणा य समिई भवे तइया ॥ २ ॥ मणसमिई वयसमिई पाणाइवायंमि होंति पंचेव। हासपरिहारअणुवीइ भासणा कोहलोहभयपरिण्णा ॥ ३ ॥ एस मुसावायस्स अदिन्नदाणस्स होंतिमा पंच। पहुसंदिट्ठ पहू वा पढमोग्गह जाए अणुवीई ॥ ४ ॥ उग्गहणसील बिइया तत्थोग्गेण्हेज्ज उग्गहं जहियं। तणडगलमल्लगाई अणुण्णवेज्जा तहिं तहियं ॥ ५ ॥ तच्चंमि उग्गहं तु अणुण्णवे सारिउग्गहे जा उ। तावइय मेर काउं न कप्पई बाहिरा तस्स ॥ ६ ॥ भावण चउत्थ साहम्मियाण सामण्णमण्णपाणं तु। संघाडगमाईणं भुंजेज्ज अणुण्णवियए उ ॥ ७ ॥ पंचमियं गंतूणं साहम्मियउग्गहं अणुण्णविया। ठाणाई चेएज्जा पंचेव अदिण्णदाणस्स ॥ ८ ॥ बंभवयभावणाओ णो अइमायापणीयमाहारे। दोच्च अविभूसणा ऊ विभूसवत्ती न उ हवेज्जा ॥ ९ ॥ तच्चा भावण इत्थीण इंदीया मणहरा ण णिज्झाए। सयणासणा विचित्ता इत्थिपसुविवज्जिया सेज्जा ॥ १० ॥ एस चउत्था ण कहे इत्थीण कहं तु पंचमा एसा। सद्दा रूवा गंधा रसफासा पंचमी एए ॥ ११ ॥ रागदोसविवज्जण अपरिग्गहभावणा उ पंचेव। सव्वा पणवीसेया एयासु न वट्टियं जं तु ॥ १२ ॥

दस उद्देसणकाला दसाण कप्पस्स होंति छच्चेव । दस चेव ववहारस्स व होंति सव्वेवि छवीसं ॥ १ ॥

वयछक्कमिंदियाणं च निग्गहो भावकरणसच्चं च । खमयाविरागयाविय मणमाईणं निरोहो य ॥ १ ॥

कायाण छक्क जोगाण जुत्तया वेयणाऽहियासणया । तह मारणंतियऽहियासणा य एएऽणगारगुणा ॥ २ ॥

व्रतषट्कं, इन्द्रियाणां च निग्रहः, भावसत्यं-भावलिङ्गं [अन्तः]शुद्धिः, करणसत्यं-बाह्यं प्रत्युपेक्षणादि, क्षमा-क्रोधनिग्रहः, मनोवाक्कायानामकुशलानामकरणं कुशलानामपि(म)निरोधश्च ॥ १ ॥ कायानां पृथिव्यादीनां षट्कं सम्यगनुपालनविषयतयाऽनगारगुणाः, संयमयोगयुक्तता, वेदना-शीतादिलक्षणा तदभिसहना च, तथा मारणान्तिकाभिसहनां च-कल्याणमित्रबुद्ध्या मारणान्तिकोपसर्गसहनमेतेऽनगारगुणाः ॥ २ ॥

सत्थपरिण्णा लोगो विजओ य सीओसणिज्ज संमत्तं । आवंति धुवविमोहो उवहाणसुय महापरिण्णा य ॥ १ ॥

पिंडेसणसिज्जि रिया भासज्जाया य वत्थपाएसा । उग्गहपडिमा सत्तेक्कतयं भावणविमुत्तीओ ॥ २ ॥

उग्घायमणुग्घायं आरूवणा तिविहमो णिसीहं तु । इय अट्ठावीसविहो आयारपकप्पणामोऽयं ॥ ३ ॥

अट्ठनिमित्तंगाइं दिव्वुप्पायंतलिक्खभोमं च । अंगसरलक्खणवंजणं च तिविहं पुणोक्केक्कं ॥ १ ॥

सुत्त वित्ती तह वत्तियं च पावसुय अउणतीसविहं । गंधव्वनट्टवत्थुं आउं धणुवेयसंजुत्तं ॥ २ ॥

पापोपादानं श्रुतं पापश्रुतं, अष्ट निमित्ताङ्गानि दिव्यं-व्यन्तराद्यट्टहासादिविषयं, उत्पातं-सहजरुधिरवृष्ट्यादिविषयं, अन्तरिक्षं-ग्रहभेदादिविषयं, भौमं भूकम्पादिविषयं, अङ्गं-अङ्गविषयं, व्यञ्जनं मषादि तद् विषयं, लक्षणं-करचरणरेखादि

सप्तविंशतिः अणगारगुणाः एकोनत्रिंशत्पापश्रुतानि च ।

तद्विषयं, तथा चाङ्गादिदर्शनतस्तद्विदो भावि सुखादि जानन्त्येव, त्रिविधं पुनरेकैकं दिव्यादि ॥ १ ॥ सूत्रं वृत्तिस्तथा वार्त्तिकं चेत्यनेन भेदेन–' दिव्वाईण सरूवं अंगविवज्जाण होइ सत्तण्हं । सुत्तं सहस्स लक्खो अ वित्ती तह कोडि वक्खाणं ॥ १ ॥ अंगस्स सयसहस्सं सुत्त वित्ती अ कोडि विन्नेआ । वक्खाणं अपरिमिअं एमेव य वत्तियं जाण ॥ २ ॥' एकोनत्रिंशद्विधं, अष्टौ मूलभेदाः, सूत्रादिभेदेन त्रिगुणिताश्चतुर्विंशतिः, तथा गान्धर्वं १ नाट्यं २ वास्तुविद्या ३ आयुर्वेदः ४ धनुर्वेदश्च ५ ॥ २ ॥

वारिमज्झेवगाहित्ता तसे पाणे विहिंसई । छाएउ मुहं हत्थेणं अंतोनायं गलेरवं ॥ १ ॥ सीसावेढेण वेढित्ता संकिलेसेण मारए[३] । सीसंमि जे य आहतु दुहमारेण हिंसइ[४] ॥ २ ॥ बहुजणस्स नेयारं दीव ताणं च पाणिणं[५] । साहारणे गिलाणंमि पहू किच्चं न कुव्वइ[६] ॥ ३ ॥ साहू अकम्म धम्माउ जे भसेइ उवट्ठिए[७] । णेयाउयस्स मग्गस्स अवगारंमि वट्टई[८] ॥ ४ ॥ जिणाणं णंतणाणीणं अवण्णं जो उ भासइ । आयरियउवज्झाए खिंसई मंदबुद्धीए[१०] ॥ ५ ॥ तेसिमेव य णाणीणं संमं नो पडितप्पइ[११] । पुणो पुणो अहिगरणं उप्पाए तित्थ-भेयए । ॥ ६ ॥ जाण आहंमिए जोए पउंजइ पुणो पुणो[१३] । कामे वमित्ता पत्थेइ इहऽन्नभविए इयं[१४] ॥ ७ ॥ भिक्खूणं बहुसुएऽहंति जो भासइऽबहुस्सुए[१५] । तहा य अतवस्सी उ जो तवस्सित्तिऽहं वए[१६] ॥ ८ ॥ जायतेएण बहुजणं अंतोधूमेण हिंसइ । अकिच्चमप्पणा काउं कयमेएण भासइ[१८] ॥ ९ ॥ नियडुवहिपणिहीए पलिउंचे[१९] साइजोगजुत्ते[२०] य । बेइ सव्वं मुसं वयसि[२१] अक्खीणझझए सया[२२] ॥ १० ॥ अद्धाणंमि पवेसित्ता जो धणं हरइ पाणिणं[२३] । वीसंभित्ता उवाएणं दारे तस्सेव लुब्भइ[२४] ॥ ११ ॥ अभिक्खमकुमारेहिं कुमारेऽहति भासई[२५] । एवं अबंभयारीवि बंभयारित्तिऽहं वए[२६] ॥ १२ ॥ जेणेविस्सरियं णीए वित्ते तस्सेव लुब्भई[२७] । तप्पभावुट्ठिए वावि अंतरायं करेइ[२८] से ॥ १३ ॥ सेणावइं पसत्थारं भत्तारं वावि हिंसई । रट्ठस्स वावि निगमस्स नायगं सेट्ठिमेव वा[२९] ॥ १४ ॥ अपस्समाणो पस्सामि अहं देवेत्ति वा

वए । अवण्णेणं च देवाणं महामोहं पकुवइ ॥ १५ ॥

सामान्येनाष्टविधं कर्म मोहः, विशेषेण चतुर्थी प्रकृतिर्मोहनीयं, तस्य स्थानानि-निमित्तानि मोहनीयस्थानानि, पाणियमज्झेऽवगाहित्ता तिव्वेण मणसा पाएण अक्कमित्ता तसे पाणे-इत्थीमाई विहिंसइ, 'से' तस्स महामोहमुप्पाएमाणे भवसयदुहवेअणिज्जं अप्पणो महामोहं पकुवइ, एवं सर्वत्र क्रिया १, छाएउ-ढकिउं मुहं 'हत्थेणं' ति उपलक्षणमिदं अन्नाणि कन्नाईणि, 'अंतोनायं' ति हिअए सुदुक्खमारडंतं, 'गलेरवं' गलएण अच्चंतं रडंतं २, 'सीसावेढेण' अल्लचंमाइणा केणइ वेढित्ता ३, 'संकिलेसेण' तिव्वासुभपरिणामेण मारणं ३, सीसंमि जे य आहंतुं-मोग्गराइणा दुह-मारेण हिंसइ ४ 'बहुजणस्स नेआरं' ति-पहुं हंति दीवं समुद्दंमि व बुड्डमाणाणं संसारे आसासत्थाणभूअं ताणं च-अन्नपाणाइणा ताणकारिणं पाणिणं तं च हिंसइ, ५, साधारणे-सर्वसामान्ये ग्लाने प्रभुः-समर्थोऽपि सन् कृत्यमौषधयाचनादि महाघोरपरिणामो न करोति ६, [तहा 'साहुं' अकम्म-बलात्कारेण धम्माओ-सुयचरित्तभेयाओ जे भंसेतित्ति-विनिवारेइ ७] नैयायिकस्य मार्गस्य ज्ञानादेरुपस्थितं साधुमाक्रम्य धर्माद् यो भ्रंशयति स स्वस्यान्येषां चापकारे वर्त्तते ८, जिनानाम-वर्णं भाषते ९, आयरियउवज्झाए पसिद्धे 'खिसइ' निंदइ जचाईहिं, अबहुस्सुया वा एए तहावि अम्हेवि एएसिं तु सगासे किंपि कहंचि अवहारियत्ति 'मंदबुद्धीए' बालेचि भणियं होइ १०, आचार्योपाध्यायानां ज्ञानिनामिति गुणोपलक्षणं सम्यग् न प्रतितर्प्यते(र्पति) आहारोपकरणादिना ११, पुनः पुनरधिकरणं ज्योतिषादि उत्पादयति-कथयति १२, तीर्थभेदको ज्ञानादिमार्गविराधकः १३, जानन् आधार्मिकान् योगान् वशीकरणादिलक्षणान् पुनः २ प्रयुङ्क्ते १४, पुनः २ कामानिच्छा-

मदनरूपान् ' वमित्त 'त्ति त्यक्त्वा प्रव्रज्यामभ्युपगम्य प्रार्थयते ऐहिकानामुष्मिकांश्च १५, अभिक्खणं २ बहुस्सुएऽहंति जो भासए, बहुस्सुएण अन्नेण वा पुट्ठो स तुमं बहुस्सुओ ?, आमंति भणेइ तुण्हिको वा अच्छइ, साहवो चेव बहुस्सुएत्ति भणइ अतवस्सी तवस्सित्ति विभासा १६, जाततेजसाऽग्निना बहुजनं गृहादौ क्षिप्त्वान्तर्धूमेन हन्ति १७, अकृत्यं-प्राणातिपातादि आत्मना कृत्वा कृतमनेनेति भाषते १८, निकृतिरन्यथाकरणरूपा माया, उपधिरन्यथाकृतं येन प्रच्छाद्यते, प्रणिधिरेवम्भूतान् धरति (एवम्भूत एव चरइ) अनेन प्रकारेण ' पलिउंचइ ' वंचेइ १९, साइजोगजुत्ते य'त्ति अशुभमनोयोगयुक्तश्च, बेइ-भणति सवं मुसं वयसि(इ) समाए २०, ' अक्खीणझंझए सय 'त्ति सदाऽक्षीणकलहः २१, अध्वनि पथि ' पवेसित्त 'त्ति नीत्वा विश्रम्भेन यो धनं सुवर्णादि हरति प्राणिनां २२, विश्वासोपायेनातुलां प्रीतिं कृत्वा पुनर्दारे-कलत्रे तस्यैव लुभ्यति, २३, अभिक्खणं अकुमारे संते कुमारे अहंति भासइ २४, एवं अबंभयारिंमि विभासा २५, येनैवैश्वर्यं नीतो वित्ते तस्यैव लुभ्यति २६, तप्पभावुट्ठिए वावि-लोगसंमयत्तणं पत्ते तस्से व केणइ पगारेण अंतरायं करेइ २७, सेनापतिं प्रशास्तारं राजानं भर्त्तारं वा स्वामिनं हन्ति, रट्ठस्स वावि निगमस्स जहासंखं नायगं सिट्ठिमेव वा, निगमो-वणिसंघाओ ॥ २८ ॥ अपश्यन्मायया पश्यामि [देवं]देवोऽहमिति वा वक्ति २९, ' अवन्नेणं च देवाणं ' जहा किं तेहिं कामगद्दहेहिं जे अम्हाणं न उवगरिंति, महामोहं पकुवइ कलुसिअचित्तत्तणओ ॥ ३० ॥

पडिसेहेण संठाणवण्णगंधरसफासवेए य । पणपणदुपणट्ठतिहा इगतीसमकायसंगरुहा ॥ १ ॥

प्रतिषेधेन संस्थानवर्णगन्धरसस्पर्शवेदानां पञ्चपञ्चद्विपञ्चाष्टत्रिभेदानामेकत्रिंशत्सिद्धादिगुणाः स्युः, ' अकायसंग-

रुह 'त्ति अकायोऽशरीरः, अमङ्गः—सङ्गवर्जितः, अरुहोऽजन्मा, एभिः सह एकत्रिंशत्स्युः । अथ प्रकारान्तरेण सिद्धादिगुणानाह—

अहवा कंमे णव दरिसणंमि चत्तारि आउए पंच । आइम अंते सेसे दोदो खीणभिलावेण इगतीसं ॥ १ ॥

'कर्म्मणि' कर्म्मविषये क्षीणाभिलापेन एकत्रिंशद्गुणाः स्युः, तत्र दर्शनावरणीये नवभेदाः—क्षीणचक्षुर्दर्शनावरण-इत्यादिरचनया, चत्वारि आयुष्के, पञ्च आद्ये ज्ञानावरणीयाख्ये कर्मणि, 'अंते'त्ति अन्तराये पञ्चैव, शेषे कर्मणि वेदनीय-मोहनीयनामगोत्रलक्षणे द्वौ द्वौ भेदौ भवतः, क्षीणसातावेदनीयः, क्षीणासातावेदनीयः क्षीणदर्शनमोहनीयः, क्षीणचारित्र-मोहनीयः, क्षीणशुभनाम, क्षीणाशुभनाम, क्षीणनीचैर्गोत्रः क्षीणोच्चैर्गोत्रः ॥ १ ॥

आलोयणा[1] निरवलावे[2] आवईसु दढधम्मया[3] । अणिस्सिओवहाणे[4] य सिक्खा[5] णिप्पडिकम्मया[6] ॥१२८८

अण्णायया[7] अलोहे[8] य तितिक्खा[9] अज्जवे[10] सुई[11] । सम्मदिट्ठी[12] समाही[13] य आयारे[14] विणओवए[15] ॥१२८९॥

[16]धिई मई य [17]संवेगे [18]पणिही [19]सुविहि संवरे[20] । अत्तदोसोवसंहारो[21] सव्वकामविरत्तिया[22] ॥१२९०॥

[23]पच्चक्खाणा विउस्सग्गे[24] अप्पमाए[25] लवालवे[26] । झाणसंवरजोगे[27] य उदए[28] मारणंतिए[29] ॥ १२९१ ॥

संगाणं च परिण्णा[30] पायच्छित्तकरणे[31] इय । आराहणा य मरणंते[32] बत्तीसं जोगसंगहा ॥ १२९२ ॥

योगाः—मनोवाक्कायव्यापारास्ते चाशुभप्रतिक्रमणाधिकारात्प्रशस्ता एव गृह्यन्ते, तेषां शिष्याचार्यगतानामालोच-नादिना प्रकारेण सङ्ग्रहणानि योगसङ्ग्रहाः प्रशस्तयोगसङ्ग्रहनिमित्तत्वादालोचनादय एव तथोच्यन्ते, शिष्येणाचार्याय सम्य-

गालोचना दातव्या १, आचार्योऽपि प्रदत्तायामालोचनायां निरपलापः स्यात्, नान्यस्मै कथयेदित्यर्थः २, आपत्सु द्रव्यादिभेदासु दृढधर्मता कार्या ३ अनिश्रितोपधाने च यत्नः कार्यः ४ शिक्षा आसेवितव्या सा च द्विप्रकारा, ग्रहणशिक्षा आसेवनाशिक्षा च ५, निष्प्रतिकर्म्मशरीरता सेवनीया, न पुनर्नागदत्तवदन्यथा वर्त्तितव्यं ६, तपसि अज्ञातता कार्या ७, अलोभश्च कार्यः ८ तितिक्षा—परीषहादिजयः सा कार्या ९, आर्जवं कर्त्तव्यं १०, शुचिना संयमवता भवितव्यं ११, सम्यग्दृष्टिः—सम्यग्दर्शनशुद्धिः कार्या १२ समाधिः—चेतःस्वास्थ्यं स कार्यः १३, आचारोपगः स्यान्न मायां कुर्यात् १४, तथा विनयोपगः स्यात्, न मानं कुर्यात् १५, धृतिप्रधाना मतिर्धृतिमतिः सा च कार्या १६ संवेगः कार्यः १७, प्रणिधिस्त्याज्या, माया न कार्या १८, सुविधिः कार्यः १९, संवरः कार्यो न तु न कार्य इति व्यतिरेकोदाहरणमत्र भावि २०, आत्मनो दोषोपसंहारः कार्यः । २१, सर्वकामविरक्तता भावनीया २२, मूलगुणोत्तरगुणविषयं प्रत्याख्यानं कार्यमिति द्वारद्वयं २३–२४ व्युत्सर्गो द्रव्यभावभेदभिन्नः कार्यः २५, अप्रमादः कार्यः २६ 'लवालवे' त्ति कालोपलक्षणं क्षणे २ सामाचार्यनुष्ठानं कार्यं २७, ध्यानसंवरयोगश्च कार्यः ध्यानमेव संवरयोगः २८, वेदनोदये मारणान्तिकेऽपि न क्षोभः कार्यः २९, सङ्गानां च ज्ञपरिज्ञाप्रत्याख्यानपरिज्ञाभेदेन परिज्ञा कार्या ३०, प्रायश्चित्तकरणं कार्यं ३१, आराधना मरणान्ते मरणकाले कार्या ३२ ॥ आद्यद्वारमाह—

उज्जेणि अट्टणे खलु सीहगिरिसोपारए य पुहइवई । मच्छियमल्ले दूरल्लकूविए फलिहमल्ले य ॥ १२९३

उज्जयिनीपुरी तस्यां जितशत्रुनृपोऽट्टनाख्योऽतिबलवान्[मल्लः], सोपारकपत्तने सिंहगिरिनामा पृथिवीपतिर्मल्लवल्लभः,

योगसङ्ग्रहे आलोचनायां अट्टन दृष्टान्तः

प्रस्यन्दमट्टनस्तत्र गत्वा जयपताकां गृह्णाति, राज्ञा स्वराज्यस्य पराभवं मत्वा वसां पिबन्तं मात्स्यिकमेकं बलवन्तं दृष्ट्वा आनीय पोषयित्वा स नियोधितोऽट्टनेनाऽजितोऽट्टनस्ततः स्वस्य हानिं मत्वा प्रतिमल्लार्थमटन् दूरल्लकूपिआग्रामे गतः, तत्र चैकेन पाणिना हलं वाहयन् अन्येन 'फलिह' त्ति वपन्यस्ता (कर्पासं) उत्पादयन् हारका(कूरघटमाना)हारोऽल्पपुरीषो हालिक एको दृष्टः । स चानीतः पोषितो नियुद्धं शिक्षितः काले सोपारके आनीतः । आद्यदिने फलही(लिह)मल्लो मात्स्यिकमल्लश्च युद्धे एको(ऽप्य)पराजितो, द्वावपि स्वाश्रये गतौऽट्टनेन दृष्ट्वा फलहि(लिह)मल्लः सज्जीकृतः मात्स्यिकेन नृपप्रहितसंमर्दकेभ्यः सम्यग् नोक्तं, द्वितीयदिने तौ समयुद्धौ, तृतीयदिने फलिहि(ह)मल्लेन मात्सिकः फलहि(लिह)ग्राहेण गृहीतो मृतः, स सत्कारितः, यथाऽट्टनस्तथाचार्याः जयपताका—आराधनापताका, साधुर्मल्लः अपराधाः प्रहाराः, यस्तान् गुरोरालोचयति स निःशल्यो निर्वृतिपताकां गृह्णाति ॥ १२९३ ॥

दंतपुरदंतचक्के सच्चवदी दोहले य वणयरए । धणमित्त धणसिरी य पउमसिरी चेव दढमित्तो ॥१२९४

दन्तपुरे दन्तचक्रो राजा, प्रिया सत्यवती, तस्या दोहदो दन्तप्रासादविषयोऽभूत् । राज्ञा वनचरास्तदर्थमादिष्टाः, ज्ञापितं च पुरे उचितं मूल्यं ददामि, यो न ददाति तस्य विनाशं करोमि, तत्रैव पुरे धनमित्रो वणिग् द्वे भार्ये धनश्री-पद्मश्रियौ, अन्यदा तयोः कलहे धनश्रीः प्राह किं त्वमेवं गर्विता ?, यथा सत्यवत्यास्तथा तव किं प्रासादो जायमानोऽस्ति ?, पद्मश्रिया तथैव प्रतिज्ञाते ज्ञात्वा धनमित्रो दुःखी तन्मित्रेण पृष्ट उक्तवान् सर्वं, ततो दृढमित्रः पुलिन्द्रप्रायोग्यं मणिकाऽलक्तकादि लात्वाऽटव्यां गतः तृणपिण्डान्तर्दन्तान् क्षिप्त्वा शकटैरानयन् पुरप्रवेशे गोकृष्टतृणपूलकपाताद्दन्तदर्शने आरक्षैर्धृत्वा

योगसङ्ग्रहे निरपलापतायां धनमित्रदृढमित्रदृष्टान्तः ।

राज्ञोऽर्पितः, राज्ञा वध्य आदिष्टो, धनमित्र आगत्य पादपतितः प्राह–स्वामिन् ! मया एते आनायिताः, स पृष्टः प्राह अहमेतं न जानामि, राज्ञाऽभये दत्ते सत्यमुक्तं, गुरुणैवं सुहृदे (शिष्याय) भाव्यं निरपलापिना ॥ १२९४ ॥

उज्जेणीए धणवसु अणगारे धम्मघोस चंपाए । अडवीए सत्थविब्भम वोसिरणं सिज्झणा चेव ॥१२९५

द्रव्यापद्युदाहरणं–उज्जयिन्यां धनवसुसार्थपः, स चम्पां गन्तुमनाः समार्थश्चचाल । तेन सह धर्म्मघोषमुनिश्चलितोऽटव्यां सार्थे पुलिन्दैर्विलोडिते नष्टजनेन सममटव्यां प्रविष्टः, जनः कन्दमूलाद्यत्ति जलं च पिबति, मुनिर्जनेन दीयमानं तदनिच्छन् शिलातले भक्तं प्रत्याख्याय केवली सिद्धः ॥ १२९५ ॥

महुराए जउण राया जउणावंकेण दंडमणगारे । वहणं च कालकरणं सक्कागमणं च पवज्जा ॥ १२९६ ॥

भावापदि मथुरायां यमुनो राजा, यमुनावङ्कमुद्यानं, तत्र यमुनाकूर्परे दण्डो अनगार आतापयन् राज्ञा दृष्टः, फलेनाहतः सर्वैः प्रस्तरराशिः कृतः कालगतः सिद्धः, विमानेन शक्रागमनं, शक्रेणोक्तं यदि प्रव्रजसि तदा मुञ्चामि प्रव्रजितो अभिगृह्णाति ऋषिघातस्मरणे न भोक्तव्यः, तेन भगवता एकशोऽपि नाहारितं, तस्य द्रव्यापत्, दण्डस्य भावापत् ॥१२९६॥

पाडलिपुत्त महागिरि अज्जसुहत्थी य सेट्ठि वसुभूती । वइदिस उज्जेणीए जियपडिमा एलकच्छं च ॥१२९७

श्रीस्थूलभद्रशिष्यौ महागिरिसुहस्तिनौ, महागिरिः सुहस्तिने गणं दत्त्वा व्युच्छिन्ने जिनकल्पे गच्छप्रतिबद्धो जिनकल्पपरिकर्म्म करोति, अन्यदा तौ पाटलीपुत्रं गतौ, तत्र वसुभूतिः श्रेष्ठी धर्मं श्रुत्वा श्रावको जातः, तत्कुटुम्बबोधार्थं सुहस्तिन-

स्तद्गृहे उपदिशतो महागिरिं भिक्षार्थमागतमभ्युतिष्ठतो वसुभूतिना पृष्टं किं युष्माकमपि गुरवः ?, सुहस्ती तेषां गुणसंस्तवं करोति, द्वितीयेऽह्नि तद्गृहेऽपूर्वकरणं दृष्ट्वा सुहस्ती उपालब्धो महागिरिणा, ततो द्वावपि वैदेशीं श्रुत्वं गतौ, तत्राजि(तत्र जीव)त्स्वामिप्रतिमां वन्दित्वा महागिरिर्गजाग्रपदपर्वतं वन्दारुरेडकाक्षपुरं गतः, तत्पूर्वं नाम्ना दशार्णपुरमासीत्, गजाग्रपदे भक्त प्रत्याख्याय महागिरिः स्वर्गतः । सुहस्ती उज्जयिन्यां जिन(जीवत्)प्रतिमां वन्दनाय प्राप्तः (गतः) । तन्मुखान्नलिनीगुल्माध्ययनं श्रुत्वा भद्रासूरवन्तिसुकुमालः प्रतिबुद्धः, आर्यमहागिरीणामनिश्रितं तपः ॥ १२९७ ॥

खितिव(च)णउसभकुसग्गं रायगिहं चंपपाडलीपुत्तं। नंदे सगडाले थूलभद्दसिरिए वररुची य ॥१२९८॥

अतीताद्धायां क्षितिप्रतिष्ठितं पुरं जितशत्रू राजा, तत् क्षीणवास्तुकं मत्वा वास्तुपाठकैरन्यनगरस्थानं विलोकयति स्म, चनकक्षेत्रमेक पुष्पितं दृष्ट्वा तत्र चनकपुरं स्थापितं, कालेन तदपि क्षीणं मत्वाऽरण्येऽन्याजय्यं वृषभं दृष्ट्वा तत्र ऋषभपुरं निवेशितं, कालेन तस्मिन्नपि क्षीणे कुशस्तम्बं दृष्ट्वा कुशाग्रपुरं कृतं, तस्मिन् पुनरग्निना ज्वलति सति प्रसेनजिन्नृपेण राजगृहं स्थापितं, प्रसेनजितः पुत्रः श्रेणिको राट्, तस्मिन् मृते, तत्सुतेन कोणिकेन चम्पा राजधानी कृता, कोणिके मृते तत्पुत्रेण उदायिनृपेण पाटलीपुरं स्थापितं । तत्र उदायिमरणे नवभिर्नन्दै राज्यं कृतं, नवमे नन्दे राज्यं कुर्वति कल्पकमन्त्रिवंशप्रसूतशकटालो मन्त्री, तस्य द्वौ पुत्रौ स्थूलभद्रः सिरी(श्री)यकश्च, यक्षाद्या सप्त पुत्र्यः, पण्डितो वररुचिः, कपटेन शकटाले विपन्ने नन्देन दीयमानाममात्यमुद्रां नेच्छति स्म स्थूलभद्रः, स वैराग्यात्सम्भूतयतिपार्श्वे प्रव्रजितः, पूर्वं कोशागृहे द्वादशवर्षी(र्षं)स्थितोऽपि स भगवांस्तयाऽक्षोभ्यो जातः । शिक्षां प्रति योगाः सङ्गृहीताः स्थूलभद्रस्वामिना ॥ १२९८ ॥

पइठाणे नागवसू नागसिरी नागदत्त पव्वज्जा। एगविहा सट्ठाणे देवय साहू य बिल्लगिरे ॥१२९९॥

प्रतिष्ठानपुरे नागवसुः श्रेष्ठी, नागश्रीः भार्या, तयोः पुत्रो नागदत्तो निर्विण्णकामभोगः प्रव्रजितः, स जिनकल्पप्रतिमाधराणां पूजासत्कारं दृष्ट्वा आचार्यैर्वार्यमाणोऽपि जिनकल्पं प्रतिपद्य एकत्र व्यन्तरगृहे प्रतिमया तस्थौ, देवतया सम्यग्दृष्ट्या मा विनश्यत्विति स्त्रीरूपेण यक्षपूजाच्छद्मना मोदका आनीय दत्ताः, स तान् भक्षयित्वा रात्रौ प्रतिमां स्थितः अतिसारो जातः, देवतया आचार्याणामुक्तं स शैक्षोऽमुकत्र, साधवः प्रेषिता आनीतः, देवतयोक्तं बिल्वगिरं (बीजपूरगर्भं) दीयतां, दत्ते स्थितं पोट्टं, शिक्षितश्च नैवं कार्यं ६ ॥ १२९९ ॥

कोसंबिय जियसेणे धम्मवसू धम्मघोस धम्मजसे। विगयभया विणयवई इड्ढिविभूसा य परिकम्मे ॥१३००

कौशाम्ब्यामजितसेनो राजा, धारिणी देवी, तत्र धर्मवसुगुरोः शिष्यौ धर्म्मघोपधर्मयशसौ, विगतभया महत्तरा विनयवती तस्याः शिष्यिणी, तया भक्तं प्रत्याख्यातं, सङ्घेन महता ऋद्धिसत्कारेण निर्यामिता मृता, तौ द्वावपि शिष्यौ परिकर्म्म कुर्वतः ॥ १३०० ॥ इतश्च—

उज्जेणिवंतिवद्धणपालगसुयरट्ठवद्धणे चेव। धारिय(णि) अवंतिसेणे मणिप्पभा वच्छगातीरे ॥ १३०१ ॥

उज्जयिन्यां चण्डप्रद्योतस्य द्वौ भ्रातरौ पालको गोपालकश्च, गोपालकः प्रव्रजितः, पालकस्य द्वौ पुत्रौ अवन्तिवर्द्धनो राष्ट्रवर्द्धनश्च, तयो राजयुवराजपदव्यौ दत्त्वा पालकः प्रव्रजितः, राष्ट्रवर्द्धनस्य भार्या धारिणी, तस्याः पुत्रोऽवन्तिसेनः,

योगसङ्ग्रहे निष्प्रतिकर्मतायां अज्ञातके च दृष्टान्ताः नि०गा० १२९९-१३०१

अन्यदा राज्ञा धारिणीं दृष्ट्वा अध्युपपन्नेन दूत्या प्रार्थिता, तयोक्तं भ्रातुरपि न लज्जसे । राज्ञा भ्रातरि हते सार्थेन सह कौशाम्ब्यां साऽऽगता, सा गर्भमनाख्याय महत्तरान्ते प्रव्रजिता, काले सुतो जातः, नाममुद्राभरणैः समं राजाङ्गणे मुक्तः, अजितसेनेन दृष्ट्वा राजगृहे मणिप्रभ इति च नाम कृतः, राज्ञि मृते मणिप्रभो राजा जातः, अवन्तिवर्द्धनस्तु पश्चात्तापादवन्तिसेनस्य राज्यं दत्त्वा प्रव्रजितः । स च मणिप्रभं दण्डं याचते, अदाने सर्वबलेन कौशाम्बीं प्रधावितः । तौ च द्वावपि मुनी परिकर्म्मसमाप्तौ एकः प्राह—यथा विनयवत्या ऋद्धिस्तथा समाप्यस्तु, नगरे भक्तं प्रत्याख्यातं, द्वितीयो धर्मयशा विभूषामनिच्छन् कौशाम्ब्या उज्जयिन्याश्चान्तरा वत्सकातीरे गिरिगुहायां भक्तं प्रत्याख्यातवान्, तदाऽवन्तिसेनेन कौशाम्बी रुद्धा जनो भयार्त्तः कश्चिद्धर्मघोषस्यान्तेऽपि न याति, स इष्टार्थमलभमानः कालगतः । मातृसाध्व्या स्वरूपं उक्त्वा सुतौ युद्धान्निवारितौ द्वावपि भ्रातरौ मिलितौ कञ्चित्कालं तत्र स्थित्वा उज्जयिन्यां चलितौ, माताऽपि समहत्तरा चलिता, मार्गे ज्ञात्वा द्वावपि नृपौ साधोर्दिने दिने पूजां चक्रतुः स्थित्वा, स कालगतः, यथा धर्मयशसा तथा कर्त्तव्यं ॥ १३०१ ॥

साएए पुंडरीए कंडरिए चेव देविजसभद्दा । सावत्थिअजियसेणे कित्तिमई खुड्डगकुमारो ॥ १३०२ ॥

जसभद्दे सिरिकंता जयसंधी चेव कण्णपाले य । नट्टविही परिओसे दाणं पुच्छा य पव्वज्जा ॥ १३०३ ॥

सुट्ठु वाइयं सुट्ठु गाइयं सुट्ठु नच्चियं साम सुंदरि ! । अणुपालिय दीहराइयओ सुमिणंते मा पमायए ॥ १३०४

साकेते पुण्डरीको नृपः, कण्डरीको युवराजः, तस्य देवी यशोभद्रा तां पुण्डरीको दृष्ट्वा प्रार्थितवान्, युवराजो हतः, सा

तथैव श्रावस्त्यां गता, तत्राऽजितसेन आचार्यः, कीर्तिमती महत्तरा, तस्याः पार्श्वे सा प्रव्रजिता, यथैव धारिणी नवरं पुत्र-स्तया न त्यक्तः, क्षुल्लककुमार इति नाम कृतं, प्रव्रजितो यौवने उन्निष्क्रमितुकामो मातृमहत्तराचार्योपाध्यायवचोभिरष्टा-चत्वारिंशद्वर्षाणि स्थितः, पश्चाद्विसृष्टो रत्नकम्बलनाममुद्राद्यादाय पुण्डरीकान्ते समागात् । रात्रौ नाट्ये प्रभाते किञ्चिन्निद्रा-प्रमादपरां नर्त्तकीमुद्दिश्य धोरिकिन्या (नर्त्तक्या) पठितं 'सुट्ठु' इत्यादि श्रुत्वा क्षुल्लककुमारो रत्नकम्बलं, यशोभद्रो युवराजः कुण्डलं, श्रीकान्ता सार्थपा हारं, जयसन्धिरमात्यः कटं, कर्ण्णपालो मिण्ठोऽङ्कुशं ददुः, सर्वाणि लक्षमूल्यानि, आहूय प्रातः पृच्छा, सद्भावकथने नृपः प्रीतः, सर्वे क्षुल्लककुमारानुलग्नाः प्रव्रजिताः, सर्वैरपि लोमस्त्यक्तः ॥ १३०२-१३०४ ॥

इंदपुर इंददत्ते बावीस सुया सुरिंददत्ते य । महुराए जियसत्तू सयंवरो निव्वुईए उ ॥ १३०५ ॥
अग्गियए पव्वयए बहुली तह सागरे य बोद्धव्वे । एगदिवसेण जाया तत्थेव सुरिंददत्ते य ॥ १३०६ ॥

इन्द्रपुरे इन्द्रदत्तो राजा तस्येष्टदेवीनां द्वाविंशतिः पुत्राः, एकाऽमात्यसुता तदुद्भवः सुरेन्द्रदत्तः, तद्दिनजाताः चत्वारो दासाः अग्निकः पर्वतको बहुलिकः सागरकः । इतश्च मथुरायां जितशत्रू राजा, तस्य सुता निवृत्तिर्नाम राज्यप्रदा, तदर्थं स्वयंवरमहे इन्द्रदत्तः ससुतो गतः । ज्येष्ठपुत्रः श्रीमाली तत्प्रमुखा द्वाविंशतिरपि राधावेधेऽसमर्थाः, तेषु चतुर्षु दासेषु विघ्नं कुर्वत्स्वन्यस्मिंश्चासिव्यग्रकरनरद्वये भयं कुर्वति, अष्टचक्राणां छिद्राणि ज्ञात्वा अन्यत्र मनोऽकुर्वता सुरेन्द्रदत्तेन राधावामाक्षि-वेधश्चक्रे, एषा द्रव्यतितिक्षा, यथा कुमारस्तथा साधुः दासाश्चत्वारः कषायाः, कुमारा द्वाविंशतिः परीषहा नरौ द्वौ रागद्वेषौ,

राधावेधः आराधना निवृत्तिः सिद्धिः ॥ १३०५-१३०६ ॥

चंपाए कोसियज्जो अंगरिसी रुद्दए य आणत्ते । पंथग जोइजसावि य अब्भक्खाणे य संबोही ॥ १३०७॥

चम्पायां कौशिकार्य उपाध्यायस्तस्य द्वौ शिष्यौ, अङ्गो भद्रकत्वादङ्गऋषिरिति नाम कृतं, रुद्रको ग्रन्थिच्छेदकः, उपाध्यायेन तौ दार्वर्थं प्रस्थापितौ, अङ्गऋषिरटवीतो दारुभारं लात्वा प्रत्येति, रुद्रको दिने यत्र तत्र स्थित्वा विकाले बहिर्गतो दृष्ट्वा आयान्तमङ्गऋर्षि चिन्तयति स्म उपाध्यायो मां ताडयिता इति ज्योतिर्यशा वत्सपाली पुत्रस्य पन्थकस्य भक्तकं दत्त्वा दारुभारेण एति । रुद्रकेण सा मारिता गर्तायां, तद्भारमादायान्यमार्गेणागत्योपाध्यायस्योचे-तव सुन्दरशिष्येण ज्योतिर्यशा मारितेति । स आगतो निष्कासितो वने शुभाध्यवसायेन जातिं स्मृत्वा केवली, देवैरुक्तं यथैतेनाऽभ्याख्यानं दत्तं, स चिन्तयन् प्रत्येकबुद्धो जातः ब्राह्मणो ब्राह्मणी च प्रव्रज्य सर्वेऽपि सिद्धाः ॥ १३०७ ॥

सोरिअ सुरंबरेवि अ सिट्ठी अ धणंजए सुभद्दा य । वीरे अ धम्मघोसे धम्मजसेऽसोगपुच्छा य ॥१३०८॥

शौर्यपुरे सुराम्ब(रव)रो यक्षस्तत्र श्रेष्ठी धनञ्जयः, भार्या सुभद्रा, ताभ्यां सुराम्ब(रव)रयक्षाय पुत्रार्थं महिषशतं मानितं, दैवात्पुत्रो जातः । अत्रान्तरे श्रेष्ठिना श्रीवीरान्तिकेऽणुव्रतप्रतिपत्तिः, यक्षेण मार्गितो दयया न दत्ते निजशरीरं शतखण्डं कृत्वा दास्ये इति कतिपयेषु खण्डेषु कृतेषु यक्षः प्रतिबुद्धः । एष देशशुचिः, श्रीवीरस्य शिष्यौ धर्म्मघोषधर्म्मयशसौ अशोकवृक्षाधो गुणवतः तच्छाया न परावर्त्तते, स्वामी पृष्टः कथयति स्म ॥ १३०८ ॥

योगसङ्ग्रहे आर्जवे शुचौ च दृष्टान्तौ नि०गा० १३०७-१३०८

सोरियसमुद्दविजए जन्नजसे चेव जन्नदत्ते य । सोमित्ता सोमजसा उंछविही नारदुप्पत्ती ॥ १३०९ ॥
अणुकंपा वेयड्ढो मणिकंचण वासुदेव पुच्छा य । सीमंधरजुगबाहु जुगंधरे चेव महबाहु ॥ १३१० ॥

शौर्यपुरे समुद्रविजयो राजा आसीत्तदा यज्ञयशास्तापसस्तद्भार्या सौमित्रा, तस्याः पुत्रो यज्ञदत्तः, सोमयशा वधूः, तत्पुत्रो नारदः ते उञ्छवृत्तिं कुर्वते, एकान्तरे भुञ्जते च, अन्यदा नारदमशोकवृक्षाधो मुक्त्वा उञ्छार्थं गताः । अतो वैताढ्याज्जृम्भकामरैर्व्रजद्भिरवधिना स्वनिकायच्युतं ज्ञात्वा अनुकम्पया[छाया]स्तम्भिता, प्रतिनिवृत्तैस्तैः स गृहीत्वा प्रज्ञप्त्याद्या विद्याः पाठितः, स मणिपादुकाभ्यां काञ्चनकुण्डिकया नभसा हिण्डति, अन्यदा द्वारकां गतो वासुदेवेन पृष्टः किं शौचं ?, उत्तरदानासमर्थ उत्थाय पूर्वविदेहेऽगात् । तत्र सीमन्धरस्वामी युगबाहुवासुदेवेन पृष्टः किं शौचमिति, स्वामी प्राह–सत्यं शौचं तेन ज्ञातं, पुनरपरविदेहेऽगात्, तत्र युगन्धरस्वामी महाबाहुवासुदेवाग्रे तथैवाकथयत् । श्रुत्वा द्वारकामागतः कृष्णायोक्तवान् सत्यं शौचं, पुनः पृष्टः किं सत्यं ?, तदजानानश्चिन्तयन् जातिं स्मृत्वा प्रत्येकबुद्धो जातः, प्रथममध्ययनं वदति स्म, एवं शौचेन योगाः सङ्गृहीताः ॥ १३०९–१३१० ॥

सागेयम्मि महाबल विमलपहे चेव चित्तकम्मे य । निप्फत्ति छट्ठमासे भुमीकम्मस्स करणं च ॥१३११

साकेते महाबलो राजा, आस्थाने दूतं पृष्टवान् किं नास्ति मम यदन्येषां राज्ञामस्ति, तेन चित्रसभेत्युक्ते सा कारिता तत्र द्वौ चित्रकरौ विमलः प्रभास(भाकर)श्च, तयोरर्द्धीकृत्य चित्रायाऽर्पिता, यवनिकान्तरितौ चित्रयतः एकेन षण्मास्या

योगसङ्ग्रहे शुचौ समग्दष्टौ च दृष्टान्तौ नि०गा० १३०९-१३११

चित्रं कृतं एकेन भूमिः कृता। राज्ञा विलोकनाय यवनिकाऽपनीता कुड्ये प्रतिबिम्बितं चित्रं दृष्ट्वा तुष्टेन तथैव स्थापितं, एवं सम्यक्त्वं विशुद्धं कर्त्तव्यं ॥ १३११ ॥

नयरं सुदंसणपुरं सुसुणाए सुजससुव्वए चेव। पव्वज्ज सिक्खमादी एगविहारे य फासणया ॥१३१२॥

सुदर्शनपुरे शिशुनागो गृहपतिस्तद्भार्या सुयशास्तौ श्राद्धौ, तत्सुतः सुव्रतो गर्भादपि संविग्नो यौवने आपृच्छ्य प्रव्रजित एकाकिविहारप्रतिमां प्रतिपन्नः, शक्रप्रशंसायां 'फासणय'त्ति सुरैर्नानोपसर्गैश्चालितोऽपि न चलितो यावत्सिद्धः ॥१३१२॥

पाडलिपुत्त हुयासण जलणसिहा चेव जलणडहणे य। सोहम्मपलियपणए आमलकप्पाइ णट्टविही॥१३१३

पाटलिपुत्रे हुताशनो ब्राह्मणः श्राद्धो भार्या ज्वलनशिखा तत्पुत्रौ ज्वलनदहनौ, चत्वारोऽपि प्रव्रजिताः; ज्वलन ऋजुर्दहनो मायी, द्वावपि मृतौ सौधर्मे शक्रस्याभ्यन्तरपर्षदि सुरौ पञ्चपल्यायुःस्थिती, श्रीवीरस्याग्रे आमलकल्पायामम्बशालवने चैत्ये नाट्यविधिं दर्शयतः, एक ऋजुरूपाणि करोति, अन्यस्य विपरीतं जातं, गौतमेन स्वामी पृष्टो मायादोषमकथयत्तस्य ॥१३१३॥

उज्जेणी अंबरिसी मालुग तह निंबए य पव्वज्जा। संकमणं च परगणे अविणय विणए य पडिवत्ती ।१३१४।

उज्जयिन्यामम्बर्षिर्विप्रः श्राद्धो मालुका प्रिया निम्बः पुत्रः, मालुकायां मृतायां पुत्रेण समं प्रव्रजितः, पुत्रस्य दुर्विनीतत्वेनोज्जयिन्यां पञ्चसु प्रतिश्रयशतेषु स हिण्डितो निष्कासितश्च, संज्ञाभूमौ पितृरोदने पृष्टं—तात! किं रोदनं! त्वया मे नाम कृतं निम्ब (तव निम्ब इति नाम कृतं न निरर्थकम्) इति, पुनर्विनीततायां तेषु तेषूपाश्रयेषु साधवस्तोषिताः ॥ १३१४ ॥

योगसङ्ग्रहे समाधौ आचारे विनयोपगते च दृष्टान्ताः नि०गा० १३१२-१३१४

नयरी य पंडुमहुरा पंडववंसे मई य सुमई य । वारीवसभारुहणे उप्पाइय सुट्ठियविभासा ॥ १३१५ ॥

नगरी पाण्डुमथुरा, तत्र पञ्च पाण्डवा अभवन्, तद्वंशेऽन्यो राजा, तत्पुत्र्यौ मतिसुमती, उज्जयन्तचैत्यवन्दनाय सुराष्ट्रायामायान्त्यौ वारिवृषभः [नाम] प्रवहणं तदारुह्य उत्पाते भिन्ने वहने लोके स्कन्दरुद्रादिस्मृतिपरे संयमयोगेन महासत्यौ सिद्धे, सुस्थितलवणाधीशेन महिमा चक्रे, देवोद्योतेन तत्प्रभासतीर्थं जातं ॥ १३१५ ॥

चंपाए मित्तपभे धणमित्ते धणसिरी सुजाते य । पियंगू धम्मघोसे य अरक्खुरी चेव चंद्घोसे य ।१३१६।
चंदजसा रायगिहे वारत्तपुरे अभयसेण वारत्ते । सुसुमार धुंधुमारे अंगारवई य पज्जोए ॥ १३१७ ॥

चम्पायां मित्रप्रभो राजा, धारिणी देवी, धनमित्रः सार्थवाहो, भार्या धनश्रीः तत्पुत्रोऽत्र कुले सुजात इति जनप्रशंसायां सुजातनामा सुरूपः, ते श्रावकाः, तत्रैव धर्म्मघोषोऽमात्यस्तस्य प्रियङ्गुः भार्या सा दृष्ट्वा सुजातं तल्ललितानि करोति, दृष्ट्वाऽमात्येन विनष्टमन्तःपुरमिति मत्वा कूटलेखप्रयोगश्चक्रे उपायेन मारणाय, राज्ञा सोऽरक्खुरीपूर्यां चन्द्रध्वजनृपान्ते प्रहितः, तेन लेखो दर्शितः, सुजातेनोक्तं यज्जानाति तत्कुरु, तेन प्रच्छन्नं संस्थाप्य चन्द्रयशा भगिनी दत्ता, सा त्वग्दोषिणी सुजातेन प्रतिबोधिता भक्तं प्रत्याख्याय देवोऽभूत् , अवधिना ज्ञात्वाऽऽगत्य शिलोच्चयेन नृपं भापयित्वा देवः सुजातं स्वस्थाने मुमोच, सुजातः नृपमापृच्छ्य मातृपितृसहितः प्रव्रज्य सिद्धः, मन्त्री राज्ञा निर्विषयः कृतो भ्रमन् वैराग्याद्राजगृहे स्थविरान्ते प्रव्रज्य बहुश्रुतो विहरन् वार्त्त(वारत्त)कपुरि गतः, तत्राभयसेनो राजा वार्त्र(वारत्त)कोऽमात्यस्तद्गृहे भिक्षार्थं गतः, स घृतादिपायसस्था-

लाद्धिन्दौ पतिते नेच्छति, वारत्तकोऽवलोकनगतो दृष्ट्वा तत्र मक्षिकाद्युपप्लवं शुभाध्यवसायेन जातिं स्मृत्वा देवतादत्तलिङ्गः प्राव्रजत्, वारत्रकर्षिर्विहरन् सुंसुमारपुरमायातः, तत्र धुन्धुमारो राजा तस्याङ्गारवती सुव्रता श्राविका, रुष्टपरिव्राजकया चित्रे लिखित्वोज्जयिन्यां चन्द्रप्रद्योतस्य दर्शिता, दूतेन बलात् मार्गितेऽदाने सर्वबलेन रुद्धं सुंसुमारपुरं तेन, निमित्तज्ञेन बाला भापितास्ते भीता नागगृहस्थितवारत्तकमूले गताः, मा बिभ्यतेति मुनिनोक्ते राज्ञस्तेनाभयमुक्तं, युद्धे बद्धश्चण्डप्रद्योतः, महाशासनमिति कृत्वा दत्ताङ्गारवती तस्मै, प्रद्योतेन पृष्टा प्रिया, प्रिये ! त्वत्पित्राहं कथं जितः, तया मुनिवचः कथितं, दृष्ट्वा प्रद्योतः प्राह-वन्दे निमित्तकर्षिं, साधुनोपयुक्तेन ज्ञातं स्खलितं, पश्चान्निवृत्तः, चन्द्रयशासुजातधर्म्मघोषवारत्तकैः संवेगेन योगाः सङ्गृहीताः ॥ १३१६-१३१७ ॥

भरुयच्छे जिणदेवो भयंतामिच्छे कुलाण भिक्खू य। पइठाण सालवाहण गुग्गुल भयवं च णहवाहणे १३१८

भरुकच्छे नभोवाहनो राजा कोशसमृद्धः, इतः प्रतिष्ठाने शालवाहनो राजा बलसमृद्धः, स नभोवाहनं रुन्धति स्म, कोशसमृद्धोऽरिमस्तकाद्यानयिनां द्रव्यलक्षं दत्ते, एवं क्षीणबलः प्रतिवर्षं याति, अन्यदा तन्मन्त्री निर्विषयकृतोऽहमिति कपटेन निर्गत्य गुग्गुलभारमादाय भरुकच्छमायातो देवकुले गुग्गुलभगवान्नामाहमिति स्वं ख्यापयन् तस्थौ, राज्ञा सत्कृत्य मन्त्री चक्रे, राज्यं पुण्यलभ्यमितिच्छद्मना देवकुलकूपादिषु सर्वं द्रव्यं तेन विश्वास्य निष्ठापितं पश्चात्शालवाहनेन जितः। एष द्रव्यप्रणिधिरमात्यस्य । भावप्रणिधौ तत्रैव जिनदेवाचार्यः भदन्तमित्रकुणालाख्यौ द्वौ भ्रातरौ भिक्षू, राजकुले वादे

जितौ जिनदेवेन, पश्चात्तत्सिद्धान्तपठनार्थं मायया तन्मूले प्रव्रजितौ, पठन्तौ गोविन्दवत् भावतः साधू जातौ ॥ १३१८ ॥

बारवई वेयरणी धन्नंतरि भविय अभविए विज्जे। कहणा य पुच्छियंमि य गइनिद्देसे य संबोही ॥१३१९॥

सो वानरजूहवई कंतारे सुविहियाणुकंपाए । भासुरवरबोंदिधरो देवो वेमाणिओ जाओ ॥ १३२० ॥

यथा सामायिकनिर्युक्तौ ॥ १३१९–१३२० ॥

वाणारसी य कोट्ठे पासे गोवालभद्दसेणे य । नंदसिरी पउमसिरी रायगिहे सेणिए वीरो ॥ १३२१ ॥

राजगृहे श्रेणिकः श्रीवीरमपृच्छत् या देवी नाट्यविधिमुपदर्श्य गता का एषा ?, स्वाम्याह–वाराणस्यां भद्रसेनः श्रेष्ठी, भार्या नन्दा, तत्पुत्री नन्दश्रीः, वरवर्जिता, तत्र कोष्ठकचैत्ये श्रीपार्श्वः समवसृतः, नन्दश्रीः प्रव्रजिता गोपालिकामहत्तरान्ते पूर्वमुग्रविहारेण विहृत्य पश्चादवसन्ना जाता, हस्तपादादिशौचं कुर्वाणा निषिद्धा पृथगुपाश्रये स्थिताऽनालोच्य मृत्वा हिमवति पद्महृदे श्रीर्जाता देवगणिका, एतया संवरो न कृतः ॥ १३२१ ॥

बारवइ अरहमित्ते अणुद्धरी चेव तहय जिणदेवो। रोगस्स य उप्पत्ती पडिसेह अत्तसंहारो ॥ १३२२ ॥

द्वारवत्यामर्हन्मित्रः श्रेष्ठी, अनुद्धरी प्रिया, जिनदेवः पुत्रः, सर्वे श्राद्धाः, जिनदेवस्य रोगोत्पत्तिः, वैद्यैर्मांसं गृहाणेत्युक्तः स्वजननिर्बन्धे स चिन्तयति स्म गृहीते द्विगुणो बन्ध इत्यात्मदोषोपसंहारश्चक्रे, सर्वं सावद्यं प्रत्याख्यातवान् कर्मक्षयात्प्रगुणः, प्रव्रज्यां कृत्वा शुभाध्यवसायात्सिद्धः ॥ १३२२ ॥

योगसङ्ग्रहे अनुकम्पायां संवरे आत्मदोषोपसंहारे च दृष्टान्ताः नि०गा० १३१९-१३२२

उज्जेणिदेवलासुय अणुरत्ता लोयणा य पउमरहो। संगयओ मणुमइया असियगिरी अद्धसंकासा ॥१३२३

उज्जयिन्यां देवलासुतो राजा, अनुरक्ता लोचना प्रिया, सा राज्ञः शिरसि पलितं दृष्ट्वाऽऽह–धर्म्मदूत आयात इति, पद्मरथं सुतं राज्ये न्यस्य प्रियायुतो राजा तापसाश्रमे तपस्वी जातः, सङ्गतको दासो मनुमतिका दासी च प्रव्रज्य कालान्तरे उत्प्रव्रजिते, देव्या तदा गर्भो नाख्यातः। पश्चात् सुतायां सूतायां मृता देवी, पुत्री त्वर्द्धसङ्काशाख्या यौवनं प्राप्ता, श्रान्तं पितरं विश्राम्यति, स तस्यामनुरक्तः अन्यदा आश्लेष्टुं धावितो अन्तरा उटजकाष्ठे आपतितश्चिन्तयति–इदमिहलोके ज्ञायते किञ्चिदिति प्रत्येकबुद्धो जातिं स्मृत्वा सर्वकामविरक्ताख्यमध्ययनमुक्त्वा पुत्रीं साध्वीनां दत्त्वा सिद्धः, पुत्र्यपि सिद्धा ॥१३२३॥

कोडीवरिसचिलाए जिणदेवे रयणपुच्छकहणा य। साएए सत्तुंजे वीरकहणा य संबोही ॥ १३२४ ॥

मूलगुणप्रत्याख्याने ज्ञातं–साकेते शत्रुञ्जयो राजा, जिनदेवः श्राद्धः, स दिग्यात्रायां गतः कोटीवर्षपुरे, तत्रानार्य-चिलातराजस्य रत्नादीनि ढौकितवान्, स चिलातः पृच्छति–क्व एतानि लभ्यन्ते ?, स प्राह–अन्यराज्ये, चिलातस्य तत्रागमनेच्छायां राज्ञोऽभयं दापयित्वा स आनीतः श्राद्धेन, श्रीवीरागमे शत्रुञ्जयो निर्गतः, चिलातः पृच्छति क्व जनो याति ?, श्राद्ध ऊचे–स एष रत्नवणिक्, द्वावपि गतौ, स्वामी भावरत्नानि द्रव्यरत्नानि च वर्णयति, चिलातः प्रव्रजितः एतन्मूलगुणप्रत्याख्यानं ॥ १३२४ ॥

वाणारसी य णयरी अणगारे धम्मघोस धम्मजसे। मासस्स य पारणए गोउलगंगा व अणुकंपा ।१३२५।

योगसङ्ग्रहे सर्वकाम-विरक्त-तायां मूल-गुणप्रत्या-ख्याने उत्तरगुण प्रत्या-ख्याने च दृष्टान्ताः नि०गा० १३२३-१३२५

वाराणस्यां धर्म्मघोषधर्म्मयशोमुनी वर्षासु स्थितौ मासात् २ भोजिनौ, चतुर्थपारणके प्रथमायां स्वाध्यायं द्वितीयस्यामर्थपौरुषीं कृत्वा तृतीयस्यां पौरुष्यां पात्रकाण्युग्राह्य चलितौ, उष्णाभिहतौ तृषातुरौ गङ्गामुत्तरन्तौ मनसा तज्जलं पातुमनिच्छन्तौ उत्तीर्णौ गङ्गादेवता आवर्जिता गोकुलानि विकृत्य प्रार्थयन्ती साधुभ्यामुपयुज्य निषिद्धा, पश्चादनुकम्पया वार्दलं चक्रे, साधू ग्रामं प्राप्तौ, एतदुत्तरगुणप्रत्याख्यानं ॥ १३२५ ॥

करकंडु कलिंगेसु पंचालेसु य दुम्मुहो । नमीराया विदेहेसु गंधारेसु य णग्गती ॥ २०५ ॥ (भा०)
वसभे य इंदकेऊ वलए अंबे य पुप्फिए बोही । करकंडु दुम्मुहस्सा नमिस्स गंधाररन्नो य ॥ २०६ (भा०)

कलिङ्गेषु काञ्चनपुरे दधिवाहनपद्मावतीसुतः करकण्डू राजा स गोकुलप्रियः, तेनैको वृषभः सलक्षणः पयोभिः पोषितो युद्धकुशलो दृष्टः, पुनः कालेन वार्द्धके महाकायः पङ्कैः परिघृष्यमाणो दृश्यते, ततो विषण्णश्चिन्तयन् सम्बुद्धः ॥ २०५-६ ॥ तथा चाह—

सेयं सुजायं सुविभत्तसिंगं जो पासिया वसभं गोट्ठमज्झे ।
रिद्धिं अरुद्धिं समुपेहिया णं कलिंगरायावि समिक्ख धम्मं ॥ २०७ ॥ (भा०)

श्वेतं शुक्लं सुजातं-गर्भदोषविकलं, सुविभक्तशृङ्गं-विभागस्थसमशृङ्गं यो राजा दृष्ट्वा वृषभं गोष्ठमध्ये गोकुलान्तः, पुनश्च तेनैवानुमानेन ऋद्धिं-समृद्धिं विभूतिं, तद्विपरीतां चाऋद्धिं सम्प्रेक्ष्याऽसारतयाऽऽलोच्य कलिङ्गराजोऽपि समीक्ष्य पर्यालोच्य

धम्मं संबुद्ध इति शेषः ॥ २०७ ॥ किं चिन्तयन्—

गोट्ठंगणस्स मज्झे ढेक्कियसद्देण जस्स भज्जंति । दित्तावि दरियवसहा सुतिक्खसिंगा सरीरेण २०८ (भा०)
पोराणयगयदप्पो गलंतनयणो चलंतवसभोट्ठो । सो चेव इमो वसहो पड्डुयपरिघट्टणं सहइ । २०९। भा०

गोष्ठाङ्गणस्यान्तः, 'ढेक्किअसद्देण 'त्ति ढेक्कितशब्देन यस्य भग्नवन्तः दीप्तरोषिणोऽपि दर्पितवृषाः, सुतीक्ष्णशृङ्गाः समर्था अपि शारीरेण बलेन ॥ २०८ ॥ पौराणकः गतदर्पो गतपुरातनदर्पः गलन्नयनः चलद्वृषभोष्ठश्चलद्दशनौष्ठौ वा, स एवायं वृषभोऽधुना पड्कपरिघट्टनं सहते, धिगसारः संसार इति सम्बुद्धो जातिस्मृतिमान् विहरति ॥ २०९ ॥ इतः पञ्चालेषु काम्पील्यपुरे द्विमुखो (दुर्मुखो) राजा स इन्द्रकेतुं पश्यति लोकेन पूज्यमानमनेकपताकाभिरामं, पुनः प्रविलुप्यमानं पतितं चामेध्याद्युपरि, सोऽपि सम्बुद्धः, तथा चाह—

जो इंदकेउं समलंकियं तु दट्ठुं पडंतं पडिलुप्पमाणं ।
रिद्धिं अरिद्धिं समुपेहिया णं पंचालराया वि समिक्ख धम्मं ॥ २१० ॥ (भा०)

इतो विदेहासु मिथिलायां युगबाहुमदनरेखासुतो नमी राजा ग्लानो जातः, चन्दनघर्षणे देवीनां वलयरवः, एकैककरणे उपशान्तः ज्ञात्वा, तेन दुःखेन अभ्याहतः परेलोकाभिमुखो बहूनां दोष एकस्य नेति चिन्तयन् सम्बुद्धस्तथा चाह—

वहुयाण सद्दयं सोच्चा एगस्स य असद्दयं । वलयाणं नमीराया, निक्खंतो मिहिलाहिवो ॥२११॥ (भा०)

इतो गन्धारदेशे पुरुष(पुरिम)पुरे नग्गती राजा अणु(नु)यात्रायां गतः पश्यति चूतं कुसुमितं, तेनैका मञ्जरी गृहीता, यावत्सैन्येन स काष्ठावशेषः कृतः, प्रत्यावृत्तेन दृष्ट्वा व्यचिन्ति, एवं राज्यश्रीः, अलमनयेति सम्बुद्धस्तथा चाह—

जो चूयरुक्खं तु मणाहिरामं समंजरिं पल्लवपुप्फचित्तं ।
रिद्धिं अरिद्धिं समुपेहिया णं गंधाररायावि समिक्ख धम्मं ॥ २१२ ॥ (भा०)

ते चत्वारोऽपि विहरन्तः क्षितिप्रतिष्ठितपुरे चतुर्द्वारं देवकुलमायाताः, पूर्वतः करकण्डुः दक्षिणतो द्विमुख (दुर्मुख) एवं शेषावपि, यक्षश्चतुर्मुखो जातः, आबाल्यात्करकण्डोः कण्डूरस्ति तेन कण्डूयनं गृहीत्वा मसृणं [कर्णः] कण्डूयितः, तत्तेनैकत्र सङ्गोपितं दृष्ट्वा द्विमुखः (दुर्मुखः) प्राह—'जया रज्जं च रट्ठं च पुरं अंतेउरं तहा । सव्वमेव परिच्चज्ज संचयं किं करेसिमं ?' ॥ १ ॥ यावत् करकण्डुः प्रतिवचो न दत्ते तावन्नमिराह—'जया ते पेइए रज्जे, कया किच्चकरा बहू । तेसिं किच्चं परिच्चज्ज अन्नकिच्चकरो भवं ?' ॥ २ ॥ पैतृके राज्ये ते त्वया कृत्यकराः कृताः अन्यकृत्यकरः कृत्यप्रवर्त्तको भवान्, नग्गतिराह—'जया सव्वं परिच्चज्ज मोक्खाय घडसी भवं । परं गरिहसी कीस ?, अत्तनीसेसकारए' ॥ ३ ॥ घटसे—चेष्टसे आत्मनिःश्रेयसकारकः, तं करकण्डुर्भणति—'मोक्खमग्गं पवण्णाणं साहूणं बंभयारिणं । अहियत्थं निवारन्ते, न दोसं वत्तुमरिहसि ॥ ४ ॥ रूसउ वा परो मा वा विसं वा परिअत्तउ । भासियव्वा हिया भासा सपक्खगुणकारिणी' ॥ ५ ॥

जहा जलंताइ(त) कट्ठाइं उवेहाइ न चिरं जले। घट्टिया घट्टिया ज्झत्ति तम्हा सहह घट्टणं ॥ १३२६ ॥

यथा ज्वलन्ति काष्ठानि, उपेक्षया न चिरेणापि ज्वलन्ति, घट्टितानि २ पुनर्झगित्येव ज्वलन्ति, तस्माद् घट्टनाः-प्रेरणाः सहत ॥ १३२६ ॥

सुचिरंपि वंकुडाइं होहिंति अणुपमज्जमाणाइं । करमद्दिदारुयाइं गयंकुसागारवेंटाइं ॥ १३२७ ॥

गजाङ्कुशाकारवृन्तानि गजाङ्कुशाकारमूलानि करमन्दिकादारूणि सुचिरं बहोः कालादपि वक्राण्यपि 'अणुपमज्जमाणाइं' ति अनु-पश्चात् स्नेहतापादिभिः ऋजूक्रियमाणानि ऋजूनि भवन्ति । एतेषां काष्ठखण्डत्यागो राज्यत्यागश्च द्रव्यव्युत्सर्गः ॥ १३२७ ॥

रायगिहमगहसुंदरि मगहसिरी पउमसत्थपक्खेवो । परिहारियअप्पमत्ता नट्टं गीयं नवि य चुक्का ॥१३२८

राजगृहे जरासन्धनृपस्य द्वे गायक्यौ मगधसुन्दरीमगधश्रियौ । मगधश्रिया दुष्टया मगधसुन्दरीनाट्यदिने तस्या मारणाय रङ्गभूमौ कर्णिकारपुष्पेषु सौवर्णिका विषभाविताः शूच्यः केसरसदृशः क्षिप्ताः, ता मगधसुन्दरीसहचरिकया ज्ञाताः, भ्रमराः कर्णिकाराणि नाश्रयन्ति चूतेषु लीयन्ते इत्येतानि सदोषाणि प्रकटोक्तौ ग्रामणी(मेयक)त्वं स्यात्ततस्तया मङ्गलगीत्यवसरे पठितं ॥ १३२८ ॥

पत्ते वसंतमासे आमोअ पमोअए पवत्तंमि । मुत्तूण कणिआरए भमरा सेवंति चूअकुसुमाइं ॥१३२९॥

योगसङ्ग्रहे द्रव्यव्युत्सर्गे दृष्टान्ताः नि०गा० १३२६-१३२७

अप्रमादे दृष्टान्ताः नि०गा० १३२८-१३२९

तया चिन्तितमपूर्वा गीतिका, ततो ज्ञातं सदोषाणि कर्णिकाराणीति तानि परिहृतानि अप्रमत्ततया, एवं साधुनापि प्रमादस्त्याज्यः ॥ १३२९ ॥

भरुयच्छंमि य विजए नडपिडए वासवासनागघरे। ठवणा आयरियस्स[उ] सामायारीपउंजणया ॥१३३०

भरुकच्छे एक आचार्यस्तेन विजयः शिष्य उज्जयिन्यां कार्येण प्रेषितः, सोऽन्तरा ग्लानादिकार्यव्याक्षिप्तोऽकालवृष्ट्या रुद्धः तृणादीन्युत्थितानि, ततो नटपिटकग्रामे नागगृहे वर्षावासं स्थितः चिन्तयति गुरुकुलवासो न जात इहापि करोमि कृत्यं, तेन स्थापनाचार्यः कृतः, सर्वाः सामाचारीः प्रयुङ्क्ते, क्षणे क्षणे उपयुङ्क्ते–' किं मे कडमि 'त्यादि, एवं तेन योगाः सङ्गृहीताः ॥ १३३० ॥

णयरं च सिंबवद्धण मुंडिम्बयअज्जपूसभूई य । आयाणपूसमित्ते सुहुमे झाणे विवादो य ॥ १३३१ ॥

सिम्बवर्द्धनपुरे मुडम्बिको (मुण्डिकाम्रको) राजा पुष्पभूतिनामान आचार्यास्तैः स श्राद्धश्चक्रे, तेषां शिष्यः पुष्पमित्रो बहुश्रुतोऽवसन्नोऽन्यत्रास्ति, समीपस्थाः शिष्या अगीतार्थास्ततः पुष्पमित्र आहूतस्तस्योक्त्वा आचार्यैः सूक्ष्मं ध्यानमारब्धमपवरकान्तः । स तद्द्वारेण स्थितोऽन्येषां प्रवेशं न दत्ते, एकेन शिष्येण प्रच्छन्नं गुरवो विलोकिता निश्चेष्टा दृष्टास्तेन सर्वेषामुक्तं मृता इति, राजा समागात् , पुष्पमित्रस्य कथयतोऽपि कश्चिन्न प्रत्येति, एके भणन्त्यसौ सलक्षणाचार्यदेहेन वेतालं साधयन्नस्तीति, शिबिका कृता दाहार्थं, ततः पुष्पमित्रेणाङ्गुष्ठः पूर्वसङ्केतितः स्पृष्टः, प्रबुद्धः प्राह–किमार्य ! व्याघातः कृतः, तेनोचे

युष्मच्छिष्यैः कृतमिदं । ईदृग् ध्यानं कर्त्तव्यं ॥ १३३१ ॥

रोहीडगं च नयरं ललिआगुट्ठी अ रोहिणी गणिआ । धम्मरुइ कडुअदुद्धियदाणायणे अ कंमुदए १३३२

रोहीडकपुरे ललितागोष्ठी, तदर्थं रोहिणी गणिका भक्तं राध्नोति, अन्यदा 'कडुयदुद्धिय'त्ति दुद्धि-तुम्बकं संस्कृतं, तया कटु च ज्ञातं, मासक्षपणपारणके धर्मरुचेर्दत्तं, तेन जीववधभयेनालोच्य प्रतिक्रम्य स्वयमेवाहारितं तीव्रवेदना सोऽधिसह्य सिद्धः ॥ १३३२ ॥

नयरी य चंपनामा जिणदेवो सत्थवाह अहिछत्ता । अडवी य तेण अगणी सावयसंगाण वोसिरणा ।१३३३

चम्पायां जिनदेवः श्राद्धः सार्थवाह उद्घोष्याहिच्छत्रां याति, भिल्लैर्लुण्टिते सार्थे सोऽटव्यां प्रविष्टो यावत्पुरतोऽग्निभयं मार्गतो व्याघ्रभयं उभयतः प्रपातभयं, स भीतोऽशरणं ज्ञात्वा स्वयमेव भावलिङ्गं प्रपद्य कृतसामायिकः प्रतिमां स्थितः, श्वापदैर्भक्षितः सिद्धः ॥ १३३३ ॥

पायच्छित्तपरूवण आहरणं तत्थ होइ धणगुत्ता । आराहणाए मरुदेवा ओसप्पिणीए पढमासिद्धो ।१३३४।

एकत्र धनगुप्ताचार्यास्ते छद्मस्था अपि तथेङ्गितादिभिर्ज्ञात्वा प्रायश्चित्तं ददति यथातिचारशुद्धिरधिकनिर्जरा च स्यात् । तथा कर्त्तव्यं ३१, मरणान्ताराधनायां मरुदेवाऽवसर्पिण्यां प्रथमसिद्धः ३२ ॥ १३३४ ॥ इति योगसङ्ग्रहाः ।

तेत्तीसाए आसायणाहिं (सूत्रम्)

योगसङ्ग्रहे उदयादि-मरणान्ता-राधनायां दृष्टान्ताः नि०गा० १३३२-१३३४

पुरओ पक्खासन्ने गंता चिट्ठणनिसीयणायमणे । आलोयणपडिसुणणा पुव्वालवणे य आलोए ॥ १ ॥
तह उवदंसनिमंतण खद्धाईयाण तह अपडिसुणणे । खद्धति य तत्थ गए किं तुम तज्जाइ णो सुमणे ॥ २ ॥
णो सरसि कह छेत्ता परिसं भित्ता अणुट्ठियाइ कहे । संथारपायघट्टण चिट्ठे उच्चासणाईसु ॥ ३ ॥

पुरतोऽग्रतो गन्ता आशातनावानेव १ पक्षाभ्यामपि गन्ता २, आसन्ने पृष्ठतोऽप्यासन्ने गन्ता ३, एवं स्थाने–कायोत्सर्गकरणे ३ निषीदनेऽपि ३ एवं ९, प्रथममाचमनं करोति १० गमनागमनयोः पूर्वमालोचयति ११ रात्रौ विकाले वा रत्नाधिकस्य वचोऽप्रतिश्रोता स्यात् १२ किञ्चिदालाप्यं पूर्वमालापयति १३ अशनादि पूर्वं शैक्षस्यालोच्य पश्चाद्रत्नाधिकस्यालोचयति १४ ॥ १ ॥ एवमुपदर्शयति १५ निमन्त्रयति १६ 'खद्ध'त्ति रत्नाधिकमनापृच्छय स्वेच्छयाऽन्यस्मै स्निग्धमधुरादि दत्ते १७ आययणे (आईयाण)त्ति रत्नाधिकेन मार्द्धं भुञ्जानः [प्रचुरं प्रचुरं] स्निग्धादि खादति १८ रत्नाधिकस्य व्याहरतो न प्रतिशृणोति १९ 'खद्धंति य'त्ति रत्नाधिकं प्रति खरकर्कशनिष्ठुरं वक्ति २० वादितस्तत्रगत एवोल्लापं दत्ते २१ किमिति वक्ति २२ त्वमिति वक्ति २३ तज्जातेन प्रतिहन्ता स्यात् २४ रत्नाधिकस्य कथां कथयतो नो सुमनाः स्यात् २५ ॥ २ ॥ 'एवं एयं हेऊ, कहं कहंतस्स नो सुमणो होइ । तज्जाएण हीलइ य, पुणो पुणो निट्ठुरं भणइ' ॥ १ ॥ इयमन्यकर्तृकी, नो स्मरसीति वक्ति २६ कथामाच्छेत्ता स्यात् २७ पर्षदं भेत्ता २८ अनुत्थितायां पर्षदि तामेव कथां कथयिता २९ शय्यासंस्तारकादि पादाभ्यां घट्टयति ३१ तत्र स्थाता ३१ उच्चासने स्थानादि करोति ३२ एवं समासनेऽपि ३३ ॥ ३ ॥ अथवा सूत्रोक्ताशातनासम्बन्धमाह—

अहवा–अरहंताणं आसायणादि सज्झाए किंचि णाहीयं । जा कंठसमुद्दिट्ठा तेत्तीसासायणा एया ॥ १ ॥

अथवाऽयमन्यः प्रकारः, अर्हतामाशातना, आदिशब्दात्सिद्धादिपरिग्रहः यावत्स्वाध्याये किञ्चिन्नाधीतं, एताः 'कण्ठसमुद्दिष्टाः' निगदसिद्धास्त्रयस्त्रिंशदाशातनाः, इति [प्रति] क्रमणसङ्ग्रहण्यवचूर्णिः ॥

(प्रतिक्रमणसङ्ग्रहणी समाप्ता)

सदेवमणुयासुरस्स लोगस्स आसायणाए (सूत्रम्)

देवादीयं लोयं विवरीयं भणइ सत्तदीवुदही । तह कइ पयावईणं पयईपुरिसाण जोगो वा ॥२१३॥(भा.)

उत्तरं-सत्तसु परिमियसत्ता मोक्खो सुण्णत्तणं पयावइ य । केण कउत्तऽणवत्था पयडीए कहं पवित्तित्ति ?

जमचेयणत्ति पुरिसत्थनिमित्तं किल पवत्तती सा य । तीसे च्चिय अपवित्ती परोत्ति सव्वं चिय विरुद्धं॥२१५॥

असज्झाए सज्झाइयं (सूत्रम्)

अस्वाध्यायिके स्वाध्यायिकं(तं), तत्किमिदमस्वाध्यायिकमित्यनेन प्रस्तावेनायाता अस्वाध्यायिकनिर्युक्तिः—

असज्झाइयनिज्जुत्ती वुच्छामी धीरपुरिसपण्णत्तं । जं नाऊण सुविहिया पवयणसारं उवलहंति ॥१३३५॥

असज्झाइयं तु दुविहं आयसमुत्थं च परसमुत्थं च । जं तत्थ परसमुत्थं तं पंचविहं तु नायव्वं ॥१३३६॥

स्वाध्याय एव स्वाध्यायिकं, न स्वाध्यायिकमस्वाध्यायिकं, तत्कारणमपि रुधिराद्यस्वाध्यायिकमुच्यते [तद् द्विविधं-] आत्मसमुत्थं-व्रणोद्भवं, परसमुत्थं-संयमघातकादि, तदेव पञ्चविधमादौ दर्शयन् द्वारगाथामाह—

संजमघाउवघाए सादिव्वे वुग्गहे य सारीरे । घोसणयमिच्छरण्णो कोई छलिओ पमाएणं ॥१३३७॥

संयमघातकं महिकादि, औत्पातिकं पांशुपातादि, गन्धर्वनगरादि दिव्यकृतं सादिव्यं, व्युद्ग्रहः-सङ्ग्रामोऽसावपि अस्वाध्यायिकनिमित्तत्वात्तथोच्यते, शारीरं तिर्यग्मनुष्यपुद्गलादि, अस्मिन् पञ्चविधेऽस्वाध्यायिके स्वाध्यायं कुर्वतः आत्मसंयमविराधना, तत्र दृष्टान्तः 'घोसणयमिच्छ' इत्यादेर्गाथाशकलस्यार्थः कथानकादवसेयः ॥१३३७॥ पश्चार्धावयवार्थमाह—

मिच्छभयघोसण निवे हियसेसा ते उ दंडिया रण्णा । एवं दुहओ दंडो सुरपच्छित्ते इह परे य ॥१३३८॥

क्षितिप्रतिष्ठिते जितशत्रू राजा, तेन स्वदेशे घोपि (घोषावि)तं यथा-म्लेच्छो राजा आयाति, तद् ग्रामादीनि त्यक्त्वा समासन्ने दुर्गे स्थातव्यं, ये राज्ञो वचसा [दुर्गे] स्थितास्ते न विनष्टाः, अन्ये म्लेच्छैर्विलुप्ता राज्ञा हृतशेषा दण्डिताश्च, एवमस्वाध्याये स्वाध्यायिकं कुर्वत उभयोर्द(उभयतो द)ण्डः, ' सुर 'त्ति देवतया च्छल्यते, ' पच्छित्ते 'त्ति प्रायश्चित्तं च प्राप्नोति ' इह 'त्ति इहलोके ' परे 'त्ति परलोके ज्ञानादि विफलं स्यात् ॥ १३३८ ॥ दृष्टान्तोपनयः—

राया इह तित्थयरो जाणवया साहू घोसणं । सुत्तं मेच्छो य असज्झाओ रयणधणाइं च नाणाई ॥१३३९॥

यथा घोषणं तथा सूत्रं, अस्वाध्याये स्वाध्यायप्रतिषेधकं, अस्वाध्यायो महिकादिः ॥ १३३९ ॥

थोवावसेसपोरिसिमज्झयणं वावि जो कुणइ सो उ । णाणाइसाररहियस्स तस्स छलणा उ संसारो १३४०

स्तोकावशेषपौरुष्यां कालवेलायामित्यर्थः, अध्ययनं-पाठोऽपिशब्दाद्व्याख्यानं वा यः करोति, च्छलना ज्ञानादि-वैफल्यात् ॥ १३४० ॥ आद्यद्वारावयवार्थमाह—

महिया य भिन्नवासे सच्चित्तरए य संजमे तिविहं । दव्वे खित्ते काले जहियं वा जच्चिरं सव्वं ॥१३४१॥

महिका-धूमिका, भिन्नवर्षो-बुद्बुदादि, सचित्तरजः-आरण्यकं वातोद्धूतं पृथिवीरजः, 'संयमे'त्ति संयमघाति त्रिविधं इदं 'दव्वे'त्ति द्रव्यं महिकादि, क्षेत्रे यस्मिन् पतति, काले यच्चिरं कालं, 'सव्वं'ति भावतः सर्वं स्थानभाषादि त्यज्यते ॥ १३४१ ॥ अवयवार्थं तु स्वयमेव वक्ष्यते, अस्वाध्यायिकं कथं परिहार्यं इति तत्प्रसाधको दृष्टान्तः—

दुग्गाइतोसियनिवो पंचण्हं देइ इच्छियपयारं । गहिए य देइ मुल्लं जणस्स आहारवत्थाई ॥१३४२॥

एकस्य राज्ञः पञ्च पुरुषाः, अन्यदा तैरत्यन्तविषमं दुर्गं लात्वा तोषितो नृपः, स ईप्सितं नगरे प्रचारं दत्ते स्म यत्ते किञ्चिद्वस्त्रादि जनस्य गृह्णन्ति तस्य मूल्यं राजा सर्वं ददाति ॥ १३४२ ॥

इक्केण तोसियतरो गिहमगिहे तस्स सव्वहिं वियरे । रत्थाईसु चउण्हं एवं पढमं तु सव्वत्थ ॥१३४३॥

तेषां पञ्चानां मध्यादेकेन तोषिततरो राजा तस्य गृहापणरथ्यासु सर्वत्रेष्टप्रचारं प्रयच्छति, चतुर्णां रथ्यादिष्वेव, य एतान् प्रचारान् परिभवति तस्य राज्ञा दण्डं करोति । यथा पञ्च पुरुषास्तथा पञ्चविधमस्वाध्यायिकं, यथैकोऽभ्यहिततरः

पुरुषः एवं प्रथमं संयमोपघाति, तस्मिन्वर्त्तमाने न स्वाध्यायो न प्रतिलेखना, नैव कापि चेष्टा क्रियते, इतरेषु चतुर्षु अस्वाध्यायिकेषु यथा ते चत्वारः पुरुषा रथ्यादिष्वेवानाशात्याः, [तथा] स्वाध्याय एव न क्रियते, आवश्यकाद्युत्कालिकं च पठ्यते ॥ १३४३ ॥ महिकादेर्व्याख्या—

महिया उ गब्भमासे सच्चित्तरओ अ ईसिआयंबो। वासे तिन्नि पयारा बुब्बुअ तवज्ज फुसिए य २१६ भा.

महिका कार्त्तिकमार्गशीर्षादिषु गर्भमासेषु स्यात्, सा च पतन्त्येव सूक्ष्मत्वात्सर्वमप्कायभावितं करोति, व्यवहारसचित्तः पृथिवीकाय आरण्यको वातोद्धूतो रजो भण्यते, तस्य सचित्तत्वलक्षणं वर्णत ईषदाताम्रं दिक्षु दृश्यते, तदपि निरन्तरं पतद्दिनत्रयात्परतः सर्वं पृथिवीकायभावितं करोति, तत्र उत्पातशङ्कासम्भवश्च, भिन्नवर्षे त्रयः प्रकाराः—यत्र वर्षे पतति बुद्बुदाः स्युस्तद्बुद्बुदवर्षं १, तैर्वर्जितं तद्वर्जं २, सूक्ष्मतुषारेषु पतत्सु पृषत(बिन्दु)वर्षं ३, एतेषु यथासङ्ख्यं त्रिपञ्चसप्तदिनपरतः सर्वमप्कायभावितं स्यात् ॥ २१६ ॥ संयमघातिसर्वभेदानामयं परिहारः—

दव्वे तं चिय दव्वं खित्ते[1] जहियं तु जच्चिरं कालं। ठाणाइभास भावे मुत्तुं[2] उस्सासउम्मेसे॥२१७॥(भा०

द्रव्यतस्तदेव द्रव्यं महिकादि त्याज्य, क्षेत्रे यत्र तत्पतति तत्र्या(तत्रैव त्या)ज्यं, काले यच्चिरं कालं स्यात्, भावे स्थानं–कायोत्सर्गं न कुर्वन्ति, न च भाषन्ते, आदिशब्दाद् गमनागमनाद्यपि न कुर्वन्ति, मुक्त्वोच्छ्वासोन्मेषौ शेषाः सर्वाः

१ " खेत्ते जहिं पडइ जच्चिर काल " इति पाठान्तर । २ " मोत्तु उस्सासउम्मेसं " इति पाठान्तर

क्रिया निषिध्यन्ते, एष उत्सर्गपरिहारः । आचीर्णं तु सचित्तरजसि त्रीणि भिन्नवर्षे त्रीणि पञ्च सप्ताहोरात्राण्यतः परं स्वाध्यायादिमर्थं न कुर्वन्ति ॥ २१७ ॥ कथं ?—

वासत्ताणावरिया निक्कारण ठंति कज्जि जयणाए। हत्थत्थंगुलिसन्ना पुत्तावरिया व भासंति ॥१३४४॥

निष्कारणे वर्षात्राणं—कम्बली, तदावृताः सर्वाभ्यन्तरे तिष्ठन्ति, कार्ये यतनेयं—हस्तेनाक्षिनिकारेणाङ्गुल्या वा 'सण्ण'त्ति इदं कुरु मा वा कुर्विति, अथैवं नावगच्छति ततः 'पुत्तावरिय'त्ति मुखपोतिकां दत्त्वा मुखेन भाषन्ते, ग्लानादिकार्ये वर्षाकल्पप्रावृता यान्ति ॥ १३४४ ॥ औत्पातिकमाह—

पंसू अ मंसरुहिरे केससिलावुट्ठि तह रउग्घाए । मंसरुहिरे अहोरत्त अवसेसे जच्चिरं सुत्तं ॥१३४५॥

पांशुमांसरुधिरकेशानां वर्षणं करकादिशिलावर्षणं रजउद्घातस्तत्र मांसे रुधिरे चाहोरात्रं स्वाध्यायो न क्रियते, अवशेषाः पांश्वादयो य(याव)च्चिरं कालं पतन्ति तावत्कालं सूत्रं नन्द्यादि न पठन्ति ॥ १३४५ ॥ पांश्वादिव्याख्या—

पंसू अच्चित्तरओ रयस्सिलाओ दिसा रउग्घाओ। तत्थ सवाए निव्वायए य सुत्तं परिहरंति ॥१३४६॥

धूमाकारमापाण्डुरमचित्तं रजः पांशुर्भण्यते, अभ्यन्तरतो मध्ये विश्रसाप्रयोगाभ्यां रजःपतत्शिला रजःशिलोच्यते, दिशासु सर्वदिक्षु महास्कन्धावारगमनसम्भूत इव विश्रसापरिणामतः समन्ताद्रेणुपतन रजउद्घातः, एतेषु वातसहितेषु निर्वातेषु वा सूत्रपौरुषीं न कुर्वन्ति ॥ १३४६ ॥ किञ्चान्यत्—

साभाविय तिन्नि दिणा सुगिम्हए निक्खिवंति जइ जोगं। तो तंमि पडंतंमी करांति संवच्छरज्झायं॥१३४७

एते पांशुरजउद्घाताः स्वाभाविकाः स्युरस्वाभाविका वा, तत्रास्वाभाविका ये निर्घातभूमिकम्पचन्द्रोपरागादिदिव्य-सहिताः, एतेष्वस्वाभाविकेषु कृतेऽप्युत्सर्गे न कुर्वन्ति स्वाध्यायं, 'सुगिम्हए' त्ति यदि चैत्रे योगं निक्षिपन्ति ततः शुद्धपञ्चम्याः पूर्वार्द्धादर्वाक्, नो चेत्तदा प्रतिपदनन्तरं योगनिक्षेपः कार्यः, अनध्यायमध्येतुं न कल्पते, दशम्याः परतो यावत् पूर्णिमा, अत्रान्तरे त्रीणि दिनानि उपर्युपरि अचित्तरजउग्घाडावणं काउस्सग्गं करिन्ति, तेरसिमाईसु वा तिसु दिणेसु, तो साभाविगे पडंते वि संवच्छरं सज्झायं करिन्ति अह उस्सग्गं न करेंति तो साभाविगे पडंते सज्झायं न करिंति ॥१३४७॥ सादिव्यमाह—

गंधव्वदिसाविज्जुक्कगज्जिए जूअजक्खआलित्ते। इक्किक्क पोरिसी गज्जियं तु दो पोरसी हणइ ॥१३४८॥

गंधव्व–नगरविउव्वणं, दिसादाहकरणं, विज्जुभवणं, उक्कापडणं, गज्जिअकरणं, जूवगो वक्खमाणो, जक्खालित्तं–जक्खुद्दित्तं आगासे भवइ, तत्थ गंधव्वनगरं जक्खुद्दित्तं च एए नियमा दिव्वकया, सेसा भयणिज्जा, जउ फुडं न नज्जन्ति तेण तेसिं परिहारो, एए गंधव्वाइआ इक्किक्कं पोरिसिं उवहणन्ति, गज्जिअं दो पोरिसीउ उवहणइ ॥ १३४८ ॥

दिसिदाह छिन्नमूलो उक्क सरेहा पगासजुत्ता वा। संझाछेयावरणो उ जूवओ सुक्कि दिणं तिन्नि ॥१३४९॥

अन्यतमदिगन्तरविभागे महानगरप्रदीप्तमिवोद्योतः किन्तूपरि प्रकाशोऽधस्तादन्धकारः ईदृक् छिन्नमूलो दिग्दाहः, उल्का सरेखा पतति, प्रकाशयुक्ता वाऽरेखाऽपि, संझप्पहा चंदप्पहा य जेण जुगवं भवंति तेण जूवगो, सा संझप्पभा चंदप्पभा-

वरिआ फिट्टन्ती न नज्जइ सुक्कपक्खपडिवगाइसु दिणेसु, संझाछेयए अणज्जमाणे कालवेलं न मुणंति तओ ते तिन्नि दिणे पाओसिअं कालं न गिण्हंति ॥ १३४९ ॥

केसिंचि हुंतिऽमोहा उ जूवओ ता य हुंति आइन्ना । जेसिं तु अणाइन्ना तेसिं किर पोरिसी तिन्नि॥१३५०॥

केषाञ्चित् भवन्ति अमोहादमूढत्वात्, जगस्स सुहासुहकम्मनिमित्तुप्पाओ अवितहो आइच्चकिरणविकारजणिओ, आइच्चमुदयत्थमआयंबो किन्हसामो वा सगडुद्धिसंठिओ दंडो[अमोहत्ति] स एव जूवगो, 'ता य'त्ति तत्र पौरुषी अनध्यायत्वेनाचीर्णा, उत्तरार्द्धे पौरुषीत्रयमनध्यायः ॥ १३५० ॥

चंदिमसूरुवरागे निग्घाए गुंजिए अहोरत्तं। संझा चउ पाडिवया जं जहि सुगिम्हए नियमा ॥१३५१॥

चन्द्रसूरोपरागे–ग्रहणे, साभ्रे निरभ्रे वा गगने व्यन्तरकृतो महागर्जितसमो ध्वनिर्निर्घातस्तस्यैव वा विकारो गुञ्जावत् गुञ्जमानो महाध्वनिर्गुञ्जितं, एतेषु चतुर्ष्वपि सामान्यतोऽहोरात्रं स्वाध्यायो न क्रियते, निर्घातगुञ्जितयोर्विशेषो द्वितीयदिने यावत् सा वेला नाहोरात्रच्छेदेन च्छिद्यते यथान्येष्वस्वाध्यायिकेषु, 'संझा चउ'त्ति अणुदिए सूरिए मज्झण्हे अत्थमणे अड्ढरत्ते य, एआसु चउसु सज्झायं न करिंति 'पाडिवए' त्ति चउण्हं महामहाणं चउसु पाडिवएसु सज्झायं न करिंति, एवमन्नंपि 'जं'ति–महं जाणिज्जा 'जहि'त्ति गामनगराइसु तंपि तत्थ वज्जिज्जा, सुगिम्हए पुण सव्वत्थ निअमा असज्झाओ ॥ १३५१ ॥ के च ते महामहाः ?, उच्यन्ते—

आसाढी इंदमहो कत्तिय सुगिम्हए य बोद्धवे । एए महामहा खलु एएसिं चेव पाडिवया ॥१३५२॥

आसाढी–आषाढपूर्णिमायां स्यात्, इन्द्रमहः–आश्विनपूर्णिमायां, 'कत्तिय'त्ति कार्त्तिकपूर्णिमायां, 'सुगिम्ह'त्ति चैत्रपूर्णिमायां, एते अन्तिमदिवसाः, यस्मिन्यस्मिन् देशे यतो यतो दिवसात् महामहस्तद्दिवसादारभ्य यावदन्त्यदिवसस्तावत्स्वाध्यायो न कार्यः, पूर्णिमासु महामहे समर्थितेऽपि परिसरपर्यटनक्रीडाप्रियव्यन्तरादिभ्यश्छलनासम्भवाच्चतसृषु प्रतिपत्स्वपि स्वाध्यायो न क्रियते ॥ १३५२ ॥ प्रतिषिद्धकाले कुर्वत एते दोषाः—

कामं सुओवओगो तवोवहाणं अणुत्तरं भणियं । पडिसेहियंमि काले तहावि खलु कम्मबंधाय ॥१३५३॥

उपधानं–योगोद्वहनं ॥ १३५३ ॥

छलया व सेसएणं पाडिवएसुं छणाणुसज्जंति । महवाउलत्तणेणं असारियाणं च संमाणो ॥ १३५४ ॥

अन्नयरपमायजुयं छलिज्ज अप्पिड्ढिओ न उण जुत्तं । अद्धोदहिट्ठिइ पुण छलिज्ज जयणोवउत्तंपि १३५५

सरागसंयतत्वादेव इन्द्रियविषयाद्यन्यतरप्रमादयुक्तो भवेत्, विशेषतो महामहेषु, तं प्रमादयुक्तं प्रत्यनीकदेवता छलयेत्, यतनायुक्तं पुनः साधुमल्पर्द्धिको देवोऽर्द्धोदध्यूनस्थितिकः छलयितुं न शक्नोति, अर्द्धोदधिस्थितिस्तु यतनायुक्तमपि पूर्ववैरस्मरणतश्छलयेत् ॥ १३५५ ॥ 'चंदिमसूरुवराग'त्ति अस्य व्याख्या—

उक्कोसेण दुवालस चंदु जहन्नेण पोरिसी अट्ठ । सूरो जहन्न बारस पोरिसि उक्कोस दो अट्ठ ॥१३५६॥

चन्द्र उदयकाल एव गृहीतः सन्दूपितरात्रेः पोरुषीचतुष्कमन्यच्चाहोरात्रं एवं द्वादश, अथवोत्पातग्रहणे सर्वरात्रिकं ग्रहणं, सग्रह एवास्तमितस्ततो रात्रिरहोरात्रं च, अथवाऽभ्रच्छन्ने न ज्ञायते कस्यां वेलायां ग्रहणं इति रात्रिः परिहृता, प्रभाते सग्रहेऽस्तमिते दृष्टेऽहोरात्रं च, एवं द्वादश, अस्तकाले ग्रहणे चाष्टौ चन्द्रस्य, सूर्यस्यास्तमनग्रहणे सग्रहास्ते रात्रिरहोरात्रं च त्याज्यं एवं द्वादश, 'दो अट्ठ' त्ति उदयग्रहणे [सग्रहास्ते] दूपितमहोरात्रमन्यच्चाहोरात्रं इति षोडश । एवं उत्पातग्रहणेष्वपि षोडश ॥ १३५६ ॥

सग्गहनिव्वुड एवं सूराई जेण हुंतिऽहोरत्ता । आइन्नं दिणमुक्के सुच्चिय दिवसो अ राई य ॥१३५७॥

सग्रहास्तमिते एतदन्यद(एकम) होरात्रमुपहतं, कथं ? उच्यते, 'सूराई जेण हुंतिऽहोरत्ता' सूरोदयाद्येनाहोरात्रस्यादिः स्यात् तत्परिहरतु, संदूपितं अन्यदप्यहोरात्रं त्याज्यं, इदं त्वाचीर्णं—चन्द्रो रात्रौ गृहीतो रात्रावेव मुक्तस्तस्या रात्रेः शेषं त्याज्यं यस्मात्सूरोदयेऽहोरात्रसमाप्तिः, सूरोऽपि दिवा गृहीतो दिवैव मुक्तस्तद्दिनशेषं रात्रिश्च वर्ज्या ॥ १३५७ ॥

'सादिव्वं' त्ति' गयं, व्युद्ग्रहमाह—

वोग्गह दंडियमादी संखोभे दंडिए य कालगए । अणरायए य सभए जच्चिर निद्दोच्चऽहोरत्तं ॥१३५८॥

एतद्व्याख्यानगाथा—

सेणाहिवई भोइय मयहरपुंसित्थिमल्लजुद्धे य । लोट्टाइभंडणे वा गुज्झग उड्डाहमचियत्तं ॥ १३५९ ॥

दण्डिकस्य व्युद्ग्रहः, आदिशब्दात्सेनाधिपतेः, एवं द्वयोर्भोगिकयोः, [द्वयोः पुरुषयोः] द्वयोः स्त्रियोः मल्लानां वा युद्धं, पिष्टातक(पृष्ठायत) लोष्टभण्डने वा, क्वचिद्देशे वा मुद्रादिलोष्टैः क्रीड्यते, आदिशब्दाद्धूल्यादिमहे, विग्रहाः प्रायो व्यन्तरबहुलास्तत्र प्रमत्तं देवता छलयेत्, उड्डाहो निदुक्खत्ति, जणो भणिज्जा–अम्हं आवइपत्ताणं इमे सज्झायं करितित्ति । अचिअत्तं हविज्ज, विसयसंखोभो परचक्कागमे, दंडिओ कालगओ भवइ, ' अणरायए 'त्ति राज्ञि कालगते निर्भयेऽपि यावदन्यो राजा न स्थाप्यते, 'सभए'त्ति जीवत्यपि राज्ञि चौरचरटाद्यैः सभये यच्चिरं समयं तावत्कालं स्वाध्यायं न कुर्वन्ति यद्दिवसं श्रुत निद्दोच्चं–निर्भयं तत्परतोऽहोरात्रं त्यजन्ति, एष दण्डिके कालगते विधिः ॥ १३५९ ॥ शेषेष्वयं—

तद्दिवसभोइआई अंतो सत्तण्ह जाव सज्झाओ। अणहस्स य हत्थसयं दिट्ठि विवित्तंमि सुद्धं तु ॥१३६०॥

एतद्व्याख्यानगाथा—

मयहरपगए बहुपक्खिए य सत्तघर अंतरमए वा । निदुक्खत्ति य गरिहा न पढंति सणीयगं वावि॥१३६१॥

ग्रामभोगिके कालगते तद्दिवसंति–अहोरात्रं त्याज्यं, आदिशब्दाद् ग्रामराष्ट्रमहत्तरकोऽधिकारनियुक्तो बहुसम्मतश्च प्रकृतः बहुपाक्षिकः–बहुस्वजनपाटकशाखाधिपः शय्यातरश्च अन्यो वा अन्यतरगृहादारभ्य यावत्सप्तमं गृहं एतेषु मृतेष्वहोरात्रं स्वाध्यायो न क्रियते, अथ कुर्वन्ति ततो निर्दुःखा इति जनो गर्हति, अल्पशब्देन शनैर्वा कुर्वन्ति, अनुप्रेक्षन्ते वा, योऽनाथो म्रियते तस्मिन् भिन्ने हस्तशतं वर्ज्यं, 'विवित्तंमि'त्ति परिष्ठापिते शुद्धं तत्स्थानं ॥ १३६१ ॥ अथ तस्य परिष्ठापकः

कोऽपि न स्याचतः—

सागारियाइ कहणं अणिच्छ रत्तिं वसहा विगिंचंति । विक्खिन्ने व समंता जं दिट्ठ सढेयरे सुद्धा ॥१३६२॥

सागारिकः–शय्यातरः आदिशब्दात् श्राद्धादयस्तेषां कथ्यतेऽस्माकं स्वाध्यायो न शुद्ध्यति, तदनिच्छया अन्या वसतिर्मार्ग्यते, तदभावे वृषभा रात्रौ त्यजन्ति । अयमभिन्ने विधिः, भिन्ने तु ढङ्कादिभिः समन्ताद्विकीर्ण्णे यदृष्टमशठभावेन गवेषयद्भिः तत्सर्वं त्यजन्ति, इतरस्मिन्नदृष्टे तत्रस्थेऽपि शुद्धाः स्वाध्यायं कुर्वन्ति ॥ १३६२ ॥ 'वुग्गहे 'त्ति गयं, 'सारीरे 'त्ति आह—

सारीरंपि य दुविहं माणुस तेरिच्छियं समासेणं । तेरिच्छं तत्थ तिहा जलथलखहजं चउद्धा उ ॥१३६३॥

मत्स्यादीनां जलजं, गवादीनां स्थलजं, मयूरादीनां खचरजं, एकैकस्यायं द्रव्यादिकश्चतुर्द्धा परिहारः ॥ १३६३ ॥

पंचिंदियाण दव्वे खेत्ते सट्ठिहत्थ पुग्गलाइन्नं । तिकुरत्थ महंतेगा नगरे बाहिं तु गामस्स ॥ १३६४ ॥

पञ्चेन्द्रियाणां रुधिरादिद्रव्यमस्वाध्यायिकं, क्षेत्रतः षष्ठिहस्ताभ्यन्तरेऽस्वाध्यायिकं, परतो न स्यात्, अथवा क्षेत्रतः 'पुग्गलाइन्नं 'ति पुद्गलं–मांसं तेन सर्वमाकीर्ण्णं–व्याप्तं, तत् तिसृभिरन्तरितं शुद्ध्यति, महत्या चैकयापि, अनन्तरितं दूरस्थितमपि न शुद्ध्यति, महारथ्या–राजमार्गः शेषाः कुरथ्याः, एष नगरे विधिः, ग्रामे तु बहिर्ग्रामसीमायां त्यक्ते शुद्ध्यति ॥ १३६४ ॥

काले तिपोरसिऽट्ठ व भावे सुत्तं तु नंदिमाईयं। सोणिय मंसं चम्मं अट्ठी विय हुंति चत्तारि ॥१३६५॥

सम्भवकालाद्यावत्तृतीया पौरुषी तावदस्वाध्यायिकं, यत्राघातस्थानं, तत्र भावतः सूत्रं नन्द्यनुयोगद्वारं तन्दुलवैचारिकचन्द्रावेध्यकादि परिहरन्ति, अथवा अस्वाध्यायिकं चतुर्विधं-मांसं शोणितं चर्म्म अस्थि ॥ १४६५ ॥ मांसाशिनोत्क्षिप्ते मांसेऽयं विधिः—

अंतो बहिं च धोअं सट्ठीहत्थाउ पोरिसी तिन्नि। महकाए अहोरत्तं रद्धे वुड्ढे य सुद्धं तु ॥ १३६६ ॥

एतद्व्याख्यानगाथा—

बहिधोयरद्धपक्के अंतो धोए उ अवयवा हुंति। महकाय बिरालाई अविभिन्ने केइ इच्छंति ॥१३६७॥

साधुवसतेः सकाशात्पष्टिहस्तानामन्तर्बहिश्च धौतमिति भङ्गदर्शनमेतत्, अन्तर्द्धौतमन्तः पक्वं १, अन्तर्द्धौतं बहिः पक्वं २, बहिर्धौतमन्तः पक्वं ३ एतेषु त्रिष्वप्यस्वाध्यायिकं, यस्मिन् प्रदेशे धौतमानीय वा राद्धं स प्रदेशः षष्ट्या हस्तैः त्याज्यः कालतः पौरुषीत्रयं, यदुक्तं 'बहिधोयरद्धपक्के'त्ति एषः चतुर्थो भङ्गः, ईदृशं यदि षष्ठिहस्तान्तरानीतं तथाप्यस्वाध्यायिकं न स्यात्। आद्यद्वितीयभङ्गयोर्धावनस्थानेऽवयवाः पतन्ति तेनास्वाध्यायिकं, यत् काकादिभिर्विप्रकीर्ण्णं नीयते तदाकीर्ण्णपुद्गलं, 'महकाए'त्ति यत्र पञ्चेन्द्रियो हतस्तदाघातनं वर्ज्यं, क्षेत्रतः षष्ठिहस्तैः कालतोऽहोरात्रं अत्राहोरात्रच्छेदः सूरोदयेन, राद्धं पक्कं वा मांसमस्वाध्यायिकं न स्यात्, यत्र च धौतं तत्र प्रदेशे महानुदकप्रवाहो यदि व्यूढस्तदा त्रिपौरुषी-

कालेऽपूर्णोऽपि शुद्धं, आघातनं न शुद्ध्यति, 'महकाए'त्ति अस्य व्याख्या-महाकायो मूषकादिर्बिडालादिना हतो यदि तमभिन्नमेव गिलित्वा गृहीत्वा वा षष्ठिहस्तेभ्यो बहिर्याति तत्केचिदस्वाध्यायिकं नेच्छति। यदुक्तं 'केइ इच्छंति'त्ति तत्र स्वाध्यायोऽभिसम्बध्यते, स्थविरपक्षस्त्वस्वाध्यायिकमेव ॥ १३६७ ॥ अस्यैवार्थस्य प्रकटनार्थमाह—

मूसाइ महाकायं मज्जाराईहयाघयण केई। अविभिन्ने गिण्हेउं पढंति एगे जइऽपलोओ ॥२१८॥(भा०)

मूषकादिर्यत्र हतस्तदाघातकं (नं) ॥ २१८ ॥ तिर्यगस्वाध्यायिकाधिकार एवेदमाह—

अंतो बहिं च भिन्नं अंडग बिंदू तहा विआया य। रायपह वूढ सुद्धे परवयणे साणमादीणं ॥१३६८॥

व्याख्या त्वस्याः प्रतिपदं करिष्यति, 'अंतो बहिं च भिन्नं अंडग बिंदु'त्ति अस्य व्याख्या—

अंडगमुज्झियकप्पे न य भूमि खणंति इहरहा तिन्नि। असज्झाइयपमाणं मच्छियपाओ जहिं न बुड्डे २१९

षष्ठिहस्तानामन्तर्भिन्नेऽण्डकेऽस्वाध्यायिकं, बहिर्भिन्ने तु न, अथवा साधुवसतेरन्तर्बहिर्वाऽण्डकं 'उज्झिअं' ति भिन्नं, तद्यदि कल्पे षष्ठिहस्तेभ्यो बहिर्धौते शुद्ध्यति, अथ भूमौ भिन्नं तर्हि न भूमिं खनन्ति यतस्तत्खननेऽपि न शुद्ध्यति, 'इहरह'त्ति तत्रस्थे षष्ठिहस्तान् पौरुषीत्रयं च वर्ज्यते। अस्वाध्यायिकस्य प्रमाणं मक्षिकापादौ यत्र [न] बुड्डति ॥ २१९ ॥ 'विआय'त्ति—

अजराउ तिन्नि पोरिसि जराउआणं जरे पडे तिन्नि। रायपह बिंदु पडिए कप्पइ वूढे पुणऽन्नत्थ २२०(भा०)

अजराणां वल्गुल्यादीनां प्रसूतिकालादारभ्य तिस्रः पौरुषीरस्वाध्यायो, मुक्त्वाऽहोरात्रच्छेदं, आसन्नप्रसूताया अपि

अहोरात्रच्छेदेन शुद्ध्यति, जरायुजानां गवादीनां यावज्जरा आलम्बते तावदस्वाध्यायिकं, जरायां पतितायां प्रहरत्रयं त्याज्यं, 'रायपह वूढ सुद्धे'त्ति अस्य व्याख्या-साधुवसतेरासन्नं गच्छतस्तिरश्चो यदि रुधिरबिन्दवो गलितास्ते यदि राजपथान्तरिताः स्युस्तदा शुद्धाः, अथ राजपथ एव ते गलितास्तथापि शुद्धाः, अन्यस्मिन् पथेऽन्यत्र वा पतितेषु षष्टि-हस्तान्तर्यद्युदकवृष्टिवाहेन तत् हृतं ततः शुद्धं, 'पुण'त्ति विशेषार्थप्रतिपादकः, प्रदीपनकेन वा दग्धे शुद्ध्यति ॥ २२० ॥ परवयणे साणमादीणं'ति अस्य व्याख्या-परस्य प्रेरकस्य वचनमिदं-यदि श्वा आदिशब्दान्मार्जारादिर्मांसं भक्षयित्वा यावत्साधुवसतिसमीपं तिष्ठति तावदस्वाध्यायिकं, आचार्य आह—

जइ फुसइ तहिं तुंडं अहवा लिच्छारिएण संचिक्खे। इहरा न होइ चोअग! वंतं वा परिणयं जम्हा ॥२२१॥

आसन्नं गच्छतस्तस्य यदि तुण्डं रुधिरलिप्तं काष्ठादिषु स्पृशति ततोऽस्वाध्यायिकं, अथवा रक्तलिप्ततुण्डो वसत्या-सन्ने तिष्ठति तथाप्यस्वाध्यायिकं, इतरथा आहारितेनाऽस्वाध्यायिकं न स्यात्, यस्मात्तदाहारितं वान्तमवान्तं वा आहार-परिणामेन परिणतं, तच्चास्वाध्यायिकं न स्यात् ॥ २२१ ॥ मानुषशरीरमाह—

माणुस्सयं चउद्धा अट्ठिं मुत्तूण सयमहोरत्तं। परिआवन्नविवन्ने सेसे तियसत्त अट्ठेव ॥ १३६९ ॥

चतुर्धा चर्ममांसरुधिरास्थिभेदात्, अस्थि मुक्त्वा शेषत्रयस्यायं परिहारः-क्षेत्रतो हस्तशतं कालतोऽहोरात्रं, यत्तु शरीरा-देव व्रणादिष्वागच्छति पर्यापन्नं विवर्णं वा तदस्वाध्यायिकं न स्यात्, पर्यापन्नं यथा रुधिरमेव पूयतां गतं, विवर्णं

खदिरकल्कसमरसिकं च, शेषमस्वाध्यायिकं स्यात् । शेषेऽगार्या आर्त्तवे त्रीणि दिनानि, पुत्रजाते सप्त, पुत्र्यामष्टौ ॥१३६९॥

रत्तुक्कडा उ इत्थी अट्ठ दिणा तेण सत्त सुक्कहिए । तिन्नि दिणाण परेणं अणोउगं तं महोरत्तं ॥१३७०॥

निषेककाले रक्तोत्कटायाः स्त्रियः स्त्री प्रसूयते तेनाष्ट दिनानि त्याज्यानि, शुक्राधिकत्वतः पुरुषस्तेन सप्त, यत्तु स्त्रियस्त्रयाणां ऋतुदिनानां परतोऽपि स्यात् तत्सरोगयोनिकत्वादनार्त्तवं महारक्तं भण्यते, तस्योत्सर्गं कृत्वा स्वाध्यायः क्रियते, एष रुधिरे विधिः ॥ १३७० ॥ अस्थन्ययं विधिः—

दंते दिट्ठि विंगिचण सेसट्ठी बारसेव वासाइं । झामिय वूढे सीआण पाणरुद्दे य मायहरे ॥ १३७१ ॥

यदि दन्तः पतितो दृष्टस्ततो हस्तशतात्परतस्त्याज्यः, अथ न दृष्टस्तत उग्घाटकाउस्सग्गं कृत्वा स्वाध्यायं कुर्वन्ति, शेषास्थिषु जीवप्रमुक्तेषु हस्तशतान्तःस्थितेषु द्वादशवर्षाण्यस्वाध्यायः ॥ १३७१ ॥ पश्चार्द्धस्य व्याख्यामाह—

सीआणे जं दिट्ठं तं तं मुत्तूणऽनाहनिहयाणि । आडंबरे य रुद्दे माइसु हिट्ठट्ठिया बारे ॥२२२॥(भा०)

श्मशाने यानि चितारोपितानि दग्धानि उदकवाहेन वा व्यूढानि न तान्यस्थीनि अस्वाध्यायं कुर्वन्ति, यानि तु तत्रान्यत्र वाऽनाथकलेवराणि परिष्ठापितानि, सनाथानि वा इन्धनाद्यभावे 'निहयाणि'त्ति निखातानि अस्वाध्यायिकं कुर्वन्ति । 'पाण'त्ति मातङ्गास्तेषामाडम्बरो यक्षस्तस्याधः सद्योमृतास्थीनि स्थाप्यन्ते, एवं रुद्रगृहे मातृगृहे च चामुण्डादिगृहे, तानि कालतो द्वादशवर्षाणि, क्षेत्रतो हस्तशतं त्यज्यन्ते ॥ २२२ ॥

आवासियं च वूढं सेसे दिट्ठंमि मग्गण विवेगो । सारीरगाम वाडग साहीइ न नीणियं जाव ॥१३७२॥

एतत्पूर्वार्द्धस्येयं विभाषा—

असिवोमाघयणेसुं बारस अविसोहियंमि न करंति । झामिय वूढे कीरइ आवासिय सोहिए चेव॥१३७३॥

यत्र श्मशानं यत्र वाऽशिवावमयोर्मृतानि बहूनि छर्दितानि, 'आघयणं'ति यत्र वा महासङ्ग्राममृता बहवः, एतेषु स्थानेष्वविशोधितेषु कालतो द्वादशवर्षाणि क्षेत्रतो हस्तशतं परिहरन्ति। अथैतानि स्थानादीनि दवाग्न्यादिना दग्धानि उदकवाहेन वा प्लावितानि, ग्रामनगरादिना वा आवसता स्वस्वस्थानानि शोधितानि, तत्र शुद्धिः, 'सेसे'त्ति यद्गृहिभिर्न शोधितं पश्चात्तत्र साधवः स्थिताः, आत्मवसतेः समन्तात् मार्गित्वा यद् दृष्टं तस्य विवेकः, अदृष्टे वा दिनत्रयं उग्घाडणकाउस्सग्गं कृत्वा स्वाध्यायं कुर्वन्ति । 'सारीरगाम' इत्यादिपश्चार्द्धस्येयं विभाषा–सारीरं'ति मृतस्य शरीरं डहरकग्रामे यावद्बहिर्न नीतं तावत्स्वाध्यायं न कुर्वन्ति अथ नगरे महति वा ग्रामे तत्र पाटकशाखागृहपङ्क्तिस्तस्या यावन्नीतं (तस्याः यावन्न निष्काशितं) तावदस्वाध्यायिकं ॥१३७३ ॥ तथा चाह—

डहरगगाममए वा न करेंति जाव ण नीणियं होइ । पुरगामे व महंते वाडगसाही परिहरंती॥२२३॥(भा०)

प्रेरकः–वसतिसमीपेन नीयमानस्य मृतशरीरस्य पुष्पवस्त्रादि किञ्चित्पतति तदस्वाध्यायिकं, आचार्य आह—

निज्जंतं मुत्तूणं परवयणे पुप्फमाइपडिसेहो । जम्हा चउप्पगारं सारीरमओ न वज्जंति ॥ १३७४ ॥

मृतशरीरं वसतेः हस्तशतान्तर्नीयमानं यावत्तावदस्वाध्यायिकं, शेषं परवचनभणितं पुष्पादि प्रतिषेध्यं तदस्वाध्यायिकं न स्यात्, यस्मात् शारीरमस्वाध्यायिकं चतुर्विधं शोणितादि, अतः पुष्पादिषु स्वाध्यायो न वर्ज्यते ॥ १३७४ ॥

एसो उ असज्झाओ तव्वज्जिउऽझाउ तत्थिमा मेरा । कालपडिलेहणाए गंडगमरुएहिं दिट्ठंतो ॥१३७५॥

एष संयमघातादिः पञ्चविधोऽस्वाध्यायो भणितः तैर्वर्जितः स्वाध्यायः, तत्र स्वाध्यायकाले इयं सामाचारी–प्रतिक्रम्य यावद्वेला न स्यात् तावत्कालप्रतिलेखनायां कृतायां ग्रहणकाले प्राप्ते दण्डक(गण्डक)दृष्टान्तो भविष्यति गृहीते शुद्धे काले प्रस्थापनवेलायां मरुकदृष्टान्तः ॥ १३७५ ॥ किमर्थं कालग्रहणं ?, उच्यते—

पंचविहअसज्झायस्स जाणणट्ठाय पेहए कालं । चरिमा चउभागवसेसियाइ भूमिं तओ पेहे ॥१३७६॥

संयमघातादिपञ्चविधास्वाध्यायपरिज्ञानार्थं प्रेक्षते कालवेलां, कालनिरूपणमन्तरेण न ज्ञायते संयमघातादिकं, चेत्कालमगृहीत्वा कुर्वन्ति ततश्च लघवः, तस्मात्कालप्रतिलेखनायामियं समाचारी–दिनचरमपौरुष्यां चतुर्भागावशेषायां कालग्रहणभूमयः, ' तउ 'त्ति तिस्रः प्रतिलेख्याः, अथवा उच्चारप्रस्रवणकालभूमयस्तिस्रः ॥ १३७६ ॥

अहियासिआइं अंतो आसन्ने चेव मज्झि दूरे य । तिन्नेव अणहियासी अंतो छ छच्च बाहिरओ ॥१३७७॥

' अंतो 'त्ति वसतेरन्तः अधिसोढुरनधिसोढुश्च त्रीणि २ आसन्नमध्यदूरगानि स्थण्डिलानि प्रतिलेखयति, एवमन्तः षट्, बहिरपि षट् मिलिता उच्चारस्य द्वादश भूमयः, परमधिसह्यानि दूरतरेऽनधिसह्यानि आसन्नतरे कर्त्तव्यानि ॥१३७७॥

एमेव य पासवणे बारस चउवीसतिं तु पेहेत्ता। कालस्स य तिन्नि भवे अह सूरो अत्थमुवयाई ॥१३७८॥

सर्वाणि चतुर्विंशतिमत्वरितमसम्भ्रान्तमुपयुक्तः प्रतिलिख्य त्रीणि कालस्य प्रतिलेखयति, जघन्यतो हस्तान्तरितानि, अथानन्तरे सूरोऽस्तमेति ॥ १३७८ ॥

अह पुण निव्वाघाओ आवासं तो करंति सव्वेऽवि। सड्ढाइकहणवाघाययाइ पच्छा गुरू ठंति ॥१३७९॥

अथ सूरास्तमनानन्तरमेवावश्यकं कुर्वन्ति, यदि निर्व्याघातं ततः सर्वे गुरुसहिताः, अथ गुरुः श्राद्धानां धर्मं कथयति ततः सहकरणस्य व्याघातस्ततो गुरवो निषद्याधरश्चावश्यके पश्चात्तिष्ठन्ति ॥ १३७९ ॥

सेसा उ जहासत्तिं आपुच्छित्ताण ठंति सट्ठाणे। सुत्तत्थकरणहेउं आयरिए ठियंमि देवसियं ॥१३८०॥

'आयरिए ठिअंमि'त्ति यदा गुरुः सामायिकं कृत्वा वोसिरामित्ति भणित्वा स्थित उत्सर्गं, तदा पूर्वस्थिता दैवसिकातिचारं चिन्तयन्ति, अन्ये भणन्ति यदा गुरुः सामायिकं करोति तदा पूर्वस्थिता अपि सामायिकं कुर्वन्ति ॥ १३८० ॥

जो हुज्ज उ असमत्थो बालो वुड्ढो गिलाण परितंतो। सो विकहाइ विरहिओ अच्छिज्जा निज्जरापेही।१३८१।

परिश्रान्तः-प्राघूर्णकादिः, सोऽपि स्वाध्यायध्यानपरस्तिष्ठति, तदा तेऽपि बालादयस्तिष्ठन्त्येतेन विधिना ॥ १३८१ ॥

आवासगं तु काउं जिणोवइट्ठं गुरूवएसेणं। तिण्णि थुई पडिलेहा कालस्स इमा विही तत्थ ॥१३८२॥

कृत्वाऽऽवश्यकमन्यास्तिस्रस्तुतीः पठन्ति, अथवा एका एकश्लोकिका द्वितीया द्विश्लोकिका, तृतीया त्रिश्लोकिका

तत्समाप्तौ कालप्रतिलेखनाविधिरयं कार्यः ॥ १३८२ ॥

दुविहो उ होइ कालो वाघाइम इतरो य नायव्वो । वाघातो घंघसालाए घट्टणं सड्ढकहणं वा ॥१३८३॥

याऽतिरिक्ता वसतिः कार्पटिकासेविता च सा घङ्घसाला तस्यां निर्गच्छतां घट्टनपतनादिव्याघातदोषः, श्राद्धकथनेन च वेलातिक्रमः ॥ १३८३ ॥

वाघाए तइओ सिं दिज्जइ तस्सेव ते निवेएंति । इयरे पुच्छंति दुवे जोगं कालस्स घेच्छामो ॥१३८४॥

तत्र व्याघातिके द्वौ कालप्रतिजागरकौ निर्यातस्तयोस्तृतीय उपाध्यायादिर्दीयते, तावापृच्छनं सन्देशनं कालप्रवेदनं च सर्वं तस्यैव कुरुतः, अत्र द(ग)ण्डकदृष्टान्तो न स्यात् , इतरे उपयुक्तास्तिष्ठन्ति, शुद्धे काले उपाध्यायस्य प्रवेदयन्ति, तदा दण्डधरो बहिः कालप्रतिचरकस्तिष्ठति इतरे चान्तर्विशन्ति तदा उपाध्यायसमीपे सर्वे युगपत् प्रस्थापयन्ति, पश्चादेको निर्याति, दण्डधर एति, तेन प्रस्थापिते स्वाध्यायं कुर्वन्ति ॥ १३८४ ॥ इतरथा निव्याघाते ' इयरे 'इत्यादिव्याख्या—

आपुच्छण किइकम्मे आवासिय पडियरिय वाघाते । इंदिय दिसा य तारा वासमसज्झाइयं चेव ॥१३८५॥

निव्याघाते द्वौ जनौ गुरुमापृच्छतः कालं गृहीष्यावः, ततो गुर्वनुज्ञातौ ' किइकम्मे ' त्ति वन्दनकं कृत्वा दण्डकं कृ- (गृही)त्वा आवश्यकीमासज्जे(शय्यामि)ति भणन्तौ [प्रमार्जन्तौ] निर्यातः, अन्तरे च यदि स्खलः (प्रस्खलतः) पततो वा वस्त्रादि वा विलगति कृतिकर्मादि किञ्चिद्वितथं कुरुतः गुरुर्वा प्रतीच्छन् वितथं करोति ततः कालव्याघातः, अयं कालभूमेः

प्रतिचरणविधिः, इन्द्रियैरुपयुक्तौ प्रतिचरतः, 'दिम'त्ति यत्र चतस्रोऽपि दिशो दृश्यन्ते, ऋतुबद्धे यदि तिस्रस्तारा दृश्यन्ते यदि तु नोपयुक्तौ अनिष्टो वा इन्द्रियविषयो दिग्मोहो वा दिशो वा तारका न दृश्यन्ते वर्षं वा पतति अस्वाध्यायिकं वा जातं ततः कालवधः ॥ १३८५ ॥ किञ्च—

जइ पुण गच्छंताणं छीयं जोइं ततो नियत्तेंति । निवाघाए दोण्णि उ अच्छंति दिसा निरिक्खंता ॥ १३८६ ॥

यदि तयोर्गुरुसमीपात् कालभूमौ यातोः क्षुत्स्यात् ज्योतिर्वा स्पृशति ततो निवर्त्ततः, निर्व्याघाते द्वावपि कालभूमिं गतौ सन्दंशकं प्रमार्जनादि विधिना (सन्दंशकादिविधिना प्रमृज्य) निषण्णौ ऊर्ध्वस्थितौ वा एकैको द्वे द्वे दिशौ निरीक्षमाणौ स्तः ॥ १३८६ ॥ किञ्च तत्र कालभूमिस्थौ—

सज्झायमचिंतंता कणगं दट्ठूण पडिनियत्तंति । पत्ते य दंडधारी मा बोलं गंडए उवमा ॥ १३८७ ॥

स्वाध्यायमकुर्वन्तौ कालवेलां च प्रतिचरन्तौ तिष्ठतः, ग्रीष्मे त्रीन् शिशिरे पञ्च वर्षासु सप्त कनकान् दृष्ट्वा निवर्त्ततः, अथ निर्व्याघातेन प्राप्ता कालग्रहणवेला तदा यो दण्डधारी सोऽन्तः प्रविश्य भणति—बहुप्रतिपूर्णा कालवेला मा बोलं कुरुत, अत्र द(ग)ण्डकोपमा क्रियते ॥ १३८७ ॥

आघोसिए बहूहिं सुयंमि सेसेसु निवडए दंडो । अह तं बहूहिं न सुयं दंडिज्जइ गंडओ ताहे ॥ १३८८ ॥

यथा लोके ग्रामादिद(ग)ण्डकेनाघोषिते बहुभिः श्रुते स्तोकैरश्रुते ग्रामादिष्व(दिस्थितिम)कुर्वत्सुदण्डः स्यात्, बहु-

मिरश्रुते द(ग)ण्डकस्य दोषस्तथेहापि ज्ञेयं । ततो दण्डधरे निर्गते कालग्राही उत्तिष्ठति ॥ १३८८ ॥ स चेदृशः—

पियधम्मो दढधम्मो संविग्गो चेव वज्जभीरू य। खेयन्नो य अभीरू कालं पडिलेहए साहू ॥ १३८९ ॥

खेदज्ञः सत्त्ववान् कालप्रतिलेखकः प्रतिजागरको ग्राहकश्चेदृशः ॥१३८९॥ तौ च तद्वेलां प्रतिचरन्तौ ईदृशं कालं तोलयतः—

कालो संझा य तहा दोवि समप्पंति जह समं चेव। तह तं तुलेंति कालं चरिमं च दिसं असंझाए ॥१३९०॥

अथवा चरमदिक्कायोत्सर्गोऽसन्ध्याकः सन्ध्यातिक्रमेऽपि क्रियते न दोषः ॥ १३९० ॥ स कालग्राही वेलां तोलयित्वा कालभूमेः सन्देश(न्दिशन)निमित्तं गुर्वन्ते याति, तत्रायं विधिः—

आउत्तपुव्वभणियं अणपुच्छा खलियपडियवाघाओ। भासंत मूढसंकिय इंदियविसए तु अमणुण्णे।१३९१।

यथा निर्गच्छन् आयुक्तो निर्गतस्तथा प्रविशन्नप्यायुक्तः प्रविशति, पूर्वनिर्गत एव यद्यनापृच्छय गृह्णाति प्रविशन्वा स्खलति, अत्रापि कालवधः, अथवा 'घाउ'त्ति अभिघातो लेष्ट्वादिना, वन्दनं ददानोऽन्यद्भाषमाणो दत्ते, क्रियासु वा मूढः, आवर्त्तादिषु वा शङ्का कृता न वेति, इन्द्रियविषयो वाऽमनोज्ञ आगतस्ततः कालवधः ॥ १३९१ ॥

निसीहिआ नमुक्कारे काउस्सग्गे य पंचमंगलए। किइकम्मं च करिंता बीओ कालं तु पडियरइ ॥१३९२॥

प्रविशतस्तिस्रो नैषेधिकीः करोति, नमो खमासमणाणं करोति, ईर्यापथिक्यां पञ्चोच्छ्वासकालिकमुत्सर्गं करोति, उत्सारिते 'नमो अरिहंताणं'ति पञ्चमङ्गलं पठति । ततः कृतिकर्म ददाति भणति च सन्दिशत प्रादोषिकं कालं गृह्णामि ।

गृह्णाणेति गुरुवचनं, एवं यावत्कालग्राही सन्दिश्याऽऽयाति तावद् द्वितीयः-दण्डधरः कालं प्रतिचरति ॥ १३९२ ॥ पुनः पूर्वोक्तेन विधिना निर्गतः कालग्राही—

थोवावसेसियाए संझाए ठाति उत्तराहुत्तो । चउवीसगदुमपुप्फियपुव्वगमेक्कि अ दिसाए ॥१३९३॥

'उत्तराहुत्तो'त्ति उत्तरामुखः वामपार्श्वे ऋजु[तिर्यग्]दण्डधारी पूर्वाभिमुखस्तिष्ठति, कालग्रहणनिमित्तं अष्टोच्छ्वासकालिकं कायोत्सर्गं करोति, उत्सारिते चतुर्विंशतिस्तवं द्रुमपुष्पिकां श्रामण्यपूर्व[क]मस्खलितमनुप्रेक्ष्य पश्चात्पूर्वादिषु प्रत्येकमेतदनुप्रेक्षते ॥ १३९३ ॥ कालं गृह्णतः एते व्याघाता ज्ञेयाः—

बिंदू छीए[य]परिणय सगणे वा संकिए भवे तिण्हं । भासंत मूढ संकिय इंदियविसए य अमणुण्णे ।१३९४।

अङ्गे यद्युदकबिन्दुः पतितोऽथवाऽङ्गे पार्श्वतो वा रक्तबिन्दुः, आत्मनः परतो वा क्षुञ्जाता, अध्ययनं वा कुर्वतो यद्यन्यो भावः परिणतः, 'सगणे'त्ति स्वगच्छे साधुत्रयस्य गर्जितादिशङ्कायां, भवेद् व्याघातः ॥ १३९४ ॥ पश्चार्द्धस्य पूर्वन्यस्तस्य वा विभाषा—

मूढो व दिसिज्झयणे भासंतो यावि गिण्हति न सुज्झे । अन्नं च दिसज्झयणे संकंतोऽनिट्ठविसए वा १३९५

दिशमध्ययनं वा प्रति मूढः, स्फुटमेव व्यञ्जनाभिलापेन भाषमाणो गृह्णाति, बुडबुडारावं वा कुर्वन्, एवं न शुद्ध्यति, अस्यां दिशि स्थितो न वा, अध्ययनमिदं चिन्तितं न वेति शङ्कति, इन्द्रियविषये चामनोज्ञे व्याघातः, यथा श्रोत्रस्य रुदितं

व्यन्तरेण वाऽट्टहासं कृतं, रूपे विकृतरूपं दृष्टं, गन्धे कडेवरादिगन्धः रसस्तस्यैव, स्पर्शोऽग्निज्वालादि, यद्वा इष्टे रागं यात्य-निष्टे द्वेषं ॥ १३९५ ॥ इत्याद्युपघातवर्जितं कालं लात्वा कालनिवेदनाय गुरुपार्श्वमागच्छत इदमाह—

जो गच्छंतंमि विही आगच्छंतंमि होइ सो चेव । जं एत्थ णाणत्तं तमहं वोच्छं समासेणं ॥१३९६॥

एषा भद्रबाहुकृता । अस्यामतिदेशे कृतेऽपि सिद्धसेनक्षमाश्रमणोऽतिदेशं व्याख्याति—

निसीहिआ आसज्जं अकरणे खलिय पडियवाघाए । अपमज्जिय भीए वा छीए छिन्ने व कालवहो॥१॥(प्र०)

यदि निर्गच्छन् आवश्यकीं न करोति, प्रविशन्वा नैषेधिकीं न करोति, गुरुसमीपमागच्छतोऽन्तरा यदि श्वमार्जारादि छिन्दति, शेषं पूर्वव्याख्यातं, एतेषु सर्वेषु कालवधः ॥ १ ॥

गोणाइ कालभूमीइ हुज्ज संसप्पगा व उट्ठिज्जा । कविहसिअ विज्जुयंमी गज्जिय उक्काइ कालवहो॥२॥(प्र०)

पूर्वं गुरुमापृच्छ्य कालभूमिं गतस्तत्र यदि गवादिकं निषण्णं संसर्पकाः—कीटिकोपदेहिकाद्या वा उत्थिताः (उष्ट्रादि) पश्येत्ततो निवर्त्तते, यदि कालं प्रतिलेखयतो गृह्णतो निवेदनाय गच्छतो वा कपिहसितादि जातं तदा कालवधः, कपि-हसितं नाम आकाशे विकृतं मुखं वानरसदृशं हासं कुर्यात् ॥ २ ॥ कालग्राही निर्व्याघातेन गुरुमूलमागतः—

इरियावहिया हत्थंतरेऽवि मंगल निवेयणा दारे । सव्वेहि वि पट्ठविए पच्छा करणं अकरणं वा ॥ १३९७ ॥

यदि गुरोर्हस्तान्तरमात्रे कालो गृहीतस्तथापि कालप्रवेदनायामीर्यापथिकी प्रतिक्रान्तव्या, पञ्चोच्छ्वासमात्रमुत्सर्गं

कुर्वन्ति, उत्सारितेऽपि पञ्चमङ्गलं पठन्ति वन्दनं दत्त्वा कालं निवेदयन्ति शुद्धः प्रादोषिकः काल इति, दण्डधरं मुक्त्वा शेषाः सर्वे युगपत्प्रस्थापयन्ति, किं कारणं ? उच्यते, अत्र मरुकदृष्टान्तः ॥ १३९७ ॥

सन्निहियाण वडारो पट्ठविय पमादि णो दए कालं। बाहि ठिए पडियरए विसई ताएऽवि दंडधरो॥१३९८॥

यथा सन्निहितानां मरुकानां 'वडारो' त्ति वण्टो-विभाग इत्यर्थो लभ्येत, न परोक्षस्य, तथा देशकथादिप्रमादिनः कालं न ददति, 'दारे' त्ति अस्य व्याख्या-'बाहि ठिए' इत्यादि, मध्याद्बहिः स्थिते प्रतिचरके प्रविशति दण्डधरः ॥ १३९८ ॥ सवेहि वि इत्यादिपश्चार्द्धस्य व्याख्या—

पट्ठविय वंदिए वा ताहे पुच्छंति किं सुयं ? भंते ! । तेवि य कहेंति सव्वं जं जेण सुयं व दिट्ठं वा ॥१३९९॥

दण्डधरेण सर्वैरपि [च] प्रस्थापिते वन्दिते दण्डधरोऽन्यो वा पृच्छति-केन किं श्रुतं दृष्टं वेति, ते सर्वे कथयन्ति, यदि सर्वैर्भणितं न किञ्चित् दृष्टं श्रुतं वा, ततः शुद्धे कुर्वन्ति स्वाध्यायं ॥ १३९९ ॥ अथ शङ्कितं—

इक्कस्स दोण्ह व संकियंमि कीरइ न कीरती तिण्हं । सगणंमि संकिए परगणं तु गंतुं न पुच्छंति॥१४००॥

यद्येकेन सन्दिग्धं-दृष्टं श्रुतं वा ततः क्रियते, त्रयाणां विद्युदाद्येकसन्देहे न क्रियते स्वाध्यायः, त्रयाणामन्यान्यसन्देहे क्रियते, स्वगणे शङ्किते परगणवचसा न क्रियते ॥ १४०० ॥

कालचउक्के णाणत्तगं तु पाओसियंमि सवेत्ति । समयं पट्ठवयंती सेसेसु समं च विसमं वा ॥ १४०१ ॥

एतत्सर्वं प्रादोपिके भणितं, सम्प्रति चतुर्षु कालेषु किञ्चित्सामान्यं किञ्चिद् विशेषितं भणामि, प्रादोपिके दण्डधरं मुक्त्वा शेपाः सर्वे युगपत् प्रस्थापयन्ति ॥ १४०१ ॥ किञ्चान्यत्—

इंदियमाउत्ताणं हणंति कणगा उ तिन्नि उक्कोसं । वासासु य तिन्नि दिसा उउबद्धे तारगा तिन्नि ॥ १४०२॥

सुष्ठु इन्द्रियोपयुक्तैः सर्वे कालाः प्रतिजागरितव्याः—ग्राह्याः, त्रयः कनका ग्रीष्मे घ्नन्ति, तदुत्कृष्टं चिरेण व्याघातात्, सप्त जघन्येन, शेपं मध्यमं ॥ १४०२ ॥ अस्य व्याख्या—

कणगा हणंति कालं ति पंच सत्तेव गिम्हि सिसिरवासे । उक्का उ सरेहागा रेहारहितो भवे कणओ॥१४०३॥

कनका ग्रीष्मे त्रयः शिशिरे पञ्च वर्षासु सप्त घ्नन्ति, उल्का त्वेकैव ॥१४०३॥ 'वासासु य तिन्नि दिसा' अस्य व्याख्या—

वासासु य तिन्नि दिसा हवंति पाभाइयंमि कालंमि । सेसेसु तीसु चउरो उडुंमि चउरो चउदिसिंपि।१४०४।

वर्षासु यत्र स्थितस्तिस्रोऽपि दिशः प्रेक्षते तत्र प्राभातिकं, शेषेषु त्रिष्वपि कालेषु वर्षासु यत्र स्थितश्चतुरोऽपि दिग्भागान् प्रेक्षते तत्र, ऋतुबद्धे चत्वारोऽपि कालांश्चतुर्दिगवलोके गृह्णन्ति ॥ १४०४ ॥ ' उउबद्धे तारगा तिन्नि ' अस्य व्याख्या—

तिसु तिन्नि तारगाओ उडुंमि पाभातिए अदिट्ठेऽवि । वासासु[य]तारगाओ चउरो छन्ने निविट्ठोऽवि१४०५

त्रिके च (त्रिषु कालेषु) जघन्येन यदि त्रींस्तारकान् प्रेक्षते ततो गृह्णाति, ऋतुबद्धे अभ्रादिसंस्वृते यद्येकोऽपि न दृश्यते तथापि प्राभातिकं गृह्णन्ति, वर्षासु चत्वारोऽपि कालास्तारकाऽदर्शनेऽपि गृह्यन्ते ॥१४०५॥ 'छन्ने निविट्ठो'त्ति अस्य व्याख्या—

ठाणासइ बिंदूसु अ गिण्हं चिट्ठोवि पच्छिमं कालं। पडियरइ बहिं एक्को एक्को (व) अंतट्ठिओ गिण्हे १४०६

वसतेर्बहिः स्थानाभावेऽन्तश्छन्ने ऊर्ध्वस्थितो गृह्णाति, बहिःस्थितश्चैकः प्रतिचरति। वृष्टिबिन्दुषु पतत्सु नियमादन्तः ऊर्ध्वस्थितो निषण्णो वा गृह्णाति, प्रतिचरकोऽप्यन्तः स्थित एव प्रतिचरति। एष गच्छोपग्रहार्थं प्राभातिकेऽपवादविधिः, शेषाः स्थानाभावे न ग्राह्याः ॥ १४०६ ॥ कालं गृह्णतो दिगाभिमुख्य(ख)माह—

पाओसि अड्डरत्ते उत्तरदिसि पुव पेहए कालं। वेरत्तियंमि भयणा पुवदिसा पच्छिमे काले ॥१४०७॥

प्रादोषिकेऽर्द्धरात्रिके च नियमादुत्तराभिमुखस्तिष्ठति, वैरात्रिके भजना, उत्तराभिमुखः पूर्वाभिमुखो वा, प्राभातिके नियमात्पूर्वाभिमुखः ॥ १४०७ ॥ कालग्रहणपरिमाणमाह—

कालचउक्कं उक्कोसएण जहन्न तियं तु बोद्धवं। बीयपएणं तु दुगं मायामयविप्पमुक्काणं ॥ १४०८ ॥

उत्कर्षतश्चत्वारो ग्राह्याः, उत्सर्गेण एव जघन्येन त्रिकं, द्वितीयपदेऽपवादे द्वयं स्यात्, मायाविप्रमुक्तस्य कारणे एकमपि कालमगृह्णतो न दोषः ॥ १४०८ ॥ कथं कालचतुष्कं ?, उच्यते—

फिडियंमि अड्डरत्ते कालं घित्तुं सुवंति जागरिया। ताहे गुरू गुणंती चउत्थि सवे गुरू सुअइ ॥१४०९॥

प्रादोषिकं कालं गृहीत्वा सर्वे सूत्रपौरुषीं कृत्वा पूर्णपौरुष्यां सूत्रपाठिनः स्वपन्ति, अर्थचिन्तकाः कालपाठिनो (उत्कालिकपाठकाश्च) जाग्रति यावदर्द्धरात्रं, स्फिटितेऽतिक्रान्तेऽर्द्धरात्रे कालं गृहीत्वा ते स्वपन्ति, गुरुरुत्थाय गुणयति

कालग्रहणविधिः
नि०गा०
१४०६-
१४०९

यावच्चरमो यामः प्राप्तस्तस्मिन् मर्वे उत्थाय वैरात्रिकं गृहीत्वा स्वाध्यायं कुर्वन्ति, तदा गुरुः स्वपिति, प्राप्ते [प्राभातिककाले यः प्राभातिकं कालं ग्रहीष्यति स कालं प्रतिक्रम्य प्राभातिककालं गृह्णाति, शेषाः कालवेलायां प्राभातिककालस्य प्रतिक्रामयन्ति, ततः आवश्यकं कुर्वन्ति, एवं चत्वारः काला भवन्ति, त्रयः कथं ?, उच्यते,] प्राभातिकेऽगृहीते शेषास्त्रयः, अथवा—

गहियंमि अड्ढरत्ते वेरत्तिय अगहिए भवइ तिन्नि। वेरत्तिय अड्ढरत्ते अइ उवओगा भवे दुण्णि ॥१४१०॥
पडिजग्गियंमि पढमे वीयविवज्जा हवंति तिन्नेव। पाओसिय वेरत्तिय अइउवओगा उ दुण्णि भवे॥१४११॥

वैरात्रिकेऽगृहीते शेषेषु त्रिषु गृहीतेषु त्रयः, अर्द्धरात्रिके वाऽगृहीते त्रयः, प्रादोपिकार्द्धरात्रयोर्गृहीतयोर्द्वा, अथवा प्रादोपिके वैरात्रिके च गृहीते द्वौ, अथवा प्रादोषिकप्राभातिकयोर्गृ(योरगृ)हीतयोः, अत्र विकल्पे प्रादोषिकेणैवानुपहतेन उपयोगतः सुप्रतिजागरितेन सर्वकालेन पठन्ति न दोषः, अथवाऽर्द्धरात्रिकवैरात्रिकाग्रहणे द्वौ, अथवाऽर्द्धरात्रिकप्राभातिकौ, वैरात्रिकप्राभातिकौ वा, यदा एक एव तदाऽन्यतरं गृह्णाति। कालचतुष्केऽग्रहणकारणान्येतानि—प्रादोषिकं न गृह्णन्ति, अशिवादिकारणतो न शुद्ध्यति, एवमर्द्धरात्रिकमपि न गृह्णन्ति [कारणतो न शुद्ध्यति वा] प्रादोषिकेण वा सुप्रतिजागरितेन पठन्ति न गृह्णन्ति, वैरात्रिकं कारणतो [न गृह्णन्ति] न शुद्ध्यति वा, प्रादोषिकार्द्धरात्रिकेण (काभ्यां) वा पठन्ति, [त्रीणि वा] न गृह्णन्ति प्राभातिकं कारणतो वा [न गृह्णन्ति] न शुद्ध्यति वा वैरात्रिकेण दिवसेन पठन्ति ॥ १४१०-१४११ ॥
प्राभातिक[काल]ग्रहणविधिमाह—

पाभाइयकालंमि उ संचिक्खे तिन्नि छीयरुन्नाणि । परवयणे खरमाई पावासिय एवमादीणि ॥१४१२ ॥

अस्या व्याख्या[भाष्यकारः]स्वयमेव करिष्यति, तत्र प्राभातिके ग्रहणविधिः प्रस्थापनाविधिश्च, ग्रहणविधिरयं—

नवकालवेलसेसे उवग्गहियअट्ठया पडिक्कमइ । न पडिक्कमइ वेगो नववारहए धुवमसज्झाओ॥भा.२२४॥

सर्वेषामनुग्रहार्थं नवकालग्रहणकालाः प्राभातिकेऽनुज्ञाताः, अतो नवकालवेलासु शेषासु प्राभातिकग्राही कालस्य प्रतिक्रमते, शेषास्तदा प्रतिक्रामन्ति वा न वा, एको नियमान्न प्रतिक्रामति, यदि क्षुतरुदितादिभिर्न शुद्ध्यति ततः स एव वैरात्रिकः प्रतिजागरितो भविष्यति, स शुद्धो गुरोः कालं निवेद्यानुदिते सूर्ये कालस्य प्रतिक्रमते, यदि गृह्यमाणो नववारा हतः ततो ज्ञायते ध्रुवमस्वाध्यायिकमस्तीति न कुर्वन्ति स्वाध्यायं ॥ २२४ ॥ नववाराग्रहणविधिरयं-' संचिक्खे तिन्नि छीयरुन्नाणि 'त्ति अस्य व्याख्या—

इक्कि तिन्नि वारे छीयाइहयंमि गिण्हए कालं। चोएइ खरो बारस अणिट्ठविसए अ कालवहो॥भा.२२५॥

एकस्य गृह्णतः क्षुतादिहते ' संचिक्खइ 'त्ति ग्रहणाद्विरमतीत्यर्थः, पुनर्गृह्णाति, पुनर्गृह्णाति, एवं वारत्रयं, ततः परमन्योऽन्यस्थण्डिले वारत्रयं, तस्याप्युपहतेऽन्योऽन्यत्र वारत्रयं । अभावे ग्राहकस्थण्डिलानां एक एव एकत्रैव नववारा गृह्णाति ॥ २२५ ॥ ' परवयणे खरमाइ ' त्ति अस्य व्याख्या—प्रेरक आह—यदि रुदितेऽनिष्टे कालवधः ततः खरेण रटिते द्वादशाब्दान्युपहन्तु, अन्येष्वप्यनिष्टेन्द्रियविषयेषु एवमेव कालवधो भवतु ?, आचार्य आह—

प्राभातिक-
कालग्रहण-
विधिः
नि०गा०
१४१२
भा०गा०
२२४-
२२५

चोअग माणुसऽणिट्ठे कालवहो सेसगाण उ पहारो । पावासुआइ पुव्विं पन्नवणमणिच्छ उग्घाडे ।भा.२२६।

मानुषस्वरेऽनिष्टे कालवधः, शेषकानां तिरश्चां यद्यनिष्टः प्रहारशब्दः श्रूयते, ततः कालवधः 'पावासिअ'त्ति अस्य व्याख्या-पावासुआइ इत्यादि, यदि प्राभातिकग्रहणवेलायां प्रोषितभार्या दिने दिने रोदिति ततो रोदनवेलायाः पूर्वं कालो ग्राह्यः, अथ साऽपि प्रत्यूषे रोदिति तदा दिवा गन्तुं (गत्वा) प्रज्ञाप्यते, प्रज्ञापनमनिच्छन्त्यां उग्घाडणउस्सग्गो कीरइ ॥ २२६ ॥ 'एवमाणीणि' त्ति अस्य व्याख्या—

वीसरसद्दरुअंते अव्वत्तगडिंभगंमि मा गिण्हे । गोसे दरपट्ठविए छीए छीए तिगी पेहे ॥ २२७ ॥ (भा०)

अत्यायासेन रुदन् विस्वरमुच्यते, तदुपहन्ति, यन्मधुरशब्दं घोलमानं च तन्नोपहन्ति, यावन्न सुजल्पति तावदव्यक्तं (दव्यक्तं), तदाल्पेनाप्यविस्वरेणोपहन्ति । अथ प्रस्थापनविधिः-'गोसे' त्ति आदित्योदये दिगवलोकं कृत्वा प्रस्थापयन्ति, 'दरपट्ठविए' त्ति अर्द्धप्रस्थापिते यदि क्षुतादिना भग्नं प्रस्थापनमन्यो दिगवलोके कृते प्रस्थापयति, एवं तृतीयवारायां, दिगवलोककरणे पुनः पुनरिदं कारणं—

आइन्न पिसिय महिया पेहित्ता तिन्नि तिन्नि ठाणाइं । नववारहए काले हउत्ति पढमाइ न पढंति १४१३

आकीर्णं पिशितं काकादिभिरानीतं भवेत्, महिका वा पतितुमारब्धा, एवमादि[भिः] एकस्मिन् स्थाने तिस्रो वारा हते हस्तशताद्बहिरन्यस्थाने गत्वा 'पेहंति' त्ति प्रस्थापयन्ति, तत्रापि पूर्वोक्तविधानेन तिस्रो वाराः प्रस्थापयन्ति । एवं

प्राभातिककालग्रहणविधिः भा०गा० २२६-२२७ नि०गा० १४१३

द्वितीयस्थानेऽप्यशुद्धे ततोऽपि हस्तशतबहिरन्यस्थाने गत्वा प्रस्थापयन्ति, नवबारा हते क्षुतादिना नियमाद् हतः कालः, प्रथमायां पौरुष्यां न कुर्वन्ति स्वाध्यायं ॥ १४१३ ॥

पट्ठवियंमि सिलोगे छीए पडिलेह तिन्नि अन्नत्थ। सोणिय मुत्तपुरीसे घाणालोअं परिहरिज्जा ॥१४१४॥

यदा प्रस्थापने त्रीण्यध्ययनानि समाप्तानि [तदा] तदुपर्वेकः श्लोकः पठितव्यः, तस्मिन् समाप्ते प्रस्थापनं समाप्नोति, यदा श्लोकेऽर्द्धपठिते क्षुतं तत्र पुनः प्रस्थाप्यति, एवं तिस्रो वारास्तत्र, ततोऽन्यत्र गम्यते, 'सोणिअ' त्ति अस्य व्याख्या—

आलोअंमि चिलिमिणी गंधे अन्नत्थ गंतु पकरंति। वाघाइयकालंमी दंडग मरुआ नवरि नत्थि १४१५

यत्र स्वाध्यायं कुर्वद्भिः शोणितलवा दृश्यन्ते तत्र न क्रियते स्वाध्यायः, कटं चिलिमिलिं–जवनिकां वा अन्तरे दत्त्वा क्रियते, मूत्रपुरीषादिदुर्गन्धे तत्रागच्छति अन्यत्र वा गत्वा कुर्वन्ति। एतत्सर्वं निर्व्याघातकाले भणितं। व्याघातिकेऽप्येवमेव, नवरं द(ग)ण्डकमरुकदृष्टान्तावत्र न भवतः ॥ १४१५ ॥

एएसामन्नयरेऽसज्झाए जो करेइ सज्झायं। सो आणाअणवत्थं मिच्छत्त विराहणं पावे ॥ १४१६ ॥

परसमुत्थस्वाध्यायिकद्वारं सप्रपञ्चं गतं, अथात्मसमुत्थास्वाध्यायिकद्वारमाह—

आयसमुत्थमसज्झाइयं तु एगविध होइ दुविहं वा। एगविहं समणाणं दुविहं पुण होइ समणीणं १४१७

श्रमणीनां द्विविधं व्रणे ऋतुसम्भवे च ॥ १४१७ ॥ इदं व्रणे विधानं—

धोयंमि उ निप्पगले बंधा तिन्नेव हुंति उक्कोसं । परिगलमाणे जयणा दुविहंमि य होइ कायव्वा ॥ १४१८ ॥

प्रथममेव व्रणो हस्तशतबहिर्धौत्वा निष्प्रगलः कृतः, ततः परिगलति त्रितयो(त्रयो) बन्धा भवन्त्युत्कर्षतः, परिगलति क्षालयति, तत्र यतना वक्ष्यमाणा द्विविधेऽपि व्रणसम्भवे ऋतुसम्भवे च एवं पट्टकयतना कर्त्तव्या ॥ १४१८ ॥

समणो उ वणिव्व भंगदरिव्व बंधं करित्तु वाएइ । तहवि गलंते छारं दाउं दो तिन्नि बंधा उ ॥ १४१९ ॥

व्रणे भगन्दरे च धौते निष्प्रगले हस्तशतबहिः पट्टकं दत्त्वा वाचयति, एवं तथापि गलति भिन्ने तस्मिन् पट्टके तस्यैवोपरि च्छारं दत्त्वा पुनः पट्टकं दत्त्वा वाचयति । एवं तृतीयमपि पट्टकं बध्वा वाचयति । ततः परं गलति हस्तशतबहिर्गत्वा व्रणं पट्टकं च धौत्वा पुनरनेनैव क्रमेण वाचयति, अथवा अन्यत्र गत्वा पठन्ति ॥ १४१९ ॥

एमेव य समणीणं वणंमि इअरंमि सत्त बंधा उ । तहविय अठायमाणे धोएउं अहव अन्नत्थ ॥१४२०॥

इतरस्मिनृतुसम्भवे, तत्राप्येवमेव ॥ १४२० ॥

एएसामन्नयरेऽसज्झाए अप्पणो उ सज्झायं । जो कुणइ अजयणाए सो पावइ आणमाईणि १४२१

न केवलमाज्ञाभङ्गादयो दोषाः किन्तु—

सुयनाणंमि अभत्ती लोअविरुद्धं पमत्तछलणा य । विज्जासाहणवइगुन्नधम्मया एव मा कुणसु ॥१४२२॥

श्रुतज्ञानेऽनुपचारतोऽभक्तिः, यदिहलोकविरुद्धं च तन्न कर्त्तव्यं, अविधिना च प्रमत्तो लभ्यते, तं देवता छलयेत्,

यथा विद्या साधनवैगुण्यधर्मतया न सिद्ध्यति, एवमिहापि कर्म्मक्षयो न स्यात्, तस्मादस्वाध्याये स्वाध्यायं मा कार्षीः ॥ १४२२ ॥ प्रेरकः प्राह–यदि दन्तमांसाद्यस्वाध्यायो ननु देह एतन्मय एव तेन कथं स्वाध्यायः क्रियते ?, गुरुराह—

कामं देहावयवा दंताई अवज्जुआ तहवि वज्जा। अणवज्जुआ न वज्जा लोए तह उत्तरे चेव ॥ १४२३ ॥

काममनुमतार्थे, सत्यं तन्मयो देहः, तथापि ये शरीरादवयुताः–पृथग्भूतास्ते वर्ज्याः, अनवयुतास्तत्रस्थास्ते नो वर्ज्याः। एवं लोके दृष्टं, लोकोत्तरेऽप्येवमेव ॥ १४२३ ॥ किञ्चान्यत्—

अब्भितरमललित्तोवि कुणइ देवाण अच्चणं लोए। बाहिरमललित्तो पुण न कुणइ अवणेइ य तओ णं १४२४

अपनयति च ततो बाह्यमलं ॥ १४२४ ॥ किञ्चान्यत्—

आउट्टियाऽवराहं संनिहिया न खमए जहा पडिमा। इह परलोए दंडो पमत्तछलणा इह सिआ उ १४२५

या प्रतिमा 'संनिहिय' त्ति देवताधिष्ठिता, तां यदि कोऽप्याकुट्योपेत्य स्पृशति बाह्यमललिप्तः ततः साऽपराधं न क्षमते रोगं जनयति मारयति वा, एवं योऽस्वाध्यायिके स्वाध्यायं करोति तस्य कर्मबन्धः, एष पारलौकिको दण्डः, इहलोके प्रमत्तं देवता छलयेत् ॥ १४२५ ॥ स्यात् कदाचित् कोऽप्येतैरप्रशस्तकारणैरस्वाध्यायिके स्वाध्यायं कुर्यात्—

रागेण व दोसेण वऽसज्झाए जो करेइ सज्झायं। आसायणा व का से ? को वा भणिओ अणायारो १४२६

रागेण वा [दोषेण वा] कुर्यात्, अथवा दर्शनमोहमोहितो भणति–काऽमूर्त्तस्य ज्ञानस्याशातना ? को वा तस्याना-

चारो ?, नास्तीत्यर्थः ॥ १४२६ ॥ तेषामियं विभाषा—

गणिसद्दमाइमहिओ रागे दोसंमि न सहए सद्दं। सव्वमसज्झायमयं एमाइं हुंति मोहाओ ॥ १४२७ ॥

उम्मायं च लभेज्जा रोगायंकं व पाउणे दीहं। तित्थयरभासियाओ भस्सइ सो संजमाओ वा ॥१४२८॥

'महिओ'त्ति हृष्टः परेण गणिवाचकादिशब्दैर्व्याह्रियमाणः स्यात् तदभिलाषी अस्वाध्यायेऽपि स्वाध्यायं करोत्येवं रागे, द्वेषे किं गणिर्व्याह्रियते वाचको वा, अहमप्यधार्ये (ध्येष्ये) येनास्य प्रतिद्वन्द्वी भवामि, यस्माज्जीवदेहावयवोऽस्वाध्यायिकं तस्मात्सर्वमस्वाध्यायिकमयं—न श्रद्धातीत्यर्थो मोहात् ॥ १४२७ ॥ इमे [च] दोषाः—क्षिप्तादिकः उन्मादः चिरकालिको रोगः, आशुघात्यातङ्कः ॥ १४२८ ॥

इहलोए फलमेअं परलोए फलं न दिंति विज्जाओ। आसायणा सुयस्स उ कुवइ दीहं च संसारं ॥१४२९॥

विद्याः कृतोपचारा अपि फलं न ददति, विधेरकरणस्य परिभवरूपत्वात् ॥ १४२९ ॥

असज्झाइयनिज्जुत्ती कहिया भे धीरपुरिसपन्नत्ता। संजमतवड्ढगाणं निग्गंथाणं महरिसीणं ॥१४३०॥

असज्झाइयनिज्जुत्तिं जुंजंता चरणकरणमाउत्ता। साहू खवेंति कम्मं अणेगभवसंचियमणंतं ॥१४३१॥

इति अस्वाध्यायिकनिर्युक्त्यवचूर्णिः।

अस्वाध्यायिके स्वाध्यायस्य दोषाः नि० गा० १४२७-१४३१

असज्झाइयनिज्जुत्ती समत्ता ॥

एयं सुत्तनिबद्धं अत्थेणऽण्णंपि चिण्णेयं । तं पुण अव्वामोहत्थमोहओ संपवक्खामि ॥ १ ॥ तेत्तीसाए उवरिं चोत्तीसं बुद्धवयणअतिसेसा । पणतीस वयणअतिसय छत्तीसं उत्तरज्झयणा ॥ २ ॥ एवं जह समवाए जा सयभिसरिक्ख होइ सततारं । तथा चोक्तं–सयभिसया नक्खत्ते सएगतारे तहेत्र पण्णत्ते । इय संखअसंखेहिं तहय अणंतेहिं ठाणेहिं ॥ ३ ॥ संजमम-संजमस्स य पडिसिद्धादिकरणाइयारस्स । होति पडिक्कमणं तू तेत्तीसेहिं तु ताइ पुण ॥ ४ ॥ अवराहपदे सुत्तं अंतग्गय होति नियम सव्वेवि । सव्वो वऽइयारगणो दुगसंजोगादि जो एस ॥ ५ ॥ एगविहस्सासंजमस्सऽहव दीहपज्जवसमूहो । एवऽ-तियारविसोहिं काउं कुणती णमोक्कारं ॥ ६ ॥ इमाः षट् गाथा अन्यकर्तृक्यः ॥ ६ ॥

उक्तो अनुगमो नयाः प्रागवत् ।

समाप्ता चेयं प्रतिक्रमणाध्ययनावचूर्णिः ॥

अथ कायोत्सर्गाध्ययनम्

इह कायोत्सर्गाध्ययने प्रतिक्रमणेऽप्यशुद्धस्यापराधव्रणचिकित्सा प्रायश्चित्तभेषजात्प्रतिपाद्यते, तत्र प्रायश्चित्तभेषजमेव विचित्रमाह—

आलोयण पडिक्कमणे मीस विवेगे तहा विउस्सग्गे । तव छेय मूल अणवट्ठया य पारंचिए चेव ॥ १४३२॥

आलोचना-प्रयोजनतो हस्तशताद्बहिर्गमनागमनादौ गुरोर्विकटना, प्रतिक्रमणं-सहसाऽसमित्या(ता)दौ मिथ्यादुष्कृतकरणं, मिश्रं शब्दादि[षु] रागादिकरणे विकटना मिथ्यादुष्कृतं च, विवेकः-अनेषणीयस्य भक्तादेस्त्यागः, व्युत्सर्गः-कुस्वप्नादौ कायोत्सर्गः, तपः-पृथिव्यादिसङ्घट्टनादौ निर्विकृतिकादितपः, च्छेदः-तपसा दुर्दमस्य श्रमणपर्यायच्छेदनं, मूलं-प्राणातिपातादौ पुनर्व्रतारोपणं, हस्ततालादिप्रमाद(प्रदान)दोषाद् दुष्टतरपरिणामत्वात् व्रतेषु नावस्थाप्यते इति अनवस्थाप्यस्तद्भावो अनवस्थाप्यता च, पुरुषविशेषस्य स्वलिङ्गराजपत्न्याद्यासेवनायां पाराञ्चिकं स्यात् ॥ १४३२ ॥ एवं प्रायश्चित्तभेषजमुक्तं, अथ व्रणः प्रतिपाद्यते, स च द्विभेदः-द्रव्यव्रणो भावव्रणश्च, द्रव्यव्रणः शरीरक्षतलक्षणोऽसावपि द्विविध एव, तथा चाह—

दुविहो कायंमि वणो तदुब्भवागंतुओ अ णायव्वो । आगंतुयस्स कारइ सल्लुद्धरणं न इयरस्स ॥१४३३॥

तस्मादुद्भवो गण्डादिरागन्तुकश्च कण्टकादिप्रभवः, तत्रागन्तुकस्य क्रियते शल्योद्धरणं नेतरस्य-तदुद्भवस्य ॥ १४३३ ॥

यद्यस्य यथोद्ध्रियते उत्तरपरिकर्म्म च क्रियत द्रव्यव्रणे एव तदाह—

तणुओ अतिक्खतुंडो असोणिओ केवलं तए लग्गो। अवउज्झत्ति सल्लो सल्लो न मलिज्जइ वणो उ १४३४

तनुकं कृशं, न तीक्ष्णतुण्डमतीक्ष्णमुखं, यस्मिन् शोणितं न विद्यते इत्यशोणितं केवलं त्वगलग्नमुद्धृत्य 'अवउज्झत्ति सल्लो'त्ति परित्यज्यते शल्यं, न मृद्यते व्रणः, स्वल्पत्वाच्छल्यस्य ॥१४३४॥ प्रथमशल्येऽयं विधिः द्वितीयादिशल्यजे त्वयं—

लग्गुद्धियंमि बीए मलिज्जइ परं अदूरगे सल्ले। उद्धरणमलणपूरण दूरयरगए तइयगंमि ॥ १४३५ ॥

लग्नमुद्धृतं तस्मिन् द्वितीये, कस्मिन्?– अदूरगे शल्ये मनाग् दृढलग्न इति भावना, अत्र मृद्यते यदि परं व्रण [इति], उद्धरणं शल्यस्य, मर्दनं व्रणस्य, [पूरणं] कर्णमलादिना तस्यैवैतानि क्रियन्ते, दूरतरगते तृतीयशल्ये विधिः ॥ १४३५ ॥

मा वेअणा उ तो उद्धरित्तु गालंति सोणिय चउत्थे। रुज्झइ लहुंति चिट्ठा वारिज्जइ पंचमे वणिणो १४३६

मा वेदना भविष्यतीति तत उद्धृत्य शल्यं गालयन्ति शोणितं चतुर्थे शल्ये, तथा रुह्यतां शीघ्रमिति चेष्टा–परिस्पन्दनादिलक्षणा वार्यते पञ्चमे शल्ये उद्धृते व्रणिनः ॥ १४३६ ॥

रोहेइ वणं छट्ठे हियमियभोई अभुंजमाणो वा। तित्तिअमित्तं छिज्जइ सत्तमए पूइमंसाई ॥ १४३७ ॥

रोहयति व्रणं षष्ठे शल्ये उद्धृते सति हितमितभोजी अभुञ्जानो वा, यावच्छल्येन दूषितं तावन्मात्रं छिद्यते सप्तमे शल्ये उद्धृते पूतिमांसादि ॥ १४३७ ॥

द्रव्यव्रण-
चिकित्सा
नि०गा०
१४३४-
१४३७

तहविय अठायमाणो गोणसखइयाइ रुप्फए वावि । कीरइ तयंगछेओ सअट्ठिओ सेसरक्खट्ठा ॥१४३८॥

तथापि चातिष्ठति विसर्पतीत्यर्थः, गोनसमक्षितादौ रर्फ़िक(रुरफ)के वा क्रियते तदङ्गच्छेदः सहास्थ्ना शेपरक्षार्थं ॥१४३८॥

एवं द्रव्यव्रणः तच्चिकित्सा चोक्ता, भावव्रणमाह—

मूलुत्तरगुणरूवस्स ताइणो परमचरणपुरिसस्स । अवराहसल्लपभवो भाववणो होइ नायव्वो ॥१॥ (प्र०)

मूलोत्तरगुणरूपस्य तायिनः, परमचरणपुरुषस्य, अपराधाः—गोचरादिगोचरास्त एव शल्यानि तेभ्यः प्रभवो यः (यस्य) स तथाविधो भावव्रणः स्यात् ॥ १ ॥ अस्य विचित्रप्रायश्चितभेषजेन चिकित्सोच्यते—

भिक्खायरियाइ सुज्झइ अइयारो कोइ वियडणाए उ । बीओ असमिओमित्ति कीस सहसा अगुत्तो वा?॥

भिक्षाचर्यादिः शुद्ध्यति अतिचारः कश्चिद्विकटनयैवेत्यर्थः, आदिशब्दाद्विचारभूम्यादिगमनजो गृह्यते, अत्रातिचार एव व्रणः,द्वितीयो व्रणोऽप्रत्युपेक्षिते खेलविवेकादौ—हा असमितोऽस्मीति सहसा अगुप्तो वा मिथ्यादुष्कृतमिति विचिकित्सा॥१४३९॥

सद्दाइएसु रागं दोसं च मणा गओ तइयगंमि । नाउं अणेसणिज्जं भत्ताइविगिंचण चउत्थे ॥ १४४० ॥

शब्दादिष्विष्टानिष्टेषु रागं द्वेषं वा मनसा गतोऽत्र तृतीयो व्रणो मिश्रभैपजचिकित्सा(तस्यः)आलोचनाप्रतिक्रमण-शोध्य इत्यर्थः, ज्ञात्वाऽनेषणीयं भक्तादि विकिंच(गिञ्च)ना चतुर्थे ॥ १४४० ॥

उस्सग्गेणवि सुज्झइ अइआरो कोइ कोइ उ तवेणं । तेणवि असुज्झमाणं छेयविसेसा विसोहिंति १४४१

कायोत्सर्गेणापि शुद्ध्यत्यतिचारः कश्चित्कुस्वप्नादिः, कश्चित्तु तपसा, तेनाप्यशुद्ध्यमानं गुरुतरं छेदविशेषाद् विशोधयन्ति ॥ १४४१ ॥ एवं सप्तप्रकारभावव्रणचिकित्सापि दर्शिता । मूलादीनि तु विषयनिरूपणद्वारेण स्वस्थानादवसेयानि, एवं सम्बन्धेनायातस्य कायोत्सर्गाध्ययनस्य नामनिष्पन्ने निक्षेपे कायोत्सर्गाध्ययनमिति कायोत्सर्गमधिकृत्याह—

निक्खेवेगट्ठ[2] विहाणमग्गणा[3] कालभेयपरिमाणे[4]। असढसढे[5] विहि[6] दोसा कस्सत्ति[11] फलं[12] च दाराइं॥१४४२॥

कायोत्सर्गस्य नामादिलक्षणो निक्षेपः कार्यः, एकार्थिकानि वक्तव्यानि, विधानं भेदोऽभिधीयते भेदमार्गणा कार्या, 'कालभेदपरिमाणं' [कालपरि]माणं अभिभवकायोत्सर्गादीनां वक्तव्यं, भेदपरिमाणमुच्छ्रितादिकायोत्सर्गाणां वक्तव्यं, अशठः कायोत्सर्गकर्त्ता वक्तव्यः, तथा शठश्च वक्तव्यः, कायोत्सर्गकरणविधिर्वाच्यः, कायोत्सर्गदोषा वक्तव्याः, कस्य कायोत्सर्ग इति वक्तव्यं, फलं च वाच्यं, एतावन्ति द्वाराणि ॥ १४४२ ॥ तत्र कायोत्सर्ग इति द्विपदं नाम इति कायस्य उत्सर्गस्य च निक्षेपः कार्यस्तथा चाह—

काए उस्सग्गंमि य निक्खेवे हुंति दुन्नि उ विगप्पा। एएसिं दुण्हंपी पत्तेय परूवणं वुच्छं ॥२२८॥ (भा०)

काये कायविषयः उत्सर्गे च उत्सर्गविषयश्च, एवं निक्षेपविषयौ भवतो द्वावेव भेदौ ॥ २२८ ॥

कायस्स उ निक्खेवो बारसओ छक्कओ अ उस्सग्गे। एएसिं तु पयाणं पत्तेय परूवणं वुच्छं ॥ १४४३ ॥

कायस्य तु निक्षेपो द्वादशप्रकारः ॥ १४४३ ॥ कायनिक्षेपमाह—

कायो-
त्सर्गस्य
निक्षेपादि-
द्वाराणि
कायस्य
उत्सर्गस्य
च निक्षेपाः
नि०गा०
१४४२-
१४४३
भा०गा०
२२८

नामं ठवण[2]सरीरे[3] गई[4] निकाय[5]त्थिकाय[6] दविए य । माउय संगह पज्जव[10] भारे[11] तह भावकाए[12] य ॥१४४४॥

नामकायः स्थापनाकायः शरीरकायः गतिकायः निकायकायः अस्तिकायः द्रव्यकायः मातृकाकायः सङ्ग्रहकायः पर्यायकायः भावकायश्च ॥ १४४४ ॥ नामकायमाह—

काओ कस्सइ नामं कीरइ देहोवि वुच्चई काओ । कायमणिओवि वुच्चइ बद्धमवि निकायमाहंसु ॥१४४५॥

कायः कस्यचित्पदार्थस्य सचेतनाचेतनस्य नाम क्रियते स नामकायः, तथा देहोऽपि कायः, तथा काचमणिरपि भण्यते प्राकृते कायः, तथा बद्धमपि किञ्चिल्लेखादि निकाचितमाख्यातवन्तः, प्राकृते ' निकाय 'त्ति (ये'ति) ॥ १४४५ ॥ स्थापनाद्वारमाह—

अक्खे वराडए वा कट्ठे पुत्थे य चित्तकम्मे य । सब्भावमसब्भावं ठवणाकायं वियाणाहि ॥ १४४६ ॥

अक्षे-चन्दनके वराटके वा-कपर्दके काष्ठे-कुट्टिमे पुस्ते वा वस्त्रकृते चित्रकर्म्मणि वा सद्भावमाश्रित्यासद्भावं च [आश्रित्य] स्थापनाकायं विजानीहि ॥ १४४६ ॥ सामान्येन सद्भाव[असद्भाव]स्थापनोदाहरणमाह—

लिप्पगहत्थी हत्थित्ति एस सब्भाविया भवे ठवणा। होइ असब्भावे पुण हत्थित्ति निरागिई अक्खो१४४७

यदिह लेप्यकहस्ती हस्तीति स्थापनायां निवेश्यते एषा सद्भावस्थापना, असद्भावे पुनर्हस्तीति निराकृतिः-शून्या एव चतुरङ्गादौ, एवं स्थापनाकायोऽपि भावनीयः ॥ १४४७ ॥ शरीरकायमाह—

कायस्य
निक्षेपाः
निर्युक्तिः
नि०गा०
१३४४-
१३४६

ओरालियवेउवियआहारगतेयकम्मए चेव । एसो पंचविहो खलु सरीरकाओ मुणेयवो ॥ १४४८ ॥

शरीराण्येव कायः शरीरकायः ॥ १४४८ ॥

चउसुवि गईसु देहो नेरइयाईण जो स गइकाओ । एसो सरीरकाओ विसेसणा होइ गइकाओ ॥१॥(प्र०)

देहो नारकादीनां यः स गतिकायः, प्रेरक आह–नन्वेष शरीरकाय उक्तः, तथाहि–नौदारिकादिव्यतिरिक्ता नारकादिदेहाः, आचार्य आह–विशेषणाद्भवति गतिकायः, विशेषणं चात्र गतौ कायो गतिकायः ॥ १ ॥ अथवा सर्वसत्त्वानामपान्तरालगतौ यः कायः स गतिकायो भण्यते, तथा चाह—

जेणुवगहिओ वच्चइ भवंतरं जच्चिरेण कालेण । एसो खलु गइकाओ सतेयगं कम्मगसरीरं ॥१४४९॥

येन उपगृहीतः–उपकृतो यदुपगृहीतः, यावता कालेन समयादिना तावन्तमेव कालमसौ गतिकायो भण्यते, सतैजसं कार्मणशरीरं गतिकायः ॥ १४४९ ॥ निकायकायमाह—

नियमहिओ व काओ जीवनिकाओ निकायकाओ य । अत्थित्तिवहुपएसा तेणं पंचत्थिकाया उ १४५०

नियतो नित्यः कायो निकायः, नित्यता चास्य त्रिष्वपि कालेषु भावात्, अधिको वा कायो निकायः, यथाधिको दाहो निदाहः, आधिक्यं चास्य धर्म्मा[स्तिकाया]द्यपेक्षया स्वभेदापेक्षया वा, तथाहि–एकादयो यावदसङ्ख्येयाः पृथिवीकायिकास्तावत्कायः, त एव स्वजातीयान्यप्रक्षेपापेक्षया निकाय इत्येवमन्येष्वपि विभाषा, एवं जीवनिकायसामान्येन

निकायकायो भण्यते, अथवा जीवनिकायः पृथिव्यादिभेदभिन्नः षड्विधोऽपि निकायो भण्यते तत्समुदायः, एवं निकायकायः, अस्तिकायमाह–' अत्थित्ति ' इत्यादि, अस्तीत्ययं त्रिकालवचनो निपातः, अभूवन् भवन्ति भविष्यन्ति च, बहुप्रदेशा यतस्तेन पञ्चैवास्तिकायाः, धर्म्मास्तिकायोऽधर्म्मास्तिकायः आकाशास्तिकायो जीवास्तिकाय[ःपुद्गलास्तिकाय]श्च, अस्तिकायाश्च काय इति हृदयं ॥ १४५० ॥ द्रव्यकायमाह—

जं तु पुरक्खडभावं दवियं पच्छाकडं च भावाओ। तं होइ दव्वदवियं जह भविओ दव्वदेवाई॥२२९॥(भा०)

यद्द्रव्यं तुशब्दो विशिनष्टि जीवपुद्गलद्रव्यं न धर्म्मास्तिकायादि, ततश्चायमर्थो–यद्द्रव्यं पुरस्कृतभावं–भाविनो भावस्य योग्यमभिमुखमित्यर्थः, पश्चात्कृतभावं वा, यस्मिन् भावे वर्त्तते द्रव्यं ततो यः पूर्वमासीद्भावस्तस्मादपेतं पश्चात्कृतभावमुच्यते, तयं(त)दित्थम्भूतं द्विप्रकारमपि भाविनो भूतस्य च भावस्य योग्यं द्रव्यं वस्तु द्रव्यं भवति, यथा भव्यो–योग्यो द्रव्यदेवादिः, यः पुरुषादिर्मृत्वा देवत्वं प्राप्स्यति बद्धायुष्कोऽभिमुखनामगोत्रो वा स योग्यत्वाद् द्रव्यदेवः। एवमनुभूतदेवभावोऽपि, आदिशब्दान्नारकादिपरिग्रहः परमाणुग्रहश्च, तथाहि–असावपि द्व्यणुकादिकाययोग्यः स्यात् एव, ततश्चेत्थम्भूतं द्रव्यं द्रव्यकायो भण्यते ॥ २२९ ॥ आह–किमिति जीवपुद्गलद्रव्यमङ्गीकृत्य धर्म्मास्तिकायादीनामिह व्यवच्छेदः कृतः ?, उच्यते, तेषां यथोक्तद्रव्यलक्षणायोगात् , सर्वदैवास्तिकायत्वलक्षणभावोपेतत्वाद् , आह च—

जइ अत्थिकायभावो इअ एसो हुज्ज अत्थिकायाणं। पच्छाकडुव तो ते हविज्ज दव्वत्थिकाया य २३० भा०

यद्यस्तिकायभावोऽस्तिकायत्वलक्षणः, 'इअ'त्ति एवं यथा जीवपुद्गलद्रव्ये विशिष्टपर्याय एष्यन्–आगामी भवेद्, अस्ति-कायानां धर्म्मास्तिकायादीनां, य(त)था पश्चात्कृतो वा यदि भवेत्ततस्ते भवेरन् द्रव्यास्तिकायाः ॥ २३० ॥

तीयमणागयभावं जमत्थिकायाण नत्थि अत्थित्तं। तेन र केवलएसुं नत्थी दव्वत्थिकायत्तं ॥ १४५१ ॥

अतीतमनागतभावं यद्–यस्मादस्तिकायानां--धर्मादीनां न अस्तित्वं–विद्यमानत्वं, कायत्वापेक्षया सदैव कायत्वयोगात् ॥ १४५१ ॥ आह–यद्येवं द्रव्यदेवाद्युदाहरणोक्तमपि द्रव्यं न प्राप्नोति सदैव सद्भावयोगात्, तथाहि–स एव तस्य भावो यस्मिन्वर्त्तते, अत्र गुरुराह—

कामं भवियसुराइसु भावो सो चेव जत्थ वट्टंति। एस्सो न ताव जायइ तेन र ते दव्वदेवुत्ति ॥ १४५२ ॥

काममनुमतं भव्यसुरादिषु तद्विषये विचारे भावः स एव यत्र वर्त्तते तदानीं मनुष्यादिभावे, किन्तु एष्यो–भावी न तावज्जायते तदा, तेन किल द्रव्यदेवाः, योग्यत्वात् योग्यस्य च द्रव्यत्वाद्, न चैतद्धर्मादीनामस्ति एष्यत्कालेऽपि तद्भाव-युक्तत्वात् ॥ १४५२ ॥ यथोक्तं द्रव्यलक्षणमवगम्य तद्भावेऽतिप्रसङ्गं च मनस्याधायाह प्रेरकः—

दुहओऽणंतररहिया जइ एवं तो भवा अणंतगुणा। एगस्स एगकाले भवा न जुज्जंति उ अणेगा ॥१४५३॥

'दुहउ'त्ति वर्त्तमानभवे स्थितस्योभयत एष्यत्कालेऽतीतकाले च अनन्तरौ एष्यातीतौ अनन्तरौ च तौ रहि[तौ च] वर्त्तमानभवभावेनेति प्रकरणाद् गम्यते अनन्तररहितौ तावपि यदि तस्योच्येते एवं सति ततो भवा अनन्तगुणाः, तद्भवद्वय-

व्यतिरिक्ता वर्त्तमानभवभावेन रहिता एष्या अतिक्रान्ताश्च तेऽप्युच्येरन्, ततश्च तदपेक्षयापि द्रव्यत्वकल्पना स्यात्, अथोच्येत—अस्त्वेवं का नो हानिः ?, अत्रोच्यते, एकस्य—पुरुषादेरेककाले—पुरुषादिकाले भवा न युज्यन्तेऽनेके ॥ १४५३ ॥ इत्थं परेणोक्ते गुरुराह—

दुहओऽणंतरभवियं जह चिट्ठइ आउअं तु जं बद्धं । हुज्जियरेसुवि जइ तं दव्वभवा हुज्ज तो तेऽवि॥१४५४॥

वर्त्तमानभवे वर्त्तमानस्योभयत एष्येऽतीते चानन्तरभविकं, पुरस्कृतपश्चात्कृतभवसम्बन्धि यथा तिष्ठत्यायुष्कं एव, न शेषं कर्म्म विवक्षितं यद् बद्धं, अयं भावार्थः, पुरस्कृतभवसम्बन्धि त्रिभागावशेषायुष्कः सामान्येन तस्मिन्नेव[भवे वर्त्तमानो बध्नाति पश्चात्कृतसम्बन्धि पुनस्तस्मिन्नेव भवे] वेदयति । भवेदितरेष्वपि—प्रभूतेष्वतीतेषु यद् बद्धमनागतेषु च यद् भोक्ष्यते यदि तस्मिन्नेव वर्त्तमानस्य द्रव्यभवा भवेरंस्ततस्तेऽपि, तदायुष्ककर्म्मसम्बन्धात्, न चैतदस्ति, तस्मादसत्प्रेरकवचः ॥ १४५४ ॥ अस्यैवार्थस्य प्रसाधकं निदर्शनमाह—

संझासु दोसु सूरो अदिस्समाणोऽवि पप्प समईयं । जह ओभासइ खित्तं तहेव एयंपि नायव्वं ॥१४५५॥

सन्ध्ययोर्द्वयोः प्रत्यूषप्रदोषप्रतिबद्धयोः सूर्योऽदृश्यमानोऽपि प्रापणीयं—प्राप्यं समतिक्रान्तं—समतीतं यथाऽवभासते क्षेत्रं, प्रत्यूषसन्ध्यायां पूर्वविदेहं भरतं च, प्रदोषसन्ध्यायां तु भरतमपरविदेहं च, तथैवेदमपि विज्ञेयं, वर्त्तमानभवे स्थितः पुरस्कृतभवं पश्चात्कृतभवं चायुष्कर्म्म स द्रव्यतया स्पृशति, प्रकाशेनादित्यवदित्यर्थः ॥ १४५५ ॥ मातृकाकायमाह—

माउयपयंति नेयं(णेमं)नवरं अन्नोवि जो पयसमूहो । सो पयकाओ भन्नइ जे एगपए बहू अत्था॥२३१॥भा०

मातृकापदानि ' उप्पन्नेइ वा ' इत्यादीनि तत्समूहो मातृकाकायः, मातृकापदमिति, 'णेमं'ति चिह्नं, नवरमन्योऽपि यः पदसमूहः स पदकायो मातृकापदकायो भण्यते, नाविशिष्टपदसमूहः किन्तु यस्मिन्नेकस्मिन् पदे बहवोऽर्थास्तेषां पदानां यः समूहः ॥ २३१ ॥ सङ्ग्रहकायमाह—

संगहकाओऽणेगावि जत्थ एगवयणेण घिप्पंति । जह सालिगामसेणा जाओ वसही(ति)निविट्ठत्ति।१४५६।

सङ्ग्रह एव कायः, स प्रभूता अपि यत्रैकवचनेन गृह्यन्ते, यथा शालिः ग्रामः सेना जातो वसति निविष्टा इति यथासङ्ख्यं प्रभूतेष्वपि स्तम्बेषु सत्सु जातः शालिरिति व्यपदेशः, प्रभूतेष्वपि पुरुपविलयादिषु [वसति ग्रामः, प्रभूतेष्वपि हस्त्यादिषु] निविष्टा सेनेति । अयं शाल्यादिरर्थः सङ्ग्रहकायो भण्यते ॥ १४५६ ॥ पर्यायकायमाह—

पज्जवकाओ पुण हुंति पज्जवा जत्थ पिंडिया बहवे । परमाणुंमिविक्कंमिवि जह वन्नाई अणंतगुणा॥१४५७॥

पर्यायकायः पुनर्भवति, पर्यायाः—वस्तुधर्म्मा यत्र परमाण्वादौ पिण्डिता बहवः, तथा च परमाणावपि कस्मिंश्चित्सांव्यवहारिके यथा वर्णादयोऽनन्तगुणा अन्यापेक्षया, स चैकस्तिक्तादिरसस्तदन्यापेक्षया तिक्ततरतिक्ततम(मादि)भेदादानन्त्यं प्रपद्यते, एवं वर्णादिष्वपि ॥ १४५७ ॥ भारकाये गाथा—

एगो काओ दुहा जाओ एगो चिट्ठइ एगो मारिओ । जीवंतो अ मएण मारिओ तं लव माणव ! केण हेउणा?

काय-
निक्षेपाः
नि०गा०
१४५६-
१४५८
भा.गा.
२३१

एकः कायः-क्षीरकायो द्विधा जातो घटद्वये न्यासात्, तत्र एकस्तिष्ठति, एको मारितः, जीवन्मृतेन मारितस्तद्धवेति-ब्रूहि हे मानव ! केन कारणेन ?, कथानकं यथा प्रतिक्रमणाध्ययने परिहरणायां, भारकायश्चात्र क्षीरभृतकुम्भद्वयोपेता कापोती भण्यते, भारश्चासौ कायश्चेति भारकायः, अन्ये तु भारकायः कापोत्येव ॥ १४५८ ॥ भावकायमाह—

दुग तिग चउरो पंच य भावा बहुआ व जत्थ वट्टंति । सो होइ भावकाओ जीवमजीवे विभासा उ ।१४५९।

द्वौ त्रयश्चत्वारः पञ्च वा भावाः-औदयिकादयः प्रभूता वा अन्येऽपि ' यत्र ' सचेतनाचेतने वस्तुनि विद्यन्ते स भावकायः, भावानां कायो भावकायः, जीवाजीवयोर्विभाषा कार्या ॥१४५९॥ कायमधिकृत्य गतं निक्षेपद्वारं, एकार्थिकान्याह—

काए सरीर देहे बुंदी य चय उवचए य संघाए । उस्सय समुस्सए वा कलेवरे भत्थ तण पाणू ॥ १४६० ॥

कायः शरीरं देहो बोन्दिश्चय उपचयश्च सङ्घात उच्छ्रयः समुच्छ्रयः कडेवरं भस्त्रा तनुः पाणुः ॥ १४६० ॥ अधुनोत्सर्गमधिकृत्य निक्षेपः एकार्थिकानि चोच्यन्ते—

नामंठवणादविए खित्ते काले तहेव भावे य । एसो उस्सग्गस्स उ निक्खेवो छव्विहो होइ ॥ १४६१ ॥

नामस्थापने गते ॥ १४६१ ॥ द्रव्योत्सर्गाद्याह—

दव्वुज्झणा उ जं जेण जत्थ अवकिरइ दव्वभूओ वा । जं जत्थ वावि खित्ते जं जच्चिर जंमि वा काले ।१४६२।

द्रव्योज्झना तु द्रव्योत्सर्गः स्वयं यद्द्रव्यमनेषणीयं ' अवकिरइ 'त्ति उत्सृजति येन करणभूतेन पात्रादिना, यत्र द्रव्ये

द्रव्यभूतो-अनुपयुक्तो वोत्सृजति, एष द्रव्योत्सर्गः । यत्क्षेत्रं दक्षिणदेशाद्युत्सृजति, यत्र वापि क्षेत्रे उत्सर्गो व्यावर्ण्यते एष क्षेत्रोत्सर्गः । यं कालमुत्सृजति यथा भोजनमधिकृत्य रजनीं साधवः, यावन्तं कालमुत्सर्गः, यस्मिन्वा काले उत्सर्गो वर्ण्यते, एष कालोत्सर्गः ॥ १४६२ ॥

भावे पसत्थमियरं जेण व भावेण अवकिरइ जं तु । अस्संजमं पसत्थे अपसत्थे संजमं चयइ ॥ १४६३ ॥

भावोत्सर्गो द्विधा-प्रशस्तं [शोभनं] वस्तु अधिकृत्य, इतरदप्रशस्तं, तथा येन भावेनोत्सर्जनीयवस्तुगतेन खरादिना अवकिरति उत्सृजति यत् तत्र भावेनोत्सर्गः । तत्रासंयमं प्रशस्ते भावोत्सर्गे त्यजति, अप्रशस्ते तु संयमं त्यजति ॥१४६३॥ यदुक्तं येन भावेनोत्सृजति तत्प्रकटयन्नाह—

खरफरुसाइसचेयणमचेयणं दुरभिगंधविरसाई । दवियमवि चयइ दोसेण जेण भावुज्झणा सा उ ।१४६४।

खरपरुषादिमचेतनं, खरं-कठिनं, परुषं-दुर्भाषणोपेतं, अचेतनं दुरभिगन्धविरसादि यद्द्रव्यमपि त्यजति दोषेण येन खरादिनैव भावोज्झना सा उक्ता येनोत्सर्गः (' भावुज्झणा सा उ ' भावेन उत्सर्ग इति) ॥ १४६४ ॥

उस्सग्ग विउस्सरणुज्झणा य अविगरण छड्डुण विवेगो । वज्जण चयणुम्मुअणा परिसाडण साडणा चेव१४६५

उत्सर्गः व्युत्सर्जना उज्झना च अवकिरणं च्छर्दनं विवेको वर्जनं त्यजनमुन्मोचना परिशातना शातना च ॥ १४६५ ॥ उक्तान्युत्सर्गैकार्थिकानि, ततश्च कायोत्सर्ग इति स्थितं, अथ विधानमार्गणाद्वारमाह—

उस्सग्गे निक्खेवो चउक्कओ छक्कओ अ कायवो। निक्खेवं काऊणं परूवणा तस्स कायवा॥ १ ॥ (प्र०)
सो उस्सग्गो दुविहो चिट्ठाए अभिभवे य नायवो। भिक्खायरियाइ पढमो उवसग्गभिजुंजणे बिइओ १४६६

चेष्टायामभिभवे च ज्ञातव्यः, भिक्षाचर्यादौ विषये प्रथमश्चेष्टाकायोत्सर्ग्गः, दिव्याद्यभिभूत एव महामुनिस्तद्वैवार्यं करोतीति हृदयं, अथवोपसर्गाणामभियोजन-सोढव्या मयोपसर्गास्तद्भयं न कार्यमित्येवम्भूतं तस्मिन् द्वितीयः ॥ १४६६ ॥ आह प्रेरकः-कायोत्सर्गे न हि साधुनोपसर्गाभियोजनं कार्यं—

हयरहवि ता न जुज्जइ अभिओगो किं पुणाइ उस्सग्गे। नणु गवेण परपुरं अभिरुज्झइ एवमेयंति (पि) ॥

इतरथापि-सामान्यकार्येऽपि तावदवस्थानादौ न युज्यतेऽभियोगः कस्यचित्कर्त्तुं, किं पुनः कायोत्सर्गे कर्म्मक्षयाय क्रियमाणे ?, स हि सुतरां गर्वरहितेन कार्यः, अभियोगश्च गर्वो वर्त्तते, ननु इत्यसूयायां गर्वेण-अभियोगेन परपुरं-शत्रुनगरमभिगृह्यते (रुध्यते), यथा तद्गर्वकरणमसाधु एवमेतदपि कायोत्सर्गेऽभियोजनं ॥ १४६७ ॥ आह आचार्यः—

मोहपयडीभयं अभिभवित्तु जो कुणइ काउसग्गं तु। भयकारणे य तिविहे णाभिभवो नेव पडिसेहो १४६८

मोहप्रकृतौ भयं मोहप्रकृतिभयं मोहनीयकर्म्मभेद इत्यर्थः, तदभिभूय यः कश्चित्करोति कायोत्सर्गं, तुशब्दो विशेषणार्थः नान्यं कञ्चन बाह्यमभिभूयेति, भयकारणे त्रिविधे दिव्यमानुष्यतैरश्चभेदभिन्ने सति तस्य नाभिभवो-नाभियोगः। अथेत्थम्भूतोऽप्यभियोगस्तस्य नैव प्रतिषेधः ॥ १४६८ ॥ किन्तु—

आगारेऊण परं रणिव जइ सो करिज्ज उस्सग्गं। जुंजिज्ज अभिभवो तो तद्भावे अभिभवो कस्स ?।१४६९।

'आगारेऊण' त्ति आकार्य रे रे क यास्यसि इदानीं एवं परं कश्चन रणे इव यदि कुर्यात्कायोत्सर्गं युज्यतेऽभिभवः, ततस्तदभावे–परा[भिभवा]भावेऽभिभवः कस्य ? ॥ १४६९ ॥

अट्ठविहंपि य कम्मं अरिभूयं तेण तज्जयट्ठाए। अब्भुट्ठिया उ तवसंजमंमि कुव्वंति निग्गंथा ॥ १४७० ॥

तज्जयार्थं–कर्म्मजयनिमित्तं अभ्युत्थिता एकान्तेन गर्वविकला अपि तपःसंयमं कुर्वन्ति निर्ग्रन्थाः, अतः कर्म्मजयार्थमेव तदभिभवोऽपि (भवनाय) कायोत्सर्गः कार्य एव ॥ १४७० ॥ तथा चाह—

तस्स कसाया चत्तारि नायगा कम्मसत्तुसिन्नस्स । काउस्सग्गमभग्गं करंति तो तज्जयट्ठाए॥ १४७१ ॥

'तस्य' प्रक्रान्तशत्रुसैन्यस्य अभिभवकायोत्सर्गं कुर्वन्ति तपःसंयमवत् ॥ १४७१ ॥ गतं विधानमार्गणं, अथ कालपरिमाणमाह—

संवच्छरमुक्कोसं अंतमुहुत्तं च(त)अभिभवुस्सग्गे। चिट्ठाउस्सग्गस्स उ कालपमाणं उवरि वुच्छं।१४७२।

संवत्सरमुत्कृष्टं कालपरिमाणं, बाहुबलिना संवत्सरं कायोत्सर्गः कृतः, अभिभवकायोत्सर्गेऽन्तर्मुहूर्त्तं च जघन्यं कालपरिमाणं, चेष्टाकायोत्सर्गस्य तु कालपरिमाणमुपरिष्टाद्वक्ष्यामः ॥ १४७२ ॥ अथ भेदपरिमाणमाह—

उसिउस्सिओ अ तह उस्सिओ अ उस्सियनिसन्नओ चेव। निसनुस्सिओ निसन्नो निसन्नगनिसन्नओ चेव।

उच्छ्रितोच्छ्रितः १ उच्छ्रितश्च २ उच्छ्रितनिषण्णः ३ निषण्णोच्छ्रितः ४ निषण्णः ५ निषण्णनिषण्णश्च ६ ॥ १४७३ ॥

निवणुस्सिओ निवन्नो निवन्ननिवन्नगो य नायव्वो । एएसिं तु पयाणं पत्तेय परूवणं वुच्छं ॥ १४७४ ॥

निवन्नोच्छ्रितः ७ निवन्नः ८ निवन्ननिवन्नः ९ ॥ १४७४ ॥

उस्सिअनिसन्नग निवन्नगे य इक्किक्कगंमि उ पयंमि । दव्वेण य भावेण य चउक्कभयणा उ कायव्वा ।१४७५।

उच्छ्रितनिषण्णनिवन्नेषु एकैकस्मिन्नेव पदे द्रव्यभावाभ्यां चतुष्कभजना कार्या, द्रव्यत उच्छ्रित ऊर्ध्वस्थानस्थः भावतो धर्म्मशुक्लध्यायी १ अन्यस्तु द्रव्यत उच्छ्रित ऊर्ध्वस्थानस्थः न भावत उच्छ्रितो ध्यानचतुष्टयरहितः कृष्णादिलेश्यागतपरिणाम इत्यर्थः २, अन्यस्तु न द्रव्यत उच्छ्रितो [नोर्ध्वस्थानस्थः भावतः उच्छ्रितः धर्म्मशुक्लध्यायी ३ अन्यस्तु न द्रव्यतो नापि भावतः, एवमन्यपदचतुर्भङ्गिकेऽपि वाच्ये ॥ १४७५ ॥ ननु कायोत्सर्गकरणे को गुणः ?, उच्यते—

देहमइजड्डसुद्धी सुहदुक्खतितिक्खया अणुप्पेहा । झायइ य सुहं झाणं एयग्गो काउसग्गंमि ।१४७६।

देहजाड्यशुद्धिः—श्लेष्मादिप्रहाणतः, मतिजाड्यशुद्धिः तथावस्थितस्योपयोगविशेषतः, सुखदुःखतितिक्षा, अनित्यत्वाद्यनुप्रेक्षा च तथाऽवस्थितस्य स्यात्, ध्यायति च शुभध्यानं धर्म्मशुक्लक्षणमेकाग्रचित्तः कायोत्सर्गे ॥ १४७६ ॥ ध्यायति शुभध्यानमित्युक्तं, तत्र किमिदं ध्यानमित्यत आह—

अंतोमुहुत्तकालं चित्तस्सेगग्गया हवइ झाणं । तं पुण अट्टं रुद्दं धम्मं सुक्कं च नायव्वं ॥ १४७७ ॥

कायोत्सर्ग-
भेद-
परिमाणं
तत्करणे-
गुणश्च
नि०गा०
१४७३-
१४७६

तत्थ य दो आइल्ला झाणा संसारवद्धणा भणिआ। दुन्नि य विमुक्खहेऊ तेसिऽहिगारो न इयरेसिं १४७८
संवरियासवदारा अवाबाहे अकंटए देसे। काऊण थिरं ठाणं ठिओ निसन्नो निवन्नो वा ॥ १४७९ ॥

अव्याबाधे-गान्धर्वादिलक्षणभावव्याबाधाविकले अकण्टके-पाषाणादिद्रव्यकण्टकविकले देशे-भूभागे ध्यायति, कृत्वा स्थिरमवस्थानं स्थितो निषण्णो निवन्नो वा ॥ १४७७-७९ ॥

चेयणमचेयणं वा वत्थुं अवलंबिउं घणं मणसा। झायइ सुअमत्थं वा दवियं तप्पज्जए वावि ॥१४८०॥

चेतनं-पुरुषादि अचेतनं-प्रतिमादि वस्त्ववलम्ब्य घनं मनसा ध्यायति सूत्रमर्थं वा, किम्भूतमर्थमत आह-द्रव्यं तत्पर्यायान्वा ॥ १४८० ॥

तत्थ उ भणिज्ज कोई झाणं जो माणसो परीणामो। तं न हवइ जिणदिट्ठं झाणं तिविहेवि जोगंमि ।१४८१।

ध्यानं यो मानसः परिणामस्तदेतन्न भवति यस्माज्जिनैर्दृष्टं ध्यानं त्रिविधेऽपि योगे मनोवाक्कायलक्षणे ॥ १४८१ ॥ किन्तु ? कस्यचित्कदाचित्प्राधान्यमाश्रित्य भेदेन व्यपदेशः, तथा चाह—

वायाईधाऊणं जो जाहे होइ उक्कडो धाऊ। कुविओत्ति सो पवुच्चइ न य इयरे तत्थ दो नत्थि ॥ १४८२ ॥

वातपित्तश्लेष्मणां [यो यदा] उत्कटः-प्रचुरो धातुः कुपित इति स प्रोच्यते न चेतरौ तत्र द्वौ न स्तः ॥ १४८२ ॥

एमेव य जोगाणं तिण्हवि जो जाहि उक्कडो जोगो। तस्स तहिं निद्देसो इयरे तत्थिक्क दो व नवा ॥१४८३॥

इतरस्तत्रैकः स्यात् द्वौ वा भवतः तथा [नवा] भवत्येव, केवलिनो वाचि उत्कटायां कायोऽप्यस्ति, अस्मदादीनां तु मनः कायो न वेति, केवलिनः शैलेश्यवस्थायां काययोगनिरोधकाले स एव केवलः, अनेन च शुभयोगोत्कटत्वं तथा निरोधश्च द्वयमपि ध्यानमित्यावेदितं ॥ १४८३ ॥ विशेषेण त्रिप्रकारमप्याह—

काएविय अज्झप्पं वायाइ मणस्स चेव जह होइ। कायवयमणोजुत्तं तिविहं अज्झप्पमाहंसु ॥ १४८४ ॥

कायेऽपि चाध्यात्मं ध्यानं, एकाग्रतया एजनादिनिरोधात्, तथा वाचि अध्यात्मं अयतभाषानिरोधात्, मनसश्चैव यथा भवत्यध्यात्मं एवं काये वाचि चेत्यर्थः, एवं भेदेनोक्त्वा अधुनैकदावाह—कायवाङ्मनोयुक्तं त्रिविधमप्यध्यात्ममाख्यातवन्तः, वक्ष्यते च 'भंगिअसुअं गुणंतो वट्टइ तिविहेवि जोगं(झाणं)मि'त्ति ॥ १४८४ ॥

जइ एगग्गं चित्तं धारयओ वा निरुंभओ वावि। झाणं होइ नणु तहा इअरेसुवि दोसु एमेव ॥ १४८५ ॥

हे आयुष्मन्! यद्येकाग्रं चित्तं क्वचिद्वस्तुनि धारयतो वा स्थिरतया निरुन्धानस्य वा तदपि योगनिरोध इव केवलिनो ध्यानं भवति मानसं यथा तथा इतरयोरपि वाक्काययोः, एवमेव—एकाग्रधारणादिनैव प्रकारेण तल्लक्षणयोगात् ध्यानं स्यात् ॥ १४८५ ॥ इत्थं त्रिविधे ध्याने सति यस्य यदोत्कटत्वं तस्य तदेतरसद्भावेऽपि प्राधान्या[त्त]द्व्यपदेशस्तथा चाह—

देसियदंसियमग्गो वच्चंति नरवई लहइ सद्दं। रायत्ति एस वच्चइ सेसा अणुगामिणो तस्स ॥१४८६॥

देशिकः-अग्रयायी देशिकेन दर्शितो मार्गो यस्य स तथा लभते शब्दं किम्भूतमित्याह-राजा एष व्रजति, न चासौ केवलः, प्रभूतलोकानुगतत्वात्, शेषाः-अमात्यादयोऽनुगामिनस्तस्य राज्ञ इत्यतः प्राधान्याद्राजेति व्यपदेशः ॥ १४८६ ॥ अयं लोकानुगतो न्यायः, अयं तु लोकोत्तरानुगतः—

पढमिल्लुअस्स उदए कोहस्सिअरे वि तिन्नि तत्थत्थि। न य ते ण संति तहियं न य पाहन्नं तहेयंमि१४८७

प्रथम एव प्रथमिल्लुकस्तस्यानन्तानुबन्धिनः, त्रयोऽप्रत्याख्यानाद्याः उदयतस्तत्र जीवद्रव्ये सन्ति न चातीताद्यपेक्षया तत्सद्भावः, यत आह-न च ते न सन्ति तदा, किन्तु सन्त्येव, न च प्राधान्यं तेषां, तथैतदप्यधिकृतं ज्ञेयं ॥ १४८७ ॥ स्वरूपतः कायिकं मानसं च ध्यानमाह—

मा मे एजउ काउत्ति अचलओ काइअं हवइ झाणं। एमेव य माणसियं निरुद्धमणसो हवइ झाणं।१४८८।

एजतु कम्पतां कायः, एवमचलतः कायिकं ध्यानं ॥ १४८८ ॥ आह प्रेरकः—

जह कायमणनिरोहे झाणं वायाइ जुज्जइ न एवं। तम्हा वई उ झाणं न होइ को वा विसेसुत्थ ?॥१४८९॥

यथा कायमनसोर्निरोधे ध्यानमुक्तं वाचि न युज्यते एव, कदाचिदप्रवृत्त्यैव निरोधाभावात्, तथाहि-न कायमनसी यथा सदा प्रवृत्ते तथा वाक्, तस्माद्वाचि ध्यानं न स्यादेव, को वा विशेषोऽत्र ? येनेत्थमपि वाग् ध्यानं स्यात् ?॥१४८९॥ गुरुराह—

मा मे चलउत्ति तणू जहं तं झाणं निरेइणो होइ। अजयाभासविवज्जस्स वाइअं झाणमेवं तु १४९०

ननु त्रिविधे ध्याने सति पूर्वं च यदुक्तं चित्तस्यैकाग्रता भवति ध्यानं, चशब्दाच्च तत ऊर्ध्वमुक्तं–' भंगिअसुअं गुणंतो वट्टइ तिविहेवि झाणंमि ' तदेतत् परस्परविरुद्धं, यतस्त्रिविधे ध्याने सति आपन्नमनेकविषयं ध्यानं, तथाहि–मनसा किञ्चिद्ध्यायति वाचाऽभिधत्ते कायेन क्रियां करोतीत्यनेकाग्रता, अत्राचार्य इदमनादृत्य सामान्येनैकाग्रं चित्तं हृदि कृत्वाह–यदनेकाग्रं तच्चित्तमेव न ध्यानं ॥ १४९९ ॥ आह–एवं त्रिविधध्यानस्य ध्यानत्वानुपपत्तिः, न, अभिप्रायापरिज्ञानात्, तथाहि—

आ. मणसहिएण उ काएण कुणइ वायाइ भासई जं च । एवं च भावकरणं मणरहियं दव्वकरणं च १५००

मनःसहितेनैव कायेन करोति यत्, वाचा भाषते यच्च मनःसहितया, एतदेव भावकरणं, तच्च ध्यानं, मनोरहितं तु द्रव्यकरणं, ततश्चायमर्थः–अत्रानेकाग्रतैव नास्ति सर्वेषां मनःप्रभृतीनामेकविषयत्वात् ॥ १५०० ॥ इत्थमुक्ते सत्यपरस्त्वाह—

चो. जइ ते चित्तं झाणं एवं झाणमवि चित्तमावन्नं । तेन र चित्तं झाणं अह नेवं झाणमन्नं ते ॥ १५०१ ॥

यदि ते चित्तं ध्यानं ' अंतोमुहुत्तकालं चित्तस्सेगग्गया हवइ झाणं 'ति वचनात्, एवं ध्यानमपि चित्तमापन्नं, ततश्च कायिकवाचिकध्यानासम्भवः, तेन किल चित्तमेव ध्यानं नान्यदिति हृदयं, अथ नैवमिष्यते, इत्थं तर्हि ध्यानमन्यत्ते चित्तादिति गम्यते, यस्मान्नावश्यं ध्यानं चित्तं ॥ १५०१ ॥ अत्राहाचार्यः–अभ्युपगमाददोषस्तथाहि—

आ. नियमा चित्तं झाणं झाणं चित्तं न यावि भइयव्वं ।
जह खइरो होइ दुमो दुमो य खइरो अखयरो वा ॥ १५०२ ॥

ध्यानविषये शङ्कासमाधानानि नि० गा० १५००-१५०२

नियमादुक्तलक्षणं चित्तं ध्यानमेव, ध्यानं तु चित्तं न चापि एवं भक्तव्यं, दृष्टान्तमाह–' जह ' इत्यादि, यथा खदिरः स्याद्द्रुम एव, द्रुमस्तु खदिरोऽखदिरो वा धवादिर्वा ॥१५०२॥ प्रकृतो द्वितीय उच्छ्रिताख्यः कायोत्सर्गभेदो व्याख्यातः, तत्र ध्यानचतुष्टयाध्यायी लेश्यापरिगतो ज्ञेयः, तृतीयकायोत्सर्गभेदमाह—

अट्टं रुद्दं च दुवे झायइ झाणाइं जो ठिओ संतो। एसो काउस्सग्गो दव्वुसिओ भावउ निसन्नो ॥१५०३॥

चतुर्थमाह—

धम्मं सुक्कं च दुवे झायइ झाणाइं जो निसन्नो अ। एसो काउस्सग्गो निसनुसिओ होइ नायव्वो १५०४

कारणिक एव ग्लानस्थविरादिर्निषण्णकारी ज्ञेयः, वक्ष्यते च ' अतरंतो उ ' इत्यादि ॥ १५०४ ॥ पञ्चममाह—

धम्मं सुक्कं च दुवे नवि झायइ नावि य अट्टरुद्दाइं। एसो काउस्सग्गो निसण्णओ होइ नायव्वो १५०५

प्रकरणान्निषण्णः सन् धर्म्मादीनि न ध्यायतीत्यवगन्तव्यं ॥ १५०५ ॥ षष्ठमाह—

अट्टं रुद्दं च दुवे झायइ झाणाइं जो निसन्नो य। एसो काउस्सग्गो निसन्नगनिसन्नओ नामं ॥ १५०६ ॥

निगदसिद्धा ॥ १५०६ ॥ अधुना सप्तममाह—

धम्मं सुक्कं च दुवे झायइ झाणाइं जो निवन्नो उ। एसो काउस्सग्गो निवनुसिओ होइ नायव्वो ॥१५०७॥

कायोत्सर्ग-भेदाः
नि०गा० १५०३-१५०७

कारणिक एव ग्लानादिर्यो निषण्णोऽपि कर्त्तुं न समर्थः स निप(व)न्नकारी गृह्यते ॥ १५०७ ॥ अष्टममाह—

धम्मं सुक्कं च दुवे नवि झायइ नवि य अट्टरुद्दाइं । एसो काउस्सग्गो निवण्णओ होइ नायव्वो ॥१५०८॥

इहापि निप(व)न्नः सन् धर्म्मादीनि न ध्यायतीत्यवगन्तव्यं ॥ १५०८ ॥ नवममाह—

अट्टं रुद्दं च दुवे झायइ झाणाइं जो निवन्नो उ । एसो काउस्सग्गो निवन्नगनिवन्नओ नाम ॥ १५०९ ॥

अतरंतो उ निसन्नो करिज्ज तहवि य सहू निवन्नो उ । संबाहुवस्सए वा कारणियसहूवि य निसन्नो ॥१५१०

यो गुरुवैयावृत्त्यादिना व्यापृतः कारणिकः समर्थोऽपि स निषण्णः करोति ॥ १५०९–१० ॥ अत्रान्तरे अध्ययन-शब्दार्थो निरूपणीयः, [स चान्यत्र न्यक्षेण निरूपितत्वान्नाधिकृतः, साम्प्रतं सूत्रालापकनिष्पन्ननिक्षेपस्यावसरः], सूत्रालापक-निष्पन्ननिक्षेपे सूत्रं यथा सामायिके, अपरं सूत्रं—

इच्छामि ठाइउं काउस्सग्गं जो मे देवसिओ अइयारो कओ काइओ वाइओ माणसिओ उस्सुत्तो उम्मग्गो अकप्पो अकरणिज्जो दुज्झाओ दुव्विचिंतिओ अणायारो अणिच्छियव्वो असमण-पाउग्गो नाणे दंसणे चरित्ते सुए सामाइए तिण्हं गुत्तीणं चउण्हं कसायाणं पंचण्हं महव्वयाणं छण्हं जीवनिकायाणं सत्तण्हं पिंडेसणाणं अट्ठण्हं पवयणमाऊणं नवण्हं बंभचेरगुत्तीणं दसविहे

समणधम्मे समणाणं जोगाणं जं खंडिअं जं विराहियं तस्स मिच्छामि दुक्कडं ॥ (सूत्रम्) ॥

अन्यत्सूत्रं—

तस्स उत्तरीकरणेणं पायच्छित्तकरणेणं विसोहीकरणेणं विसल्लीकरणेणं पावाणं कम्माणं निग्घायणट्ठाए ठामि काउस्सग्गं अन्नत्थ ऊससिएणं नीससिएणं खासिएणं छीएणं जंभाइएणं उड्डुएणं वायनिसग्गेणं भमलिए पित्तमुच्छाए सुहुमेहिं अंगसंचालेहिं सुहुमेहिं खेलसंचालेहिं सुहुमेहिं दिट्ठिसंचालेहिं एवमाइएहिं आगारेहिं अभग्गो अविराहिओ हुज्ज मे काउस्सग्गो जाव अरिहंताणं भगवंताणं नमुक्कारेणं न पारेमि ताव कायं ठाणेणं मोणेणं झाणेणं अप्पाणं वोसिरामि ॥ (सूत्रम्) ॥

तत्र इच्छामि स्थातुं, कायोत्सर्गस्य प्रयोजनतामाह—

काउस्सग्गंमि ठिओ निरेयकाओ निरुद्धवइपसरो। जाणइ सुहमेगमणो मुणि देवसियाइअइयारं ॥१॥प्र०
परिजाणिऊण य जओ संमं गुरुजणपगासणेणं तु। सोहेइ अप्पगं सो जम्हा य जिणेहिं सो भणिओ॥२॥प्र०

कायोत्सर्गे स्थितः सन् निरेजकायो निष्प्रकम्पदेहो निरुद्धवाक्प्रसरो जानीते सुखमेकमना मुनिर्दैवसिकाद्यतिचारं ॥ १ ॥ परिज्ञायातिचारं, यतः सम्यग्गुरुजनप्रकाशनेन शोधयत्यात्मानमसौ, यस्माच्च जिनैः कायोत्सर्गो भणितस्तस्माच्च कायोत्सर्गस्थानं कार्यं ॥ २ ॥ यतश्चैवमतः—

काउस्सग्गं मुक्खपहदेसियं जाणिऊण तो धीरा। दिवसाइयारजाणणट्ठयाइ ठायंति उस्सग्गं ॥१५११॥

भोक्षपथेनोपचारात्तीर्थकृता देशितस्तं दिवसातिचारज्ञानार्थमुपलक्षणं रात्र्यतिचारज्ञानार्थमपि ॥ १५११ ॥ तत्रौघतो विषयद्वारेण तमतिचारमाह—

सयणासणण्णपाणे चेइय जइ सेज्ज काय उच्चारे। समितीभावणगुत्ती वितहायरणंमि अइयारो ॥१५१२॥

शयनीयं संस्तारकादि, आसनं पीठकादि, अन्नपाने प्रतीते तेषामविधिना ग्रहणादौ वितथाचरणेऽतिचारः, चैत्यविषयं च वितथाचरणमविधिना वन्दनेऽकरणे चेत्यादि, यतिविषयं वितथाचरणं यथार्हं विनयाद्यकरणं, शय्या-वसतिः तद्विषयमविधिना प्रमार्जनादौ स्त्र्यादिसंसक्तायां वा वसत इत्यादि, 'काय' इति कायिका उच्चारः-पुरीषं तद्विषयमस्थण्डिले व्युत्सृजत इत्यादि, समितयः पञ्च, भावना अनित्यत्वादिगोचरा द्वादश पञ्चविंशतिर्वा, गुप्तयस्तिस्रः, वितथाचरणं चासामविधिना-सेवनेऽनासेवने चेत्यादि, तस्मिन् सत्यतिचारः ॥ १५१२ ॥ इत्थमतिचारमुक्त्वा कायोत्सर्गगतस्य मुनेः क्रियामाह—

गोसमुहणंतगाई आलोए देसिए य अइयारे। सव्वे समाणइत्ता हियए दोसे ठविज्जाहि ॥ १५१३ ॥

गोपः प्रत्यूपो 'मुहनन्तकं' मुखवस्त्रिका, ततश्चायमर्थः-गोपादारभ्य मुखवस्त्रिकादौ विषयेऽवलोकयेत्-निरीक्षेत दैवसिकातिचारान्-अविधिप्रत्युपेक्षितादीन्, ततः सर्वानतिचारान् मुखवस्त्रिकाप्रत्युपेक्षणादारभ्य यावत्कायोत्सर्गेणावस्थानं अत्रान्तरे 'सव्वे समाणइत्त'त्ति समाप्य बुद्ध्यवलोकनेन एतावन्त एते नातः परमतिचारोऽस्तीति, ततो हृदये दोषानालोचनीयान् स्थापयेत् ॥ १५१३ ॥

काउं हिअए दोसे जहक्कमं जा न ताव पारेइ । ताव सुहुमाणुपाणू धम्मे सुक्कं च झाइज्जा ॥ १५१४ ॥

दोषान् यथाक्रमं [प्रतिसेवनानुलोम्येन आलोचनानुलोम्येन च,] प्रतिसेवनानुलोम्यं ये यथाऽऽसेविताः, आलोचनानुलोम्यं तु पूर्वं लघव आलोच्यन्ते पश्चाद् गुरवः, यावन्न तावत्पारयति गुरुः, तावत्सूक्ष्मप्राणापानः- सूक्ष्मोच्छ्वासनिश्वासो धर्म्यं शुक्लं च ध्यायति ॥ १५२४ ॥

देसिय राइय पक्खिय चाउम्मासे तहेव वरिसे य । इक्किक्के तिन्नि गमा नायव्वा पंचसेएसु ॥ १५१५ ॥

दैवसिके रात्रिके पाक्षिके चातुर्मासिके [वार्षिके] च, एकैकस्मिन् प्रतिक्रमणे त्रयो गमा ज्ञातव्याः, पञ्चस्वेतेपु दैवसिकादिषु, कथं ?, सामायिकं कृत्वा कायोत्सर्गकरणं, सामायिकं कृत्वा च प्रतिक्रमणं, सामायिकं कृत्वा पुनः कायोत्सर्गकरणं ॥ १५१५ ॥ अत्राह परः—

आइमकाउस्सग्गे पडिकमणे ताव काउ सामइयं । तो किं करेह बीयं तइयं च पुणोऽवि उस्सग्गे ? ॥ १५१६ ॥

आद्यकायोत्सर्गं कृत्वा सामायिकमिति योगः, 'पडिकमणे वीअं (ताव बितिउं) काउं सामाइअं'ति योगः, "ता किं करेह तइअं [च] सामाइअं पुणोवि उस्सग्गो, यः प्रतिक्रान्तोपरि ॥ १५१६ ॥ चालना चेयम्, अत्रोच्यते—

समभावंमि ठियप्पा उस्सग्गं करिय तो पडिक्कमइ । एमेव य समभावे ठियस्स तइयं तु उस्सग्गे ॥१५१७॥

समभावस्थितस्य भाव[प्रति]क्रमणं स्यान्नान्यथा, ततश्च समभावे स्थितात्मा दिवसातिचारपरिज्ञानाय कायोत्सर्गं कृत्वा गुरोरतिचारजालं निवेद्य तत्प्रदत्तप्रायश्चित्तं समभावपूर्वकमेव [प्रपद्य] ततः प्रतिक्रामति । एवमेव च समभावस्थितस्य सतश्चारित्रशुद्धिरपि स्यादितिकृत्वा तृतीयं सामायिकं कायोत्सर्गे क्रियते ॥ १५१७ ॥ प्रत्यवस्थानमिदं—

सज्झायझाणतवओसहेसु उवएसथुइपयाणेसु । संतगुणकित्तणेसु अ न हुंति पुणरुत्तदोसा उ ॥ १५१८ ॥

'तस्स मिच्छामि दुक्कड'मित्यवयवार्थमाह—

मित्ति मिउमद्दवत्ते छत्ति अ दोसाण छायणे होइ । मित्ति य मेराइ ठिओ दुत्ति दुगुंछामि अप्पाणं ॥ १५१९ ॥

कत्ति कडं मे पावं डत्तिय डेवेमि तं उवसमेण । एसो मिच्छाउक्कडपयक्खरत्थो समासेणं ॥ १५२० ॥

यथा सामायिके ॥ १५१९-२० ॥ 'तस्योत्तरीकरणेनेत्या(ने'ति सूत्रावयवं विवृण्वन्ना)ह—

खंडियविराहियाणं मूलगुणाणं सउत्तरगुणाणं । उत्तरकरणं कीरइ जह सगडरहंगगेहाणं ॥ १५२१ ॥

खण्डितविराधितानामक्षारवलकादिनोत्तकरणं क्रियते ॥ १९२१ ॥ प्रायश्चित्तकरणेनेत्याह—

पावं छिंदइ जम्हा पायच्छित्तं तु भन्नई तेणं । पाएण वावि चित्तं विसोहए तेण पच्छित्तं ॥ १५२२ ॥

पापं–कर्म छिनत्ति यस्मात्तेन पापच्छिदुच्यते, प्रायसो वा चित्तं–जीवं शोधयति तेन प्रायश्चित्तमित्युच्यते ॥ १५२२ ॥ विशोधिकरणेनेत्याह—

दव्वे भावे य दुहा सोही सल्लं च इक्कमिक्कं तु । सव्वं पावं कम्मं भामिज्जइ जेण संसारे ॥ १५२३ ॥

द्रव्यतो भावतश्च द्विधा विशुद्धिः, शल्यं चैकैकं, तत्र द्रव्यशुद्धिर्जलादिना वस्त्रादेः, भावशुद्धिः प्रायश्चित्तादिना आत्मन एव, द्रव्यशल्यं कण्टकादि, भावशल्यं तु मायादि, सर्वं ज्ञानावरणीयादि कर्म्म पापं वर्त्तते, भ्राम्यते येन कारणेन तेन कर्म्मणा जीवः संसारे ॥ १५१२ ॥ अन्यत्रोच्छ्वसितेनेत्याह—

उस्सासं न निरुंभइ आभिग्गहिओवि किमुअ चिट्ठा उ ?। सज्जमरणं निरोहे सुहुमुस्सासं तु जयणाए १५२४

ऊर्ध्वं प्रबलो वा श्वास उच्छ्वासस्तं न निरुणद्धि आभिग्रहिकोऽपि–अभिभवकायोत्सर्गकार्यपीत्यर्थः, किं पुनश्चेष्टाकायोत्सर्गकारी, स तु सुतरां न निरुणद्धि, सद्योमरणं निरोधे उच्छ्वासस्य, ततश्च सूक्ष्मोच्छ्वासमेव यतनया मुञ्चति, नोल्बणं, मा भूत्सत्त्वघातः ॥ १५२४ ॥ कासितेनेत्याद्याह—

कासखुअजंभिए मा हु सत्थमणिलोऽणिलस्स तिव्वुण्हो । असमाही य निरोहे मा मसगाई अ तो हत्थो ॥

कायोत्सर्गे कासक्षुतजृम्भितानि नायतनया क्रियन्ते मा शस्त्रं भविष्यति, कासितादिसमुद्भवोऽनिलो–वायुरनिलस्य–बाह्यवायोस्तीव्रोष्णो बाह्यानिलापेक्षयाऽत्युष्णः । न च न क्रियन्ते न च न निरुद्ध्यन्ते एव, असमाधिः, चशब्दान्मरणमपि सम्भाव्यते, कासितादिसमुद्भवपवनश्लेष्माभिहता [मशकादयः] मरिष्यन्ति, जृम्भिते वा (च) मुखप्रवेशं करिष्यन्ति ततो हस्तोऽग्रे दीयते ॥ १५२५ ॥ उच्छ्वसितेन तुल्ययोगक्षेमत्वान्निःश्वसितेनेति न व्याख्यातं, उद्गारितेनेत्याद्याह—

वायनिसग्गुड्डोए जयणासद्दस्स नेव य निरोहो । उड्डोए वा हत्थो भमलीमुच्छासु अ निवेसो ॥१५२६॥

वातनिसर्गोद्गारयोर्यतना शब्दस्य क्रियते, न निसृष्टं मुच्यते नैव च निरोधः क्रियते, असमाधिमात्रादेव, उद्गारे वा हस्तोऽन्तरे दीयते, भ्रमिमूर्च्छयोर्निविशेत, मा मूत्सहसापतितस्यात्मसंयमविराधना ॥ १५२६ ॥ सूक्ष्मैरङ्गसञ्चारैरित्याद्याह–

वीरियसजोगयाए संचारा सुहुमबायरा देहे । बाहिं रोमंचाई अंतो खेलाणिलाईया ॥ १५२७ ॥

वीर्यसयोगतया मञ्चाराः सूक्ष्मबादरा देहे अवश्यम्भाविनः, वीर्यं वीर्यान्तरायक्षयोपशमक्षयजमात्मपरिणामः, योगस्तु मनोवाक्कायास्तत्र वीर्यसयोगतयैव सञ्चाराः (अतिचारा) सूक्ष्मबादराः स्युः न केवलाद्वीर्यात् देह एव नादेहस्य, तत्र बही रोमाञ्चोत्कम्पादयः अन्तः–मध्ये सूक्ष्माः श्लेष्मानिलादयो विचरन्ति ॥ १५२७ ॥ सूक्ष्मैर्दृष्टिसञ्चारैरित्याह—

आ(अव)लोअचलं चक्खू मणुव तं दुक्करं थिरं काउं । रूवेहिं तयं खिप्पइ सभावओ वा सयं चलइ।१५२८।

अवलोकचलं–दर्शनलालसं चक्षुरतो मनोवद्दुष्करं स्थिरं कर्तुं, यतो रूपैस्तदाऽऽक्षिप्यते स्वभावतो वा स्वयं चलति

॥ १५२८ ॥ तस्मात्—

न कुणइ निमेसजत्तं तत्थुवओगे ण झाण झाइज्जा । एगनिसिं तु पवन्नो झायइ साहू अणिमिसच्छोऽवि ॥

न करोति निमेषयत्नं कायोत्सर्गकारी, तत्र निमेषयत्ने य उपयोगस्तेन सता मा न ध्यानं ध्यायेदभिप्रेतं, एकरात्रिकीं तु प्रतिमां प्रतिपन्नो ध्यायति समर्थोऽनिमेषाक्षोऽपि निश्चलनयनः ॥ १५२९ ॥ एवमादिभिराकारैरित्याद्याह—

अगणीओ छिंदिज्ज व बोहियखोभाइ दीहडक्को वा । आगारेहिं अभग्गो उस्सग्गो एवमाईहिं ॥ १५३० ॥

'अगणि'त्ति यदा ज्योतिः स्पृशति तदा प्रावरणाय कल्पग्रहणं कुर्वतोऽपि न कायोत्सर्गभङ्गः । आह—नमस्कारमेवोक्त्वा किमिति तद्ग्रहणं न करोति ? येन तद्भङ्गो न स्याद्, उच्यते, नात्र नमस्कारेण पारणमेवाविशिष्टं कायोत्सर्गमानं क्रियते, किन्तु यो यत्परिमाणो यत्र कायोत्सर्ग उक्तस्तत ऊर्ध्वं समाप्तेऽपि तस्मिन्नमस्कारमपठतो भङ्गोऽपरिसमाप्ते च पठतो भङ्ग एव, स चात्र न स्यादेवं सर्वत्र ज्ञेयं । 'छिंदिज्ज व'त्ति मार्जारो मूषकादिर्वा पुरतो यायात् तत्राप्यग्रतः सरतो न कायोत्सर्गभङ्गः, बोधिकाः—स्तेनकास्तेभ्यः क्षोभः—सम्भ्रमः आदिशब्दाद्राजादिक्षोभस्तत्रास्थानेऽप्युच्चारयतो वाऽनुच्चारयतो वा न कायोत्सर्गभङ्गः । 'दीहडक्को व'त्ति सर्पदष्टे वा आत्मनि परे वा साधौ सहसा—अकाण्डे एवोच्चरतस्तथैव ॥ १५३० ॥ ओघतः कायोत्सर्गविधिमाह—

ते पुण ससूरिए चिय पासवणुच्चारभूमीओ । पेहित्ता अत्थमिए ठंतुसग्गं सए ठाणे ॥ १५३१ ॥

अन्नत्थ ऊससिएणं सूत्रस्य व्याख्या नि०गा० १५२९-१५३१

ते कायोत्सर्गकर्त्तारः साधवः ससूर्य एव दिवसे प्रस्रवणोच्चारकालभूमीः प्रत्युपेक्ष्य ततश्चास्तमिते सूर्ये तिष्ठन्त्युत्सर्गं स्वके स्थाने, अयं विधिः ॥ १५३१ ॥ कारणान्तरेण गुरोर्व्याघाते सति—

जइ पुण निव्वाघाए आवासं तो करिंति सव्वेवि । सड्ढाइकहणवाघायथाइ पच्छा गुरू ठंति ॥ १५३२ ॥

यदि निर्व्याघात एव सर्वेषामावश्यकं-प्रतिक्रमणं ततः कुर्वन्ति, सर्वेऽपि सहैव गुरुणा ॥ १५३२ ॥ यदा च पश्चाद्गुरवस्तिष्ठन्ति तदा—

सेसा उ जहासत्तिं आपुच्छित्ताण ठंति सट्ठाणे । सुत्तत्थसरणहेउं आयरिए ठियंमि देवसियं ॥१५३३॥

सूत्रार्थस्मरणहेतुं ॥ १५३३ ॥ कायोत्सर्गस्थानाख्यम(त्सर्गेण स्थातुमशक्तानां)विधिमाह—

जो हुज्ज उ असमत्थो बालो वुड्ढो गिलाण परितंतो । सो विकहाइरहिओ झाइज्जा जा गुरू ठंति ॥१५३४॥

ध्यायेत्सूत्रार्थं यावद् गुरवस्तिष्ठन्ति कायोत्सर्गं ॥ १५३४ ॥ आचार्ये स्थिते दैवसिकमित्युक्तं तद्गतं विधिमाह—

जा देवसिअं दुगुणं चिंतइ गुरू अहिंडओऽचिट्ठं । बहुवावारा इअरे एगगुणं ताव चिंतंति ॥ १५३५ ॥

अहिण्डकश्चेष्टां-व्यापाररूपां ॥ १५३५ ॥

पवइयाण व चिट्ठं नाऊण गुरू बहुं बहुविहीअं । कालेण तदुचिएणं पारेइ थोवचिट्ठोऽवि ॥ १ ॥ (प्र०)

नमुक्कारचउवीसगकिइकम्मालोअणं पडिक्कमणं । किइडम्मदुरालोइअ दुप्पडिक्कंते य उस्सग्गो ॥१५३६॥

कायोत्सर्गसमाप्तौ नमस्कारेण पारयन्ति चतुर्विंशतिस्तवं भणन्ति मुखानन्तकं शरीरं च प्रतिलिख्य कृतिकर्म्म कुर्वन्ति । पूर्वपरिचिन्तितान् दोषान् रत्नाधिकतया आलोचयन्ति ततो गुरुदत्तप्रायश्चित्ताः सामयिकपूर्वकं समभावे स्थित्वा प्रतिक्रम्य क्षामणानिमित्तं कृतिकर्म्म कुर्वन्ति आचार्यादीन् क्षामयन्ति । किमपि दुरालोचितं दुष्प्रतिक्रान्तं वानाभोगादि स्यात् अतः पुनरपि कृतसामायिकाश्चारित्रविशोधनार्थं कायोत्सर्गं कुर्वन्ति ॥ आलो० ॥ इत्यादिगाथानवकमन्यकर्तृकं[1]—

एस चरित्तुस्सग्गो दंसणसुद्धीइ तइयओ होइ । सुयनाणस्स चउत्थो सिद्धाण थुई अ किइकम्मं ॥१५३७॥

दर्शनशुद्धिनिमित्तं तृतीयः स्यात् कायोत्सर्गः, तृतीयत्वं चास्यातिचारालोचनविषयप्रथमकायोत्सर्गापेक्षया । विशुद्धचरणदर्शनश्रुतातिचारा मङ्गलनिमित्त चरणादिदेशकानां सिद्धानां स्तुतिं पठन्ति, ततः पुनः कृतिकर्म आचार्याणां कुर्वन्ति ॥ १५३७ ॥ किं निमित्तं ?, उच्यते—

सुकयं आणत्तिं पिव लोगे काऊण सुकयकिइकम्मं । वड्ढंतिया थुईओ गुरुथुइगहणे कए तिन्नि ॥१५३८॥

सुकृतामाज्ञप्तिमादेशं लोके इवेति, यथा राज्ञा मनुष्या आज्ञप्तिकया प्रेषिताः प्रणम्य यान्ति तां च सुकृतां कृत्वा प्रणम्य निवेदयन्ति, एवं साधवो गुरुसमादिष्टा वन्दनपूर्वं चारित्रादिविशुद्धिं कृत्वा पुनः सुकृतकृतिकर्म्माणः सन्तो गुरोर्निवेद-

[1] इद गाथानवक न क्वापि लब्ध अत एव न दर्शितम् ।

यन्ति, तावत्तिष्ठन्ति यावद् गुरवः स्तुतिग्रहणं कुर्वन्ति, समाप्तायां प्रथमस्तुतौ वर्द्धमानास्तिस्रः स्तुतीः पठन्ति, एवं दैवसिकं गतं, रात्रिके प्रथमं चारित्रशुद्ध्यर्थं कायोत्सर्गं कुर्वन्ति, श्रुतज्ञानविशुद्ध्यर्थं श्रुतस्तवं पठन्ति, कायोत्सर्गे प्रादोपिकमतिचारं चिन्तयन्ति ॥ १५३८ ॥ आह–किमर्थमाद्यकायोत्सर्ग एव न चिन्तयन्ति ?, उच्यते—

निद्दामत्तो न सरइ अइयारं मा य घट्टणं ऽणोऽन्नं । किइअकरणदोसा वा गोसाई तिन्नि उस्सग्गा ॥ १५३९ ॥

निद्दामत्तो–निद्राभिभूतो न स्मरति सुष्ठु अतिचारं, मा घट्टणं ऽणोऽन्नं अंधयारे वंदंतयाणं, किइअकरणदोसा वा, अंधयारे अदंसणाओ मंदसद्धा न वंदंति, एएण कारणेण गोसे–पच्चूसे आइए तिन्नि काउस्सग्गा भवन्ति, न पुण पाओसिए जहा एक्कोत्ति ॥ १५३९ ॥

एत्थ पढमो चरित्ते दंसणसुद्धीए बीयओ होइ । सुयनाणस्स य तातिओ नवरं चिंतंति तत्थ इमं ॥१५४०॥

तइए निसाइयारं चिंतइ चरमंमि किं तवं काहं ?। छम्मासा एगादिणाइहाणि जा पोरिसि नमो वा ।१५४१।

यावत् पौरुषीं नमस्कारसहितं वा ॥ १५४१ ॥ पाक्षिकादिविधिः स्वयं ज्ञेयः, क्षामणेष्वाचार्यो यदभिधत्ते तदाह—

अहमवि भे खामेमी तुब्भेहिं समं अहं च वंदामि । आयरियसंतियं नित्थारगा उ गुरुणो अ वयणाइं।१५४२।

अहमवि खामेमि तुब्भेहिं समं, अहमवि वंदामि चेइआइं, आयरिअसंतिअं, नित्थारगपारगा होह, गुरोरेतानि वचनानि

॥ १५४२ ॥ क्षामणकपञ्चके चातुर्मासिकादौ लेशतो विधिमाह—

चाउम्मासियवरिसे आलोअण नियमसो हु दायव्वा । गहणं अभिग्गहाण य पुव्वगहिए निवेएउं ।२३२। (भा.)

चातुर्मासिकवार्षिकयोः सर्वेऽपि मूलोत्तरगुणानामालोचनां दत्त्वा प्रतिक्रामन्ति, पूर्वगृहीतानभिग्रहान्निवेद्य पुनरन्यान् गृह्णन्ति, निरभिग्रहाणा न युज्यते स्थातुं ॥ २३२ ॥

चाउम्मासियवरिसे उस्सग्गो खित्तदेवयाए उ । पक्खिय सिज्जसुरीए करिंति चउमासिए वेगे २३३ (भा.)

क्षेत्रदेवताया उत्सर्गं कुर्वन्ति, पाक्षिके शय्यासुर्याः, केचित् चातुर्मासिके शय्यादेवताया अप्युत्सर्गं कुर्वन्ति ॥ २३३ ॥ नियतकायोत्सर्गानाह—

देसिय राइय पक्खिय चउमासे या तहेव वरिसे य । एएसु हुंति नियया उस्सग्गा अनिअया सेसा ।१५४३।

शेषाः—गमनादिविषयाः ॥ १५४३ ॥ नियतकायोत्सर्गाणामोघत उच्छ्वासमानमाह—

साय सयं गोसऽद्धं तिन्नेव सया हवंति पक्खंमि । पंच य चाउम्मासे अट्ठसहस्सं च वारिसए ॥१५४४॥

सायं—प्रदोपस्तत्र शतमुच्छ्वासानां चतुर्भिरुद्योतकरैः, 'गोसऽद्धं'ति प्रत्यूपे पञ्चाशत् उद्योतकरद्वयेन, पाक्षिके त्रीणि शतानि द्वादशभिरुद्योतकरैः, चातुर्मासके पञ्चशतानि विंशत्योद्योतकरैः, वार्षिकेऽष्टोत्तरं सहस्रं चत्वारिंशतोद्योतकरैर्नमस्कारेण च ॥ १५४४ ॥ दैवसिकादिषूद्योतकरमानमाह—

२०

चातुर्मासिकादौ क्षामणकादिविधिः
नियतकायोत्सर्गमानं च
नि० गा० १५४३-१५४४
भा. गा. २३२-२३३

चत्तारि दो दुवालस वीसं चत्ता य हुंति उज्जोआ । देसिय राइय पक्खिय चाउम्मासे अ वरिसे य ।१५४५।

भावितार्था ॥ १५४५ ॥ अथ श्लोकमानमाह—

पणवीसमद्धतेरस सिलोग पन्नत्तरिं च बोद्धवा । सयमेगं पणवीसं बे बावन्ना य वारिसिए ॥ १५४६ ॥

चतुर्भिरुच्छ्वासैः श्लोकः परिगृह्यते, दैवसिके पञ्चविंशतिश्लोकाश्चतुर्षूद्योतकरेषु, रात्रिकेऽर्द्धत्रयोदशश्लोका द्वयोरुद्योतकरयोरित्यादि यावद्वार्षिके द्वे शते द्विपञ्चाशदधिके ॥ १५४६ ॥ अनियतकायोत्सर्गवक्तव्यतावसरे द्वारगाथेयं—

गमणागमणविहारे सुत्ते वा सुमिणदंसणे राओ । नावानइसंतारे इरियावहियापडिक्कमणं ॥ १५४७ ॥

गमनं भिक्षाद्यर्थं अन्यग्रामादौ, आगमनं तत एव, अत्र ईर्यापथिकीं प्रतिक्रम्य पञ्चविंशत्युच्छ्वासः कायोत्सर्गः कार्यः ॥ १५४७ ॥ तथा चाह—

भत्ते पाणे सयणासणे य अरिहंतसमणसिज्जासु । उच्चारे पासवणे पणवीसं हुंति उस्सासा ॥२३४॥ (भा.)

भक्तपाननिमित्तमन्यग्रामादिगता यावन्न स्याद्वेला तावदीर्यापथिकीं प्रतिक्रम्य स्वाध्यायं कुर्वन्ति, आगता अपि पुनः प्रतिक्रामन्ति, एवं शयनासननिमित्तमपि, शयनं संस्तारकादि, आसनं पीठकादि, 'अरिहंतसमणसिज्जासु' त्ति चैत्यगृहं गताः प्रतिक्रम्य तिष्ठन्ति, एवं श्रमणशय्यायां—साधुवसतौ उच्चारप्रश्रवणयोर्व्युत्सर्गे, स्वस्थानात् हस्तशताद्बहिर्गमने ॥ २३४ ॥ 'विहार' त्ति आह—

दैवसिकादिकायोत्सर्गेषु उद्योतकरश्लोकमानं अनियतकायोत्सर्गवक्तव्यता च
नि०गा० १५४५-१५४७
भा. गा. २३४

नियआलयाओ गमणं अन्नत्थ उ सुत्तपोरिसिनिमित्तं । होइ विहारो इत्थवि पणवीसं हुंति ऊसासा ॥१॥प्र०

' सुत्ते व 'त्ति सूत्रद्वारमाह—

उद्देससमुद्देसे सत्तावीसं अणुन्नवणियाए । अट्ठेव य ऊसासा पट्ठवण पडिक्कमणमाई ॥ १५४८ ॥

सूत्रस्योद्देशे [समुद्देशे] च यः कायोत्सर्गस्तत्र सप्तविंशतिरुच्छ्वासाः, अनुज्ञायां च, ' पट्ठवण 'त्ति प्रस्थापितः कार्यनिमित्तं यदि स्खलति ततोऽष्टोच्छ्वासं, द्वितीयवारायां स्खलति षोडशोच्छ्वासं, तृतीयवेलायां न याति, अन्यः प्रस्थाप्यते, अवश्यकार्ये देवान्नत्वा पुरतः साधुं स्थापयित्वा अन्येन समं याति, कालप्रतिक्रमणेऽष्टोच्छ्वासाः, आदिशब्दात् कालग्रहणे प्रस्थापनायां गोचरचर्यायां श्रुतस्कन्धपरिवर्त्तनानन्तरं (परावर्त्तने) च ॥ १५४८ ॥ अत्राह प्रेरकः—

जुज्जइ अकालपढियाइएसु दुट्ठु अ पडिच्छियाईसु । समणुन्नसमुद्देसे काउस्सगस्स करणं तु ॥ १५४९ ॥

अकालपठितादिषु सत्सु दुष्ठु च प्रतीच्छितादिषु समनुज्ञासमुद्देशयोश्च कायोत्सर्गस्य करणं ॥ १५४९ ॥

जं पुण उद्दिसमाणा अणइकंतावि कुणह उस्सग्गं । एस अकओवि दोसो परिघिप्पइ किं मुहा भंते !? १५५०

यत्पुनरुद्दिश्यमानाः श्रुतमनतिक्रान्ता अपराधमप्राप्ता अपि कुरुत कायोत्सर्गं एष अकृतोऽपि दोषः कायोत्सर्गशोध्यः परिगृह्यते किं मुधा भदन्त ! ? ॥ १५५० ॥ आहाचार्यः—

पावुग्घाइ कीरइ उस्सग्गो मंगलंति उद्देसो । अणुवहियमंगलाणं मा हुज्ज कहिंचि णे विग्घं ॥ १५५१ ॥

अनुपहितमङ्गलानामकृतमङ्गलानां ' णे ' इत्यस्माकं ॥ १५२१ ॥ ' सुमिणदंसण'त्ति आह—

पाणवहमुसावाए अदत्तमेहुणपरिग्गहे चेव । सयमेगं तु अणूणं ऊसासाणं हविज्जाहि ॥ १५५२ ॥

स्वप्ने प्राणवधादिष्वासेवितेषु सत्सु शतमेकमन्यूनं उच्छ्वासानां ध्यायेत् , दृष्टिविपर्यासे शतं, स्त्रीविपर्यासे अष्टोत्तरं शतं, उक्तं च—" दिट्ठीविपरियासे सय मेहुन्नंमि थीविपरियासे । ववहारेणट्ठसयं अणभिस्संगस्स साहुस्स ॥ १ ॥ "
' नावानइसंतार 'त्ति आह—

नावा[ए] उत्तरिउं वहमाई तह नइं च एमेव । संतारेण चलेण व गंतुं पणवीस ऊसासा ॥ १॥ (प्र०)

संतारेण चलेन—सङ्क्रमेण वाशब्दात्पादाभ्यामुत्तीर्यापि ॥ १ ॥ उच्छ्वासमानमाह—

पायसमा ऊसासा कालपमाणेण हुंति नायव्वा । एवं कालपमाणं उस्सग्गेणं तु नायव्वं ॥ १५५३ ॥

पादः श्लोकपादः ॥ १५५३ ॥ आद्यद्वारगाथागतमशठद्वारमाह—शाठ्यरहितेन स्वबलापेक्षया कायोत्सर्गः कार्यः, अन्यथा दोष इत्याह—

जो खलु तीसइवरिसो सत्तरिवरिसेण पारणाइसमो । विसमे व कूडवाही निव्विन्नाणे हु से जड्डे ।२३५। भा०

अनियत-कायोत्सर्ग-वक्तव्यता नि०गा० १५५१-१५५३

यः साधुस्त्रिंशद्वर्षः सन् खलुशब्दाद्बलवान् आतङ्करहितश्च सप्ततिवर्षेणान्येन वृद्धेन साधुना पारणके समः–कायोत्सर्गप्रारम्भपरिसमाप्त्या तुल्य इत्यर्थः, विषम इव–उट्टङ्कादौ इव कूटवाही विषमवाही बलीवर्दवन्निर्विज्ञान एवासौ जड्डः, स्वहितपरिज्ञानशून्यत्वात् ॥ २३५ ॥ दृष्टान्तमेव विवृण्वन्नाह—

समभूमेवि अइभरो उज्जाणे किमुअ कूडवाहिस्स ? । अइभारेण भज्जइ तुत्तयघाएहि अ मरालो॥२३६॥भा.

समभूमावपि अतिभारो(भर)विषमवाहित्वात्, ऊर्द्धं यानमस्मिन्निति उद्यानं तस्मिन् किमुत ?, सुतरामित्यर्थः, कूटवाहिनः–बलिवर्दस्य, तस्य च दोषद्वयं, अतिभारेण मज्यते यतो विषमवाहिन एवातिभारः स्यत्, तुत्तकघातैश्च विषमवाही च पीड्यते मरालो–गलिः ॥ २३६ ॥ दार्ष्टान्तिकयोजनामाह—

एमेव बलसमग्गो न कुणइ मायाइ सम्ममुस्सग्गं । मायावडिअ कम्मं पावइ उस्सग्गकेसं च ॥१॥(प्र०)

स मायाप्रत्ययं कर्म्म प्राप्नोति, तथा कायोत्सर्गक्लेशं च निष्फलं ॥ १ ॥ मायावतो दोषानाह—

मायाए उस्सग्गं सेसं च तवं अकुवओ सहुणो । को अन्नो अणुहोही सकम्मसेसं अणिज्जरियं ? ॥१५५४॥

मायया कायोत्सर्गं शेषं च तपः–अनशनादि अकुर्वतः 'सहिष्णोः' समर्थस्य कोऽन्योऽनुभविष्यति ? स्वकर्मशेषमनिर्जरितं, शेषता चास्य सम्यक्त्वप्राप्त्योत्कृष्टकर्मापेक्षया ॥ १५५४ ॥ यतश्चैवमतः—

निक्कूडं सविसेसं वयाणुरूवं बलाणुरूवं च । खाणुव उद्धदेहो काउस्सग्गं तु ठाइज्जा ॥ १५५५ ॥

कथं
कायोत्सर्गः
कार्यः
नि०गा०
१५५४-
१५५५

निष्कूटमशठं, सविशेषं समवलादन्यस्मात् सकाशात् ॥ १५५५ ॥ वयो वलं चाधिकृत्य कायोत्सर्गकरणविधिमाह—

तरुणो वलवं तरुणो अ दुब्बलो थेरओ बलसमिद्धो । थेरो अबलो चउसुवि भंगेसु जहाबलं ठाई ॥१५५६॥

तरुणो बलवान् १ तरुणश्च दुर्बलः २ स्थविरो बलसमृद्धः ३ स्थविरो दुर्बलः ४, चतुर्ष्वपि भङ्गकेषु यथाबलं तिष्ठति बलानुरूपमित्यर्थः ॥ १५५६ ॥ गतमशठद्वारं, शठद्वारे गाथेयं—

पयलायइ पडिपुच्छइ कंटयवियारपासवणधम्मे । नियडी गेलन्नं वा करेइ कूडं हवइ एयं ॥ १५५७॥

कायोत्सर्गकरणवेलायां मायया प्रचलायति–निद्रां गच्छति, प्रतिपृच्छति सूत्रमर्थं वा, कण्टकमपनयति, 'वियार'त्ति पुरीषोत्सर्गाय याति, प्रस्रवणं व्युत्सृजति, धर्मं कथयति, निकृत्या–मायया ग्लानत्वं वा करोति, कूटं भवत्येतदनुष्ठानं ॥ १५५७ ॥ विधिद्वारं—

पुव्वं ठंति य गुरुणो गुरुणा उस्सारियंमि पारेंति । ठायंति सविसेसं तरुणा उ अनूणविरिया उ ॥ १५५८ ॥

चउरंगुल मुहपत्ती उज्जूए डब्बहत्थ रयहरणं । वोसट्ठचत्तदेहो काउस्सग्गं करिज्जाहि ॥ १५५९ ॥

चत्वार्यङ्गुलानि पादयोरन्तरं कार्यं, मुखपोतिका दक्षिणहस्तेन ग्राह्या, वामहस्ते रजोहरणं कार्यं, एतेन विधिना व्युत्सृष्टत्यक्तदेहः कायोत्सर्गं कुर्यात् ॥ १५५९ ॥ दोषद्वारमाह—

घोडग लयाइ खंभे कुड्डे माले य सबरि वहु नियले। लंबुत्तर थण उद्धी संजय खलि[णे य]वायसकविट्ठे१५६०
सीसुक्कंपिय सूई अंगुलिभमुहा य वारुणी पेहा। नाहीकरयलकुप्पर उस्सारिय पारियंमि थुई ॥ १५६१ ॥

एतद्व्याख्यानगाथाः 'आसुव०' इत्याद्याः—

आसुव विसमपायं गायं ठावित्तु ठाइ उस्सग्गे । कपइ काउस्सग्गे लयव्व खरपवणसगेणं ॥ १ ॥ खंभे वा कुड्डे वा अवठंभिय ठाइ काउस्सग्गं तु । माले य उत्तमगं अवठंभिय ठाइ उस्सग्गं ॥ २ ॥ सबरी वसणविरहिया करेहि सागारियं जह ठवेइ । ठइऊण गुज्झदेसं करेहि तो कुणइ उस्सग्गं ॥ ३ ॥ अवणामिउत्तमंगो काउस्सग्गं जहा कुलवहुव । नियलियओविव चलणे वित्थारिय अहव मेलविउं ॥ ४ ॥ काऊण चोलपट्टं अविधीए नाभिमंडलस्सुवरिं । हिट्ठा य जाणुमित्तं चिट्ठई लंबुत्तरुस्सग्गं ॥ ५ ॥ उच्छाईऊण य थणे चोलगपट्टेण ठाइ उस्सग्गं । दंसाइरक्खणट्ठा अहवा अन्नाणदोसेण ॥ ६ ॥ मेलित्तु पण्हियाओ चलणे वित्थारिऊण बाहिरओ । ठाउस्सग्गं एसो बाहिरउद्धी मुणेयव्वो ॥७॥ अंगुट्ठे मेलविउ वित्थारिय पण्हियाओ बाहिं तु । ठाउस्सग्गं एसो भणिओ अब्भिंतरुद्धित्ति ॥ ८ ॥ कप्पं वा पट्टं वा पाइणिउ संजइव्व उस्सग्ग । ठाइ य खलिणं व जहा रयहरणं अग्गओ काउं ॥ ९ ॥ भामेइ तहा दिट्ठिं चलचित्तो वायसुव्व उस्सग्गे । छप्पइआण भएणं कुणई अ पट्टं कविट्ठं व ॥ १० ॥ सीसं पकंपमाणो जक्खाइट्ठव्व कुणइ उस्सग्गं । मूयव्व हुयहुअंतो तहेव छिज्जतमाईसु ॥ ११ ॥ अंगुलिभमुहाओवि य चालंतो तहय कुणइ उस्सग्गं । आलावगगणणट्ठा संठवणत्थं च जोगाणं ॥ १२ ॥ काउस्सग्गंमि ठिओ सुरा जह बुडबुडेइ अव्वत्तं । अणुपेहंतो तह वानरुव्व चालेइ ओट्ठउडे ॥ १३ ॥ एए काउस्सग्गं

कुणमाणेण विबुहेण दोसा उ । सम्मं परिहरियवा जिणपडिकुट्ठत्तिकाऊणं ॥ १४ ॥

चतुर्दश[गाथाः] स्पष्टाः, नवरं 'आउंट्टाविंतु' त्ति आकुञ्च्य कराभ्यां सागारिकं-भगं स्थगयति-आच्छादयति, कल्पं वा पट्टं वा चोलपट्टं वा प्रावृत्यावगुण्ठ्य कविट्ठं वा शब्दं इत्यर्थः । 'छिज्जंतमाईसु' त्ति छिद्यमानाद्यवयव इव । 'नाभीकरयलकुप्पर उस्सारिअ पारिअंमि थुइ' त्ति गाथाशकलं लेशतोऽदुष्टकायोत्सर्गावस्थानप्रदर्शनपरं विध्यन्तरसङ्ग्रहपरं च, तत्र नाभेरधश्चोलपट्टः कार्यः, 'करयल' त्ति सामान्येनाधः प्रलम्बकरतलः यावत् 'कोप्पर' त्ति सोऽपि कूर्प्पराभ्यां धार्यः, एवम्भूतेन कायोत्सर्गः कार्यः, उत्सारिते च-कायोत्सर्गे पारिते नमस्कारेणावसाने स्तुतिर्दातव्या ॥ १५६१ ॥ कस्येतिद्वारे यस्यायं कायोत्सर्गो यथोक्तफलः स्यात्तमाह—

वासीचंदणकप्पो जो मरणे जीविए य समसण्णो। देहे य अपडिबद्धो काउस्सग्गो हवइ तस्स ॥१५६२॥

तथा—

तिविहाणुवसग्गाणं दिव्वाणं माणुसाण तिरियाणं। सम्ममहियासणाए काउस्सग्गो हवइ सुद्धो॥१५६३॥

फलद्वारमाह—

इहलोगंमि सुभद्दा राया उदओद सिट्ठिभज्जा य। सोदासखग्गथंभण सिद्धी सग्गो य परलोए॥ १५६४ ॥

इहलोके यत् कायोत्सर्गफलं तत्र सुभद्रोदाहरणं-वसन्तपुरे जिनदत्तश्रेष्ठिसुता सुभद्रा बौद्धभक्तेन चम्पापुरीनिवासिना

कपटश्राद्धीभूय बुद्धदासेन परिणीय स्वगृहं नीता । कुटुम्बकलहे पृथग्गृहे स्थापिता । तत्र प्रायोग्यापानके (ग्यभक्तपानार्थं) साधव आगच्छन्ति, एषा संयतेषु रक्तेति अन्यवचोभिर्भर्त्ता न प्रत्येति । अन्यदा अस्याः साध्वक्षितृणापनोदं जिह्वया कुर्वाणायास्तिलकः सङ्क्रान्तो भर्तुर्दर्शितः, स मन्दस्नेहो जातः, सुभद्रया ज्ञात्वा प्रवचनोड्डाहं रात्रौ कायोत्सर्गश्चक्रे, आगम्य देवतयोक्ता—प्रातरस्याः पुर्याः स्तब्धेषु द्वारेषु चालन्याकृष्टोदकेनाच्छोट्य द्वारत्रयमुद्घाटनीयं त्वया यथा उड्डाहो याति प्रशंसा च स्यात्, तया सत्या तथैव विदधे । राजा उदितोदयो यथा तस्य राज्ञो भार्या धर्मलाभागतं नृपरुद्धस्य (अन्तः-पुररुद्धं श्रमणमुपसर्गयति, तस्य) कायोत्सर्गेणोपसर्गप्रशमनं जातं । श्रेष्ठिभार्या—मित्रवती मनोरमा अपरनाम्नी, यथा तया कायोत्सर्गे कृते सुदर्शनस्य दिव्यानुभावादुपसर्गान्मुक्तिः । सौदासो नमस्कारे । ' खग्गथंमण 'त्ति कोऽपि विराद्धश्रामण्यः खड्गः समुत्पन्नः, वने साधुमारणाय प्रधावितः, साधवः कायोत्सर्गे स्थिताः, न प्रभवति पश्चादुपशान्तः, एतदैहिकं फलं, सिद्धिः स्वर्गश्च परलोके फलं ॥ १५६४ ॥ ननु सिद्धिः कर्म्मक्षयात् सा कथं कायोत्सर्गफलं ?, उच्यते, कर्म्मक्षयस्यैव कायोत्सर्गफलत्वात्, यत आह—

जह करगओ निकिंतइ दारुं इंतो पुणोवि वच्चंतो । इअ कंतंति सुविहिया काउस्सग्गेण कम्माइं २३७ भा०

यथा करपत्रकं निकृन्तति—छिनत्ति दारु—काष्ठं आगच्छन् पुनश्च व्रजन् एवं कृन्तन्ति सुविहिताः कायोत्सर्गेण कर्माणि ॥ २३७ ॥ आह—किमिदमित्थमित्यत आह—

काउस्सग्गे जह सुट्ठियस्स भज्जंति अंगमंगाइं । इय भिंदंति सुविहिया अट्ठविहं कम्मसंघायं ॥ १५६५ ॥

यथा कायोत्सर्गे सुस्थितस्य भज्यन्तेऽङ्गोपाङ्गानि एवं चित्तनिरोधेन भिन्दन्ति ॥ १५६५ ॥

अन्नं इमं सरीरं अन्नो जीवुत्ति एव कयबुद्धी । दुक्खपरिकिलेसकरं छिंद ममत्तं सरीराओ ॥ १५६६ ॥

किञ्च-एवं भावनीयं—

जावइया किर दुक्खा संसारे जे मए समणुभूया । इत्तो दुव्विसहतरा नरएसु अणोवमा दुक्खा ॥१५६७॥

तम्हा उ निम्ममेण मुणिणा उवलद्धसुत्तसारेणं । काउस्सग्गो उग्गो कम्मक्खयट्ठाय कायव्वो ॥ १५६८॥

काउस्सग्गनिज्जुत्ती समत्ता ।

नयाः पूर्ववत् , इति कायोत्सर्गाध्ययननिर्युक्त्यवचूर्णिः ॥

अथ प्रत्याख्यानाध्ययनं ।

प्रत्याख्यानाध्ययनस्य नामनिष्पन्ने निक्षेपे प्रत्याख्यानाध्ययनमिति प्रत्याख्यानमध्ययनं च, तत्र प्रत्याख्यानमधिकृत्य द्वारगाथामाह—

पच्चक्खाणं पच्चक्खाओ पच्चक्खेयं च आणुपुव्वीए। परिसा कहणविही या फलं च आईइ छब्भेआ॥१५६९॥

प्रत्याख्यानक्रियैव प्रत्याख्यानं, प्रत्याख्याता—गुरुर्विनेयश्च, प्रत्याख्येयं—प्रत्याख्यानगोचरं वस्तु, आनुपूर्व्या कथनीयमिति वाक्यशेषः, तथा परिषद्वक्तव्या, कथनविधिश्च वक्तव्यः, तथा फलं चास्य कथनीयं, आदावेते षड् भेदाः—

नामं ठवणा दविए अइच्छ पडिसेहमेव भावे य। एए खलु छब्भेया पच्चक्खाणंमि नायव्वा ॥२३८॥(भा०)

नामप्रत्याख्यानं, स्थापनाप्रत्याख्यानं, द्रव्यप्रत्याख्यानं, न दित्सा अदित्सा सैव प्रत्याख्यानं, प्रतिषेधप्रत्याख्यानं, एवं भावप्रत्याख्यानं ॥ २३८ ॥ नामस्थापने गतार्थे, द्रव्यप्रत्याख्यानमाह—

दव्वनिमित्तं दव्वे दव्वभूओ व तत्थ रायसुआ। अइच्छापच्चक्खाणं वंभणसमणा न(अ)इच्छात्ति॥२३९॥भा०

द्रव्यनिमित्तं प्रत्याख्यानं वस्त्रादिद्रव्यार्थमित्यर्थः, तथा द्रव्ये प्रत्याख्यानं द्रव्यप्रत्याख्यानं यथा भूम्यादौ व्यवस्थितः करोति, तथा द्रव्यभूतोऽनुपयुक्तः सन् यः करोति, तुशब्दाद्द्रव्यस्य द्रव्याणां द्रव्येणेत्यादि ज्ञेयं, तत्र राजसुता—एकस्य

प्रत्याख्यानद्वारगाथा प्रत्याख्यानभेदाश्च नि०गा० १५६९ भा०गा० २३८-२३९

राज्ञः सुता भर्त्तरि मृते पितृगृहमागता धर्मार्थिनी पाखण्डिनां दानं दत्ते । अन्यदा कार्त्तिक(को धर्म)मास इति मांसं प्रत्याख्यातव्रती, पारणकेऽनेकेषां नानाविधानि मांसानि दीयन्ते, तत्र साधवोऽदूरेण यान्तो निमन्त्रिताः, भक्तं गृहीतं मांसं नेच्छन्ति, राजसुता प्राह-किं युष्माकं न तावत्कार्त्तिकमासः पूर्यते ?, तैरूचे यावज्जीवं कार्त्तिकः, कथं ?, धर्म्मकथायां मांसदोषाः कथिताः, सा प्रबुद्धा प्रव्रजिता, एवं तस्याः पूर्वं द्रव्यप्रत्याख्यानं, पश्चाद्भावप्रत्याख्यानं जातं । अदित्साप्रत्याख्यानं-हे ब्राह्मण ! हे श्रमण ! अदित्सेति-न मे दातुमिच्छा, न तु नास्ति यद्भवता याचितं, ततश्चादित्सैव वस्तुतः प्रतिषेधात्मिकेति कृत्वा प्रत्याख्यानं ॥ २३९ ॥

अमुगं दिज्जउ मज्झं नत्थि ममं तं तु होइ पडिसेहो । सेसपयाण य गाहा पच्चक्खाणस्स भावंमि ।२४०।भा०

अमुकं घृतादि दीयतां मह्यं, इतरस्त्वाह-नास्ति मम तदिति, न तु दातुं नेच्छा, एष प्रतिषेधः, अयमपि वस्तुतः प्रत्याख्यानं, प्रतिषेध एव प्रत्याख्यानं प्रतिषेधप्रत्याख्यानं भावप्रत्याख्यानमाह-शेषपदानामागमनोआगमइत्यादीनां साक्षादिहानुक्तानां प्रत्याख्यानस्य सम्बन्धिनां गाथा कार्येति शेषः, इह गाथा प्रतिष्ठोच्यते, निश्चितिरित्यर्थः, 'भावंमि'त्ति भावप्रत्याख्याने ॥ २४० ॥ तदाह—

तं दुविहं सुअनोसुअ सुयं दुहा पुव्वमेव नोपुव्वं । पुव्वसुय नवमपुव्वं नोपुव्वसुयं इमं चेव ॥२४१॥(भा०)

तद्भावप्रत्याख्यानं द्विविधं-श्रुतप्रत्याख्यानं नोश्रुतप्रत्याख्यानं च, श्रुतं(तप्रत्याख्यानं)द्विविधं-पूर्वश्रुतप्रत्याख्यानं

नोपूर्वश्रुतप्रत्याख्यानं च, पूर्वश्रुतप्रत्याख्यानं नवमं पूर्वं प्रत्याख्यानपूर्वमित्यर्थः, नोपूर्वश्रुतप्रत्याख्यानमिदमेव प्रत्याख्यानाध्ययन, उपलक्षणत्वादन्यच्चातुरप्रत्याख्यानादि पूर्वबाह्यं ॥ २४१ ॥ नोश्रुतप्रत्याख्यानमाह—

नोसुअपच्चक्खाणं मूलगुणे चेव उत्तरगुणे य । मूले सव्वं देसं इत्तरियं आवकहियं च ॥२४२॥ (भा०)

श्रुतप्रत्याख्यानं न भवतीति नोश्रुतप्रत्याख्यानं, मूलगुणांश्चाधिकृत्योत्तरगुणाश्च, मूलगुणा एव प्राणातिपातादिनिवृत्तिरूपत्वात् प्रत्याख्यानं वर्त्तन्ते, उत्तरगुणा एवाशुद्धपिण्डनिवृत्तिरूपत्वात् प्रत्याख्यानं तद्विषयं वाऽनागतादि वा दशविधमुत्तरगुणप्रत्याख्यानं, 'मूले सव्वं देसं 'ति मूलगुणप्रत्याख्यानं द्विधा-सर्वमूलगुणप्रत्याख्यानं देशमूलगुणप्रत्याख्यानं च, सर्व मूलगुणप्रत्याख्यानं पञ्च महाव्रतानि, देशमूलगुणप्रत्याख्यानं पञ्चाणुव्रतानि, इदं चोपलक्षणं यत उत्तरगुणप्रत्याख्यानं द्विधैव-सर्वोत्तरगुणप्रत्याख्यानं देशोत्तरगुणप्रत्याख्यानं च, तत्र सर्वोत्तरगुणप्रत्याख्यानं दशविध 'अणागयमइक्कंतं' इत्याद्युपरिष्टाद्वक्ष्यामः, देशोत्तरगुणप्रत्याख्यानं सप्तविध-त्रीणि गुणव्रतानि चत्वारि शिक्षाव्रतानि, एतान्यप्यूर्ध्वं वक्ष्यामः । पुनरुत्तरगुण प्रत्याख्यानं द्विधा-इत्वरं साधूनां किञ्चिदभिग्रहादि, श्रावकाणा तु चत्वारि शिक्षाव्रतानि, यावत्कथिकं तु [साधूनां] नियन्त्रित, यत्कान्तारदुर्भिक्षादिपु न भज्यते, श्रावकाणां तु त्रीणि गुणव्रतानि ॥ २४२ ॥ स्वरूपतः सर्वमूलगुणप्रत्याख्यानमाह—

मूलगुणावि य दुविहा समणाणं चेव सावयाणं च । ते पुण विभज्जमाणा पंचविहा हुंति नायव्वा॥१॥(प्र०)

इयमन्यकर्त्तृकी ॥ १ ॥

पाणिवहमुसावाए अदत्तमेहुणपरिग्गहे चेव । समणाणं मूलगुणा तिविहंतिविहेण नायव्वा ॥२४३॥(भा०)

प्राणवधादिषु विषयभूतेषु श्रमणानां मूलगुणास्त्रिविधं त्रिविधेन योगत्रयकरणत्रयेण नेतव्याः, श्रमणाः प्राणातिपातादि-विरतास्त्रिविधं त्रिविधेनेत्यर्थः ॥ २४३ ॥ देशमूलप्रत्याख्यानं श्रावकाणां स्यादिति तद्धर्मविधिमेवौघत आह—

सावयधम्मस्स विहिं वुच्छामी धीरपुरिसपन्नत्तं । जं चरिऊण सुविहिया गिहिणोवि सुहाइं पावंति ।१५७०

साभिग्गहा य निरभिग्गहा य ओहेण सावया दुविहा । ते पुण विभज्जमाणा अट्ठविहा हुंति नायव्वा १५७१

साभिग्रहैः प्रतिज्ञाविशेषैर्वर्त्तन्ते इति साभिग्रहाः, निरभिग्रहाः केवलसम्यग्दर्शनिनः, ते पुनर्द्विधा अपि विभज्यमाना अभिग्रहविशेषेण निरूप्यमाणा अष्टविधाः स्युः ॥ १५७१ ॥ तथाह—

दुविहतिविहेण पढमो दुविहं दुविहेण बीयओ होइ । दुविहं एगविहेणं एगविहं चेव तिविहेणं ॥१५७२॥

इह योऽसौ कश्चनाभिग्रहं गृह्णाति स ह्येवं–' द्विविधं ' कृतकारितं ' त्रिविधेन ' मनसा वाचा कायेन, अयमर्थः–स्थूल-प्राणातिपातं न करोत्यात्मना न कारयत्यन्यैर्मनसा वाचा कायेनेति प्रथमः, अस्यानुमतिरप्रतिषिद्धा, अपत्यादिपरिग्रह-सद्भावात्, तत्तप्तिकरणे च तस्यानुमतिप्रसङ्गाद्, इतरथा सपरिग्रहापरिग्रहयोरविशेषेण प्रव्रजिताप्रव्रजितयोरभेदापत्तेः । यत्तु भगवत्यादौ त्रिविधं त्रिविधेनेत्यपि प्रत्याख्यानमुक्तं अगारिणस्तद्विशेषविषयं, तथाहि–यः प्रविव्रजिषुरेव प्रतिमां प्रतिपद्यते पुत्रादिसन्ततिपालनाय स एव त्रिविधं त्रिविधेनेति करोति, तथा विशेष्यं वा किञ्चिद्वस्तु स्वयम्भूरमणमत्स्यादिकं

तथा क्वचिदवस्थाविशेषे स्थूलप्राणातिपातादिकं चेत्यादि, न तु सर्वसावद्यव्यापारविरमणमधिकृत्य, बाहुल्येन तु द्विविधं त्रिविधेनेत्यादिभिरेव षड्भिर्विकल्पैः सर्वस्यागारिणः सर्वमेव प्रत्याख्यानं स्यात् । द्विविधं द्विविधेनेति द्वितीयः, तत्र यदा मनसा वाचा न करोति न कारयति तदा मनसा अभिसन्धिरहित एव [वाचापि हिंसकमब्रुवन्नेव कायेनैव दुश्चेष्टादिना करोत्यसञ्ज्ञिवत्, यदा तु मनसा कायेन च न करोति न कारयति तदा मनसा अभिसन्धिरहित एव] कायेन दुश्चेष्टितादि परिहरन्नेव अनाभोगाद्वाचैव हिंसकं ब्रूते । यदा तु वाचा कायेन च न करोति न कारयति तदा मनसैवाभिसन्धिमधिकृत्य करोति, एवं शेषविकल्पा अपि ज्ञेयाः ॥ १५७२ ॥

एगविहं दुविहेणं इक्किक्कविहेण छट्ठओ होइ । उत्तरगुण सत्तमओ अविरओ चेव अट्ठमओ ॥१५७३॥

प्रतिपन्नोत्तरगुणः सप्तमः, अविरतसम्यग्दृष्टिरष्टमः ॥ १५७३ ॥ एत एवाष्टौ भेदा विभज्यमाना द्वात्रिंशत्स्युः, कथमित्यत आह—

पणय चउक्कं च तिगं दुगं एगं च गिण्हइ वयाइं । अहवावि उत्तरगुणे अहवावि न गिण्हई किंचि॥१५७४॥

पञ्चाणुव्रतानि समुदितान्येव गृह्णाति कश्चित्तत्र उक्तलक्षणाः षड् भेदाः, तथाणुव्रतचतुष्टयं गृह्णात्यपरस्तत्रापि षडेव, यावदन्य एकमेवाणुव्रतं गृह्णाति तत्रापि षडेव, एवमनेकधा गृह्णाति व्रतानि, विचित्रत्वात् श्रावकधर्मस्य । एवमेते पञ्च षट्काखिंशत्, अथवोत्तरगुणान् गृह्णाति समुदितान्येवेत्येकत्रिंशत्, अथवा न गृह्णाति कानप्युत्तरगुणान् केवलं सम्यग्-

दृष्टिरेव इति द्वात्रिंशत् ॥ १५७४ ॥ इह मूलगुणोत्तरगुणानामाधारः सम्यक्त्वं स्यात्, तथा चाह—

निस्संकियनिक्कंखिय निव्वितिगिच्छा अमूढदिट्ठी य। वीरवयणंमि एए बत्तीसं सावया भणिया ॥१५७५॥

तथा एते चैव विभज्यमानाः सप्तचत्वारिंशदधिकं श्रमणोपासकशतं स्यात्, कथं ?, करणकारणानुमतीनां मनोवाक्कायैः सह संयोगे सत्येककद्विकत्रिकयोगे सप्त सप्तकाः स्युः, तथाहि—प्राणातिपातं न करोति मनसा १ वाचा २ कायेन ३ मनसा वाचा ४ मनसा कायेन ५ वाचा कायेन ६ मनसा वाचा कायेन च ७ एते करणेन १ एवं कारणेन २ अनुमत्या ३ करण कारणाभ्यां ४ करणानुमतिभ्यां ५ कारणानुमतिभ्यां ६ करणकारणानुमतिभिरपि ७, एवमेते सप्त सप्तकभङ्गकानामेकोनपञ्चाशद् भवन्ति, एकोनपञ्चाशत्तमोऽयं विकल्पः—प्राणातिपातं न करोति न कारयति कुर्वन्तमन्यं नानुजानाति मनसा वाचा कायेनेतिस्वरूपः प्रतिमाप्रतिपन्नस्य श्राद्धस्य स्यात्, एषां त्रिकालविषयता चाऽतीतस्य निन्दया साम्प्रतिकस्य संवरणेनानागतस्य प्रत्याख्यानेन, एवमेकोनपञ्चाशत्कालत्रयगुणिताः सप्तचत्वारिंशदधिकं शतं ॥ १५७५ ॥

सीयालं भंगसयं गिहिपच्चक्खाणभेयपरिमाणं । तं च विहिणा इमेणं भावेयव्वं पयत्तेणं ॥ १ ॥ तिन्नि तिया तिन्नि दुया तिन्निक्किका य हुंति जोगेसु । तिदुइक्कं तिदुइक्क तिदुएग चेव करणाइं ॥ २ ॥ पढमे लब्भइ एगो सेसेसु पएसु तिय तिय तियंति । दो नव तिय दो नवगा तिगुणिय सीयाल भंगसयं ॥ ३ ॥ स्थापना—

एतत्पुनः प्रश्वभिरणुव्रतैर्गुणितं सप्तशतानि पञ्चत्रिंशदधिकानि श्राद्धानां स्युः, अथवा अणुव्रतान्येव प्रतीत्य एककादिसंयोगद्वारेण प्रभूततरा भेदाः स्युः, तत्रेयमेकादिसंयोगपरिमाणप्रदर्शनपरा गाथा–

३	३	२	[illegible]	२	२	१	१	१
३	२	१	३	२	१	३	२	१
१	३	३	३	९	९	[illegible]	९	९

पंचण्हमणुवयाणं इक्कदुगतिगचउक्कपणगेहिं । पंचगदसदसपणइक्कगे य संजोग कायव्वा ॥१॥ (अन्यक०)

पञ्चानामणुव्रतानामेककेन चिन्त्यमानानां पञ्चसु गृहेषु पञ्चैव संयोगाः (भङ्गाः), द्विकेन चिन्त्यमानानां दश, कथं ?, प्रथमद्वितीयगृहेण १ प्रथमतृतीयगृहेण २ प्रथमचतुर्थगृहेण ३ इत्यादि चारणिकया ज्ञेयं, त्रिकेण चिन्त्यमानाना दश, चतुष्केन पञ्च, पञ्चकेन एक एव ॥ १ ॥ एतेषामागतफलगाथाः—

वयमिक्कगसंजोगाण हुंति पंचण्ह तीसई भंगा । दुगसंजोगाण दसण्ह तिन्नि सट्ठा सया हुंति ॥१॥ (प्र०)
तिगसंजोगाण दसण्ह भंगसयं इक्कवीसई सट्ठा । चउसंजोगाण पुणो चउसट्ठिसयाणिऽसीयाणि॥२॥प्र०
सत्तुत्तरिं सयाइं छसत्तराइं च पंचसंजोए । उत्तरगुण अविरयमेलियाण जाणाहि सव्वग्गं ॥ ३ ॥ (प्र०)

पञ्चानामणुव्रतानामेककयोगात् पञ्च, एकैकस्मिंश्चैककसंयोगे द्विविधत्रिविधादयः षड् भङ्गाः, एते सर्वेऽपि मिलिताः ३०, ततश्च यदुक्तं–' वयमिक्कगसयोगाण हुंति पंचण्ह तीसई भंग 'त्ति तद् भावितं, तथा एकैकस्मिन् द्विकसंयोगे षट्त्रिंशद्

भङ्गाः, तथाहि-आद्यव्रतसम्बन्धी आद्याऽवस्थितो मृषावादसत्कान् षड् भङ्गकान् लभते, एवमाद्यव्रतसम्बन्धी द्वितीयोऽपि, ततश्च षट् षड्भिर्गुणिताः षट्त्रिंशत्, दश चात्र द्विकसंयोगाः, अतः षट्त्रिंशद् दशभिर्गुण्यन्ते, जातानि ३६०, ततश्च यदुक्तं- ' दुगसंजोगाण दसण्ह तिन्नि सट्ठा सया हुंति ' तद् भावितं । एवं त्रिकसंयोगादिष्वपि भङ्गसङ्ख्याभावना कार्या । ' उत्तरगुण अविरयमेलियाण जाणाहि सव्वग्गं 'ति प्रतिपन्नोत्तरगुणाविरतलक्षणभेदद्वयमीलितानामन्तरोक्तानां त्रिंशत्प्रभृतीनां भङ्गानां सर्वाग्रमाह—

सोलस चेव सहस्सा अट्ठसया चेव होंति अट्ठहिया । एसो उवासगाणं वयगहणविही समासेणं॥४॥(प्र०)

तत्र यस्मात् श्रावकधर्मस्य मूलं सम्यक्त्वं तस्माद् तद्गतमेव विधिमभिधातुकाम आह—

तत्थ समणोवासओ पुव्वामेव मिच्छत्ताओ पडिक्कमइ, संमत्तं उवसंपज्जइ, नो से कप्पइ अज्जप्पभिई अन्नउत्थिए वा अन्नउत्थिअदेवयाणि वा अन्नउत्थियपरिग्गहियाणि अरिहंतचेइआणि वा वंदित्तए वा नमंसित्तए वा पुव्विं अणालत्तएणं आलवित्तए वा संलवित्तए वा तेसिं असणं वा पाणं वा खाइमं वा साइमं वा दाउं वा अणुप्पयाउं वा, नन्नत्थ रायाभिओगेणं गणाभिओगेणं बलाभिओगेणं देवयाभिओगेणं गुरुनिग्गहेणं वित्तीकंतारेणं, से य संमत्ते पसत्थसंमत्तमोहनीय-

कम्माणुवेयणोवसमखयसमुत्थे पसमसंवेगाइलिंगे सुहे आयपरिणामे पन्नत्ते, सम्मत्तस्स समणोवासएणं इमे पंच अइयारा जाणिअवा न समायरियवा, तंजहा—संका कंखा वितिगिच्छा परपासंडपसंसा परपासंडसंथवे ॥ (सूत्रम्)

तत्त्वार्थश्रद्धानरूपमुपसम्पद्यते, सम्यक्त्वमुपसंपन्नस्य सतो न से तस्य कल्पते—युज्यते 'अद्यप्रभृति' सम्यक्त्वप्रतिपत्तिकालादारभ्य अन्यतीर्थिकान्—चरकपरिव्राजकभिक्षुभौतादीन् अन्यतीर्थिकदेवतानि वा रुद्रविष्णुसुगतादीनि, अन्यतीर्थिकपरिगृहीतानि वा [अर्हत्] चैत्यानि—अर्हत्प्रतिमालक्षणानि यथा भौतपरिगृहीतानि वीररु(रभ)द्रमहाकालादीनि बोटिकपरिगृहीतानि वा वन्दितुं वा नमस्कर्त्तुं वा, तत्र वन्दनं—अभिवादनं नमस्करणं—प्रणामपूर्वकं प्रशस्तध्वनिभिर्गुणोत्कीर्त्तनं, अन्येपां तद्भक्तानां मिथ्यात्वादिस्थिरीकरणात्, तथा पूर्वमनालप्तेन सतान्यतीर्थिकैस्तानेवालप्तुं वा संलप्तुं वा, तत्र सकृत्सभाषणमालपनं पौनःपुन्येन संलपनं, को दोपः स्यात् ?, ते तप्ततरायोगोलकल्पा आसनादिक्रियायां नियुक्ता भवन्ति तत्प्रत्ययः कर्म्मबन्ध इत्यादि, प्रथमालप्तेन त्वसम्भ्रमं लोकोपवादभीरुतया कीदृशस्त्वमित्यादि वाच्यं । तथा तेपामन्यतीर्थिकानां [अशन पानं खादिमं स्वादिमं वा] दातुं वाऽनुप्रदातुं वा न कल्पते, तत्र सकृद्दानं पुनः पुनरनुप्रदानं, किं सर्वथैव न कल्पते इति ?, न, अन्यत्र राजाभियोगेनेति—राजाभियोगं मुक्त्वा, अयमर्थः—राजाभियोगादिना ददद्पि न धर्म्ममतिक्रामति, करुणागोचर पुनरापन्नानामेतेपामनुकम्पया दद्यादपि । अतिचारा मिथ्यात्वमोहनीयोदयादात्मनोऽशुभ-

परिणामविशेषा ज्ञातव्याः ज्ञपरिज्ञया न समाचरितव्याः नासेव्याः । शङ्का—अर्हत्प्रणीतेषु पदार्थेषु संशयः, सा द्विभेदा—देशशङ्का सर्वशङ्का च, आद्या यथा किमयमात्माऽसङ्ख्येयप्रदेशात्मकोऽथ निष्प्रदेशः स्यादिति, सर्वशङ्का सकलास्तिकायत्रा(जा)त एव किमेवं स्यान्नैवमिति । काङ्क्षा सुगतादिप्रणीतदर्शनेषु ग्राहोऽभिलाप इत्यर्थः, इयमपि देशसर्वभेदाभ्यां वाच्या, अथवा ऐहिकामुष्मिकफलानि काङ्क्षति । विचिकित्सा मतिविभ्रमः, युक्त्यागमोपपन्नेऽप्यर्थे फलं प्रति सम्मोहः, किमस्य महतस्तपःक्लेशायासस्य आयत्यां मम फलसम्पद्भविष्यति किं वा नेति । शङ्का हि सकलाऽसकलपदार्थभाक्त्वेन द्रव्यगुणविषया इयं तु क्रियाविषयैव, अथवा विद्वांसः—साधवस्तेषां जुगुप्सा—निन्दा विद्वज्जुगुप्सा । परपाखण्डानां—सर्वज्ञप्रणीतपाखण्डव्यतिरिक्तानां प्रशंसा—स्तुतिः, परपाखण्डैः सह संस्तवः [—परिचयः] परपाखण्डसंस्तवः संवसनभोजनालापादिलक्षणोऽयमपि न समाचरणीयः, तथाहि—एकत्र संवासे तत्प्रक्रियाश्रवणात्तत्क्रियादर्शनाच्च तस्याऽसकृदभ्यस्तत्वादवाप्त तत्सहकारिकारणान्मिथ्यात्वोदयतो दृष्टिभेदः स्यादतोऽतिचारहेतुत्वान्न समाचरणीयः । एवं शङ्कादिरहितः सम्यक्त्ववान् शेषाणुव्रतादिप्रतिपत्तियोग्यः स्यात्, तानि चाणुव्रतानि स्वरूपत आह—

थूलगपाणाइवायं समणोवासओ पच्चक्खाइ, से पाणाइवाए दुविहे पन्नत्ते, तंजहा—संकप्पओ आरंभओ अ, तत्थ समणोवासओ संकप्पओ जावज्जीवाए पच्चक्खाइ, नो आरंभओ, थूलगपाणाइवायवेरमणस्स समणोवासगेणं पंच अइयारा जाणिअव्वा, तंजहा—बंधे वहे छविच्छेए अइभारे

भत्तपाणवुच्छेए ॥ १ ॥ (सूत्रम्)

स्थूलाः-द्वीन्द्रियादयः, स्थूला एव स्थूलकास्तेषां प्राणाः-इन्द्रियादयस्तेषामतिपातस्तं प्रत्याख्याति, तस्माद्विरमति । स च प्राणातिपातो द्विविधः-सङ्कल्पज आरम्भजश्च, सङ्कल्पजो मनसः सङ्कल्पाद् द्वीन्द्रियादिप्राणिन मांसास्थिचर्मनखवालदन्ताद्यर्थं व्यापादयतः स्यात्, आरम्भाज्जात आरम्भजस्तत्रारम्भो हलदन्तालादिखननसूना(नलवन)प्रकारस्तस्मात् शङ्खचन्दणकपीपिलिकादिसङ्घट्टनपरितापापद्रावणलक्षणः, तत्र सङ्कल्पतो यावज्जीवयैव प्रत्याख्याति न आरम्भज, तस्यावश्यंतया सम्भवात् । आह-एवं सङ्कल्पतः किं सूक्ष्मप्राणातिपातमपि न प्रत्याख्याति ?, उच्यते, एकेन्द्रियाः प्रायो दुष्परिहारा गृहिणा सङ्कल्प्यैव सचित्तपृथिव्यादिपरिभोगात्, सम्बन्धः(बन्धः)-संयमनं रज्जुदामा(मनका)दिभिः १, वधस्ताडनं कसादिभिः २, छविः-शरीरं तस्य च्छेदः-पाटनं करपत्रादिभिः ३, अतिभारः प्रभूतस्य पूगफलादेः स्कन्धपृष्ठ्यादिषु आरोपणं ४, भक्तपानस्य व्यवच्छेदोऽदानं ५, एतान् समाचरन्नतिचरति प्रथमाणुव्रतं ॥ १ ॥

थूलगमुसावायं समणोवासओ पच्चक्खाइ, से य मुसावाए पंचविहे पन्नत्ते, तंजहा-कन्नालीए गवालीए भोमालीए नासावहारे कूडसक्खिज्जे । थूलगमुसावायवेरमणस्स समणोवासएणं इमे पंच अइयारा जाणियव्वा, तंजहा-सहस्सब्भक्खाणे रहस्सब्भक्खाणे सदारमंतभेए मोसुवएसे कूडलेहकरणे ॥ २ ॥ (सूत्रम्)

मृषावादोऽपि द्विविधः–स्थूलः सूक्ष्मश्च, तत्र परिस्थूलकमृषावादं प्रत्याख्याति, कन्याविषयमलीकं कन्यालीकं, अभिन्नकन्यकामेव [भिन्न]कन्यकां वक्ति विपर्ययो वा, एवं गवालीकमल्पक्षीरामेव गां बहुक्षीरां वक्ति विपर्ययो वा, भूम्यलीकं परसत्कामेव भुवमात्मसत्कां वक्ति इत्यादि, न्यासः–रूपकाद्यर्पणं तस्यापहरणं न्यासापहारः, ननु अदत्तादानरूपत्वादस्य कथं मृषावादत्वं ?, उच्यते, अपलपतो मृषावादः, कूटसाक्षित्वं लञ्चामत्सराद्यभिभूतः प्रमाणीकृतः सन् कूटं वक्ति, अविधवाद्यनृतस्यात्रैवान्तर्भावो ज्ञेयः, सहसा–अनालोच्याभ्याख्यानं सहसाभ्याख्यानं अभिशंसनं–असदध्यारोपणं, चौरस्त्वं पारदारिको वेत्यादि १, रहस्याभ्याख्यानं–एकान्ते मन्त्रयमाणान् [दृष्ट्वा] वक्ति–एते हि इदं चेदं च राजापकारित्वादि मन्त्रयन्ति २, स्वदारमन्त्रभेदः–स्वकलत्रविश्रब्धविशिष्टावस्थामन्त्रितान्यकथनं ३, मृषोपदेशोऽसदुपदेशः ४, कूटलेखकरणं–अन्यमुद्राक्षरबिम्बस्वरूपलेखकरणं ५ । एतानि समाचरन्नतिचरति द्वितीयाणुव्रतं ॥ २ ॥

थूलगअदत्तादाणं समणोवासओ पच्चक्खाइ, से अदिन्नादाणे दुविहे पन्नत्ते, तंजहा–सचित्तादत्तादाणे अचित्तादत्तादाणे य । थूलादत्तादाणवेरमणस्स समणोवासएणं इमे पंच अइयारा जाणियवा, तंजहा–तेनाहडे तक्करपओगे विरुद्धरज्जाइक्कमणे कूडतुलकूडमाणे तप्पडिरूवगववहारे ॥ ३ ॥ (सूत्रम्)

अदत्तादानं द्विविधं–स्थूलं सूक्ष्मं च, तत्र परिस्थूलविषयं चौर्यारोपणहेतुत्वेन प्रसिद्धं, अतिदुष्टाध्यवसायपूर्वकं स्थूलं,

विपरीतमितरत् । सेशब्दस्तच्छब्दार्थः, तथा(चा)दत्तादानं द्विविधं–सचित्तं–द्विपदादिलक्षणं वस्तु तस्य क्षेत्रादौ सुन्यस्त-दुर्न्यस्तविस्मृतस्य स्वामिनाऽदत्तस्य चौर्यबुद्ध्या आदानं सचित्तादत्तादानं, एवमचित्तादानमपि, नवरं अचित्तं वस्तु कनकादि । स्तेनाश्चौरास्तैराहृतं–आनीतं किञ्चित्कुङ्कुमादि देशान्तराद् स्तेनाहृतं तत्समर्घमिति लोभाद् गृह्णतोऽतिचारः १, तस्कराणां प्रयोगो हरणक्रियायां प्रेरणमभ्यनुज्ञानं(नुज्ञा)तस्करप्रयोगः, तान् प्रयुङ्क्ते–हरत यूयमिति २, विरुद्धनृपयो राज्यं विरुद्धराज्यं तस्याऽतिक्रमः–अतिलङ्घनं विरुद्धराज्यातिक्रमः न हि ताभ्यां तत्र तदाऽतिक्रमोऽनुज्ञातः ३, 'कूटतुलाकूटमानं' तुला प्रतीता मानं–कुडवादि, कूटत्वं–न्यूनया ददतोऽधिकया गृह्णतोऽतिचारः ४, तेन–अधिकृतेन प्रतिरूपकं–सदृशं तत्प्रतिरूपकं, तस्य व्यवहारः–प्रक्षेपस्तत्प्रतिरूपकव्यवहारः, यद्यत्र घटते व्रीह्यादिघृतादिषु पलञ्जीवसादि तस्य प्रक्षेप इत्यर्थः, तत्प्रति-रूपकेण वा वसादिना व्यवहरणं तत्प्रतिरूपकव्यवहारः ५ ॥ ३ ॥

परदारगमणं समणोवासओ पच्चक्खाति सदारसंतोषं वा पडिवज्जइ, से य परदारगमणे दुविहे पन्नत्ते, तंजहा–ओरालियपरदारगमणे वेउव्वियपरदारगमणे, सरदारसंतोसस्स समणो-वासएणं इमे पंच अइयारा जाणियव्वा, तंजहा–अपरिगहियागमणे इत्तरियपरिग्गहियागमणे अणंगकीडा परवीवाहकरणे कामभोगतिव्वाभिलाषे ॥ ४ ॥ (सूत्रम्)

आत्मव्यतिरिक्तो योऽन्यः स परः तस्य दाराः–कलत्रं परदारास्तत्र गमनं परदारगमनं, गमनमासेवनरूपतया ज्ञेयं,

स्वदाराः-स्वकलत्रं तैस्तेषु वा [सन्तोषः तं वा] प्रतिपद्यते, अयमर्थः-परदारगमनप्रत्याख्याता यास्वेव परदारशब्दः प्रवर्त्तते ताभ्य एव निवर्त्तते, स्वदारसन्तुष्टस्तु एकानेकस्वदारव्यतिरिक्ताभ्यः सर्वाभ्य एव । औदारिकपरदारगमनं-स्त्र्यादिगमनं, वैक्रियपरदारगमनं-देवाङ्गनागमनं । इत्वरकालपरिगृहीता कालशब्दलोपादित्वरपरिगृहीता, भाटिप्रदानेन कियन्तमपि कालं दिनमासादिकं स्ववशीकृता तस्यां गमनं-मैथुनासेवनं इत्वरपरिगृहीतागमनं १, अपरिगृहीता वेश्या अन्यसत्काऽगृहीतभाटिः कुलाङ्गना वाऽनाथा तस्यां गमनं २, अनङ्गानि-कुचकक्षोरुवदनादीनि तेषु क्रीडनमनङ्गक्रीडा अथवाऽनङ्गक्रीडा समाप्तप्रयोजनस्यापि स्वलिङ्गेन आहार्यैः काष्ठपुस्तकफलमृत्तिकाचर्म्मादिघटितप्रजननैर्योषिद्वाच्यप्रदेशासेवनं ३, स्वापत्यव्यतिरिक्तमन्यापत्यं परशब्देनोच्यते, तस्य कन्याफललिप्सया स्नेहसम्बन्धेन वा विवाहकरणं परविवाहकरणं ४, कामाः-शब्दरूपगन्धाः भोगाः-रसस्पर्शास्तेषु तीव्राभिलाषोऽत्यन्ततदध्यवसायित्वं, तस्माच्चेदं करोति-समाप्तरतोऽपि योषिन्मुखोपस्थकर्ण्णकक्षान्तरेष्वतृप्ततया प्रक्षिप्य लिङ्गं मृत इवास्ते महतीवेलां, दन्तनखादिभिर्वा मदनमुत्तेजयति, वाजीकरणानि चोपयुङ्क्ते, योषिदवाच्यदेशं वा मृद्नाति ४ । एतानि इत्वरपरिगृहीतादीनि समाचरन्नतिचरति चतुर्थाणुव्रतं । तत्राद्यौ द्वौ अतिचारौ स्वदारसन्तुष्टस्य स्यातां नो परदारविवर्जकस्य, शेषा द्वयोरपि ॥ ४ ॥

अपरिमियपरिग्गहं समणोवासओ पच्चक्खाइ इच्छापरिमाणं उवसंपज्जइ, से परिग्गहे दुविहे पन्नत्ते, तंजहा-सचित्तपरिग्गहे अचित्तपरिग्गहे य, इच्छापरिमाणस्स समणोवासएणं इमे पंच

अइयारा जाणियव्वा, तंजहा—धणधन्नपमाणाइक्कमे, खित्तवत्थुपमाणाइक्कमे हिरन्नसुवन्नपमाणाइक्कमे दुपयचउप्पयपमाणाइक्कमे कुवियपमाणाइक्कमे ॥ ५ ॥ (सूत्रम्)

अपरिमितः अपरिमाणः स चासौ परिग्रहश्च अपरिमितपरिग्रहस्तं, इच्छापरिमाणं, सचित्तादिगोचरेच्छापरिमाणं। क्षेत्रवास्तुप्रमाणातिचारः, तत्र शस्योत्पत्तिभूमिः [क्षेत्रं] तच्च सेतुकेतुभेदाद् द्विविधं, तत्र सेतुक्षेत्रमरघट्टादिसेच्यं, केतुक्षेत्र तु आकाशपतितोदकनिष्पाद्यं, वास्तु—अगार, तदपि त्रिविधं—खातं १ उच्छ्रितं २ खातोच्छ्रित च ३। तत्र खातं—भूमिगृहादि उच्छ्रितं—प्रासादादि खातोच्छ्रित भूमिगृहस्योपरि प्रासादः, एतेषां क्षेत्रवास्तूनां प्रमाणातिक्रमः, प्रत्याख्यानकालगृहीतप्रमाणोल्लङ्घनं १, हिरण्यसुवर्णप्रमाणातिक्रमः, तत्र हिरण्य रजतं घटितमघटितं चा, एवं सुवर्णमपि, एतद्ग्रहणाचेन्द्रनीलमरकताद्युपलग्रहः २, धनधान्यप्रमाणातिक्रमः, तत्र धनं—गुडखण्डादि गोमहिष्याद्यन्ये, धान्यं—व्रीह्यादि ३, द्विपदचतुष्पदप्रमाणातिक्रमः, तत्र द्विपदानि—दासीदासमयूरादीनि, चतुष्पदानि—हस्त्यादीनि ४, कुप्यप्रमाणातिक्रमः, तत्र कुप्य-आसनशयनभण्डककरोटकलोहाद्युपस्करजातं, एतद्ग्रहणाच्च वस्त्रकम्बलपरिग्रहः ५। अणुव्रताना परिपालनाय भावनाभूतानि गुणव्रतान्युच्यन्ते—

दिसिव्वए तिविहे पन्नत्ते—उड्ढदिसिव्वए अहोदिसिव्वए तिरियादिसिव्वए, दिसिव्वयस्स समणोवासएणं इमे पंच अइयारा जाणियव्वा, तं जहा—उड्ढदिसिपमाणाइक्कमे अहोदिसिपमाणाइक्कमे

तिरियदिसिपमाइक्कमे खित्तवुड्ढी सइअंतरद्धा ॥ ६ ॥ (सूत्रम्)

ऊर्ध्वदिग्व्रतमेतावतीदिगूर्ध्वं पर्वताद्यारोहणादवगानीया, एतावती पूर्वेणावगाहनीया एतावती दक्षिणेनेत्यादि न परत इत्येवम्भूतं, अस्मिंश्च सत्यगृहीतक्षेत्राद्बहिः स्थावरजङ्गमप्राणिगोचरोदण्डः स्यात्त्यक्त इति गुणः । क्षेत्रवृद्धिरिति एकतो योजनशतं गृहीतमन्यतो दशयोजनान्यभिगृहीतानि तस्यां दिशि समुत्पन्ने कार्ये योजनशतमध्यादपनीयान्यानि दशयोजनानि तत्रैव स्वबुद्ध्या प्रक्षिपति । स्मृतेरन्तर्द्धानं-भ्रंशः स्मृत्यन्तर्द्धानं, किं मया परिगृहीतं कया मर्यादया व्रतमित्येवमननुस्मरणं, स्मृतिमूलं नियमानुष्ठानं, तद्भ्रंशे नियमत एव नियमभ्रंश इत्यतिचारः ॥ ६ ॥

उवभोगपरिभोगवए दुविहे पन्नत्ते, तं जहा—भोअणओ कम्मओ अ । भोअणओ समणोवासएणं इमे पंच अइयारा जाणियव्वा, तं जहा—सचित्ताहारे सचित्तपडिवद्धाहारे अप्पलिओसहिभक्खणया तुच्छोसहिभक्खणया दुप्पलिओसहिभक्खणया । कम्मओ णं समणोवासएणं इमाइं पन्नरस कम्मादाणाइं जाणियव्वा, तं जहा—इंगालकम्मे वणकम्मे साडीकम्मे फोडीकम्मे, दंतवाणिज्जे लक्खवाणिज्जे रसवाणिज्जे केसवाणिज्जे विसवाणिज्जे, जंतपीलणकम्मे निल्लंछणकम्मे दवग्गिदावणया सरदहतलायसोसणया असईपोसणया ॥ ७ ॥ (सूत्रम्)

उपशब्दः सकृदर्थेऽन्तर्भोगे वाऽत उपभोग आहारादेः, परिशब्द आवृत्तौ पुनःपुनरित्यर्थः बहिर्भोगे वा, ततः परिभोगो वस्त्रादेः, एतद्विषयं व्रतमुपभोगपरिभोगव्रतं। तत्र भोजनत उत्सर्गेण निरवद्याहारभोजिना भवितव्यं, अपवादतोऽनन्तकाय-बहुबीजविवर्जकेन, कर्म्मतोऽपि निरवद्यकर्म्मानुष्ठानयुक्तेन, अशक्तौ अत्यन्तसावद्यत्यागिना। भोजनतो यद्व्रतमुक्तं तदाश्रित्य सचित्तश्चासावाहारश्च सचित्ताहारः १, सचित्तप्रतिबद्धाहारो यथा वृक्षप्रतिबद्धो गुन्दादि पक्वफलानि वा २, अपक्वौषधिभक्षणत्वं प्रतीतं, सचित्तसंमिश्राहार इति पाठान्तरं ३, दुष्पक्वौषधिभक्षणता दुष्पक्वाः—अस्विन्ना इत्यर्थः ४, तुच्छौषधिभक्षणता तुच्छा असारा मुद्गफलीप्रभृतयः, अत्र महती विराधनाऽल्पा च तुष्टिः ५, कर्म्मादानानीत्यसावद्यजीवनोपायाभावेऽपि तेषामुत्कटज्ञानावरणीयादिकर्महेतुत्वादादानानि, अङ्गारकरणविक्रयक्रिया १, एवं वन २ शकट ३ भाटक ४ स्फोटन ५ दन्त ६ विष ७ लाक्षा ८ रस ९ केशवाणिज्यं १० यन्त्रपीडन ११ निर्लाञ्छन १२ दवदापन १३ सरोह्रदादिशोषण १४ असतीपोषणेष्वपि १५ द्रष्टव्यं, प्रदर्शनं चैतद् बहुसावद्यानां कर्मणामेवंजातीयानां, न पुनः परिगणनं ॥ ७ ॥

अणत्थदंडे चउव्विहे पन्नत्ते, तं जहा—अवज्झाणायरिए पमत्तायरिए हिंसप्पयाणे पावकम्मोवएसे, अणत्थदंडवेरमणस्स समणोवासएणं इमे पंच अइयारा जाणियव्वा, तं जहा—कंदप्पे कुक्कुइए मोहरिए संजुत्ताहिगरणे उवभोगपरिभोगाइरेगे ॥ ८ ॥ (सूत्रम्)

अर्थः—प्रयोजनं, गृहस्थस्य क्षेत्रवास्तुधनधान्यशरीरपरिजनादिविषयं तदर्थ आरम्भो—भूतोपमर्दोऽर्थदण्डः, अनर्थः—

अप्रयोजनं भूतानि दण्डयति विनाशयतीत्यनर्थदण्डः, अपध्यानेन आचरितोऽपध्यानाचरितः, अप्रशस्तं ध्यानमपध्यानं, प्रमादेनाचरितः प्रमादाचरितः, प्रमादस्तु मद्यादिः, हिंसाप्रदानं हिंसाहेतुत्वादायुधानलविषादयोऽपि हिंसा उच्यन्ते, तेषां प्रदानमन्यस्मै क्रोधाभिभूतायानभिभूताय वा न कल्पते, प्रदाने त्वनर्थदण्डः, पापकर्मोपदेशो यथा 'कृष्यादि कुरु' इत्यादि। कन्दर्पो रागोद्रेकात्प्रहासमिश्रं मोहोद्दीपकं नर्म १, कौकुच्यमनेकप्रकारा मुखाक्षिप्रभृतिविकारपूर्विका परिहासादिजनिका भाण्डादीनामिव विडम्बनक्रिया २, मौखर्यं धार्ष्ट्यप्रायमसत्यमसम्बद्धप्रलापित्वं ३, संयुक्ताधिकरणं, [अधिकरणं]वास्तूदुखलशिलापुत्रकादि, संयुक्तमर्थक्रियाकरणक्षमं, संयुक्तं च तदधिकरणं च संयुक्ताधिकरण ४, उपभोगपरिभोगयोरतिरेकः-आधिक्यं ५ ॥ ८ ॥

सामाइअं नाम सावज्जजोगवरिवज्जणं निरवज्जजोगपडिसेवणं च। सिक्खा दुविहा गाहा उववायठिई गई कसाया य। बंधंता वेयंता पडिवज्जाइक्कमे पंच ॥ १ ॥ सामाइअंमि उ कए समणो इव सावओ हवइ जम्हा। एएणं कारणेणं बहुसो सामाइयं कुज्जा ॥ २ ॥ सवंति भाणिऊणं विरई खलु जस्स सविया नत्थि। सो सवविरइवाई चुक्कइ देसं च सवं च ॥ ३ ॥ सामाइयस्स समणोवासएणं इमे पंच अइयारा जाणियवा, तं जहा—मणदुप्पणिहाणे वइदुप्पणिहाणे

कायदुप्पणिहाणे सामाइयस्स सइअकरणया सामाइयस्स अणवट्ठियस्स करणया ॥ ९ ॥ (सूत्रम्)

सावद्ययोग परिवर्जनं कालावधिनेति गम्यते, निरवद्ययोगप्रतिसेवनं च। आह–सावद्ययोगपरिवर्जनादिरूपत्वात्सामायिकस्य कृतसामायिकश्रावको वस्तुतः साधुरेव, स कस्मादित्वरं सर्वसावद्य योगप्रत्याख्यानमेव न करोति त्रिविधं त्रिविधेनेति ?, उच्यते, सर्वसावद्ययोगप्रत्याख्यानस्यागारिणोऽसम्भवाम् आरम्भेष्वनुमतेरव्यवच्छिन्नत्वात्, कनकादिषु चात्मीयपरिग्रहानिवृत्तेः, साधुश्रावकयोश्च प्रपञ्चेन भेदस्तथाचाह—

सिक्खा दुविहा गाहा उववाताठिता गती कसाया य। बंधंता वेदेन्ता पडिवज्जाइक्कमे पंच ॥ १ ॥

शिक्षाकृतः साधुश्रावकयोर्महान् विशेषः, सा च शिक्षा द्विविधा–आसेवनशिक्षा ग्रहणशिक्षा च, शिक्षा–अभ्यासः, तत्रासेवनाशिक्षामधिकृत्य सम्पूर्णामेव चक्रवालसामाचारीं सदा पालयति साधुः, श्रावकस्तु न तत्कालमपि सम्पूर्णामपरिज्ञानादसम्भवाच्च, ग्रहणशिक्षां त्वधिकृत्य साधुः सूत्रतोऽर्थतश्च जघन्येनाष्टौ प्रवचनमातर उत्कृष्टतस्तु बिन्दुसारपर्यन्त गृह्णाति. श्रावकः सूत्रतोऽर्थतश्च जघन्येन तावत्प्रवचनमातरः उत्कृष्टतः षड्जीवनिकायां यावदुभयतोऽर्थतस्तु पिण्डैषणां यावत्, सूत्रप्रामाण्याच्च विशेषस्तथा चोक्तं–" सामा० " सामायिके एव कृते श्रमण इव श्रावकः स्याद्यस्मात्, अत्र श्रमण इव चोक्तो न तु श्रमण एव, यथा समुद्र इव तडागो न तु समुद्र एव, तथा उपपातः विशेषकः, साधुः सर्वार्थसिद्धावु(द्वे उ)त्पद्यते श्रावकस्त्वच्युते परमोपपातेन जघन्येन तु द्वावपि सौधर्मे एव। स्थितिः भेदिका, साधोरुत्कृष्टा त्रयस्त्रिंशत्साग-

शाणि जघन्या तु पल्योपमपृथक्त्वं, श्रावकस्योत्कृष्टा द्वाविंशतिरतराणि, जघन्या तु पल्यं । गतिर्भेदिका साधुः सुरगतौ मोक्षे च श्रावकश्चतसृष्वपि[1] । कषायाश्च विशेषकाः साधुः कषायोदयमाश्रित्य सञ्ज्वलनापेक्षया चतुस्त्रिद्व्येककषायोदयवान् अकषायोऽपि स्यात् छद्मस्थवीतरागादिः, श्रावकस्तु द्वादशकषायोदयवानविरतः अष्टकषायोदयवांश्च विरताविरतः । बन्धश्च भेदकः साधुः मूलप्रकृत्यपेक्षयाऽष्टविधबन्धको वा सप्तविधबन्धको वा षड्विधबन्धको वा एकविधबन्धको वा अबन्धको वा, श्रावकस्त्वष्टविधबन्धको वा सप्तविधबन्धको वा । वेदनाकृतो भेदः, साधुरष्टानां सप्तानां चतसृणां वा प्रकृतीनां वेदकः, श्रावकस्तु नियमादष्टानां । प्रतिपत्तिकृतो विशेषः, साधुः पञ्च महाव्रतानि, श्रावकस्त्वेकमणुव्रतमित्यादि, अथवा साधुः सकृत्सामायिकं प्रतिपद्य सर्वकालं धारयति, श्रावकस्तु पुनः पुनः प्रतिपद्यते । अतिक्रमो विशेषकः, साधोरेकव्रतातिक्रमे पञ्चव्रतातिक्रमः, श्रावकस्य पुनरेकस्यैव, पाठान्तरं वा, किञ्च इतरश्च सर्वशब्दं, प्रयुङ्क्ते, मा भूद्देशविरतेरप्यभावः, आह च–' सव्वं ' विरतिर्यस्य ' सर्वा ' निरवशेषा नास्ति अनुमतेर्नित्यप्रवृत्तत्वात् । सामायिकस्य सम्बन्धिनी या स्मृतिरुपयोगलक्षणा तस्या अकरणं, अयमर्थः–प्रमादान्नैव स्मरत्यस्यां वेलायां मया सामायिकं कर्त्तव्यं कृतं न कृतमिति वा, सामायिकस्यानवस्थितमल्पकालं करणानन्तरमेव वा त्यजति, यथाकथञ्चिदव्यवस्थितं करोति ॥ ९ ॥

दिसिव्वयगहियस्स दिसापरिमाणस्स पइदिणं परिमाणकरणं देसावगासियं, देसावगासियस्स

[1] व्यवहारतः साधु. पञ्चस्वपि गच्छति, तथा च कुरटोत्कुरटौ नरक गतौ (आव. हारि. वृत्तिः पत्र ८३३/२) ।

समणोवासएणं इमे पंच अइयारा जाणियव्वा, तं जहा—आणवणप्पओगे पेसवणप्पओगे सद्दाणु-वाए रुवाणुवाए बाहिया पुग्गलपक्खेवे ॥ १० ॥ (सूत्रम्)

दिग्व्रतगृहीतस्य दिशापरिमाणस्य दीर्घकालिकस्य यावज्जीवसंवत्सरचतुर्मासादिभेदस्य प्रतिदिनमित्येतच्च प्रहरमुहू-र्त्ताद्युपलक्षणं प्रमाणकरणं—दिनादिगमनयोग्यदेशस्थापनं प्रतिदिनप्रमाणकरणं देशावकाशिकं, दिग्व्रतगृहीतदिक्परिमाण-स्यैकदेशो देशस्तस्मिन्नवकाशो गमनादिचेष्टास्थानं देशावकाशस्तेन निर्वृत्तं देशावकाशिकं, एतच्चाणुव्रतादिगृहीत-दीर्घतरकालावधिविरतेरपि प्रतिदिनसङ्क्षेपोपलक्षणं । आनयनप्रयोगः—विशिष्टे देशावकाशिके(देशादिके)भूदेशाभिग्रहे परतः स्वयं गमनायोग्याद्यदन्यः सचित्तादिद्रव्यानयने प्रयुज्यते सन्देशकप्रदानादिना त्वयेदमानेयमित्यानयनप्रयोगः १, बलाद्विनियोज्यः प्रेष्यस्तस्य प्रयोगो यथाभिगृहीतप्रवी(परवि)चारदेशव्यतिक्रमभयात्त्वयावश्यमेव गत्वा मम गवाद्यानेय-मिदं वा तत्र कर्त्तव्यमिति प्रेष्यप्रयोगः २, स्वगृहवृत्तिप्राकारकादिव्यवच्छिन्नभूप्रदेशाभिग्रहे बहिः प्रयोजनोत्पत्तौ वृत्त्यादि-प्रत्यासन्नवर्त्तिनो बुद्धिपूर्वकं क्षुत्कासितादिशब्दकरणेन बोधयतः शब्दानुपातः ३, एवं शब्दमनुच्चारयत एव परेषां समी-पानयनार्थं स्वशरीररूपप्रदर्शनं रूपानुपातः ४, एवं बहिः परेषां बोधनाय लेष्टादिक्षेपः पुद्गलप्रक्षेपः ५ ॥ १० ॥

पोसहोववासे चउव्विहे पन्नत्ते, तं जहा—आहारपोसहे सरीरसक्कारपोसहे बंभचेरपोसहे अव्वा-वारपोसहे, पोसहोववासस्स समणोवासएणं इमे पंच अइयारा जाणियव्वा, तं जहा—अप्पडि-

लेहियदुप्पडिलेहियसिज्जासंथारए अपमज्जियदुप्पमज्जियसिज्जासंथारए अप्पडिलेहियदुप्पडिलेहिय-उच्चारपासवणभूमीओ अप्पमज्जियदुप्पमज्जियउच्चारपासवणभूमीओ पोसहोववासस्स सम्मं अणणु-पाल[ण]या ॥ ११ ॥ (सूत्रम्)

पौषधशब्दो रूढ्यापर्वसु, पर्वाणि चाष्टम्यादितिथयः, पौषधे उपवसनं पौषधोपवासः नियमविशेषाभिधानं चेदं, आहार-पोषधः-आहारनिमित्तपोषधः आहारपोषधः ब्रह्मचर्य-कुशलानुष्ठानाचरणीयं । अप्रत्युपेक्षितदुष्प्रत्युपेक्षितशय्यासंस्तारौ उपयोगिनः पीठिकादेरपि, प्रत्युपेक्षणं चक्षुषा निरीक्षणं, प्रमार्जनं-आसेवनाकाले वस्त्रोपान्तादिना, उच्चारप्रश्रवणं निष्ठ्यूत खेद(खेल)मलाद्युपलक्षणं । पोषधोपवासस्य सम्यग्-विधिना निष्प्रकम्पेन चेतसा अननुपालन[मना]सेवनं ॥ ११ ॥

अतिहिसंविभागो नाम नायागयाणं कप्पणिज्जाणं अन्नपाणाईणं दव्वाणं देसकालसद्धासक्का-रकमजुअं पराए भत्तीए आयाणुग्गहबुद्धीए संजयाणं दाणं, अतिहिसंविभागस्स समणोवासएणं इमे पंच अइयारा जाणियव्वा, तं जहा-सच्चित्तनिक्खेवणया सच्चित्तापिहणया कालाइक्कमे परव-वएसे मच्छरिया य ॥ १२ ॥ (सूत्रम्)

साधुरेव मुख्योऽतिथिस्तस्य संविभागोऽतिथिसंविभागः, न्यायो द्विजादीनां स्ववृत्त्यनुष्ठानं, तेनागतानां प्राप्तानां कल्प-

नीयानामुद्गमादिदोषवर्जितानां द्रव्याणा देशकालश्रद्धासत्कारक्रमयुक्तं, तत्र शाल्यादिनिष्पत्तिभाग्देशः सुभिक्षदुर्भिक्षादि-कालः विशुद्धश्चित्तपरिणामः श्रद्धा अभ्युत्थानामनदानवन्दनानुव्रजनादिः सत्कारः, पाकस्य पेयादिपरिपाट्या प्रदान क्रमः, एभिर्युक्तं परया भक्त्या, आत्मानुग्रहबुद्ध्या, न यत्यनुग्रहबुद्ध्या, संयता मूलोत्तरगुणप्रतिपन्नास्तेभ्यो दानं। अत्र सामाचारी–पौषधोपवासपारणे श्राद्धेन नियमाद्दत्त्वा साधूनां भोक्तव्य, अन्यदाऽनियमः, सचित्तनिक्षेपणं सचित्तेषु निक्षेपण-मन्नादेरदानबुद्ध्या मातृस्थानतः १, एवं सचित्तपिधानं २, कालातिक्रमः उचितो यो भिक्षाकालः साधूनां तमतिक्रम्याऽना-गतं वा भुङ्क्तेऽतिक्रान्ते वा, तदा च किं तेन लब्धेनापि ३, परव्यपदेशः साधोः भिक्षार्थं समुपस्थितस्य प्रकटमन्नादि पश्यतः श्रावकोऽभिधत्ते परकीयमिदमतो न ददामीत्यादि ४, 'परोन्नतिवैमनस्यं च मात्सर्यं' तेन द्रमकेण याचितेन दत्तं किमहं ततोऽपि न्यून इति मात्सर्याद्ददाति ५ ॥ १२ ॥

इत्थं पुण समणोवासगधम्मे पंचाणुवयाइं तिन्नि गुणवयाइं आवकहियाइं, चत्तारि सिक्खा-वयाइं इत्तरियाइं, एयस्स पुणो समणोवासगधम्मस्स मूलवत्थुं सम्मत्तं, तं जहा—तं निसग्गेण वा अभिगमेण वा पंचअईयारविसुद्धं अणुवयगुणवयाइं च अभिग्गहा अन्नेऽवि पडिमादओ विसेसकरणजोगा, अपच्छिमा मारणांतिया संलेहणाझूसणाराहणया, इमीए समणोवासएणं इमे

इहलो-
काशं-
साद्यति-
चाराधि-
कारः

पंच अइयारा जाणियव्वा, तं जहा—इहलोगासंसप्पओगे परलोगासंसप्पओगे जीवियासंसप्पओगे मरणासंसप्पओगे कामभोगासंसप्पओगे ॥ १३ ॥ (सूत्रम्)

यावत्कथिकानि सकृद्गृहीतानि यावज्जीवमपि भावनीयानि, शिक्षापदव्रतानीत्वराणीति तत्र प्रतिदिवसानुष्ठेये सामायिकदेशावकाशिके पुनः पुनरुच्चार्ये इत्यर्थः, पौषधोपवासातिथिसंविभागौ नियतदिवसानुष्ठेयौ न प्रतिदिवसाचरणीयौ, तन्मूलवस्तुभूतं सम्यक्त्वं निसर्गेण वाधिगमेन वा स्यात्, तत्र निसर्गः—स्वभावोऽधिगमस्तु यथावस्थितपदार्थपरिच्छेदः, आह—क्षयोपशमादेरिदं स्यात्तत्कथं ?, उच्यते, स एव क्षयोपशमादिर्निसर्गाधिगमजन्मा इति न दोषः । उक्तस्यैवार्थस्य विशेषज्ञापनायानुक्तशेषस्य चाभिधानायेदमाह—इदं च सम्यक्त्वं शङ्कादिपञ्चातिचारविशुद्धमनुपालनीयमिति शेषः, अन्ये चानेके प्रतिमादयो विशेषकरणयोगाः सम्यक् परिपालनीयाः, तथाऽपश्चिमा मारणान्तिकी संलेखना—तपोविशेषलक्षणा तस्याः जोषणं सेवनं तस्याराधना—अखण्डकालस्य करणं, चः समुच्चयार्थः । अस्याः केऽतिचारा इति तानाह—' इमीए ' इत्यादि, इहलोकाशंसाप्रयोगः इहलोको मनुष्यलोकस्तस्मिन्नाशंसा—अभिलाषस्तस्याः प्रयोगः श्रेष्ठी स्याममात्यो वेति १, एवं परलोकाशंसाप्रयोगः—परलोको देवलोकः २, जीविताशंसाप्रयोगः पूजादिदर्शनादेवं मन्यते जीवितमेव मे श्रेयः प्रत्याख्यातान्नस्यापि ३, मरणाशंसाप्रयोगः अपूज्यत्वे शीघ्रं म्रियेऽहमिति चिन्तयति ४, भोगाशंसाप्रयोगो जन्मान्तरे चक्री स्यां वासुदेवो वेत्यादि ५ ॥ व्याख्यातं देशोत्तरगुणप्रत्याख्यानं, अथ सर्वोत्तरगुणप्रत्याख्यानमाह—

पच्चक्खाणं उत्तरगुणेसु खमणाइयं अणेगविहं। तेण य इहयं पगयं तंपि य इणमो दसविहं तु ॥१५७७॥

प्रत्याख्यानमुत्तरगुणेषु उत्तरगुणविषयं प्रकरणात्साधूनामिदं–क्षपणादि, क्षपणग्रहणाच्चतुर्थादिभक्तपरिग्रहः, तेनैवात्र सर्वोत्तरगुणप्रत्याख्यानप्रक्रमे प्रकृतं–उपयोगः, तदपि चेदं दशविधं मूलापेक्षया ॥ १५७७ ॥

अणागयमइक्कंतं कोडियसहियं निअंटियं चेव । सागारमणागारं परिमाणकडं निरवसेसं ॥१५७८॥

अनागतकरणादनागतं पर्युषणादावाचार्यादिवैयावृत्त्यकरणान्तरायसद्भावादारत एव तत्तपःकरणं एवमतिक्रान्तकरणादतिक्रान्तं, कोटीभ्यां सहितं कोटीसहितं–मिलितोभयप्रत्याख्यानकोटि, चतुर्थादिकरणं, नियन्त्रितं प्रतिज्ञातदिनादौ ग्लानाद्यन्तरायभावेऽपि नियमतः कर्त्तव्यं, सहाकारैरनाभोगादिभिरिति साकारं, अविद्यमानाकारं अनाकारं, परिमाणकृतं दत्त्यादिकृतपरिमाणं, निरवशेषं समग्राशनादिविषयं ॥ १५७८ ॥

संकेयं चेव अद्धाए पच्चक्खाणं तु दसविहं । सयमेवणुपालणियं दाणुवएसे जह समाही ॥ १५७९ ॥

केतं–चिह्नमङ्गुष्ठादि सह केतेन सङ्केतं, 'अद्धाए'त्ति पौरुष्यादिकालमानमित्यर्थः, प्रत्याख्यानं दशविधमेव । इदं स्वयमेवानुपालनीयं, न पुनः प्राणातिपातादिप्रत्याख्यानवदन्यकारापणे अनुमतौ वा निषेधः, आह च–'दाणुवएसे जह समाहि'त्ति अन्याहारप्रदाने यतिप्रदानोपदेशे च यथा समाधानमात्मनोऽप्यपीडया प्रवर्त्तितव्यं ॥ १५७९ ॥ दशविध प्रत्याख्यानाद्यभेदावयवार्थमाह—

होही पज्जोसवणा मम य तपा अंतराइयं हुज्जा । गुरुवेयावच्चेणं तवस्सिगेलन्नयाए वा ॥ १५८० ॥

मम च तदान्तरायं भवेत् गुरुवैयावृत्त्ये न तपस्विग्लानतया वेत्युपलक्षणमिदं ॥ १५८० ॥

सो दाइ तवोकम्मं पडिवज्जे तं अणागए काले । एयं पच्चक्खाणं अणागयं होइ नायवं ॥ १५८१ ॥

स इदानीं तपःकर्म प्रतिपद्येत तदनागते काले ॥ १५८१ ॥

पज्जोसवणाइ तवं जो खलु न करेइ कारणज्जाए । गुरुवेयावच्चेणं तवस्सिगेलन्नयाए वा ॥ १५८२ ॥

पर्युषणायां यस्तपो न करोति कारणजाते सति, तदेवाह–गुरुवैयावृत्त्येन तपस्विग्लानतया वा ॥ १५८२ ॥

सो दाइ तवोकम्मं पडिवज्जइ तं अइच्छिए काले । एयं पच्चक्खाणं अइक्कंतं होइ नायवं ॥ १५८३ ॥

पट्ठवणो अ दिवसो पच्चक्खाणस्स निट्ठवणओ अ । जहियं समिंति दुन्निवि तं भन्नइ कोडिसहियं तु १५८४

प्रस्थापकश्च–प्रारम्भकश्च दिवसः प्रत्याख्यानस्य निष्ठापकश्च–समाप्तिदिवसश्च प्रत्याख्याने 'समिंति'त्ति मिलितौ द्वावपि पर्यन्तौ तद्भण्यते कोटीसहितं ॥ १५८४ ॥

मासे २ अ तवो अमुगो अमुगे दिणंमि एवइमो । हट्ठेण गिलाणेण य कायवो जाव ऊसासो ॥१५८५॥

हृष्टेन–नीरोगेण ग्लानेन वा कर्त्तव्यं यावदुच्छ्वासो यावदायुः ॥ १५८५ ॥

अनागतादिदशविधंप्रत्याख्यानम् नि. गा. १५८०-१५८५

एयं पच्चक्खाणं नियंटियं धीरपुरिसपन्नत्तं । जं गि■हंतऽणगारा अणिस्सि(स्सि)अप्पा अपडिबद्धा ।१५८६।

निपन्त्रितं अनिश्रि(भृता)तात्मानोऽनिदाना अप्रतिबद्धाः ॥ १५८६ ॥

चउदसपुव्वी जिणकप्पिएसु पढमंमि चेव संघयणे । एयं विच्छिन्नं खलु थेरावि तया करेसी य ॥१५८७॥

तदा चतुर्दशपूर्विकाले, अपिशब्दादन्ये च कृतवन्तः ॥ १५८७ ॥

मयहरगागारेहिं अन्नत्थवि कारणंमि जायंमि । जो भत्तपरिच्चायं करेइ सागारकडमेयं ॥ १५८८ ॥

महत्तराकारैः, प्रभूतैर्वंविधाकारसत्ताख्यापनार्थं बहुवचनं, हेतुभूतैः, अन्यत्र वा-अन्यस्मिश्चानाभोगादौ कारणजाते सति भुजिक्रियां करिष्येऽहं इत्येव यो भक्तपरित्यागं करोति साकारकृतमेतत् ॥ १५८८ ॥

निज्जायकारणंमी मयहरगा नो करंति आगारं । कंतारवित्तिदुब्भिक्खयाइ एयं निरागारं ॥ १५८९ ॥

निश्चयेन यातं-अपगतं कारणं-प्रयोजनमस्मिन्निति असौ निर्यातकारणस्तस्मिन् साधौ महत्तराः-प्रयोजनविशेषास्तत्-फलाभावान्न कुर्वन्त्याकारं, क ?, कान्तारवृत्तौ दुर्भिक्षभावे च, अत्र यत्क्रियते तत्प्रत्याख्यानं निराकार । भावार्थस्त्व-त्रापि काष्ठमङ्गुलिं वा मुखे प्रक्षिपेदनाभोगेन सहसा वा तेनैतौ द्वावाकारौ क्रियते ॥ १५८९ ॥

दत्तीहि उ कवलेहि व घरेहिं भिक्खाहिं अहव दव्वेहिं । जो भत्तपरिच्चायं करेइ परिमाणकडमेयं ॥१५९०॥

दत्तिभिर्वा कवलैर्वा गृहैर्वा भिक्षाभिरथवा द्रव्यैः-ओदनादिभिराहारायामितमानैर्यो भक्तपरित्यागं करोति कृत-परिमाणमेतत् ॥ १५९० ॥

सव्वं असणं सव्वं पाणगं सव्वखज्जभुज्जविहं । वोसिरइ सव्वभावेण एयं भणियं निरवसेसं ॥ १५९१ ॥

सर्वखाद्यभोज्यं-विविधं खाद्यप्रकारं भोज्यप्रकारं च व्युत्सृजति सर्वभावेन-सर्वप्रकारेण ॥ १५९१ ॥

अंगुट्ठमुट्ठिगंठीघरसेउस्सासथिबुगजोइक्खे । भणियं संकेयमेयं धीरेहिं अणंतनाणीहिं ॥ १५९२ ॥

अङ्गुष्ठमुष्टिग्रन्थिगृहस्वेदउच्छ्वासस्तिबुकज्योतिष्कान् चिह्नं कृत्वा यत्क्रियते प्रत्याख्यानं, अयमर्थः-पूर्णेऽपि पौरुष्यादिप्रत्याख्याने साधुः श्रावको वा यावन्न भुङ्क्ते तावत्किञ्चिच्चिह्नमभिगृह्णाति, न युज्यतेऽप्रत्याख्यानिनः (नेन) स्थातुमिति, ततोऽङ्गुष्ठं यावत् न मुञ्चामि यावद्वा ग्रन्थिं न च्छोटयामि गृहं न प्रविशामि यावत्स्वेदो न शुष्यति यावद्वा एतावन्त उच्छ्वासाः पानीयमञ्चिकायां वा यावदेतावन्तः स्तिबुकाः-बिन्दवः यावद्पो दीपो ज्वलति तावदहं न भोक्ष्ये न केवलं भक्तेऽन्येष्वप्यभिग्रहविशेषु सङ्केतं स्यात् ॥ १५९२ ॥

अद्धा पच्चक्खाणं जं तं कालप्पमाणछेएणं । पुरिमड्ढपोरिसीए मुहुत्तमासद्धमासेहिं ॥ १५९३ ॥

अद्धा-काले प्रत्याख्यानं अद्धाप्रत्याख्यानं, यत्कालप्रमाणच्छेदेन स्यात् पुरिमार्द्धपौरुषीभ्यां मुहूर्त्तमासार्द्धमासैः॥१५९३॥

भणियं दसविहमेयं पच्चक्खाणं गुरूवएसेणं । कयपच्चक्खाणविहिं इत्तो वुच्छं समासेणं ॥ १५९४ ॥

६ प्रत्याख्यानाध्ययनम्
१० प्रत्याख्यानानि।

कृतं प्रत्याख्यानं येन स तथाविधस्तस्य विधिः कृतप्रत्याख्यानविधिस्तं अतो वक्ष्ये ॥ १५९४ ॥

आह जह जीवघाए पच्चक्खाए न कारए अन्नं । भंगभयाऽसणदाणे धुव कारवणे य नणु दोसे ॥ १५९५ ॥

आह परः–यथा जीवघाते–प्राणातिपाते प्रत्याख्याते सति असौ न कारयति जीवघातमन्यप्राणिना प्रत्याख्यानभङ्गभयात्, अशनदानेऽशनशब्दः पानाद्युपलक्षणार्थः, अयमर्थः–कृतप्रत्याख्यानस्य सतो अन्यस्मै अशनादिदाने ध्रुवं कारणमिति–अवश्यं भुजिक्रियाकारणं, अशनादिलाभे सति भोक्तुर्भुजिक्रियासद्भावात्, ततो ननु दोषः–प्रत्याख्यानभङ्गः ॥ १५९५ ॥ अतः—

नो कयपच्चक्खाणो आयरियाण दिज्ज असणाई । न य विरईपालणाओ वेयावच्चं पहाणयरं ॥ १५९६ ॥

न कृतप्रत्याख्यानः पुमान् आचार्यादिभ्यो दद्यादशनादि, न च विरतिपालनाद्वैयावृत्त्यं प्रधानतरं ॥१५९६॥ गुरुराह—

नो तिविहंतिविहेणं पच्चक्खइ अन्नदाणकारवणं । सुद्धस्स तओ मुणिणो न होइ तब्भंगहेउत्ति ॥१५९७॥

न 'त्रिविधं' करणकारणानुमतिभेदभिन्नं त्रिविधेन मनोवाक्काययोगत्रयेण प्रत्याख्याता प्रत्याचष्टे प्रक्रान्तमशनादि, अन्यस्मै दानमन्नदानं अशनादेरिति गम्यते, तेन हेतुभूतेन कारणं भुजिक्रियागोचरमन्यदानकरणं तच्छुद्धस्य–आशंसादिदोषरहितस्य, ततो मुनेर्न स्यात्तद्भङ्गहेतुः–प्रक्रान्तप्रत्याख्यानभङ्गहेतुः ॥ १५९७ ॥ किञ्च—

सयमेवणुपालणियं दाणुवएसो य नेह पडिसिद्धो । ता दिज्ज उवइसिज्ज व जहा समाहीइ अन्नेसिं १५९८

स्वयमनुपालनीयं प्रत्याख्यानमित्युक्तं निर्युक्तिकारेण, दानोपदेशौ च नेह प्रतिषिद्धौ, तत्रात्मना आनयित्वा दानं दानश्राद्धकादिकुलाख्यानं तूपदेशः, तस्माद्दद्यादुपदिशेद्वा यथासमाधिना, अन्येभ्यः-बालादिभ्यः ॥१५९८॥ अमुमेवार्थं स्पष्टयन्नाह—

कयपच्चक्खाणोऽवि य आयरियगिलाणबालवुड्ढाणं । दिज्जासणाइ संते लाभे कयवीरियायारो ॥१५९९॥

दाणेत्ति गयं, उवदिसेज्ज वा ॥ १५९९ ॥

संविग्गअण्णसंभोइयाण देसेज्ज सङ्ढगकुलाइं । अतरंतो वा संभोइयाण देज्जा जहसमाही ॥२४४॥ भा०

संविग्नान्यसाम्भोगिकानामुपदिशेत् यथा एतानि दानकुलानि श्राद्धकुलानि वा, अतरंतोत्ति अशक्नुवन् साम्भोगिकानामपि उपदिशेन्न दोषः, यथासमाधिर्नाम यथा यथा साधूनामात्मनो वा समाधिस्तथा तथा प्रयतितव्यं ॥ २४४ ॥ प्रत्याख्यानशुद्धिमाह—

सोही पच्चक्खाणस्स छव्विहा समणसमयकेऊहिं । पन्नता तित्थयरेहिं तमहं वुच्छं समासेणं ॥२४५॥भा.

श्रमणसमयकेतुभिः-साधुसिद्धान्तचिह्नभूतैः ॥ २४५ ॥

सा पुण सद्दहणा जाणणा य विणयाणुभासणा चेव । अणुपालणा विसोही भावविसोही भवे छट्ठा॥१६००

सा शुद्धिरेवं षड्विधा-श्रद्धानशुद्धिः १ ज्ञानशुद्धिः २ विनयशुद्धिः ३ अनुभाषणाशुद्धिः ४ अनुपालनाशुद्धिः ५ भावशुद्धिश्च ६ भवति षष्ठी ॥ १६०० ॥ अवयवार्थमाह—

पच्चक्खाणं सवन्नुदेसिअं जं जहिं जयाकाले । तं जो सद्दहइ नरो तं जाणसु सद्दहणसुद्धं ॥२४६॥(भा.)

यत्सप्तविंशतिविधस्यान्यतमत्, सप्तविंशतिविधं च पञ्चविधं साधुमूलगुणप्रत्याख्यानं दशविधमुत्तरगुणप्रत्याख्यानं द्वादशविधश्रावकप्रत्याख्यानं, 'यत्र' जिनकल्पे चतुर्यामे पञ्चयामे वा श्रावकधर्म्मे वा, 'यदा' सुभिक्षे दुर्भिक्षे वा पूर्वाह्णेऽपराह्णे वा, 'काल' इति चरमकाले ॥ २४६ ॥

पच्चक्खाणं जाणइ कप्पे जं जंमि होइ कायवं । मूलगुणे उत्तरगुणे तं जाणसु जाणणासुद्धं ॥२४७॥(भा.)

कल्पे-जिनकल्पादौ यत्प्रत्याख्यानं यस्मिन् भवति कर्त्तव्यं मूलोत्तरगुणविषयं ॥ २४७ ॥

किइकम्मस्स विसोही पउंजइ जो अहीणमइरित्तं । मणवयणकायगुत्तो तं जाणसु विणयओ सुद्धं २४८भा०

विनयतो विनयेन शुद्धं ॥ २४८ ॥

अणुभासइ गुरुवयणं अक्खरपयवंजणेहिं परिसुद्धं । पंजलिउडो अभिमुहो तं जाणसु भासणासुद्धं २४९भा०

कृतकृतिकर्म्मा प्रत्याख्यानं कुर्वन्ननुभाषते गुरुवचनं, लघुतरेण शब्देन भणतीत्यर्थः, अक्षरपदव्यञ्जनैः परिशुद्धं, नवर गुरुर्भणति वोसिरइ [शिष्यः] वोसिरामीति ॥ २४९ ॥

कंतारे दुब्भिक्खे आयंके वा महई समुप्पन्ने । जं पालियं न भग्गं तं जाणसु पालणासुद्धं ॥२५०॥ (भा०)

रागेण व दोसेण व परिणामेण व न दूसियं जं तु । तं खलु पच्चक्खाणं भावविसुद्धं मुणेयव्वं ॥२५१॥(भा०)

रागेण वा–अभिष्वङ्गलक्षणेन द्वेषेण वा–अप्रीतिलक्षणेन, परिणामेन च–इहलोकाद्याशंसालक्षणेन न दूषितं यदेव तदेव प्रत्याख्यानं भावशुद्धं ॥ २५१ ॥

एएहिं छहिं ठाणेहिं पच्चक्खाणं न दूसियं जं तु । तं सुद्धं नायव्वं तप्पडिवक्खे असुद्धं तु ॥२५२॥ (भा०)

एभिः षड्भिः स्थानकैः श्रद्धानादिभिः प्रत्याख्यानं न दूषितं यदेव ॥ २५२ ॥ परिणामेन वा न दूषितमित्युक्तं तत्र परिणाममाह—

थंभा कोहा अणाभोगा अणापुच्छा असंतई । परिणामओ असुद्धो अवाउ जम्हा विउ पमाणं ॥२५३॥भा०

(पच्चक्खाणं समत्तं)

स्तम्भात् यथा एष मान्यतेऽहमपि प्रत्याख्यामि येन मान्यो भवामि, क्रोधान्न भुङ्क्ते, अनाभोगात् किं मम प्रत्याख्यातं इति न जानाति, अनापृच्छातः स्वेच्छया असंस्तया (असदिति) नास्त्यत्र किञ्चिद्भोक्तव्यं वरं प्रत्याख्यातमिति, परिणामश्चाशुद्धः प्राग्व्याख्यातः, ' अवाउ 'त्ति अहमपि प्रत्याख्यामि मा निःसारयिष्यन्तीति, एवं न कल्पते, तस्माद्विद्वान् प्रमाणं, सोऽन्यथा न करोति तस्य शुद्धं स्यादित्यर्थः ॥ २५३ ॥ प्रत्याख्यानमिति द्वारं व्याख्यातं, अत्रान्तरेऽध्ययनशब्दार्थः पूर्ववत् , सूत्रालापकनिष्पन्ने निक्षेपे सूत्रं—

सूरे उग्गए णमोक्कारसहितं पच्चक्खाति चउव्विहंपि आहारं असणं पाणं खाइमं साइमं, अण्णत्थणाभोगेणं सहसाकारेणं वोसिरामि । (सूत्रम्)

सूत्रस्पर्शिकनिर्युक्त्या एतदेवाह—

असणं पाणगं चेव खाइमं साइमं तहा । एसो आहारविही चउव्विहो होइ नायव्वो ॥ १६०१ ॥

अशनं मण्डकौदनादि, पानकं द्राक्षापानादि, खादिमं फलादि, स्वादिमं गुडादि ॥१६०१॥ समयपरिभाषया शब्दार्थमाह—

आसुं खुहं समेई असणं पाणाणुवग्गहे पाणं । खे माइ खाइमंति य साएइ गुणे तओ साई ॥ १६०२ ॥

आशु-क्षुधां शमयतीत्यशनं, प्राणानां-इन्द्रियादिलक्षणानामुपग्रहे यद्वर्त्तते तत् पानं, खमिति-आकाशं तच्च मुखविवरमेव, तस्मिन्मातीति खादिमं, स्वादयति गुणान्-रसादीन् संयमगुणान्वा [यतः] ततः स्वादिमं, हेतुत्वेन तदेव स्वादयतीत्यर्थः ॥ १६०२ ॥ चालनामाह—

सव्वोऽविय आहारो असणं सव्वोऽवि वुच्चई पाणं । सव्वोऽवि खाइमंति य सव्वोऽवि य साइमं होई ॥ १६०३ ॥

यद्यनन्तरोक्तपदार्थापेक्षया अशनादीनि ततः सर्वोऽपि चाहारश्चतुर्विधोऽप्यशनं ॥ १६०३ ॥ संयमोपकारकमस्त्येवं कल्पनायाः, अन्यथा दोषः, तथाचाह—

जइ असणमेव सव्वं पाणग अविवज्जणंमि सेसाणं। हवइ य सेसविवेगो तेण विहत्ताणि चउरोऽवि१६०४

यद्यशनमेव सर्वमाहारजातं गृह्यते ततः शेषापरिभोगेऽपि पानकादिवर्जने-उदकादिपरित्यागे शेषाणामाहारभेदानां निवृत्तिर्न कृता स्यादिति शेषः, भवति च शेषविवेकः-शेषाहारभेदस्यागः, न्यायोपपन्नत्वात्, स चेह सम्भवति, तेन विभक्तानि चत्वार्यपि अशनादीनि, एवं तु सामान्यविशेषभेदनिरूपणं सुखावसेयं सुखश्रद्धेयं च स्यात् ॥१६०४॥ तथा चाह—

असणं पाणगं चेव खाइमं साइमं तहा । एवं परूवियंमी सद्दहिउं जे सुहं होइ ॥ १६०५ ॥

श्रद्धातुं सुखं स्यादुपलक्षणार्थत्वाद्दीयते पाल्यते च सुखं ॥ १६०५ ॥ आह-मनसाऽन्यथा सम्प्रधारिते प्रत्याख्याने त्रिविधस्य प्रत्याख्यानं करोमीति वागन्यथा विनिर्गता चतुर्विधस्येति, गुरुणापि तथैव दत्तं अत्र कः प्रमाणं ?, उच्यते, शिष्यस्य मनोभावः, आह च—

अन्नत्थ निवाडिए वंजणंमि जो खलु मणोगओ भावो। तं खलु पच्चक्खाणं न पमाणं वंजणच्छलणा१६०६

अन्यत्र निपतिते व्यञ्जने-त्रिविधप्रत्याख्यानचिन्तायां चतुर्विध इत्येवमादौ निपतिते शब्दे यः खलु मनोगतो भावः प्रत्याख्यातुरधिकतरसंयमयोगकरणाक्षिप्तचेतसः, न तु तथाविधप्रमादात्, तत् खलु प्रत्याख्यानं प्रमाणं, न प्रमाणं व्यञ्जनं, च्छलना असौ व्यञ्जनमात्रं, तदन्यथाभावसद्भावात् ॥ १६०६ ॥ इदं च प्रत्याख्यानं प्रधाननिर्जराकारणं इति विधिवदनुपालनीयं, तथा चाह—

फासियं पालियं चेव सोहियं तीरियं तहा । किट्टिअमाराहिअं चेव एरिसयंमी पयइयव्वं ॥ १६०७ ॥

स्पृष्टं–प्रत्याख्यानग्रहणकाले विधिना प्राप्तं, पालितं–पुनः पुनरुपयोगप्रतिजागरणेन रक्षितं, शोभितं–गुर्वादिप्रदानशेषभोजनासेवनेन, तीरितं–पूर्णेऽपि कालावधौ किञ्चित्कालावस्थानेन, कीर्त्तितं भोजनवेलायाममुकं प्रत्याख्यातं तत्पूर्णमधुना भोक्ष्य इत्युच्चारणेन, आराधितमेभिरेवप्रकारैः सम्पूर्णैर्निष्ठां नीतं, ईदृशि प्रयतितव्यं ॥ १६०७ ॥ एतदेवाह—

उवि० ॥ गुरु० ॥ भोअ० ॥

एतद्गाथात्रयमन्यकर्तृकं [न क्वापि लब्धं] प्रत्याख्यानगुणानाह—

पच्चक्खाणंमि कए आसवदाराइं हुंति पिहियाइं । आसववुच्छेएणं तण्हावुच्छेअणं होइ ॥ १६०८ ॥

तृड्व्यवच्छेदनं स्यात् तद्विषयाभिलापनिवृत्तिः ॥ १६०८ ॥

तण्हावोच्छेदेण य अउलोवसमो भवे मणुस्साणं । अउलोवसमेण पुणो पच्चक्खाणं हवइ सुद्धं ॥ १६०९ ॥

अतुलः उपशमः–माध्यस्थ्यपरिणामः स्यात् ॥ १६०९ ॥

तत्तो चरित्तधम्मो कम्मविवेगो तओ अपुव्वं तु । तत्तो केवलनाणं तओ अ मुक्खो सयासुक्खो ॥ १६१० ॥

ततः प्रत्याख्यानाच्छुद्धाचारित्रधर्म्मः स्फुरति, कर्म्मविवेकः–कर्मनिर्जरा, ततश्चारित्रधर्म्मात्, ततः कर्म्मविवेकात् क्रमेणापूर्वकरणं, ततः श्रेणिक्रमेण केवलज्ञानं, ततश्च मोक्षः सदासौख्यः ॥ १६१० ॥ इदं च प्रत्याख्यानमुपाधिभेदाद्दश—

जइ असणमेव सव्वं पाणग आवित्रज्जणंमि सेसाणं । हवइ य सेसविवेगो तेण विहत्ताणि चउरोऽवि१६०४

यद्यशनमेव सर्वमाहारजातं गृह्यते ततः शेषापरिभोगेऽपि पानकादिवर्जने-उदकादिपरित्यागे शेषाणामाहारभेदानां निवृत्तिर्न कृता स्यादिति शेषः, भवति च शेषविवेकः-शेषाहारभेदत्यागः, न्यायोपपन्नत्वात्, स चेह सम्भवति, तेन विभक्तानि चत्वार्यपि अशनादीनि; एवं तु सामान्यविशेषभेदनिरूपणं सुखावसेयं सुखश्रद्धेयं च स्यात् ॥१६०४॥ तथा चाह—

असणं पाणगं चेव खाइमं साइमं तहा । एवं परूवियंमी सद्दहिउं जे सुहं होइ ॥ १६०५ ॥

श्रद्धातुं सुखं स्यादुपलक्षणार्थत्वाद्दीयते पाल्यते च सुखं ॥ १६०५ ॥ आह-मनसाऽन्यथा सम्प्रधारिते प्रत्याख्याने त्रिविधस्य प्रत्याख्यानं करोमीति वागन्यथा विनिर्गता चतुर्विधस्येति, गुरुणापि तथैव दत्तं अत्र कः प्रमाणं ?, उच्यते, शिष्यस्य मनोभावः, आह च—

अन्नत्थ निवाडिए वंजणंमि जो खलु मणोगओ भावो । तं खलु पच्चक्खाणं न पमाणं वंजणच्छलणा॥१६०६

अन्यत्र निपतिते व्यञ्जने-त्रिविधप्रत्याख्यानचिन्तायां चतुर्विध इत्येवमादौ निपतिते शब्दे यः खलु मनोगतो भावः प्रत्याख्यातुरधिकतरसंयमयोगकरणाक्षिप्तचेतसः, न तु तथाविधप्रमादात्, तत् खलु प्रत्याख्यानं प्रमाणं, न प्रमाणं व्यञ्जनं, च्छलना असौ व्यञ्जनमात्रं, तदन्यथाभावसद्भावात् ॥ १६०६ ॥ इदं च प्रत्याख्यानं प्रधाननिर्जराकारणं इति विधिवदनुपालनीयं, तथा चाह—

फासियं पालियं चेव सोहियं तीरियं तहा । किट्टिअमाराहिअं चेव एरिसयंमी पयइयवं ॥ १६०७ ॥

स्पृष्टं–प्रत्याख्यानग्रहणकाले विधिना प्राप्तं, पालितं–पुनः पुनरुपयोगप्रतिजागरणेन रक्षितं, शोभितं–गुर्वादिप्रदानशेषभोजनासेवनेन, तीरितं–पूर्णेऽपि कालावधौ किञ्चित्कालावस्थानेन, कीर्त्तितं भोजनवेलायाममुकं प्रत्याख्यातं तत्पूर्णमधुना भोक्ष्य इत्युच्चारणेन, आराधितमेभिरेवप्रकारैः सम्पूर्णैर्निष्ठां नीतं, ईदृशि प्रयतितव्यं ॥ १६०७ ॥ एतदेवाह—उवि० ॥ गुरु० ॥ भोअ० ॥

एतद्गाथात्रयमन्यकर्तृकं [न क्वापि लब्धं] प्रत्याख्यानगुणानाह—

पच्चक्खाणंमि कए आसवदाराइं हुंति पिहियाइं । आसववुच्छेएणं तण्हावुच्छेअणं होइ ॥ १६०८ ॥

तृड्व्यवच्छेदनं स्यात् तद्विषयाभिलाषनिवृत्तिः ॥ १६०८ ॥

तण्हावोच्छेदेण य अउलोवसमो भवे मणुस्साणं । अउलोवसमेण पुणो पच्चक्खाणं हवइ सुद्धं ॥१६०९॥

अतुलः उपशमः–माध्यस्थ्यपरिणामः स्यात् ॥ १६०९ ॥

तत्तो चरित्तधम्मो कम्मविवेगो तओ अपुवं तु । तत्तो केवलनाणं तओ अ मुक्खो सयासुक्खो ॥ १६१० ॥

ततः प्रत्याख्यानाच्छुद्धाच्चारित्रधर्म्मः स्फुरति, कर्म्मविवेकः–कर्मनिर्जरा, ततश्चारित्रधर्म्मात्, ततः कर्म्मविवेकात् क्रमेणापूर्वकरणं, ततः श्रेणिक्रमेण केवलज्ञानं, ततश्च मोक्षः सदासौख्यः ॥ १६१० ॥ इदं च प्रत्याख्यानमुपाधिभेदाद्दश—

विधं स्यात्, आकारसमन्वितं च गृह्यते पाल्यते च, अत इदमाह—

नमुक्कारपोरिसीए पुरिमड्ढेगासणेगठाणे य । आयंबिल अभत्तट्ठे चरमे य अभिग्गहे विगई ॥ १६११ ॥
दो छच्च सत्त अट्ठ सत्तट्ठ य पंच छच्च पाणंमि । चउ पंच अट्ठ नव य पत्तेयं पिंडए नवए ॥ १६१२ ॥

नमस्कारसहिते १ पौरुष्यां २ पुरिमार्द्धे ३ एकाशने ४ एकस्थाने च ५ आचाम्ले ६ अभक्तार्थे ७ चरमे च ८ अभिग्रहे ९ विकृतौ १० यथासङ्ख्यमेते आकाराः द्वौ १ षट् २ सप्त ३ अष्टौ ४ सप्त ५ अष्टौ ६ पञ्च ७ षट् पाने चत्वारः ८ पञ्च ९ अष्टौ नव १० प्रत्येकं पिण्डो नवकसहितः, को व्यञ्जनेष्वाद्यवर्णः ? तत एककः अङ्कानां वामतो गतिरिति । एकोनविंशतिर्लभ्यते, ते च प्रस्तावादत्राकारा ग्राह्यास्तद्यथा एकासनगता अष्टावाकाराः, विकृतिप्रत्याख्याना-च्चाधिकाश्चत्वारः, पौरुषीप्रत्याख्यानाच्च त्रयः, एकश्चोलपट्टकाकारः, पानाश्रिताः षट्, उक्ता अपि अलेपेन वा लेपकृतेनापि अच्छेन वा बहुलेनापि ससिक्थेन वा असिक्थेनापि न भङ्ग इति त्रय एवाकाराः, त्रयश्चोपमाभूतत्वेन गताः, सर्वेऽपि मीलिताः उक्तसंख्याः पिण्डकः—समूह इत्यर्थः, भावार्थमाह—

दो चेव नमुक्कारे आगारा छच्च पोरिसीए उ । सत्तेव य पुरिमड्ढे एगासणगंमि अट्ठेव ॥ १६१३ ॥

द्वावेवाकारौ नमस्कारसहिते अन्नत्थणाभोगेणं १ सहसागारेणं २ इति, षट् पौरुष्यां अन्नत्थ० १ सहसा० २ पच्छन्न-कालेणं ३ दिसामोहेणं ४ साहुवयणेणं ५ सव्वसमाहिवत्तिआगारेणं ६ इति, सप्तैव तु पुरिमार्द्धे, षट् त एव महत्तरागारेण-

मिति सप्तमः, एकाशनेऽष्टावेव अन्नत्थ० १ सहसा० २ सागारिआगारेणं ३ आउंटणपसारणेणं ४ गुरुअब्भुट्ठाणेणं ५ पारिट्ठावणिआगारेणं ६ मह० ७ सव्व० ८ ॥ १६१३ ॥

सत्तेगट्ठाणस्स उ अट्ठेवायंबिलंमि आगारा । पंचेव अभत्तट्ठे छप्पाणे चरिमि चत्तारि ॥ १६१४ ॥

सप्तैकस्थानस्य तु, अत्राकुञ्चनप्रसारणं नास्ति शेषा यथा एकाशने, अष्टौ चाचाम्लस्याकाराः अन्न० १ सह० २ लेवालेवेण ३ गिहत्थसंसट्ठेणं ४ उक्खित्तविवेगेणं ५ पारि० ६ मह० ७ सव्व० ८, इदं च बहुवक्तव्यमितिभेदेन वक्ष्यामो 'गोन्नं नाम' मित्यादिना, अभक्तार्थ उपवासः, तस्य पञ्च आकाराः अन्न० १ सह० २ पारि० ३ मह० ४ सव्व० ५, यदि त्रिविधस्य प्रत्याख्याति तदा पारिष्ठापनिकं कल्पते, यदि चतुर्विधस्य प्रत्याख्यातं पानकं च नास्ति ततो न कल्पते, यदि तु पानकमप्यधिकं ततः कल्पते, षट् पाने लेवाडेण वा १ अलेवाडेण वा २ अच्छेण वा ३ बहुलेण वा ४ ससित्थेण वा ५ असित्थेण वा ६, चरमे च चत्वारि, चरमं द्विविधं-दिवसचरमं भवचरमं च, तस्मिन् द्विविधेऽपि अन्न० १ सह० २ मह० ३ सव्व० ४ ॥ १६१४ ॥

पंच चउरो अभिग्गहि निव्वीए अट्ठ नव य आगारा । अप्पाउरण पंच उ हवंति सेसेसु चत्तारि ॥ १६१५ ॥

पञ्च चत्वारश्चाभिग्रहे, निर्विकृतौ अष्ट नव आकाराः, पञ्च चत्वारश्चाभिग्रहे इति सामान्येनोक्तः, विशेषतस्तु अप्रावरणे पञ्चैव, अयमर्थः-प्रावृतत्वं कोऽपि प्रत्याख्याति, तस्य पञ्च अन्न० १ सहसा० २ चोलपट्टागा० ३ मह० ४ सव्वसमाहि०,

शेषेष्वभिग्रहेषु दण्डकप्रमार्जनादिषु ग्रन्थिसहितादिषु चत्वार एव, चोलपट्टाकारो नास्ति, निर्विकृतौ अष्ट नव चाकारा इत्युक्तं तत्र दश विकृतयः—क्षीरं १ दधि २ नवनीतं ३ घृतं ४ तैलं ५ गुडो ६ मधु ७ मद्यं ८ मांसं ९ अवगाहिमं पक्कान्नमिति रूढं १० । तत्र पञ्च क्षीराणि—गो १ महिषी २ अजा ३ उष्ट्री ४ एलिकानां ५। दधिनवनीतघृतानि चतुर्द्धा, उष्ट्रीणां तदभावात्, तैलानि चत्वारि—तिल १ अतसी २ लट्टा (कुसुम्भ) ३ सर्षपाणां, विकृतयः लेवाडाणि स्युः, मद्यं विकूट-मित्युच्यते, तद्द्विधा काष्टजं पिष्टजं च। फाणितो गुड उच्यते, स द्विधा द्रवगुडः पिण्डगुडश्च, मधूनि त्रीणि—माक्षिकं १ कौलिकं २ भ्रामरं च ३, मांसं पुद्गल उच्यते, तत् त्रिधा—जल १ स्थल २ खेचर ३ जन्तूनां अथवा चर्म १ मांसं २ शोणितं च ३, एता नव विकृतयः, अवगाहिमं च दशमं, स्नेहपूर्णायां तापिकायां एकमवगाहिमं चलचलत् पच्यते सफेनं द्वितीयं तृतीयमिति, शेषाणि योगवाहिनां कल्पन्ते, यद्येकेनैव पूपकेन तापिका पूर्यते तदा द्वितीयमपि कल्पते निर्विकृतिप्रत्याख्यानिनः, लेवाडं तु स्यात्। अधुना प्रकृतमुच्यते, विकृतिषु कासु अष्टौ क्व वा नव आकाराः ?, तत्र—

नवणीओगाहिमए अद्दवदहि(व) पिसियघयगुले चेव। नव आगारा तेसिं सेसदवाणं च अट्ठेव ॥१६१६॥

नवनीते, ओगाहिमके, अद्रवदध्निगालिते (' अद्दवदवे ' निगालिते) इत्यर्थः, पिशिते मांसे, घृतगुडे च, अद्रव-ग्रहणं सर्वत्र योज्यं, नव आकारा अमीषां विकृतिविशेषाणां स्युः। अन्न० १ सह० २ लेवा० ३ गिह० ४ उक्खि० ५ पडुच्चमक्खिएणं० ६ पारि० ७ मह० ८ सव० ९ इति, शेषाणां द्रवाणां विकृतिविशेषाणामष्टावेवाकाराः, उत्क्षिप्तविवेको न स्यात् ॥ १६१६ ॥

इह चेदं सूत्रम्—

‘ णिव्वियतियं पच्चक्खाती’ त्यादि अन्नत्थऽणाभोगेणं सहसाकारेणं लेवालेवेणं गिहत्थसंसट्ठेणं उक्खित्तविवेगेणं पडुच्चमक्खिएणं पारिट्ठावणियागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरति । (सूत्रं)

इदं च प्रायो गतार्थमेव विशेषं तु ‘पंचेव य खीराइं’ इत्यादिनोपन्यासक्रमप्रामाण्यादुत्तरत्र वक्ष्यामः । आचामाम्लमाह—

गोन्नं नामं तिविहं ओअण कुम्मास सत्तुआ चेव। इक्किक्कंपि य तिविहं जहन्नयं मज्झिमुक्कोसं ॥१६१७॥

आयामाम्लमिति गौण नाम, आयामः अवशायनं, आम्लं–चतुर्थरसं ताभ्यां निर्वृत्तं आयामाम्लं, इदं चोपाधिभेदात् त्रिविधं स्यात् , ओदनः १ कुल्माषाः २ सक्तवश्चैव ३, ओदनमधिकृत्य तथा कुल्माषान् सक्तूंश्च, एकैकमपि चामीषां त्रिविधं स्यात्–जघन्यं १ मध्यमं २ उत्कृष्टं च ३ ॥ १६१७ ॥ कथमित्यत्राह—

दव्वे रसे गुणे वा जहन्नयं मज्झिमं च उक्कोसं । तस्सेव य पाउग्गं छलणा पंचेव य कुडंगा ॥ १६१८ ॥

द्रव्ये रसे गुणे चैव, द्रव्यमधिकृत्य रसमधिकृत्य [गुणमधिकृत्य] जघन्यकं मध्यमं चोत्कृष्टं च, तस्यैव चाचामाम्लस्य प्रायोग्यं वक्तव्यं, तथा आयामाम्लं प्रत्याख्यातमिति दध्ना भुञ्जानस्यादोषः प्राणातिपातप्रत्याख्याने तदानासेवनवदिति

छलना वक्तव्या, पञ्चैव कुडङ्गाः—वक्रविशेषाः ॥ १६१८ ॥ तद्यथा—

लोए वेए समए अन्नाणे खलु तहेव गेलन्ने । एए पंच कुडंगा नायव्वा अंबिलंमि भवे ॥ १६१९ ॥

लोके १ वेदे २ समये ३ अज्ञाने चैव ४ तथा ग्लानत्वे ५, एते पञ्च कुडङ्गा भवन्त्यायामाम्लविषये ॥ १६१९ ॥ अत्र वृद्धसम्प्रदायोऽयं—आचाम्लं नाम उत्कृष्टं शालिकूरादिद्रव्यं तेन किल आचाम्लं क्रियते, अत उपचारात्तद्प्याचाम्लमुक्तं, इदं चोत्कृष्टत्वात्प्रायो न गृह्यते एव, आचाम्लप्रायोग्यं च तण्डुलकणिकापिष्टपोलिकामण्डकादि, अस्य च निरपवादग्राह्यत्वात् प्रायोग्यत्वमुक्तं, एवं कुल्माषा आचाम्लप्रायोग्यं, तुषमिश्रतत्कणिकादि सक्तवो यवगोधूमादीनामाचाम्लप्रायोग्यं, धानादि (?) कलमशालिकूरो द्रव्यत उत्कृष्टद्रव्यं चतुर्थरसेन भुज्यते रसत उत्कृष्टं तत्मत्केनापि आयामेनोत्कृष्टं रसतो गुणतो जघन्यं स्तोका निर्जरा इति, स एव कूरो यदाऽन्येषामा(न्यैरा)यामैस्तदा द्रव्यत उत्कृष्टो रसतो मध्यमो गुणतोऽपि मध्यमः, यदोष्णोदकेन तदा द्रव्यत उत्कृष्टं रसतो जघन्यं गुणतो मध्यममेव, मध्यमाः ओदनाः ते द्रव्यतो मध्यमा आचामाम्लेन रसत उत्कृष्टा गुणतो मध्यमाः, तथैव उष्णोदकेन द्रव्यतो मध्यमं रसतो जघन्यं गुणतो मध्यमं मध्यमं द्रव्यमितिकृत्वा, रालगतृणकूरा द्रव्यतो जघन्यास्ते [आचामाम्लेन रसत उत्कृष्टं गुणतो मध्यमं, ते एवाचामाम्लेन द्रव्यतो जघन्यं रसतो मध्यमं गुणतो मध्यमं], यदा उष्णोदकेन तदा द्रव्यतो जघन्यं रसतो जघन्यं गुणोत्कृष्टमित्यादि । छलना नाम कश्चिदाचाम्लं प्रत्याख्याय विकृतीर्भोक्तुमुपविष्टो गुरुक्तः—कथमाचाम्लं प्रत्याख्याय विकृतीर्भोक्ष्यसे ?, स ऊचे यथा प्राणातिपातं प्रत्या-

ख्याय प्राणातिपातो न क्रियते, एवमाचाम्लेऽपि प्रत्याख्याते तन्न क्रियते, एषा च्छलना, परिहारस्तु प्रत्याख्यानं भोजने तन्निवृत्तौ च स्यात्, भोजने आयामाम्लं प्रतिय(म्लप्रायोग्या)दन्यत् तत् प्रत्याख्याति आयामाम्ले च वर्त्तते, तन्निवृत्तौ चतुर्विधमप्याहारं प्रत्याचक्षाणस्य, तेन एषा छलना निरर्थिका । पञ्च कुडङ्गा–एकेनाचाम्लं प्रत्याख्यातं, संखण्डयां पक्वान्नादि लब्ध्वा गुरूणां दर्शितं गुरुभिरूचे त्वयाचाम्लं प्रत्याख्यातं, स प्राह–मया बहूनि लौकिकशास्त्राणि परिमिलितानि तत्राचाम्लशब्दो नास्ति इति प्रथमः कुडङ्गः, अथवा वेदेषु चतुर्षु साङ्गोपाङ्गेषु नास्त्याचाम्लं इति द्वितीयः, अथवा समये चरकचीरिकभिक्ष्वादीनां नास्ति, न जाने कुतोऽपि युष्माकमागतः ?, तृतीयः, अज्ञानेन भणति–न जानामि कीदृशमाचाम्लं, अहं जाने घृतदध्यादिभिरार्द्रीकृत्य भुज्यते तेन गृहीतं इति चतुर्थः, ग्लानकुडङ्गः पञ्चमः भणति–न शक्नोम्याचाम्लं कर्तुं शूलं मे आयातीत्यादि । निर्विकृतिकाधिकारशेषमाह—

पंचेव य खीराइं चत्तारि दहीणि सप्पि नवणीता । चत्तारि य तिल्लाइं दो वियडे फाणिए दुन्नि ॥१६२०॥

महुपुग्गलाइं तिन्नि चलचलओगाहिमं तु जं पक्कं । एएसिं संसट्ठं वुच्छामि अहाणुपुव्वीए ॥ १६२१ ॥

इदं गाथाद्वयं विकृतिस्वरूपप्रतिपादकं गतार्थमेव ॥ १६२०–२१ ॥ गृहस्थसंसृष्टाकारो बहुवक्तव्य इति गाथाभ्यां तमाह—

खीरदहीवियडाणं चत्तारि उ अंगुलाइं संसट्ठं । फाणियतिल्लघयाणं अंगुलमेगं तु संसट्ठं ॥ १६२२ ॥

महुपुग्गलरसयाणं अद्धंगुलयं तु होइ संसट्ठं । गुलपुग्गलनवणीए अद्दामलयं तु संसट्ठं ॥ १६२३ ॥

क्षीरेण मिश्रितः कूरो यदि लभ्यते, यदि च तस्य कुडङ्गस्य ओदनाचत्वार्यङ्गुलानि दुग्धं तदा निर्विकृतिकं कल्पते। पञ्चमं चारब्धं(भ्य) विकृतिश्च, एवं दधिविकटयोरपि, फाणित[गुड]तैलघृतानां मिश्रिते यद्यङ्गुलमुपरि ततः कल्पते, परतो न ॥ १६२२ ॥ मधुनः पुद्गलरमकस्यार्द्धाङ्गुलेन संसृष्टं स्यात् , पिण्डगुडस्य पुद्गलस्य नवनीतस्य च आर्द्रामलकमात्रं संसृष्टं, यदि बहून्येतत्प्रमाणानि कल्पन्ते, एकमपि वृद्धं (एकस्मिन् बृहति) न कल्पते ॥ १६२३ ॥ पारिष्ठापनिकाकार एकाशनैकस्थानादिषु साधारणः इति विशेषेण तमाह—

आयंबिलमणायंबिल चउथा बालवुड्ढसहुअसहू। अणहिंडियहिंडियए पाहुणयनिमंतणावलिया १६२४

पारिष्ठापनिक[भोजने] योग्याः साधवो द्विधा—आचाम्लवन्तोऽनाचाम्लवन्तश्च, ते (अनाचाम्लवन्तः) एकासनएकस्थानचतुर्थषष्ठाष्टमनिर्विकृतिकृतः, दशमभक्तिका(दशभक्ता)दीनां पारिष्ठापनिकं न कल्पते दातुं। एक आचाम्लक एकश्चतुर्थभक्तिकः कतरस्य दातव्यं ?, चतुर्थभक्तिकस्य, सोऽपि द्विधा—बालो वृद्धश्च, बालस्य दातव्यं, बालोऽपि द्विधा—सहोऽसहश्च, असहस्य दातव्यं, सोऽपि द्विधा—हिण्डितोऽहिण्डितश्च, हिण्डितस्य दातव्यं, सोऽपि द्विधा—वास्तव्यः प्राघूर्णकश्च, प्राघूर्णकस्य दातव्यं, एवं चतुर्थभक्तो बालोऽसहो हिण्डितः प्राघूर्णकः पारिष्ठापनिकं भोज्यते, तदभावे बालोऽसहो हिण्डितो वास्तव्यः, [तदभावे बालोऽसहोऽहिण्डमानः प्राघूर्णकः, तदभावे बालोऽसहोऽहिण्डमानो वास्तव्यः], एवमेतैश्चतुर्भिः [पदैः]

षोडशावलिकाभङ्गाः, एवमावलिकाक्रमेण निमन्त्रणा कार्या, मुख्यतः प्रथमभङ्गे दातव्यं, अभावे यावच्चरमे, प्रचुरपारिष्ठापनिकायां सर्वेषां दातव्यं, एवमाचाम्लकृतः षष्ठभक्तिकस्य षोडशभङ्गाः, एवमष्टमभक्तिकस्यापि, एवमाचाम्लकृतो निर्विकृतिकस्य च, नवरमाचाम्लकृतो दातव्यं, एवं सर्वत्र यत्राधिकं तपस्तत्र दातव्यं ॥ १६२४ ॥ तच्च पारिष्ठापनिकं किं स्वरूपं ?, इत्यत आह—

विहिगहियं विहिभुत्तं उव्वरियं जं भवे असणमाई। तं गुरुणाऽणुन्नायं कप्पइ आयंबिलाईणं ॥१६२५॥
(विहिगहिअं विहिभुत्त)तह गुरूहिं(जं भवे)अणुन्नायं। ताहे वंदणपुव्वं भुंजइ से संदिसावेउं(पाठान्तरं)

विधिना अलुब्धेन गृहीतं, पश्चान्मण्डल्यां कटप्रतरच्छेदादिना विधिना भुक्तं, एवंविधं पारिष्ठापनिकं यदा गुरुर्भणति-आर्य ! इदं पारिष्ठापनिकं इच्छाकारेण भुङ्क्ष्व इति, तदा तस्य कल्पते वन्दनं दत्त्वा सन्दिश्य भोक्तुं ॥१६२५॥ अत्र चतुर्भङ्गी—

चउरो य हुंति भंगा पढमे भंगंमि होइ आवलिया। इत्तो अ तइयभंगो आवलिया होइ नायव्वा ॥१६२६॥

विधिगृहीतं विधिभुक्तं १ विधिगृहीतमविधिभुक्तं २ अविधिगृहीतं विधिभुक्तं ३ अविधिगृहीतमविधिभुक्तं ४, प्रथमभङ्गे कल्पते पूर्वोक्तावलिकानां भोक्तुं, द्वितीयः परिष्ठाप्यते, ईदृग् यो ददाति यश्च भुङ्क्ते द्वयोरपि विवेकः क्रियते, अपुनःकारेण चोपस्थितयोः पञ्चकल्याणकं दीयते, तृतीये तु कल्पते, चतुर्थे न ॥ १६२६ ॥ व्याख्यातं मूलद्वारगाथोपन्यस्तं प्रत्याख्यानं, अथ प्रत्याख्याता उच्यते, तथा चाह—

६ प्रत्याख्यानाध्ययनम्
पारिष्ठापनिकं किं स्वरूपम् ?।

पच्चक्खाएण कया पच्चक्खाविंतएवि सूआए(उ)। उभयमवि जाणगेयर चउभंगे गोणिदिट्ठंतो ॥१६२७॥

प्रत्याख्याता–गुरुस्तेन प्रत्याख्यात्रा कृता प्रत्याख्यापयितर्यपि शिष्ये सूचा–उल्लिङ्गना, न हि प्रत्याख्यानं प्रायो गुरुशिष्यावन्तरेण सम्भवति, अत्र ज्ञातरि अज्ञातरि च चतुर्भङ्गः, तत्र चतुर्भङ्गे गोदृष्टान्तः ॥ १६२७ ॥ भावार्थं स्वयमेवाह—

मूलगुणउत्तरगुणे सव्वे देसे य तह य सुद्धीए। पच्चक्खाणविहिन्नू पच्चक्खाया गुरू होइ ॥ १६२८ ॥

मूलगुणेषु उत्तरगुणेषु च, 'सव्वे देसे य त्ति' सर्वमूलगुणेषु देशमूलगुणेषु च, एवं सर्वोत्तरगुणेषु देशोत्तरगुणेषु च, तथा च शुद्धौ–षड्विधायां श्रद्धानादिलक्षणायां प्रत्याख्यानविधिज्ञः प्रत्याख्याता गुरुर्भवति ॥ १६२८ ॥

किइकम्माइविहिन्नू उवओगपरो अ असढभावो अ। संविग्गथिरपइन्नो पच्चक्खाविंतओ भणिओ १६२९

कृतिकर्मादिविधिज्ञः–वन्दनाकारादिप्रकारज्ञः उपयोगपरश्च अशठभावश्च संविग्नो–मोक्षार्थी स्थिरप्रतिज्ञः प्रत्याख्यापयिता–शिष्य एवम्भूतो भणितः ॥ १६२९ ॥

इत्थं पुण चउभंगो जाणगइअरंमि गोणिनाएणं। सुद्धासुद्धा पढमंतिमा उ सेसेसु अ विभासा ॥१६३०॥

अत्र प्रत्याख्यातुः प्रत्याख्यापयितुश्च चतुर्भङ्गः–जानन् जानतः प्रत्याख्यानं कारयति शुद्धं प्रत्याख्यानं, जानन् अजानतो ज्ञापयित्वा कारयति, यथा तेऽमुकं प्रत्याख्यातं इति शुद्धं, अजानन् जानतः अयमपि तथाविधगुरोरभावे गुरुभक्त्या गुरोः स्थाने पित्रादिकं साक्षिणं कुर्वन्‌ः शुद्धः, अन्यथा त्वशुद्धः, अजानन्नजानतोऽशुद्धमेव, अत्र दृष्टान्तो गावः, यदि यवां प्रमाणं

स्वामी विजानाति गोपालोऽपि जानाति तदा द्वयोर्जानतोः स्वामी सुखं भृतिं ददाति गोपालश्च गृह्णाति, शेषयोर्मध्ययोर्विभाषा ॥ १६३० ॥ उक्तः प्रत्याख्याता, प्रत्याख्यातव्यमुक्तमप्यध्ययने द्वाराशून्यार्थमाह—

दव्वे भावे य दुहा पच्चक्खाइव्वयं हवइ दुविहं । दव्वंमि अ असणाई अन्नाणाई य भावंमि ॥ १६३१ ॥

द्रव्ये प्रत्याख्यातव्यमशनादि, अज्ञानादि तु भावे ॥ १६३१ ॥ अथ परिषदमाह—

सोउं उवट्ठियाए विणीयवक्खित्ततदुवउत्ताए । एवंविहपरिसाए पच्चक्खाणं कहेयव्वं ॥ १६३२ ॥

श्रोतुं सम्यग् उपस्थिताया विनीताया अव्याक्षिप्तायास्तदुपयुक्तायाः परिषदः ॥ १६३२ ॥ अथ कथनविधिरुच्यते—पूर्वं मूलगुणरूपः साधुधर्म्मः कथ्यते, तदशक्तस्य श्राद्धधर्म्मः, उत्तरगुणेष्वपि पाण्मासिकमादौ कृत्वा यद् यस्य योग्यं तत्तस्य दातव्यं, अथवायं कथनविधिः—

आणागिज्झो अत्थो आणाए चेव सो कहेयव्वो । दिट्ठंति उ दिट्ठंता कहणविहि विराहणा इयरा ॥१६३३॥

आज्ञा—आगमस्तद्ग्राह्यः—तद्विनिश्चेयः अर्थः, अनागतातिक्रान्तप्रत्याख्यानादिः आज्ञयैव आगमेनैव असौ कथयितव्यः न दृष्टान्तेन, तथा दार्ष्टान्तिकः—दृष्टान्तपरिच्छेद्यः प्राणातिपाताद्यनिवृत्तानां एते दोषाः स्युः, एवमादिर्दृष्टान्तात्—दृष्टान्तेन कथयितव्यः, कथनेऽयं विधिः, विराधना इतरथा ॥ १६३३ ॥ अथ फलमाह—

पच्चक्खाणस्स फलं इहपरलोए अ होइ दुविहं तु । इहलोइ धम्मिलाई दामन्नगमाई परलोए ॥१६३४॥

इहलोके धम्मिलादय उदाहरणं, दामन्नकादयः परलोके, धम्मिलज्ञातमिदं—कुशाग्रपुरे सार्थवाहसुरेन्द्रदत्तभार्यासुभद्रासुतो धम्मिलः द्वासप्ततिकलादक्षो यौवने धर्म्मपरोऽनिच्छन्नपि यशोमतीं कन्यां परिणायितः पित्रा, विषयपराङ्मुखो बलान्मात्रा दुर्ललितगोष्ठ्यां क्षिप्तः, वसन्ततिलकावेश्यासक्तः पित्रादिपूरितधनो द्वादशाब्दीं तत्रैव तस्थौ। निर्द्धनत्वेऽक्कया त्यक्तः, मातापित्रोर्म्मरणं पत्न्याः पितृगृहगमनं च, स ज्ञात्वा दुःखी मृत्यर्थमुद्याने गतः, तत्र चागडदत्तराजर्षेर्नत्वा स्वदुःखमकथयत्, साधुना आसक्तानां दुःखस्य किं वाच्यं इति स्वचरित्रकथनपूर्वकं बोधितोऽपि न विषयेच्छामत्यजत्, तपसेष्टप्राप्तिरिति च मुनिवचः श्रुत्वा द्रव्यसाधुलिङ्गमादाय षण्मासान् आचाम्लान्यकरोत्, ततो मुनिं नत्वा वेषं मुक्त्वा भूतगृहपर्वतकन्दरं गतः, सुप्तस्य तस्य देवी आख्यत्—अस्मात्तपसः खेचरामात्यनृपाणां द्वात्रिंशत्कन्यास्त्वं प्राप्स्यसि, अथ काचित् स्त्री द्वारे आगत्य ऊचे—भो धम्मिल्ल ! इहागच्छ रथमारुह इत्याकर्ण्य रथारूढः प्रयाति प्रातस्तं पिशाचप्रायं दृष्ट्वा रथान्तःस्था कन्या धात्रीं निर्भर्त्सयति स्म, ग्रामे क्वापि हयं सशल्यं चिकित्सितवान्, धम्मिल्लो हयस्वामिना सत्कृतो रात्रिं स्थापितः, धम्मिल्लपृष्टा धात्री कन्याचरित्रमाह—मागधपुरेऽमित्रदमनस्य राज्ञः सुता विमला, इयं च पुरुषद्वेषिणी सुरेन्द्रदत्ताङ्गजं धम्मिल्लं दृष्ट्वा रक्ता भूतगृहे पाणिग्रहणार्थं स सङ्केतितोऽपि नागात्, त्वामिहागतं दृष्ट्वा विरक्ता इयं, अहं त्वस्या धात्री कमला, क्रमेण त्वयि रक्तामिमां करिष्यामि, चम्पायां गतो नृपसुतरविशेखरेण कलावानिति अभ्यर्थ्य प्रासादे धनपूरिते स्थापितः, धम्मिल्ले प्रियानुरक्ताऽभूत्, तत्र राजसुता कपिला परिणीता, एवमपरा अपि परिणीताः। यशोमतीवसन्ततिलकादिचतुस्त्रिंशद्वधूभोगान् बुभुजे, प्राग्भवे स वसुनन्दः पञ्च मत्स्यान् रक्षितवान्, ततो मृतः पल्लीपतिसुतोऽनशनेन

धम्मिल्लो जातस्त्वं इति धर्म्मरुचिगुरुवचः श्रुत्वा विरक्तः प्रव्रज्याऽच्युते गत्वा ततश्च्युत्वा महाविदेहे सेत्स्यति, आदि-शब्दादामर्षौषध्यादयो गृह्यन्ते । दामन्नकज्ञातं यथा-राजपुरे कुलपुत्रको मत्स्यमांसं प्रत्याख्याय दुर्भिक्षे मृतोऽनशनेन राजगृहे मणिकरश्रेष्ठिसुतो दामन्नको जातः, मार्या कुलमुच्छिन्नं, स क्रमेण सागरपोतसार्थवाहगृहस्वामी जातः, धर्म्मानुष्ठानेन स्वर्गतः ॥ १६३४ ॥ अथ प्रधानफलमाह—

पच्चक्खाणमिणं सेविऊण भावेण जिणवरुद्दिट्ठं । पत्ता अणंतजीवा सासयसुक्खं लहुं मुक्खं ॥ १६३५ ॥

सुगमा ॥ १६३५ ॥ नयमतमाह—

नायंमि गिण्हियव्वे अगिण्हियव्वंमि चेव अत्थंमि । जइअव्वमेव इह जो उवएसो सो नओ नाम ॥१६३६॥

ज्ञाते ग्रहीतव्ये-उपादेये अगृहीतव्ये-हेये उपेक्षणीये चशब्दाक्षिप्ते ज्ञाते एवार्थे ऐहिकामुष्मिके यतितव्यमेव इति य उपदेशो ज्ञानप्राधान्यख्यापनपरः स नयो ज्ञाननयः, अयं च सम्यक्त्वश्रुतसामायिकद्वयमेवेच्छति ज्ञानात्मकत्वादस्य, तथा ज्ञाते गृहीतव्येऽग्रहीतव्ये चार्थे यतितव्यमेव इति य उपदेशः क्रियाप्राधान्यख्यापनपरः स क्रियानयः, अयं च देशविरतिसर्वविरतिसामायिकद्वयमेवेच्छति । ननु किमत्र तत्त्वं ?, उच्यते—

सव्वेसिंपि नयाणं बहुविहवत्तव्वयं निसामित्ता । तं सव्वनयविसुद्धं जं चरणगुणट्ठिओ साहू ॥ १६३७ ॥

ततः सर्वनयविशुद्धं–सर्वनयसम्मतं वचनं यच्चरणगुणस्थितः साधुः, यस्मात् सर्वनया भावनिक्षेपमिच्छन्ति ॥ १६३७ ॥
इति प्रत्याख्याननिर्युक्त्यवचूर्णिः ॥ आद्यपञ्चविंशति[हस्तलिखितावश्यकनिर्युक्ति]पत्रसत्का तु किञ्चित्सविस्तरा ॥

श्रीमत्तपागणनभोङ्गणभास्कराणां, श्रीदेवसुन्दरयुगोत्तमपादुकानां ।
शिष्यैर्जिनागमसुधाम्बुधिलीनचित्तैः, श्रीज्ञानसागरगुरूत्तमनामधेयैः ॥ १ ॥

खाब्धियुगेन्दु १४४० मितेऽब्देऽवचूर्णिरावश्यकस्य जयिनी। विदधे वृद्धविवरणात् श्रुतभक्त्या स्वपरहितहेतोः ॥ २ ॥

समाप्ता चेयं श्रीआवश्यकश्रुतस्कन्धनिर्युक्त्यवचूर्णिराचार्यश्रीहरिभद्रसूरिकृतवृत्त्यनुसारेण भट्टारकश्रीज्ञानसागर-सूरिविरचिता ॥ छ ॥

॥ इति सिरिभद्दबाहुसामीविरइया पच्चक्खाणनिज्जुत्ती सम्मत्ता ।

परिशिष्ट नंबर – १

आवश्यक सूत्र अंगेना ग्रंथोनी यादी

मूलसूत्र १

आवस्सय – आवश्यकसूत्र

चोथुं आवश्यक अनुसरतां, केवली चंदनबाळा ।
अल्पागम तप क्लेश ते जाणो, बोले उपदेशमाळा ॥ १ ॥
आवश्यक आराधिये, षट् अध्ययने खास ।
नमन स्तवन पूजन करी, आतम (नो) सुप्रकाश ॥ २ ॥

आवश्यक सूत्र ते ' सामायिक, चतुर्विंशतिस्तव (लोगस्स), वंदनक, प्रतिक्रमण, कायोत्सर्ग (प्रायश्चित्त) अने प्रत्याख्यान ' ए छ विषयोने आवश्यक कहे छे. तेनी श्लोक संख्या १३० छे अने तेना कर्त्ताः – गणधर महाराज श्री ' सुधर्मास्वामीजी ' महाराज छे.

'आवश्यक निर्युक्ति 'ना कर्त्ताः – श्री भद्रबाहुस्वामीजी महाराज छे. तेनी गाथा २५५० अने श्लोक ३१०० प्रमाण छे.

'आवश्यक मूळ भाष्य ' (लघु) गाथा १८३ श्लोक २२५ लगभग.

'आवश्यक मूळ भाष्य ' (मध्यम) गाथा ३०० श्लोक ३७५ लगभग.

'आवश्यक मूळ भाष्य ' (बृहत्) बीजुं नाम 'विशेष आवश्यक भाष्य ' गाथा ३६२५ श्लोक ४००० कर्त्ताः 'श्री जिनभद्रगणिक्षमाश्रमण महाराज. ' छपायुं छे. प्रकाशकः 'श्री यशोविजयजी जैन ग्रंथमाळा. '

'आवश्यक चूर्णि ' कर्त्ताः श्री जिनभद्रगणिमहत्तर गाथा १३६०० श्लोक १८४६४. छपायुं छे. बे भाग. प्रकाशकः श्री ऋषभदेवजी केशरीमलजीनी पेढी, रतलाम.

'आवश्यक मूळ अने निर्युक्ति मूलभाष्य अने त्रणे उपर 'शिष्यहिता ' टीका श्लोक २२००० त्रण भाग. छपायुं छे. प्रकाशकः श्री आगमोदय समिति, सूरत.

'आवश्यक निर्युक्ति दीपिका ' कर्त्ताः श्री माणिक्यशेखरसूरि श्लोक ११७०० छपायुं छे. त्रण भाग–प्रकाशकः – श्री विजयदानसूरीश्वरजी जैन ग्रंथमाळा सूरत, संशोधक : पं. श्री. मानविजयजी गणि, जेओए आ अवचूर्णिनुं संपादन करी आप्युं छे. आ विषयना निष्णात होवाथी तेओश्रीने संपादननुं कार्य फंड तरफथी सोंपवामां आव्युं छे.

'आवश्यक सूत्रवृत्ति' कर्त्ताः—श्री मलयगिरिसूरि श्लोक २२००० छपायुं. प्रकाशकः—श्री आगमोदयसमिति, सूरत.

'आवश्यक लघुवृत्ति' कर्त्ताः श्री तिलकाचार्य सं. १२९६. पाटण, अमदावादना ज्ञानभंडारमां छे. छपाई नथी; तेना आदि अने अंत भागनो आ बीजा भागमां परिशिष्ट बीजामां समावेश करवामां आव्यो छे.

'आवश्यक अवचूर्णि' कर्त्ताः श्री ज्ञानसागरसूरि सं. १४४० पाटण, अमदावादमां छे. जे आ ग्रंथ तरीके प्रकाशित थाय छे.

'आवश्यक सूत्र अवचूरि' कर्त्ताः श्री शुभवर्धन गणि अमदावादना ज्ञानभंडारमां छे; ते अप्रसिद्ध अने अमुद्रित छे.

'आवश्यक सूत्र भाष्य पर टिप्पनक' कर्त्ताः श्री मलधारी गच्छीय आ. श्री हरिभद्रसूरि श्लोक ४६४० छपायेल छे.

'आवश्यक सूत्र भाष्य पर भाष्य' कर्त्ताः कोटयाचार्य मुद्रित थयेल छे. कोट्याचार्यनी बीजी वृत्ति पण जाणवामां आवी छे. प्रायः ए पण होय.

'विशेषावश्यक भाष्य पर शिष्यहिता वृत्ति' कर्त्ताः—मलधारी गच्छीय आ. हेमचंद्रसूरि श्लोक २८००० पाटण अमदावाद, पूनाना ज्ञानभंडारमां छे. तेनो प्रत 'विशेषावश्यक (जीर्ण) वृत्ति' श्लोक १४०००. पाटण भंडारमां छे. तेनो उद्धार करवा जेवो छे.

'आवश्यक सूत्र (षड् आवश्यक) वृत्ति अपरनाम 'वंदारुवृत्ति' कर्त्ताः—श्री देवेन्द्रसूरि श्लोक प्रायः ५००० छपायेली छे.

'आवश्यक सूत्र (षड् आवश्यक) वृत्ति ' अपरनाम ' अर्थदीपिका ' कर्त्ताः श्री रत्नशेखरसूरि छपायेल छे.

' आवश्यक (षड् आवश्यक विधि) ' कर्त्ताः अंचलगच्छीय महिमासागरजी—श्लोक २३७५ पुना भंडारमां छे. अप्रसिद्ध छे.

' आवश्यक सूत्र लघुवृत्ति ' कर्त्ताः आ. श्री फलप्रभसूरि श्लोक ३००० पूनाना ओरि. ई. मां छे. अप्रसिद्ध छे.

आवश्यक सूत्रमां दर्शावेल छ आवश्यकनी पृथक् पृथक् विभागमां पूर्वाचार्यो कृत जुदी जुदी रीते रचना थई छे; ते क्रमशः अने क्यां क्यां प्राप्य छे ते आपवामां आवे छे—

१ ' **सामायिक सूत्र** ' मूलसूत्र ' करेमिभंते '

' सामायिक सूत्र निर्युक्ति, वृत्ति अने उद्धार ' ताडपत्र पर प्रत पाटण सूचिपत्र २९५ अने ३०३ छे.

२ ' **चउव्विसत्थो सूत्र** ' चतुर्विंशति सूत्र मूल सूत्र ' लोगस्स ' परनी निर्युक्ति अने उद्धारनी प्रत पाटण ज्ञानभंडारमां छे.

' चैत्यवंदन ' ललितविस्तरा वृत्ति ' कर्त्ताः श्री हरिभद्रसूरिजी श्लोक १२७० पहेलां छपाई छे; ते पछी सटीप्पण ' ललितविस्तरा ' आ. श्री. सागरानदसूरिजीए छपावेल छे. टीप्पण तेमनुं पोतानुं छे. आनो अनुवाद तेमज ' ललितविस्तरा ' परनुं श्री मुनिचंद्रसूरिकृत ' टिप्पनक ' ए बंने छपायां छे. अनुवादकः—पं. श्री भानुविजयजी गणि. प्रायः ' ललितविस्तरा ' नुं गुजराती विवरण डॉ. भगवानदासे श्री जैन एसोसिएशन ऑफ इन्डिया द्वारा प्रकाशित कर्युं छे.

' चैत्यवंदन पंजिका अने वृत्ति ' कर्त्ताः श्री हरिभद्रसूरिजी पाटण भंडारमां छे, छपाई गई छे.

' चैत्यवंदन महाभाष्य ' कर्त्ताः श्री शान्तिसूरि गाथा ९२२ आ अने ते परनी वृत्ति ए बंने पाटण भंडारमां छे, आमांनुं महाभाष्य मुद्रित छे.

' चैत्यवंदनभाष्य वृत्ति ' अपरनाम ' संघाचार वृत्ति ' कर्त्ताः आ. धर्मघोषसूरि (श्री देवेन्द्रसूरि शिष्य – पट्टधर) गाथा ८५०० श्लोक ९७५०. बे भागमां छपायुं छे.

' चैत्यवंदनावचूर्णि कर्त्ताः सोमसुंदरसूरि श्लोक १०२७ मुद्रित थयेल छे.

' चैत्यवंदनावचूर्णि ' कर्त्ताः XXXXX श्लोक ४२५ पूना भंडारमां छे.

' चैत्यवंदन भाष्य (लघु) ' कर्त्ताः श्री पार्श्वचंद्रसूरि श्लोक १०८ पूना भां. ओरि. ई. मां छे.

' चैत्यवंदन चूर्णि ' कर्त्ताः श्री सौभाग्य . पाटण भंडारमां छे.

' चैत्यवंदन विवरण ' कर्त्ताः श्री रत्नप्रभसूरि श्लोक ८४० जेसलमेरमां छे.

' चैत्यवंदन ' साधुवंदन ' श्री प्रतिक्रमणसूत्र वृत्ति कर्त्ताः श्री पार्श्वचंद्रसूरि श्लोक २००० पाटण भंडारमां छे. आ वृत्ति प्राचीन छे.

' चैत्यवंदन चूर्णि ' कर्त्ताः श्री यशोदेवसूरि श्लोक ८४० सं. १७७४, पाटण ज्ञानभंडारमां छे.

' चैत्यवंदन सूत्र वृत्ति ' कर्त्ताः श्री तिलकाचार्य, पाटणमां छे

' चैत्यवंदन सूत्रवृत्ति ' कर्त्ताः खर० श्री. तरुणप्रभसूरि श्लोक ७००० सं. १३३१ तेनुं बीजुं नाम ' बालबोधा ' पण छे.

३ ‘ वंदनक ’ पर ‘ निर्युक्ति, चूर्णि, भाष्य, वृत्ति, स्तवोद्धार अने आलापक ’ ए छ कृतिओ पाटण भंडारमां छे.

‘ वंदनक अवचूर्णि ’ कर्त्ताः यशोदेव श्लोक ७२० पाटणमां छे.

‘ वंदनकवृत्ति ’ कर्त्ताः श्री तिलकाचार्य पाटणमां छे. आ उपरांत आवश्यक साथे तेनी वृत्ति, अवचूरि पण छे ते षड् आवश्यक सूत्रमांथी जाणवी.

‘ वंदन, प्रतिक्रमण अवचूरि ’ प्रकाशकः—देवचंद लालभाई सूरत.

४ चोथुं ‘ प्रतिक्रमण ’ आवश्यकना बे प्रकार छेः (१) साधु माटे अने (२) श्रावक माटे. तेनुं कारण ए छे के—साधुने पांच महाव्रत आलोववानां होय छे, ज्यारे श्रावकने समकित मूल बार व्रत आलोववानां होय छे. आ कारणे ए बंनेना कोई कोई ग्रंथो जुदा पण छे.

‘ साधु श्राद्ध प्रतिक्रमण सूत्र पद पर्याय मंजरीओ ’ नी प्रत पाटण ज्ञानभंडारमां छे. तेनी साथे चैत्यवंदनादि सूत्र पण छे. कर्त्ताः श्री अकलंकदेव श्लोक ५००.

‘ साधु श्राद्ध प्रतिक्रमण चैत्य गुरुवंदन अवचूरि ’ नी प्रत लींबडी ज्ञानभंडारमा छे. श्लोक ८०० अप्रसिद्ध छे.

‘ साधु प्रतिक्रमण वृत्ति ’ कर्त्ताः श्री तिलकाचार्य श्लोक २९६ पाटणना भंडारमां छे.

‘ साधु प्रतिक्रमण वृत्ति ’ कर्त्ताः खर० श्री जिनप्रभसूरि श्लोक ९४८ पाटण ज्ञानभंडारमां छे.

‘ साधु प्रतिक्रमण सूत्र वृत्ति ’ कर्त्ताः पार्श्वदेवसूरि श्लोक ६७२ पाटण ज्ञानभंडारमां छे.

‘ श्रावक प्रतिक्रमण सूत्र ’ अपरनाम ‘ वंदित्तासूत्र ’ गणधरकृत गाथा ५० श्लोक ६० सुलभ.

'श्रावक प्रतिक्रमण सूत्र चूर्णि' कर्त्ताः पिपलीया गच्छना श्री विजयसिंहसूरि श्लोक ४५९० सं. ११८३ पाटण ज्ञानभंडारमां छे.

'श्रावक प्रतिक्रमण सूत्र वृत्ति' कर्त्ताः श्री चंद्रसूरि श्लोक १९५० सं १२२२ पाटणमां छे.

'श्राद्ध प्रतिक्रमण सूत्र लघुवृत्ति' कर्त्ताः श्री तिलकाचार्य श्लोक २०० पाटण, खंभात, अमदावादमां छे.

'श्राद्ध प्रतिक्रमण सूत्र वृत्ति' कर्त्ताः श्री पार्श्वसूरि श्लोक ५७७ सं. ९५६ पाटण भंडारमां छे.

'श्रावक प्रतिक्रमण सूत्र वृत्ति' कर्त्ताः तपा० श्री जिनहर्ष गणि श्लोक ७१८ सं. १५२५ आ एक ज प्रत पूना भां० प्राच्य विद्यामंदिरमां छे. तेनी साथे 'श्री प्रतिक्रमण सूत्र अवचूरि' कर्त्ताः तपा० कुलमंडनसूरि श्लोक १६२० नी छे. जे पूना भां० प्रा. वि. मां छे.

'प्रतिक्रमण वृत्ति' कर्त्ताः श्री सिंहदत्तसूरि (दिगं०) पाटण ज्ञानभंडारमां छे.

'प्रतिक्रमण क्रमविधि' कर्त्ताः आ० जयचंद्रसूरि श्लोक ९०० सं. १५०६ पाटण ज्ञानभंडारमां छे. छपाई पण छे.

'प्रतिक्रमण संग्रहिणी' गा० १०० श्लोक ११५ पूना भां० प्रा० वि. मां० छे.

'ईर्यापथिकी' अपरनाम 'ईर्यावही' सूत्रचूर्णि कर्त्ताः यशोदेवसूरि श्लोक १५० पाटण ज्ञानभंडारमां छे.

५ आवश्यक सूत्र पांचमा आवश्यक 'कायोत्सर्ग' संबंधी ग्रंथरचनानो अत्र निर्देश करेल छे—

'कायोत्सर्ग आवश्यक सूत्र' निर्युक्ति, भाष्य उद्धारनी प्रत पाटण ज्ञानभंडारमां छे. आ एक ज प्रत छे.

आने लगतुं स्वतंत्र लखाण जुदुं जणातुं नथी ने माटेनुं ते लखाण षड् आवश्यक साथे ज छे, त्यांथी जाणी लेवुं.

६ छट्ठा आवश्यक ' प्रत्याख्यान ' सूत्र संबंधी संपूर्ण साहित्य ' प्रत्याख्यान सूत्र, निर्युक्ति, भाष्य, चूर्णि, वृत्ति, ' उद्धारविचार ' नी प्रत पाटण ज्ञानभंडारमां छे.

' प्रत्याख्यान स्वरूप ' कर्त्ताः यशोदेवसूरि श्लोक ५५० सं. ११८३ पाटणमां छे.

' प्रत्याख्यान चूर्णि ' श्लोक ४०० अजमेरमां छे.

' प्रत्याख्यान विचारामृ० कर्त्ताः श्री शालिभद्रसूरि गा० २३७ श्लोक २८० पाटणमां छे.

' प्रत्याख्यान स्थान विवरण ' कर्त्ताः जयचंद्रसूरि श्लोक ७०० पाटण ज्ञानभंडारमां छे.

' सागार प्रत्याख्यान विधि ' ताडपत्र प्रत पाटणमां छे.

उपरोक्त छ आवश्यकनी रचना अने तेनी जुदी जुदी रचना जे जणावी; तेमांनी केटलीक छपाई छे अने केटलीक छपाई नथी. ज्यां सुधी जाणवामां छे त्यां सुधी ते छपायेल तरीके जणावी छे.

विवरणः मुख्य तथा गद्यमां रचायेल आ आगम पर गा० १६२३ श्लोक २५०० प्रमाण विस्तृत अने मार्गदर्शक निर्युक्ति श्री भद्रबाहु स्वामीजीए रची छे. एनी गा० ६०० थी ६४१ सुप्रसिद्ध गणधरवादना बीजनी गरज सारे छे.

आ निर्युक्ति पर बे भाष्य छे: (१) १८३ पद्यमय मूळ भाष्य अने (२) ३०० पद्यमय बीजुं भाष्य.

विशेषमां प्रथम अध्ययन पूरती अने कर्त्ताए जाते ' विसेसावस्सयभास (विशेषावश्यक भाष्य) ' तरीके निर्देशेल मननीय आगमोना अनुरागीने शोभे तेवी तार्किकदृष्टिपूत महामूल्य एवी कृति श्री जिनभद्रगणि क्षमाश्रमणे पद्य ४३३६ श्लोक ५००० प्रमाण रची छे.

आ आगम पर १८५०० श्लोक प्रमाण चूर्णि छे; तेना कर्त्ताः निसीह उपर चूर्णि रचनार श्री जिनदासगणि होवानुं केटलाक विद्वान कहे छे.

जैनशासनना महास्तंभरूप श्री हरिभद्रसूरिजीए आ आवश्यक पर ८४००० श्लोक प्रमाण महाकाय टीका रची हती; ते हजो अप्राप्य छे. परंतु सद्‌भाग्ये एमणे २२००० श्लोक प्रमाण जे 'शिष्यहिता' टीका रची हती ते मळे छे अने ते प्रकाशित पण छे.

विविध उपांगोना वृत्तिकार श्री मलयगिरिसूरिजीए पण आ आगम पर टीका रची छे; परंतु ते अपूर्ण मळे छे; तेम छतां तेनो १८००० श्लोक प्रमाण उपलब्ध भाग मुद्रित थयो छे ते आनंदजनक छे.

आ उपरांत बीजी पण केटलीक वृत्तिओ छे; ए बधीनुं प्रमाण १,००,००० (एक लाख) श्लोक प्रमाण गणाय छे, ते उपरांत आवश्यकना कोइ कोइ विभागने अनुलक्षीने पण वहोळा प्रमाणमां वृत्ति आदि साहित्य योजायुं छे.

पू० आ० तिलकाचार्ये 'श्राद्ध प्रतिक्रमण सूत्र वृत्ति' श्लोक ३०४० रची; ते उपरांत 'साधु प्रतिक्रमण सूत्र वृत्ति' पण तेमणे रची छे.

'श्राद्ध सामायिक प्रतिक्रमण सूत्र व्याख्या प्रकरण' कर्त्ताः श्री विजयदेवसूरि प्राकृत गाथा २९३ श्लोक ३६५ सं. ११८३,

'चैत्यवंदन विचार' गाथाबद्ध छे तेमां चैत्यवंदनमां वपराता सूत्रोनी व्याख्या छे. अमुद्रित छे.

'चैत्यवंदनादि सूत्र' फलप्रदीप टीका श्लोक २४५८ अप्रसिद्ध छे.

'आवश्यक सूत्रना छ पेटा विभाग छे, जेमां दरेक विभागनी अंदर अनेकविध ग्रंथ जोवामां आवे छे.

परिशिष्ट – नंबर २

आवश्यकसूत्रनिर्युक्ति उपर श्री तिलकाचार्यकृतलघुवृत्तिनो आदि विभाग.

॥ ॐ नमः श्रीपञ्चपरमेष्ठिभ्यः ॥

देवः श्रीनाभिसूनुर्जनयतु स शिवान्यंसदेशे यदीये, खेलन्ती कुन्तलाली विलसदलिकुलाभोज्वला शालते स्म।
संजाते संयमश्रीपरिणयनविधौ माङ्गलिक्ये त्रिलोकी, लक्ष्म्या दुर्वाङ्कुराणां ततिरिव पतितोदस्तहस्तद्वयाग्रात् ॥ १ ॥

विश्वाहंकारमर्दी समितिकृतरतिश्चक्रचापाङ्कपाणिः, प्रोद्यद्गीर्वाणशाली व्यपहतविषमास्त्रारिदोर्दण्डकण्डूः।
भक्तिप्राग्भारनम्रक्षितिपतिपटलीमौलिकोटीरकोटी–शाणाकोणाग्रलेखोल्लिखितनखशिखः पातु वीरस्त्रिलोकीम् ॥ २ ॥

नित्यं यत्प्रणिपातसंभ्रमभृतां पादाब्जपीठस्थल-न्यासोल्लासिकिणावलिव्यतिकराद्भालेषु भव्यात्मनाम् ।
एतेऽनन्तमहोमहोदयपदे योग्या इति प्रीतितः, पुण्यर्द्ध्या किल वर्द्धितानि तिलकान्यव्याज्जिनौघः स वः ॥ ३ ॥
यत्कान्ति (न्तेः खलु विश्व) विश्वधवलीकारश्रिया सर्वतः, सध्यानं परिपच्यतेऽधिमनसं शुक्लं तदक्लेशतः ।
येनोत्सर्पति सर्ववाङ्मयगतं ज्ञानं परं तत्क्षणात्, सास्माकं श्रुतदेवता रचयताद् विघ्नोपशान्तिक्रियाम् ॥ ४ ॥
आस्तेऽनन्यतमा मनस्यनुकलं स्वस्वामिभक्तिस्ततो, वासं यस्य चकार पाणिकमले सा केवलश्रीर्ध्रुवम् ।
नैवं चेद्विललास तत्कथमियं सर्वत्र तत्तत्क्षणात्, न्यस्तो यत्र भवेदयं स भगवान् श्रीगौतमो नन्दतात् ॥५ ॥
गवामीशे यत्र प्रवचनधुरां धर्मधवले, स्फुरद्व्याख्यानादि प्रतिहतसमस्तेतरवृषे ।
समारोप्यात्मीयां त्रिभुवनपतिर्निर्वृतिमगा-द्भवारण्यान्निस्तारयतु स सुधर्माभिधगुरुः ॥ ६ ॥
तत्त्वार्थरत्नौघविलोकनार्थं, सिद्धान्तसौधान्तरहस्तदीपाः । निर्युक्तयो येन कृताः कृतार्थ-स्तनोतु भद्राणि स भद्रबाहुः ॥ ७ ॥
तस्यावश्यकनिर्युक्तिगवीं दुहन् वृत्तिभाजनेऽर्थपयः । प्रगुणीकरोमि सरसं, रसलोलुपलोकतुष्टिकृते ॥ ८ ॥
परं क्व द्वादशाङ्गीभृद्भद्रबाहुगुरोर्गिरः ? । मुग्धधीर्वालिशः क्वाहं पदमात्रेप्यशक्तिमान् ? ॥ ९ ॥
तद्यदावश्यकमहं, विवरीतुं मतिं व्यधाम् । तरीतुमारब्धस्तदोर्ष्णैकेन प्रप्लवन्[1] ॥ १० ॥

---

१ क्व प्लवतु ।

महाशास्त्रस्य चामुष्य, महाकविविनिर्मिते, गम्भीरार्थे महत्यौ स्त-श्चूर्णिर्वृत्तिश्च यद्यपि ॥ ११ ॥
तथाप्यत्यल्पधीहेतो-रल्पधीरप्यहं पुनः । रचयिष्याम्यमूं[1] वृत्ति-मुत्तानार्थां लघीयसीम् ॥ १२ ॥
॥ युग्मम् ।
ततोऽत्र यदहं कुर्वे, तत्सर्वं गुरुभक्तिजम् । जानन्तु मावजानन्तु[2], सन्तः सुमनसो मयि ॥ १३ ॥
तथाहि—
संजातेऽवसरेऽधुना श्रुतसुधाधाराकिरो मद्गिरः, सद्यः (प्र) प्लवयन्तु भव्यहृदयारामे प्रबोधद्रुमम् ।
लब्ध्वाऽत्यद्भुतवासनाढ्यसुमनोभावं सदालिप्रियं, यस्तैस्तैः फलितः फलैरविरलैः स्वर्गापवर्गादिभिः ॥ १४ ॥

इहायं शास्त्रवेधसां सुमेधसां शास्त्रसन्दर्भारम्भसंरम्भविधिः यथा सर्वाण्यपि शास्त्राणि मङ्गलाभिधेयसम्बन्धप्रयोजनप्रतिपादनपूर्वाण्येव प्ररूप्यन्ते ।

इदं च शास्त्रमर्हत्प्रणीतार्थत्वात्सकलमपि मंगलरूपमेव । तथाप्यभिनवविनेयोत्साहाय प्रथमगाथया ज्ञानपञ्चकाभिधानरूपं मंगलमाह—

आभिणिबोहियनाणं, सुयनाणं चेव ओहिनाणं च । तह मणपज्जवनाणं केवलनाणं च पंचमयं ॥ १ ॥

१ स्तं । २ वि ।

व्याख्या—अर्थाभिमुखो नियतो[1] बोधो मतिरूपोऽभिनिबोधः । स एव आभिनिबोधिकं 'स्वार्थे इकण्' । आभिनिबोधिकं च तद् ज्ञानं च आभिनिबोधिकज्ञानं-मतिज्ञानमित्यर्थः ।

तथा श्रूयते इति श्रुतं, शब्दः सिद्धान्तो वा, ताभ्यां सकाशाद् ज्ञानं श्रुतज्ञानं, चशब्दोऽनयोस्तुल्यकक्षताद्योती, तुल्यत्वं च य एव मतिज्ञानस्य स्वामी स एव श्रुतज्ञानस्यापि " जत्थ मइनाणं तत्थ सुयनाण " मितिवचनात्, स्थितिकालोऽप्यनयोस्तुल्य एव । अनेकजीवापेक्षया भूतभवद्भाविरूपः सर्वोऽपि । अप्रतिपतितैकजीवापेक्षया च षट्षष्टिसागरोपमाणि साधिकानि, उक्तं च भाष्यकृता—

" दो वारे विजयाईसु गयस्स तिन्निच्चुए अहव ताइं । अइरेगं नरभवियं नाणाजीवाण सव्वद्धम् ॥१॥

तथा द्वे अप्येते क्षयोपशमहेतुके सर्वद्रव्यविषये परोक्षे च, एवोऽवधारणे, एते एव द्वे ज्ञाने परोक्षे नेतराणि, तथा अवधीयते एकाग्रैर्भूयतेऽस्मिन्निति अवधिरेकाग्रता रूपिद्रव्यमर्यादा वा, ताभ्यां ज्ञानमवधिज्ञानम् । चशब्दो मतिश्रुताभ्यां साम्यार्थः, साम्यं चानयोरिवावधेरपि समस्थित्या एकस्वामिकत्वात्, मिथ्यादृग्देवस्य सम्यग्बोधे सति ज्ञानत्रयस्यापि युगपल्लाभाच्च ।

तथा पर्यवनं पर्यवो मनसः पर्यवो मनःपर्यवः । 'उङ् शब्दे' अल् प्रत्ययो अनेकार्थत्वाद्धातूनां, सर्वतो मतिज्ञानत्रयस्वामिनः ? (मनः) पुद्गलावबोधः, स एव ज्ञानं मनःपर्यवज्ञानं, यद्वा मनसः पर्यायाः परिणामविशेषाः पौद्गलिकवस्तुविमर्शनप्रका-

[1] विहितो ।

रास्तेषु ज्ञानं मनःपर्यायज्ञानम् । इदं च मनुष्यक्षेत्रवर्त्तिसंज्ञिमनोगतद्रव्यालम्बनमेव । तथाशब्दोऽवधिज्ञानसाधर्म्यार्थः, साधर्म्यं च छद्मस्थस्वामित्वपुद्गलमात्राश्रयत्वक्षायोपशमिकत्वप्रत्यक्षत्वैः ।

तथा केवलम्—अन्यज्ञाननिरपेक्षम्, असदृशमनन्तं संपूर्णं ज्ञानं केवलज्ञानं, चः समुच्चये, अत्राह—'एषां ज्ञानानां कथमेष क्रमः ? उच्यते स्वस्यैव प्रकाशकत्वात् आदौ मतिज्ञानं, ततः स्वपरप्रकाशकत्वात् श्रुतज्ञानं, तदनन्तरं मतिश्रुतानन्तरभावित्वात् प्रत्यक्षत्वाच्चावधिज्ञानं, ततः संयतानामेव भावान्मनःपर्यवज्ञानम्, अथ क्षायिकत्वात्सर्वोत्तमं केवलज्ञानं पञ्चमकम् । अनयैव च गाथया ज्ञानपञ्चककारणभूतं सामायिकाद्यावश्यकषट्कं अभिधेयं सूचितम्, सम्बन्धश्च शास्त्रार्थयोर्वाच्यवाचकरूपः प्रतीत एव, प्रयोजनं च शिष्याचार्ययोरनन्तरं शास्त्रार्थज्ञानज्ञापनरूपम्, परम्परं च द्वयोरपि महोदयावाप्तिरिति सुज्ञातमेव ॥१॥

अथ प्रथमोद्दिष्टस्याभिनिवोधिकस्य स्वरूपं निरूप्यते, तच्च द्विधा—एकं अश्रुतानिःसृ (निश्रि) तं प्रातिभम् औत्पत्तिक्यादि, वैनयिकी (शास्त्रसंस्पर्श) रहितं, द्वितीयं श्रुतनिःसृ(निश्रि)तं अवग्रहादि, तच्चतुर्द्धा—

उग्गह ईहाऽवाओ य, धारणा एव हुंति चत्तारि, आभिणिबोहियनाणस्स, भेयवत्थू समासेण ॥ २ ॥

अवग्रहः ईहा अवायो धारणा, एवकारः क्रमार्थः, एवमनेन क्रमेण भवन्ति, चत्वारि आभिनिवोधिकज्ञानस्य भेदवस्तूनि—भेदरूपाणि—भेदप्रकारा इत्यर्थः । समासेन—संक्षेपेण । एतत्स्वरूपमेवाह—

अत्थाणं उग्गहणं, उग्गहो तह विआलणं ईहा। ववसायं च अवायं, धरणं पुण धारणं बेंति ॥ ३ ॥

अत्र प्राकृतत्वात्सप्तमी प्रथमार्थे, अर्थानां शब्दादीनां निर्विकल्पकं ग्रहणमवग्रहः। आह-सामान्यविशेषात्मकानामर्थानां कथमादौ दर्शनं न ज्ञानम्? उच्यते, ज्ञानस्य प्रबलावरणत्वात्, स च द्विधा-व्यञ्जनावग्रहोऽर्थावग्रहश्च, व्यज्यतेऽनेनार्थः प्रदीपेनेव घट इति व्यञ्जनं-द्रव्येन्द्रियं कदम्बपुष्पाकारादि शब्दादिपरिणतद्रव्यसंघातश्च। ततो व्यञ्जनेन द्रव्येन्द्रियेण शब्दादिपरिणतद्रव्याणां व्यञ्जनानामवग्रहो व्यञ्जनावग्रहः, नयनमनोवर्जेन्द्रियाणामसौ चतुर्विधो ज्ञेयः, तयोरप्राप्तकारित्वेन पुद्गलस्पर्शाभावात्। इतोऽनन्तरं शब्दादिपुद्गलसङ्गतेन द्रव्येन्द्रियेणार्थानां शब्दादीनामवग्रहोऽर्थावग्रहः। तथेत्यानन्तर्ये शब्दाद्यर्थग्रहणे सति-विचारणं-विमर्शः-किमयं शब्दः शाङ्खः शार्ङ्गो वेति मतिविशेष ईहा। विशिष्टोऽवसायोऽध्यवसायो निश्चयः, माधुर्यादिगुणत्वात् शाङ्ख एवायम्, कर्कशादिगुणत्वात् शार्ङ्ग एवावधारणात्मकः प्रत्ययोऽवायः। धरणं-परिच्छिन्नस्यार्थस्याविच्युति-स्मृति-वासनारूपं धारणा इति ब्रुवते तीर्थकरगणधरा इति भावः। एवं शेषेन्द्रियाणामपि स्थाणुपुरुषकुण्डोत्पलसंभूतकरिल्लमांससर्पोत्पलनालादौ अवग्रहादयो वाच्याः। एवं मनसोऽपि स्वप्नेन्द्रियव्यापाराभावे वा चिन्तयतः शब्दादिविषयावग्रहादयो ज्ञेयाः। अर्थावग्रहः ईहादयश्च सर्वेन्द्रियमनःसम्भवत्वात्षोढा, सर्वे सङ्कलिताः अष्टाविंशतिर्मतिज्ञानभेदाः ॥ ३ ॥

अवग्रहादीनां कालमानमाह—

उग्गह इक्कं समयं, ईहावाया मुहुत्तमध्धं तु। कालमसंखं संखं च धारणा होइ नायव्वा ॥ ४ ॥

जघन्यो नैश्चयिकोऽर्थावग्रहः एकं समयं परमसूक्ष्मकालरूपं, व्यवहारतस्तु द्वावप्यर्थावग्रहव्यञ्जनावग्रहौ अन्तर्मुहूर्त्तं भवतः।

ईहावायौ ' मुहुत्तमद्धं ' अर्द्धमुहूर्त्तं, ' मुहुत्तमंतं तु ' इति पाठान्तरात्तत्त्वतः पृथक्पृथक् द्वावप्यन्तर्मुहूर्त्तं, कालमसङ्ख्यमसङ्ख्यवर्षायुषां पल्योपमादेर्जी(र्दि्जी)विनां, सङ्ख्यातं च सङ्ख्यातवर्षायुषां, धारणा वासनारूपा, चशब्दाद्विच्युतिरूपा स्मृतिरूपा च धारणा अन्तर्मुहूर्त्तं भवति ज्ञातव्या ॥ ४ ॥

अथ श्रोत्रेन्द्रियादीनां प्राप्ताप्राप्तविषयतामाह—

पुट्ठं सुणेइ सद्दं, रूवं पुण पासई अपुट्ठं तु । गंधं रसं च फासं च, बद्धपुट्ठं वियागरे ॥ ५ ॥

स्पृष्टं भावेन्द्रियाख्ये श्रोत्रेन्द्रियलग्नमात्रं तनौ रेणुवत्, तस्य घ्राणादिभ्यः पटुतरत्वात्, शृणोति गृह्णाति शब्दं शब्दप्रायोग्यभाषापुद्गलसङ्घातं, रूपं पुनः पश्यत्यस्पृष्टं तुशब्द एवकारार्थः, ततोऽस्पृष्टमेव—अलग्नमेव, चक्षुषोऽप्राप्तकारित्वात्, यदि तु स्पृष्टं पश्येत्तदा स्वपक्ष्मपुटतरा(टन्यस्ता)ञ्जनमन्तःक्षिप्तमौषधं वा पश्येन्न च पश्यति, पुनःशब्दो विशेषणार्थः, किं विशिनष्टि? अस्पृष्टमपि योग्यदेशावस्थितं न पुनरयोग्यदेशावस्थितमन्तरितादि, अनन्तरितमपि परमाण्वादिकं अमूर्त्तं स्वविषयाद्दूरस्थं वा न पश्यति। गन्धं रसं च स्पर्शं च। बद्धस्पृष्टं प्राकृतत्वाद्व्यत्यये स्पृष्टबद्धं, स्पृष्टं—लग्नं ततो बद्धम्—आश्लिष्टं, आश्लि — तोयवदात्मप्रदेशैरात्मीकृतं घ्राणरसनास्पर्शेन्द्रियाणि जानन्तीति व्यागृणीयात्—ब्रूयात्, योग्यदेशावस्थितं रूपं चक्षुः पश्यतीत्युक्तं स चायं योग्यो देशः, चक्षुषो जघन्येनाङ्गुलसङ्ख्येयभागः, अत्यासन्नस्थपक्ष्मन्यस्ताञ्जनादेरदर्शनात्, उत्कृष्टतः स्वाङ्गुलनिष्पन्नं साधिकं योजनलक्षम्। श्रोत्रस्य द्वादशयोजनागतशब्दः, घ्राणरसनास्पर्शनेन्द्रियाणां नवयोजनागतं वस्तु, जघन्यतोऽङ्गुलासङ्ख्ये-

यभागागतं, मनसस्तु केवलज्ञानस्येव क्षेत्रतो न विषयपरिमाणं सर्वगतत्वात् ॥५॥ 'स्पृष्टं शृणोति शब्द'मित्युक्तं तत्किं भाषकोत्सृष्टान्येव शब्दद्रव्याणि गृह्णाति उतान्यानि तद्वासितानि मिश्राणि वेत्याशङ्क्याह—

भासासमसेढीओ, सद्दं जं सुणइ मीसयं सुणई। वीसेढी पुण सद्दं, सुणेइ नियमा पराघाए ॥ ६ ॥

भाषकेण शब्दतयोत्सृज्यमाना शब्दपुद्गलसंहतिर्भाषा, तस्याः समश्रेणीतः, षट्सु दिक्षु समपङ्क्तिगतः श्रोता यं शब्दं शृणोति तं भाषकोत्सृष्टशब्दपुद्गलभावितान्तरालस्थशब्दद्रव्यमिश्रं श्रोत्रेन्द्रियेणादत्ते, विश्रेणिगतः-विदिग्गतः पुनः पराघाते सति, सप्तमी तृतीयार्थे, भाषकोत्सृष्टशब्दद्रव्यैः पराघातेन अभिघातेन वासितमेव शब्दपुद्गलराशिं शृणोति न पुनरुत्सृष्टं मिश्रं वा तेषामनुश्रेणिगमनात् प्रतिस्खलनाभावाच्च ॥ ६ ॥

केन पुनर्योगेन वाग्द्रव्याणि गृह्णाति उत्सृजति वेत्याशङ्क्याह—

गिण्हइ य काइएणं, निसिरइ तह वाइएण जोगेणं। एगंतरं च गिण्हइ, निसिरइ एगंतरं चेव ॥ ७ ॥

गृह्णाति-आदत्ते वाग्द्रव्याणि, च एवार्थे स चाग्रे योज्यते, कायिकेनैव, तथेत्यनन्तरं निसृजति-मुञ्चति वाचिकेन योगेन, किमत्र वाग्द्रव्यनिसर्गे कायव्यापारो नास्ति ?, उच्यते, आत्मा येन कायव्यापारेण शब्दद्रव्याण्यादत्ते स कायिको योगः, येन तु कायसंरम्भेण तानि मुञ्चति स वाचिकः, येन मनोद्रव्याणि मन्यते मनस्त्वेन परिणमयति स मानसः इति कायव्यापार एव व्यवहारार्थं त्रिधोच्यते। एकान्तरं च गृह्णाति, निसृजत्येकान्तरं चैव, अत्रायं भावः-एकेन समयेन अन्तरं, विचालिको

यत्र प्रथम समये वाग्द्रव्यनिसर्गस्य चरमसमये च वाग्द्रव्यादानस्य तदैकान्तरं, मध्यमसमयेषु च प्रतिसमयं शुभाशुभकर्मादाननिसर्गक्रियावत् उत्पादव्ययक्रियावत् अङ्गुल्याकाशदेशसंयोगविभागक्रियावच्च वाग्द्रव्यादाननिसर्गरूपं युगपत् क्रियाद्वयं भवति ॥७॥

गृह्णाति कायिकेनेत्युक्तं स च काययोगः पञ्चधा तत्केन गृह्णातीत्याह—

तिविहंमि सरीरम्मि, जीवपएसा हवंति जीवस्स । जेहि तु गिण्हइ गहणं, तो भासइ भासओ भासं ॥८॥

त्रिविधे शरीरे जीवस्यापृथग्भूताः प्रदेशा जीवप्रदेशा भवन्ति जीवस्य न तु शरीरवत् पृथग्भूताः यैस्तु गृह्णाति, तुशब्दो विशेषणे न सदैवादत्ते किन्तु आदानपरिणामे सति ग्रहणं, शब्दद्रव्यनिवहमादत्ते, ततो भाषते भाषको भाषां, भाषेत्यधिकमिति चेत्, न, भाष्यमाणैव हि भाषा, न पूर्वं पश्चाद्वेति ज्ञापनाय भाषाग्रहणम् ॥८॥

त्रिविधे शरीर इत्युक्तं किं तत्त्रैविध्यमित्याह—

ओराल(लिय)वेउव्विय-आहारो गिण्हई मुअइ भासं । सच्चं मोसं सच्चा-मोसं च असच्चमोसं च ॥९॥

औदारिकं शरीरं विद्यते यस्य 'अभ्रादित्वान्मत्वर्थीयेऽचि' औदारिकः, एवं वैक्रियः आहारकश्च गृह्णाति मुञ्चति भाषां भाषात्वपरिणतद्रव्यसंहतिं, किंरूपां ? सत्यां मृषां सत्यामृषां 'मिश्रां' असत्यामृषां-आगच्छ देवदत्तेत्यादिकां । भाषाव्याप्तिप्रश्नस्वरूपमाह—

हिं समएहिं लोगो, भासाइ निरंतरं तु होइ फुडो । लोगस्स य कइभागे, कइभागो होइ भासाए ॥१०॥

कतिभिस्समयैर्लोकश्चतुर्दशरज्ज्वात्मको भाषया शब्दपुद्गलरूपया निरन्तरं तु भवति स्पृष्टः, लोकस्य च कतिभागे कियत्प्रमाणे भागे कतिभागो भवति भाषायाः ? ॥१०॥

उत्तरमाह—

चऊहिं समएहिं लोगो, भासाए निरंतरं तु होइ फुडो। लोगस्स य चरमंते, चरमंतो होइ भासाए ॥ ११ ॥

चतुर्भिः समयैरिति भणनात् त्रिभिः पञ्चभिः समयैरित्यपि ज्ञेयम्, तुलामध्यग्रहणवत्, तत्र त्रिभिः स्पृष्ट उच्यते—लोकमध्यस्थमहाप्रयत्नवक्तृनिसृष्टानि वाग्द्रव्याणि सूक्ष्मत्वाद्बहुत्वाच्चानन्तगुणवृद्ध्या वर्धमानानि प्रथमसमय एव दण्डाकाराणि षट्सु दिक्षु लोकान्तमाप्नुवन्ति, जीवपुद्गलयोरनुश्रेणिगतिरितिवचनात्, द्वितीयसमये त एव षट् दण्डाश्चतुर्दिशमेकैकशो वर्धमाना षण्मन्थाना भवन्ति, तृतीयसमये त्वन्तरालपूरणात्पूर्णो लोकः स्यात्। यदा तु दिगन्ते नाडीबहिःस्थितो वक्ता कश्चिद्देवो वक्ति तदाद्यसमये चतुरङ्गुलबाहल्यो रज्ज्वायामो भाषाणुराशिर्दण्डाकारः संमुखदिगन्ते लगति, द्वितीयसमये चतुरङ्गुलबाहल्यो रज्जुविस्तारः उध्र्वाधश्चतुर्दशरज्ज्वायामः कपाटाकारः, तिर्यग्लोके तु दिग्द्वयाणुनिर्गमे स्थूलाकारः स्यात्, तृतीयेतूर्ध्वाधःकपाटयोर्मन्थत्वं चतुर्थे त्वन्तरालपूरणं, एवं चतुर्भिस्समयैर्लोकः पूर्यते। यदा तु विदिशि स्थितो वक्ति तदैकसमयेन विदिशो दिशि, द्वितीयसमयेन नाडीं प्रविशति, अन्यैस्त्रिभिः प्राग्वल्लोकमापूरयति एवं पञ्चभिः पूर्णो भवति। 'भासाए' इति भाषाया लोकव्यापिन्याः ॥११॥

तत्त्वभेदपर्यायैर्व्याख्येति तत्त्वतो भेदतश्च मतिज्ञानं व्याख्यातमधुना नानादेशजविनेयसुखाववोधाय तत्पर्यायानाह—

ईहा अपोहवीमंसा, मग्गणा य गवेसणा । सण्णा सई मई पण्णा, सव्वमाभिणिबोहियं ॥ १२ ॥

ईहा-स्थाणुर्वा पुरुषो वेति विचारणा । अपोहो-निश्चयः, ईहाया उत्तरोऽपोहात्पूर्वः, नात्र राजपथे स्थाणुर्भवति पुरुषः संभाव्यते इति विमर्शः । अन्वयधर्मालोचनं मार्गणा । चः समुच्चये । व्यतिरेकधर्मालोचनं गवेषणा । संज्ञा-व्यञ्जनावग्रहानन्तरं शब्दारूषितार्थज्ञानरूपा, स्मृतिरनुभूतार्थस्मरणरूपा, मतिर्ज्ञातेऽप्यर्थे सूक्ष्मधर्मालोचनरूपा, प्रज्ञा स्वयमेव विशिष्टक्षयोपशमात् प्रभूतार्थधर्मालोचना, सर्वमिदमाभिनिबोधिकम् ॥१२॥

इदानीं नवभिरनुयोगद्वारैर्मतिज्ञाननिरूपणामाह—

संतपयपरूवणया, दव्वपमाणं च खित्तफुसणा य । कालो य अंतरं भाग-भावे अप्पाबहुं चेव ॥ १३ ॥
गइ इंदिए अ काए, जोए वेए कसायलेसासु । संमत्त नाण दंसण-संजय उवओग आहारे ॥ १४ ॥
भासग परित्तपज्जत्त-सुहमे सन्नी य होइ भवचरिमे । आभिणिबोहियनाणं, मग्गिज्जइ एसु ठाणेसु ॥ १५ ॥

सत्पदप्ररूपणा मतिज्ञानस्यास्तित्वाख्यानं, द्रव्यप्रमाणं-कियन्तो मतिज्ञानिनः ?, क्षेत्रं-कियति क्षेत्रे मतिज्ञानिनः सन्ति ? स्पर्शना-कियत्क्षेत्रं ते स्पृशन्ति ? क्षेत्रस्पर्शनयोरयं विशेषः-यत्रावगाहस्तत्र (तत्) क्षेत्रं स्पर्शना तु बाह्यतोऽपि स्यात्, कालः-स्थित्यादिः, अन्तरं-प्रतिपत्त्यादौ, भागः-मतिज्ञानिनोऽन्यज्ञानिनां कतिभागे, भावः-कस्मिन् भावे मतिज्ञानिनः, अल्पबहुत्वम्-एषां पूर्वप्रतिपन्नप्रतिपद्यमानापेक्षम् ॥१३॥

अथ सत्पदप्ररूपणादिद्वारैर्मतिज्ञानं गत्यादिषु मार्गयेत्, तत्र गतौ चतुर्विधायामपि मतिज्ञानिनः पूर्वप्रतिपन्ना नियमतः सन्ति, प्रतिपद्यमानास्तु कदाचिद्भवन्ति वा न वा । इन्द्रियद्वारे पञ्चेन्द्रियेष्वाद्याः सदैव स्युर्न वा । द्वित्रिचतुरिन्द्रियेष्वविरतसम्यग्दृष्टेः सम्यक्त्वं वमत उत्पादादपर्याप्तकावस्थायामाद्याः सम्भवन्ति नान्ये, एकेन्द्रियेषूभयाभावः । काये त्रसाख्ये आद्याः सन्ति सदैव, इतरे स्युर्नवा शेषकायेषूभयाभावः । योगे त्रिषु योगेषु समुदितेषु पञ्चेन्द्रियवत्, केवलकाययोगे तूभयाभावः । वेदे–त्रिष्वपि वेदेषु आद्याः सन्त्येव अन्ये स्युर्नवा । कषायेषु–अनन्तानुबन्धिषूभयाभावः, शेषेषु पञ्चेन्द्रियवत्, लेश्यासु आद्यासु तिसृष्वाद्याः सन्ति नान्ये, शेषासु तिसृषु पञ्चेन्द्रियवत् । सम्यक्त्वद्वारे आद्या एव नापरे, सम्यग्दर्शनमतिश्रुतानां युगपल्लाभात् । ज्ञानद्वारे–मतिश्रुतावधिमनोज्ञानेषु आद्या एव नापरे, केवलज्ञाने तु नाद्या नाप्यन्ये, तस्मिन्सति छाद्मस्थिकज्ञानाऽभावात् । मत्याद्यज्ञानेष्वपि नाद्या नान्ये द्वयेषामप्यघटनात् । दर्शनद्वारे–चक्षुदर्शनेऽचक्षुर्दर्शने च दर्शनलब्धिसंपन्नाः आद्याः सन्त्येव अन्ये भाज्याः, अवधिदर्शने त्वाद्या एव नान्ये, केवलदर्शने न द्विधापि । संयतद्वारे–आद्या एव नान्ये । उपयोगः–साकारोऽनाकारश्च, तत्र साकारोपयोगे–आद्याः सन्त्येव, अन्ये भाज्याः । अनाकारोपयोगे–आद्या एव नान्ये, " सव्वाओ लद्धीओ सागारोवओगोवउत्तस्स भवंती "ति वचनात् । आहारका आद्याः सन्त्येव अन्ये भाज्याः । अनाहारका विग्रहगतौ आद्याः सन्त्येव नान्ये इति । भाषकद्वारे–भाषालब्धिसम्पन्ना आद्याः सन्त्येव अन्ये भाज्याः, तल्लब्धिशून्याश्च न द्विधापि । परीत्तद्वारे–अनेकार्थत्वाद्धातूनामिति दानार्थोऽपि दाधातुः परिपूर्वोऽत्र संख्यावाची तेन परीत्तः

परिमितीकृतः संसारो यैस्ते परीत्ताः प्रत्येकशरीरा वा, एष्वप्यग्रे केवलस्य वक्ष्यमाणत्वादेतेऽपि मनुष्या एवेह ग्राह्याः, अतोऽमीष्वप्याद्या मतिज्ञानिनः सन्त्येव अन्ये भाज्याः, साधारणास्तु न द्विधापि। पर्याप्तद्वारे—षट्पर्याप्तिपर्याप्ता आद्याः सन्त्येव अन्ये भाज्याः, अपर्याप्तकास्त्वाद्याः सन्त्येव नान्ये। सूक्ष्मद्वारे—सूक्ष्मा अन्तरान्तादिभवाः संमूर्च्छनमनुष्याः तेषु न द्विधापि, वादरेषु तु केवलज्ञानस्याप्यभिधानात्तेऽत्र गर्भजमनुष्या ज्ञेयाः, अतस्तेषु मतिज्ञानिन आद्याः सन्त्येव अन्ये भाज्याः। संज्ञिद्वारे—संज्ञिनो वादरवत्, असंज्ञिनस्त्वाद्याः सन्त्येव नान्ये। भवद्वारे – भवसिद्धिकाः संज्ञिवत्, अभवसिद्धिका न द्विधापि। चरमद्वारे – भविष्यच्चरमभवा आद्याः सन्त्येत्र अन्ये भाज्याः, अचरमास्तु न द्विधापि। कृता मतिज्ञानस्य सत्पदप्ररूपणा।

द्रव्यप्रमाणं मतिज्ञानिनां सङ्ख्या, तत्राद्या जघन्यतः क्षेत्रपल्योपमासङ्ख्येयभागप्रदेशराशितुल्याः, उत्कृष्टतस्तेभ्यो विशेषाधिकाः। अन्ये जातु स्युर्नवा, यदि स्युर्जघन्येनैको द्वौ त्रयो वा, उत्कृष्टतः क्षेत्रपल्योपमासङ्ख्येयभागप्रदेशराशिमानाः।

क्षेत्रं मतिज्ञानिनां लोकस्यासङ्ख्येयभागः, एकस्य तु इलिकागत्या सर्वार्थसिद्धौ गच्छत आगच्छतो वा सप्त चतुर्दशभागाः सप्त रज्जव इत्यर्थः। अधस्तु षष्ठ्यां गच्छतः प्रत्यागच्छतश्च पञ्च सप्त (चतुर्दश) भागाः, सप्तम्यां सम्यग्दृष्टेर्गत्यभावात्। स्पर्शना क्षेत्रादधिका, यथा परमाणोरेकप्रदेशं क्षेत्रं, सप्तप्रदेशा स्पर्शना। कालो मत्युपयोगमाश्रित्य जघन्य उत्कृष्टश्च एकस्य

अनेकेषां चान्तर्मुहूर्त्तमात्रः, तल्लब्धिमाश्रित्यैकस्य जघन्येनान्तर्मुहूर्त्तमेव, उत्कृष्टतस्तु षट्षष्टिसागरोपमाणि साधिकानि प्राग्वत्, नानाजीवापेक्षया तु सर्वः कालः, मतिज्ञानिनां सर्वकालेषु भावात् ।

अन्तरम्–एकस्य सम्यक्त्वं विमुच्य पुनर्ग्रहणे जघन्येनान्तर्मुहूर्त्तमुत्कर्षेणापार्द्धपुद्गलपरावर्त्तः, नानाजीवापेक्षया त्वन्तराभावः ।

भागद्वारे–मतिज्ञानिनः शेषज्ञानिनां अज्ञानिनां चानन्तभागे वर्त्तन्ते ।

भावे क्षायोपशमिके मतिज्ञानिनः ।

अल्पबहुत्वे मतिज्ञानिनः प्रतिपद्यमानकाः सर्वस्तोकाः, पूर्वप्रतिपन्नाः जघन्येन तेभ्योऽसङ्ख्यगुणाः, उत्कर्षेण त्वेतेभ्योऽपि विशेषाधिका इति गाथात्रयार्थः ॥ १४ । १५ ॥

मतिज्ञानोपसंहारं श्रुतज्ञानारम्भं चाह—

आभिणिबोहियनाणे, अट्ठावीसं (सइ) हवंति पयडीओ । सुयनाणे पयडीओ, वित्थरओ आवि वुच्छामि ॥ १६ ॥

स्पष्टा ॥

श्री तिलकाचार्य कृत लघुवृत्तिनो अंतिम विभाग.

प्रत्याख्यानगुणानाह—

पच्चक्खाणंमि कए, आसवदाराइं हुंति पिहियाइं। आसववुच्छेएणं, तण्हावुच्छेयणं होइ ॥ १६०८ ॥
तण्हावुच्छेएण य, अउलोवसमो भवे मणुस्साणं। अतुलोवसमेण पुणो, पच्चक्खाणं हवइ सुद्धं ॥१६०९॥
स्पष्टे ॥

तत्तो चरित्तधम्मो, कम्मविवेगो तओ य अपुव्वं तु। तत्तो केवलनाणं, तओ य मुक्खो सयासुक्खो ॥१६१०॥
ततः—शुद्धप्रत्याख्यानाच्चारित्रधर्मः कर्मणां विपाकः निर्जरा ततोऽपूर्वकरणं, शेषं स्पष्टम् ॥ १६१० ॥
तच्च प्रत्याख्यानं दशविधं साकारं गृह्यते पाल्यते चेत्याह—

नमुक्कारपोरसिए, पुरिमड्ढेगासणेगठाणे य। आयंबिलअभत्तट्ठे, चरिमे य अभिग्गहे विगई ॥ १६११ ॥
दो छच्च सत्त अट्ठ य, सत्तट्ठ य पंच छच्च पाणंमि। चउ पंच अट्ठ नव य, पत्तेयं पिंडउ नवए ॥ १६१२ ॥
स्पष्टे, नवां प्रत्येकं पिण्डको नवकः, नवसहितः, को व्यञ्जनादिवर्णो नवकः; अङ्कानामुक्तमलेख्यत्वादानने (नां वामतो गतिरित्ये) कोनविंशतिर्लभ्यते, ते च प्रस्तावादत्राकाराः, स नवको विद्यते यत्र पिण्डके 'अभ्रादित्वादचि' नवकः एकोन-

विंशत्याकारवान्, एकोनविंशत्याकारसम्बन्धी पिण्डकः इत्यर्थः। एकोनविंशतिः कथम्? एकाशनगता अष्टावाकाराः, विकृतिप्रत्याख्यातात्चाधिकाश्चत्वारः पौरुषीप्रत्याख्यानाच्च त्रयः एकश्च चोलपट्टाकारः, पानाश्रिताः षडुक्ता अपि लेपेन वा लेपकृतेनापि, अच्छेन वा बहुलेनापि असिक्थेन वा ससिक्थेनापि न भङ्ग इति त्रय एवाकाराः त्रयश्चोपमानभूतित्वेन गताः, सर्वेऽपि मेलिताः उक्तसङ्ख्याः, पिण्डक इति जात्यैकवचनम्। ततश्च प्रत्येकं दशानामपि प्रत्याख्यानानां द्विषट्सप्तादिकः पिण्डकः समूह इत्यर्थः। 'पिंडए नवए' इति' पाठे तु काकु व्याख्या-(प्रत्येकं दशानामपि प्रत्याख्यानानां द्विषट्सप्तादिकान् आकाराणां पिण्डकान् न वदेत्, अपि तु वदेदित्यर्थः। संचूर्णयामि गदया न सुयोधनोरुः, (रुम्) अपि चूर्णयामीतिवत्?) ॥ १६११-१२ ॥

व्यक्तिमाह—

दो चेव नमुक्कारे, आगारा छच्च पोरसीए उ। सत्तेव य पुरिमड्ढे, एगासणगंमि अट्ठेव ॥ १६१३ ॥

'दो चेव नमुक्कारे' इति व्याख्यातं, पौरुष्यां षडाकाराः, तत्सूत्रं चेदम्—

उग्गए सूरे पोरिसिं पच्चक्खाइ दुविहं तिविहं चउव्विहंपि आहारं असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं पच्छन्नकालेणं दिसामोहेणं साहुवयणेणं सव्वसमाहिवत्तियागारेणं वोसिरइ ॥

पुरुषः प्रमाणमस्याः सा पौरुषी छाया तद्युक्तः कालोऽपि पौरुषी प्रहर इत्यर्थः, केवलं याम्योत्तररेखाया आत्मनश्चाव-

तारपूर्वपश्चिमरेखेव छायेति ग्राह्या तां पौरुषीं प्रत्याख्याति, अत्र षडाकाराः—प्रथमौ पूर्ववत्, अन्यत्र प्रच्छन्नकालात् दिग्मोहात् साधुवचनात्, सर्वसमाधिप्रत्याकाराच्च । प्रच्छन्नकालता च कालस्य मेघेन रजसा गिरिणा चान्तरितत्वात् सूर्यस्यादर्शने, तेनापूर्णामपि पूर्णां पौरुषीं ज्ञात्वा भुञ्जानस्य न भङ्गः, ज्ञात्वा भुक्तेनापि तथैव स्थातव्यं यावत्पौरुषी पूर्यते ततः परं भोक्तव्यमन्यथा तु भङ्गः । एवं दिग्मोहस्तु यदा पूर्वामपि पश्चिमेति जानाति तदा पौरुष्यामपूर्णायामपि भुञ्जानस्य न भङ्गः, मोहविगमे तु पूर्वविधिः । साधुवचनम्—उद्घाटा पौरुषीत्यादिकं शंतिकारणं (?) तच्छ्रुत्वा भुञ्जानस्य न भङ्गः, भुञ्जानेन तु ज्ञातेऽन्येन वा कथिते प्राग्विधिः कार्यः । सर्वसमाधिः—गाढातङ्कादौ च तत्प्रत्यय आकारः प्रत्याख्यानापवादः भवति, अयमभिप्रायः—आकस्मिकतीव्रशूलादिदुःखोद्भवार्त्तरौद्रध्यानोपशमनाय सर्वेन्द्रियसमाध्यर्थं पथ्यौषधादिकुर्वाणस्यापूर्णायामपि पौरुष्यां न भङ्गो जायते, जाते तु समाधौ पूर्वविधिः ।

अथ पूर्वार्द्धप्रत्याख्यानं तच्च पौरुषीवत् केवलं ' महत्तरागारेण ' मित्यधिकं, [शेषं] पूर्ववत्, पूर्वार्ध्यं—दिनस्याद्यं प्रहरद्वयं तत्प्रत्याख्याति, षडाकाराः प्राग्वत्, ' महत्तरागारेणं ति' महत्तरं प्रत्याख्यानानुपालनादपि बहुतरनिर्जरानिमित्तं पुरुषान्तरासाध्यं ग्लानचैत्यसंघादिकार्यं तदेवाकारोऽपवादो महत्तराकारस्तेनार्वागपि भुञ्जानस्य न भङ्गः यच्चात्रैव महत्तराकार पाठो न नमस्कारसहितादौ तत्र कालमहत्त्वाल्पत्वहेतुः ।

अथैकाशनम्—

“ एगासणं पच्चक्खाइ दुविहं तिविहं चउव्विहंपि आहारं असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं सागारियागारेण आउंटणपसारेणं गुरुअब्भुट्टाणेणं पारिट्ठावणियागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ ”।

एकं सकृदशनं भोजनमेकं वा आसनं पुताचलनतो यत्र तदेकाशनं एकासनं वा । अत्राष्टावाकाराः, आद्यावन्त्यौ चाकारौ प्राग्वत्, सागारियागारेणं–सहागारेण वर्त्तते इति सागारिको–गृहस्थः स एवाकारः सागारिकाकारः, साधोर्भुञ्जानस्य चले सागारिके आगते क्षणं प्रतीक्षणं, स्थिरे तु ततः स्थानादन्यत्रोपविश्य भुञ्जानस्यापि न भङ्गः, गृहस्थस्य तु येन दृष्टं भोजनं न जीर्यति तदादिः सागारिकः । ‘ आउंटणपसारेणं ’ आकुञ्चनं जङ्घादेः सङ्कोचनं प्रसारणं तस्यैव ऋजूकरणं । आकुञ्चने प्रसारणे वाऽसहिष्णुतया क्रियमाणे किंचिदासनं चलति तेन न भङ्गः, “ गुरुअब्भुट्टाणेणं ” गुरोः–अभ्युत्थानार्हस्याचार्यस्य प्राघुर्णकस्य वा अभ्युत्थानं भुञ्जानेनाऽपि कार्यं नात्र भङ्गः । ‘ पारिट्ठावणियागारेणं ’ परिष्ठापनं सर्वथा त्याजयितुं प्रयोजनमस्य परिष्ठापनिकं अधिकीभूतं प्रत्याख्यातवस्तु तदेवाकारः परिष्ठापनिकाकारः, तत्र हि त्यज्यमाने महान् दोषः भुज्यमाने च गुर्वाज्ञया गुणस्तद्भुञ्जानस्यापि न भङ्गः । ‘ वोसिरइ त्ति ’ अनेकाशनं परिहरति ।

सत्तेगट्ठाणस्स उ, अट्ठेवायंबिलंभि आगारा । पचेव अब्भत्तट्ठे, छप्पाणे चरिम्मि चत्तारि ॥ १६१४ ॥

अथैकस्थानकम्—

'एगट्ठाणं पच्चक्खाई' त्याद्येकाशनवत्, केवलं 'आउंटणपसारणं' इति न पठनीयम्, अत्र सप्ताप्याकाराः प्राग्वत्, एकं स्थानमङ्गविन्यासरूपं यत्र तदेकस्थानं यद्यथाङ्गोपाङ्गं भोजनकाले स्थापितं तस्मिंस्तथास्थित एव भोक्तव्यमाकुञ्चनप्रसारणे न कार्ये मुखस्य पाणेश्चाशक्यपरिहारत्वाच्चलनं न निषिद्धं। आचामाम्लेऽष्टावेवाकाराः, अत्र वहु वाच्यं तदग्रे वक्ष्यते। 'पंचेव अभत्तट्ठे' पञ्चैवाकारा अभक्तार्थे-उपवासे—

"उग्गए सूरे अभत्तट्ठं पच्चक्खाइ तिविहं चउव्विहंपि आहारं असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं पारिट्ठावणियागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ" ॥

अत्र पञ्चाप्याकाराः प्राग्वत्, पारिष्ठापनिकाकारे विशेषः-त्रिविधाहारप्रत्याख्याने पारिष्ठापनिकं कल्प्यते चतुर्विधाहारप्रत्याख्याने तु न कल्प्यते, पानकेऽप्युद्धरिते कल्पते 'वोसिरइ त्ति' भक्तार्थं त्यजति। 'छप्पाणे' एषु त्रिविधाहारं प्रत्याख्यातेषु पानकमाश्रित्य षडाकाराः स्युः, 'पाणस्स लेवाडेण वा अलेवाडेण वा अच्छेण वा बहलेण वा ससित्थेण वा असित्थेण वा वोसिरइ,' इहाप्यन्यत्रेत्यनुवृत्तिः, लेपकृताद्वा भाजनाद्युपलेपकृत्खर्जूरपानकादेः अलेपकृतान्निर्लेपात् वाशब्दान्निर्लेपेनेव लेपकारिणाप्युपवासादेर्न भङ्गः, अच्छाद्वा निर्मलादुष्णोदकादेः बहुलाद्वा गडुलात्तन्दुलोदकादेः ससिक्थाद्वा भक्तलवोपेतादवश्रावणादेः, असिक्थाद्वा सिक्थवर्जितात् पानकाहारादन्यत्र व्युत्सृजति। 'चरिमे चत्तारि' चरमोऽन्त्यो

भागः स च दिवसस्य भवस्य वा तद्विषयं प्रत्याख्यानमपि चरमं, तत्र दिवसचरमं—सूर्योद्गमान्तं, भवचरिमं—यावज्जीवं, द्वयोरपि चत्वार आकाराः ।

‘दिवसचरिमं भवचरिमं वा पच्चक्खाइ दुविहं तिविहं चउव्विहंपि आहारं असणं पाणं खाइमं साइमं अन्नत्थणाभोगेणं सहसागारेणं महत्तरागारेणं सव्वसमाहिवत्तियागारेणं वोसिरइ’ ।

ननु दिवसचरिमं निष्फलं एकासनादिकेनैव गतार्थत्वात्, नैवम्, एकासनादिकं त्वष्टाद्याकारं एतच्च चतुराकारं, अत आकाराणां संक्षेपकरणात्सफलमेवेदं, निषिद्धरात्रिभोजनानामपि दिवसशेषे क्रियमाणत्वात् स्मारकत्वाच्च फलवदेव ॥१६१४॥

पंच चउरो अभिग्गहि, निव्विए अट्ठ नव य आगारा । अप्पाउरणे पंच उ, हवंति सेसेसु चत्तारि ॥१६१५॥

पञ्च चत्वारश्चाभिग्रहे आकारा इति सामान्येनोक्तं विशेषस्तु अप्रावरणाख्येऽभिग्रहे ‘चोलपट्टागारेणं’ पञ्चम आकारः स्यात् । शेषेषु ग्रन्थिसहितादिषु चत्वार एव चरमोक्ताः । निर्विकृतावष्टौ नवाकाराः, तत्र मनसो विकृतिहेतुत्वाद्विकृतयः, ताश्च दश—

क्षीरं[१] दधि[२] नवनीतं[३] घृतं[४] तैलं[५] गुडो[६] मधु[७] मद्यं[८] मांसं[९] अवगाहिमं[१०] । अवगाहेन स्नेहबोळनेन निर्वृत्तं ‘पाकादिम’ इतीमः पक्वान्नमिति रूढं । तत्र पञ्च क्षीराणि-गोमहिष्युष्ट्र्यजैलकानाम् । दधि-नवनीत-घृतादि तु चतुर्द्धा, उष्ट्रीणां तदभावात् ।

तैलानि चत्वारि–तिलातसीलट्टासर्षपाणां, शेषतैलानि तु न विकृतयः। गुडो द्विधा–पिण्डो द्रवश्च। मधु त्रिधा–माक्षिकं कौन्तिकं भ्रामरं च। मद्यं द्विधा–काष्ठजं पिष्टजं च। मांसं त्रिधा–जलस्थलखचरजन्तूनाम्, चर्मरुधिरमांसभेदाद्वा। अवगाहिमं–स्नेहपूर्णतापिकायामन्यस्नेहाक्षेपे यावच्चलाचलं खाद्यकादि त्रिः पच्यते तावद्विकृतिः ततः परं पक्वानि योगवाहिनां निर्विकृतिप्रत्याख्यानेऽपि कल्प्यन्ते, यद्येकेनैव पूपकेन तापिका पूर्यते तदा द्वितीयमपि कल्प्यत इति वृद्धसामाचारी। एतासु दशसु विकृतिषु मद्यमांसमधुनवनीताख्याश्चस्रोऽभक्ष्याः शेषाः षड् भक्ष्याः, तत्र भक्ष्यास्वेकादिविकृतिप्रत्याख्यानं षड्विकृत्या (ति) प्रत्याख्यानं च निर्विकृतिसंज्ञं। तत्पाठश्च–'निव्विगइअं पच्चक्खाइ' इत्यादि आद्यावन्त्यौ चाकारौ प्राग्वत् 'लेवालेवेणं' ति भाजनादेः प्रत्याख्यातविकृत्यादिना लेपः तस्यैव हस्तादिना संलेखनादलेपः लेपश्चालेपश्च लेपालेपं ततोऽन्यत्र भाजनादेर्विकृत्याद्यवयवयोगेऽपि न भङ्गः ५। 'गिहत्थसंसट्ठेणं' गृहस्थेन स्वार्थं दुग्धेनोदनः संसृष्टः तच्च दुग्धं तदुपरि चत्वार्यङ्गुलानि यावद्वर्त्तमानमविकृतिः अधिकं तु विकृतिरेव। पोलिकायां अङ्गुलमात्रं स्त्यानीभूतकृतघृतलेपो न विकृतिः तदूर्ध्वं तु विकृतिः।'उक्खित्तविवेगेणं' उत्क्षिप्तविवेकः उद्धर्त्तुं शक्येषु प्रत्याख्यातविकृत्यादिषु न तु द्रवरूपेषु। कानि तानीत्याह–

नवणीओगाहिमए, अद्दवदहिपिसियघयगुले चेव। नव आगारा तेसिं, सेसदवाणं च अट्ठेव ॥ १६१६ ॥

स्पष्टा, नवरं शेषद्रवाणां विलीनघृततैलद्रवगुडादीनां नोत्क्षिप्तविवेकाकारः। 'पडुच्चमक्खिएणं' अतिरुक्षमण्डकादिकं

प्रतीत्याश्रित्य म्रक्षितमिव म्रक्षितमीपत्स्नेहेन म्रक्षिताभासमित्यर्थः, अयं चात्र विधिः-अङ्गुल्या स्नेहमादाय म्रक्षितं मण्डकादिकं निर्विकृतिकस्यापि कल्प्यते धारया तु न कल्प्यते । पूर्वोपन्यस्तमाचामाम्लमाह—

गोण्णं नामं तिविहं, ओअणकुम्माससत्तुया चेव । इक्किक्कं पिय तिविहं, जहन्नयं मज्झिमुक्कोसं ॥१६१७॥

गौणं नाम आचामो अवश्रावणं अम्लं चतुर्थो रसस्ताभ्यां निर्वृत्तम् आचामाम्लं, तत्त्रिविधं-ओदनः-शाल्यादिः, कुल्माषाः, सक्तवश्च एतानधिकृत्याचामाम्लं, ओदनाचामाम्लं कुल्माषाचामाम्लं, सक्तुकाचामाम्लं, एकैकं त्रिविधं-जघन्यं मध्यममुत्कृष्टं च ॥ १६१७ ॥ कथमित्याह—

दव्वे गुणे रसे वा, जहन्नयं मज्झिमं च उक्कोसं । तस्सेव य पाउग्गं, छलणा पंचेव य कुडंगा ॥ १६१८ ॥

तस्यैवाचामाम्लस्य प्रायोग्यं द्रव्यगुणरसानधिकृत्य जघन्यं मध्यममुत्कृष्टं च वाच्यं । द्रव्यमुत्कृष्टं शालिगोधूमकुल्माषादि, रसश्चतुर्थरसमवश्रावणादि गुणो निर्जरा जघन्या । जघन्यद्रव्यं-रालककोद्रवादि रसस्तूष्णोदकादि गुण उत्कृष्टा निर्जरा, मध्यमद्रव्यरसयोर्गुणो निर्जरारूपो मध्यमः । छलना-कश्चिदाचामाम्लं प्रत्याख्याय विकृतीर्भोक्तुमुपविष्टः आचार्यैरुक्तः कथं [आचामाम्लं] प्रत्याख्याताचामाम्लो (रूयाय विकृती) भोक्ष्यसे ?, स ऊचे यथा प्राणातिपातं प्रत्याख्याय प्राणातिपातो न क्रियते एवं आचामाम्लं प्रत्याख्याय आचामाम्लमपि न क्रियते, परिहारस्तु, आचामाम्लप्रायोग्यादन्यत्प्रत्याख्यातीत्यर्थः, तन्निरर्थिका छलना ॥ १६१८ ॥

पञ्चैव कुडङ्गा वक्रविशेषाः, तद्यथा—

लोए वेए समए, अन्नाणे खलु तहेव गेलन्ने । एए पंच कुडंगा, नायव्वा अंबिलंमि भवे ॥ १६१९ ॥

एकेनाचामाम्लं प्रत्याख्यातं संखडिकार्या पक्वान्नादयो (दीन्) लब्ध्वा गुरूणां दर्शिताः, गुरुभिरूचे तवाचामाम्लं स स्माह—मया लौकिकशास्त्रेषु बहुष्वपि नाचामाम्लशब्दः श्रुतः इत्येकः कुडङ्गः । वेदेषु चतुर्षु साङ्गोपाङ्गेषु न श्रुत इति द्वितीयः । समये शाक्यादीनां न श्रुतः कुतो युष्माकमागमे समागत इति तृतीयः ? । अज्ञाने न जानामि कीदृशमप्याचामाम्लं ? घृत-दध्यादिभिरार्द्रीकृत्यान्नं भुज्यते इत्येवं वेद्मि इति चतुर्थः । ग्लानकुडङ्गः पञ्चमः—न शक्नोमि ग्लानोऽहं न शक्नोम्याचाम्लं कर्तुं शूलं मे उत्तिष्ठते इति । तत्राचामाम्लेऽष्टावाकाराः ॥ १६१९ ॥

निर्विकृतिकाधिकारे विकृतीः गृहस्थसंसृष्टं चोक्तमपि गाथाभिराह—

पंचेव य खीराइं, दहीणि सप्पि नवणीए (णीता) । चत्तारि य तिलाइ, दो वियडे फाणिए दुन्नि ॥१६२०॥

महुपुग्गलाइं तिन्नि, चलचल ओगाहिमं तु जं पक्कं । एएसिं संसट्ठं, वुच्छामि अहाणुपुव्वीए ॥ १६२१ ॥

उक्तार्थं ।

खीरदहीवियडाणं, चत्तारि उ अंगुलाइं संसट्ठं । फाणियतिल्लघयाणं, अंगुलमेगं तु संसट्ठं ॥ १६२२ ॥

महुपुग्गलरसयाणं, अद्धंगुलयं तु होइ संसट्ठं । गुलपुग्गलनवणीए, अद्दामलयं (च) तु संसट्ठं ॥ १६२३ ॥

स्पष्टे, नवरं गुडस्य पिण्डस्य पुद्गलाः—अवयवाः ततश्च पिण्डगुडस्य नवनीतस्य आर्द्रामलकप्रमाणखण्डयुक्तं संसृष्टमेतच्च गृहस्थसंसृष्टं आचामाम्लवतोऽनाचीर्णं ।' पडुच्चमक्खिएणं ' ति च नात्र पठनीयं, म्रक्षितमपि निर्विकृतकस्यैव कल्प्यते नाचामाम्लस्य । आह परः—एकासनैकस्थानकनिर्विकृत्याचामाम्लचतुर्थषष्ठाष्टमेषु पारिष्ठापनिकाकारः पठितः तत्कीदृशस्य पारिष्ठापनिकं देयं ?, गुरुराह—

आयंबिलणायंबिल-चउत्थाई बालवुड्ढसहुअसहु । अणहिंडयहिंडियए पाहुणनिमंतणा बलिया॥ १६२४॥

एक आचामाम्लवान् अनाचामाम्लवन्तोऽन्ये, तत्र पारिष्ठापनिकं आचामाम्लवतो न देयं, चतुर्थभक्तिकस्य देयं, तत्रापि बालवृद्धसहासहाहिण्डकाहिण्डकवास्तव्यप्राघुर्णकानामावलिकाक्रमेण निमन्त्रणा कार्या । उत्तरोत्तराभावे पश्चिमानुपूर्व्या देयमित्यर्थः । एवमेकासनादिष्वप्यावलिकाक्रमो ज्ञेयः । पारिष्ठापनिकाप्राचुर्ये सर्वेषां देयं, दशमभक्तिकादीनां च न देयं, तेषामुत्कृष्टत्वात् ॥ १६२४ ॥

तच्च किंस्वरूपं देयमित्याह—

विहिगहियं विहिभुत्तं, उव्वरियं तह गुरूहिं भणिओ य । ताहे वंदणपुव्वं, भुंजइ सो संदिसावेउं ॥१६२५॥

विधिना अणुत्ति (अलुब्धेन) गृहीतं, विधिना अशठैर्भुक्तं, उद्धृतं गुर्वाज्ञया वन्दनकं दत्त्वा पारिष्ठापनिकं सन्दिश्य भोक्तुं कल्प्यते ॥ १६२५ ॥ अत्र चतुर्भङ्गी—

चउरो य हुंति भंगा, पढमे भंगंमि होइ आवलिया। इत्तो य तइयभंगे, आवलियाणं तु संजोगा॥ १६२६ ॥

विधिगृहीतं विधिभुक्तं, अविधिगृहीतं विधिभुक्तं, अनयोः प्रथमतृतीयभङ्गयोः परिष्ठापनिकमावलिकाक्रमेण कल्प्यते विधिगृहीतमविधिभुक्तं अविधिगृहीतमविधिभुक्तं अनयोर्द्वितीयचतुर्थभङ्गयोर्न कल्प्यते तत्त्यज्यते, असंसृष्टस्यैव वस्तुनः पारिष्ठापनिकं क्रियत इत्याचरणा। ॥ १६२६ ॥ उक्तं च प्रत्याख्यानं, प्रत्याख्यातारमाह—

पच्चक्खाएण पच्चक्खा-विंतए विसयाओ। उभयमवि जाणयेयर-चउभंगे गोणिदिट्ठंतो ॥ १६२७ ॥

प्रत्याख्यात्रा प्रत्याख्यानमकथयित्रा गुरुणा प्रत्याख्यापयितरि प्रत्याख्यानं मां कारयतेति प्रयोक्तरि शिष्ये सूचा कृता, उभयेऽपि ज्ञानदर्शन (ज्ञाताज्ञात) रूपे चतुर्भङ्गी। अत्र गोदृष्टान्तः (स च) अग्रे भावयिष्यते ॥ १६२७ ॥ पुनराह—

मूलगुणउत्तरगुणे, सव्वे देसे य तह य सुद्धीए। पच्चक्खाणविहिन्नू, पच्चक्खाया गुरू होइ ॥ १६२८ ॥

नवरं ' सुद्धीए ' शुद्धया षड्विधया श्रद्धानादिरूपया पूर्वोक्तया ॥ १६२८ ॥

तथा—

किइकम्माइविहिन्नू, उवओगपरो य असढभावो य। संविग्गथिरपइन्नो, पच्चक्खावितओ होइ॥ १६२९ ॥

प्रत्याख्यापयिता-शिष्यः ॥ १६२९ ॥ तथा—

एवं पुण चउभंगो, जाणगइयरंमि गोणिनाएणं। सुद्धासुद्धा पढमंतिमा उ सेसेसु अ विभासा॥ १६३० ॥

इह प्रत्याख्यानार्थं जानन् जानत एव गुरोः सकाशे प्रत्याख्यानं करोतीति चतुर्भङ्ग्यां प्रथमो भङ्गः शुद्धः, द्वयोरप्यजानतोरन्त्योऽशुद्धः, मध्यमयोर्विभाषा, गुरोर्जानतः शिष्यस्य चाजानतो द्वितीयः, इह तत्कालं शिष्यं संक्षेपतः प्रबोध्य गुरोः प्रत्याख्यानं कारयतोऽयमपि शुद्धः, अन्यथा त्वशुद्धः, गोज्ञातेन यथा लोके गवां स्वरूपं स्वामी गोपालश्च द्वावपि जानीतस्ततः स्वामी सुखं भृतं ददाति गोपालश्च गृह्णाति ॥ १६३० ॥ प्रत्याख्यातव्यमुक्तमप्यध्ययनादौ द्वाराशून्यार्थमाह—

दव्वे भावे य तहा, पच्चक्खायव्वयं भवे दुविहं। दव्वंमि य असणाई, अन्नाणाई य भावमि ॥ २६३१ ॥

स्पष्टा ॥ १६३१ ॥ कस्यां पर्षदि प्रत्याख्यानं कथनीयमित्याह—

सोउं उवट्ठियाए, विणीयवक्खित्ततदुवउत्ताए। एवंविहपरिसाए, पच्चक्खाणं कहेयव्वं ॥ १६३२ ॥

श्रोतुमुपस्थितयोर्विनीतयोः, अव्याक्षिप्तयोस्तदुपक्तयोः, शेषं स्पष्टम् ॥ १६३२ ॥

कथनविधिमाह—

आणागिज्झो अत्थो, आणाए चेव होइ कहियव्वो। दिट्ठंतिय दिट्ठंता, कहणविहि विराहणा इहरा ॥१६३३॥

इतरथा आज्ञां विना दार्ष्टान्तिकदृष्टान्तरूपा कथनविधिः विराधना ॥ १६३३ ॥ फलमाह—

पच्चक्खाणस्स फल-मिह परलोए य होइ दुविहं तु। इहलोए धम्मिलाई, दामन्नगमाई परलोए ॥ १६३४ ॥

स्पष्टा, धम्मिलकथा धम्मिलहिण्डेर्ज्ञेया, कफविप्रुण्मलामर्षाद्यो वा लब्धयः प्रत्याख्यानस्यैहिकं फलम्। पारत्रिकफले-
दामन्नककथा, सा चेयम्—अस्ति राजपुरं नाम, नगरं नगरोत्तमम्। पराभूच्च....लक्ष्या, तिरोभूतामरावती ॥ १ ॥
धर्मकर्मानभिज्ञोऽभू-त्तत्रैकः कुलपुत्रकः। जिनदासः सुहृत्तस्य, नीतस्तेनान्तिकं गुरोः ॥ २ ॥
तत्राधरीकृत............रूयामाकर्ण्य तस्य सः। मत्स्यमांसस्य नियमं, गृह्णाति स्म सविष्म(स्म)यः ॥ ३ ॥
दुर्भिक्षे च तदा जाते, मीनमांसाशनो जनः। सोऽपि श्यालैश्च...............मानो....दं ययौ ॥ ४ ॥
ततो दिनत्रयं स त्रि – गृहीत्वाऽप्यमुचत्तिमीन्। परं कथंचिदेकस्या – त्रुटत्पुच्छच्छटैकिका ॥ ५ ॥
ततोऽनशनमादाय, मृत्वा राजगृहे पुरे। मणिकारवणिक्पुत्रो, जज्ञे दामन्नकाभिधः ॥ ६ ॥
आदौ प्राग्जन्मनि कृता – त्प्राणिघातादिदुष्कृतात्। उत्सन्नमष्टवर्षस्य, कुलं तस्याखिलं रुजा ॥ ७ ॥
सोऽथ सागरपोताख्य – सार्थवाहगृहे स्थितः। साधुसंघाटकस्तत्र, गृहे भिक्षागतोऽभ्यधात् ॥ ८ ॥
बृहल्लघोरयं बालो, भाव्येतद्गृहनायकः। जवन्यन्तरितोऽश्रौषीत्, सार्थवाहस्तु तद्वचः ॥ ९ ॥
अथ घातयितुं छन्नं, श्वपचाय तमार्पयत्। रक्षितास्तेन यन्मीनाः, प्राग्भवे सुकृतात्ततः ॥ १० ॥
तेनाघातितपुच्छांश – त्रोटान्मुक्तः क्षताङ्गुलिः। नश्यंस्तस्यैव याति स्म, गोकुले स भयाकुलः ॥ ११ ॥
गृहीतः पुत्र इत्येष, गोकुलाधिकृतेन सः। तत्रस्थो यौवनं प्राप, श्रेष्ठी तत्रान्यदागमत् ॥ १२ ॥

तं दृष्ट्वा पृष्टवान् कोऽय – माख्यंस्तस्योदन्तं जनाः । अनाथोऽयमिहायासीत्, क्रीडन् गोपैः सह स्थितः ॥ १३ ॥
स एवायमिति श्रेष्ठी, ज्ञात्वा तं चकितस्ततः । लेखं दत्त्वा गृहे प्रैषीत्, गतो राजगृहेऽथ सः ॥ १४ ॥
बहिर्देवकुले तस्य, श्रान्तः सुष्वाप तत्र च । प्राग्भवानशनोपात्त – पुण्याकृष्टेन तत्क्षणात् ॥ १५ ॥
तस्यैव श्रेष्ठिनः पुत्री, विषाऽऽगादर्चनाकृते । पितृनामाङ्कमालोक्य, लेखं तत्पार्श्ववर्त्तिनम् ॥ १६ ॥
दामन्नकं च तं ज्ञात्वा, साऽथ लेखमवाचयत् । एतस्याधौतपादस्य, पुत्र ! देयं विषं त्वया ॥ १७ ॥
दध्यौ सा न विरूपं मे, पिता ध्यायति कस्यचित् । विस्मृत्या न ददौ कर्णं, सकर्णोऽपि स्फुटं पिता ॥ १८ ॥
ततो नेत्राञ्जनेनासौ, दत्त्वा रेखां विषां दधत् । लेखं तथैव कृत्वा तं, तदुपान्तेऽमुचद्विषा ॥ १९ ॥
सुप्तबुद्धो गृहे गत्वा – ऽर्पयल्लेखं तदैव च । स्वसारं श्रेष्ठिसूस्तेन, सार्द्धं तेन पर्यणाययत् ॥ २० ॥
आगात्सागरपोतोऽथ, दृष्ट्वा तं खेदभूरभूत् । मृतस्तस्यान्यदा सूनु – विस्तव्याकुलवर्द्धनः (?) ॥ २१ ॥
तच्छ्रुत्वा हृदयस्फोटा – द्ययौ श्रेष्ठ्यपि पञ्चताम् । ततस्तस्य गृहस्वामी, राज्ञा दामन्नकः कृतः ॥ २२ ॥
ततो माङ्गलिकं कर्त्तुं, तस्यागात्प्रमदाकुलम् । गायति स्म तदा तत्र, सुस्वरं गीतिकामिमाम् ॥ २३ ॥
अणुपुंखमावहंतावि, अणत्था तस्स बहुगुणा हुंति । सुह दुह कच्छफुडतु, जस्स कयंतो वहइ पक्खं ॥ २४ ॥
त्री(त्रिः)गीतिकायां गीतायां, स तस्यादात्त्रिलक्षिकाम् । दुर्जनः कोऽपि तस्याख्य – द्भूपस्य तमसद्व्ययम् ॥ २५ ॥

तमाकार्य नृपोऽप्राक्षी – द्वृत्तान्तं स्वं स शिष्टवान्। तुष्टो राजा ततः श्रेष्ठी – पदे स्थापयति स्म तम् ॥ २६ ॥
ततः पुरे स मुख्योऽभू – द्राजमान्यो महर्द्धिकः। प्रत्याख्यानमभूदेव – मस्यामुत्र फलप्रदम् ॥ २७ ॥
ततो गुरुसमायोगे, स्वस्य पूर्वभवे श्रुते। सद्बोधिं प्राप्य सद्धर्मं, कृत्वा स स्वर्गमासदत् ॥ २८ ॥
प्रत्याख्यानप्रधानफलमाह—

पच्चक्खाणमिणं सेविऊण भावेण जिणवरुद्दिट्ठं। पत्ता अणंतजीवा, सासयसुक्खं लहुं मुक्खं ॥ १६३५ ॥
स्पष्टा, एतच्च फलं प्रागुक्तमपि शास्त्रान्ते मङ्गलार्थत्वादुक्तम्। उक्तोऽनुगमो व्याख्यालक्षणः, अथ नयाः, तत्रैके ज्ञान-नयाः एके च क्रियानयाः, ज्ञाननयमतमाह——

नायंमि गिण्हियव्वे, अगिण्हियव्वंमि चेव अत्थंमि। जइयव्वमेव इह जो, उवएसो सो नओ नाम ॥१६३६॥
ज्ञाते गृहीतव्ये ऐहिके–स्रक्चन्दनाङ्गनादौ, आमुष्मिके सम्यग्दर्शनादौ, अगृहीतव्ये ऐहिके – विषशस्त्रकण्टकादौ, आमुष्मिके मिथ्यात्वादौ, चकारादुपेक्षणीये ऐहिके तृणादौ, आमुष्मिके राज्यादौ, यतितव्यमेवेति य उपदेशः स नयो नाम, ततश्च सम्यग्ज्ञानाच्च क्रियायां प्रवर्त्तितव्यं, मिथ्याज्ञानात्प्रवृत्तस्य फलविसंवादात्, उक्तं च–' विज्ञप्तिः फलदा पुंसां न क्रिया फलदा मता। मिथ्याज्ञानात्प्रवृत्तस्य फलासंवाददर्शनात् '। तथा सत्क्रियावतोऽपि केवलज्ञानं विना मुक्तेरभावात् ज्ञानमेव प्रधानमिति न क्रिया।

क्रियानयस्त्वाह–' नायंमि गिण्हियव्वे ' एषैव गाथा, ज्ञाते गृहीतव्ये चार्थे यतितव्यमेव क्रियैव कर्त्तव्या, सैव फलवती न ज्ञानं, यदुक्तम्—

क्रियैव फलदा पुंसां, न ज्ञानं फलदं मतम् । यतः स्त्रीभक्ष्यभोगज्ञो, न ज्ञानात्सुखितो भवेत् ॥

किंच, केवलज्ञानवतोऽपि शैलेशीक्रियां विना मोक्षानवाप्तेः क्रियैव प्रधानभूता । ज्ञानक्रियानयद्वयमतयुक्ती श्रुत्वा किमत्र तत्त्वमिति संशयाने शिष्ये गुरुराह—

सव्वेसिं पि नयाणं, बहुविहवत्तव्वयं निसामित्ता । तं सव्वनयविसुद्धं, जं चरणगुणट्ठिओ साहू ॥ १६३७ ॥

पूर्वार्द्धं स्पष्टं, तत्सर्वनयविशुद्धं यच्चरणगुणस्थितः साधुः यतो यथाख्यातचारित्रिण एव महोदयपदावाप्तिरिति ॥१६३७॥

॥ इति श्रीतिलकाचार्यविरचितायामावश्यकलघुवृत्तौ प्रत्याख्यानाध्ययनं समाप्तम् ॥

॥ ग्रं० ६१८ तत्समाप्तौ समाप्तेयमावश्यकलघुवृत्तिः ॥ ॥ सर्वसङ्ख्यया ग्रन्थाग्रं. १२३२५ श्लोकाः ॥

तीर्थे वीरविभोः सुधर्मगणभृत्सन्तानलब्धोन्नति–श्चारित्रोज्ज्वलचन्द्रगच्छजलधिप्रोल्लासशीतद्युतिः ।
साहित्यागमतर्कलक्षणमहाविद्यापगासागरः, श्रीचन्द्रप्रभसूरिरद्भुतमतिर्वादीभसिंहोऽभवत् ॥ १ ॥
तत्पट्टलक्ष्मीश्रवणावतंसाः, श्रीधर्मघोषप्रभवो बभूवुः । यत्पादपद्मे कलहंसलीलां, दधौ नृपः श्रीजयसिंहदेवः ॥ २ ॥
तत्पट्टोदयशैलशृङ्गमभजत्तेजस्विचूडामणिः, श्रीचक्रेश्वरसूरिरित्यभिधया कोऽप्यत्र भानुर्नवः ।

सम्प्राप्ताभ्युदयः सदैव तमसा नो जातुचिन्नायितः, नैवोच्चण्डरुचिः कदाचिदपि न प्राप्तापरागस्ततः ॥ ३ ॥
विललास स्वैरं तत्पट्ट-प्रासादचन्द्रशालायाम् । श्रीमान् शिवप्रभगुरुः, संयमकमलाकृतासक्तिः ॥ ४ ॥
श्रीशिवप्रभसूरिणां, तेषां शिष्योऽस्मि मन्दधीः । नाम्ना श्रीतिलकाचार्यः, श्रुताराधनगृद्धिभाक् ॥ ५ ॥
एतां वृत्तिं लघुमविषमां, सोऽहमावश्यकीयां । तत्पादाम्बुस्मरणमहसा मुग्धधीरप्यकार्षम् ।
यद्यत्किञ्चिद्भ्रमवशतो ह्यधमस्यामशुद्धं, तत्संशोध्यं मम कृतकृपैः सूरिभिस्तत्त्वविद्भिः ॥ ६ ॥
वृत्तिं रचयता चैतां, सुकृतं यन्मयार्जितम् । भवे भवेऽहं तेन स्यां, श्रुताराधनतत्परः ॥ ७ ॥
शते द्वादशकेऽब्दानां, गते विक्रमभूभुजः । संवत्सरे षण्णवते-र्वृत्तिरेषा विनिर्ममे ॥ ८ ॥
शिष्या नः शस्यचारित्राः, सर्वशास्त्राब्धिपारगाः । अस्यां साहाय्यकं चक्रुः, श्रीपद्मप्रभसूरयः ॥ ९ ॥
शिष्योऽस्माकमिमां वृत्ति-मखिन्नः शास्त्रतत्त्ववित् । अलिलिखत्प्रथमा-दर्शे यशस्तिलकपण्डितः ॥ १० ॥
ससपादत्रिशत्यस्यां, श्लोकद्विषट्सहस्रिका । प्रत्यक्षरेण संख्याना-दिति निश्चितवानहम् ॥ ११ ॥
यावद्विजयते तीर्थं, श्रीमद्वीरजिनेशितुः । तावदेषा मरालीव, खेलतात् कृतिमानसे ॥ १२ ॥

॥ श्रीरस्तु ॥

અમારાં પ્રકાશનો ગ્રંથાંક ૧૦૮ સુધીની હકીકત-સારાંશ

(સ્ટોકમાં જે પુસ્તકો છે તેની હકીકત આપવામાં આવી છે)

૧ ગ્રથાંક ૮૫. આવશ્યકસૂત્ર ભાગ ત્રીજો.

આ ગ્રંથ શ્રીગણધર ભગવંતકૃત છે. શ્રીમલયગિરિસૂરિકૃત વિવરણ સહિત શ્રુતકેવલિશ્રીમદ્‌ભદ્રબાહુસ્વામિસૂત્રિત નિર્યુકિતયુકત સંશોધક આચાર્યશ્રી આનંદસાગર સૂરિજી. પ્રકાશક શ્રી જીવણચંદ સાકેરચંદ ઝવેરી. મુદ્રણકાલ વિ. સં. ૧૯૯૨ ઈ. સ. ૧૯૩૬ વીર સં. ૨૪૬૨ મુદ્રણસ્થાન નિર્ણયસાગર પ્રેસ. મુંબઈ. શ્લોકટીકા ૧૮૦૦૦ પ્રમાણ છે. કિંમત રૂા. ૨-૫૦ કુલ ૧૦૦૦ નકલો. વિષય ષડાવશ્યકનો છે. ભાષા સંસ્કૃત-પ્રાકૃત છે, કુલ ખર્ચ રૂા. ૫૦૦૦ થયો છે. આવશ્યકસૂત્ર ભા. ૧-૨ આગમોદય સમિતિ તરફથી પ્રસિદ્ધ થયો હતો.

૨ ગ્રંથાક ૮૬. લોકપ્રકાશ ભાગ ચોથો ભાવલોકસર્ગ ૩૪ થી ૩૭.

આ ગ્રંથના કર્તા મહોપાધ્યાય શ્રી કીર્તિવિજયગણિ શિષ્ય મહોપાધ્યાય શ્રી વિનયવિજયજી છે. સંશોધક આચાર્યશ્રી આનંદસાગર સૂરિજી. પ્રકાશક જીવણચંદ સાકેરચંદ ઝવેરી, રચનાકાલ સંવત ૧૭૦૮. મુદ્રણકાલ વિ. સં. ૧૯૯૩. ઈ. સં. ૧૯૩૭. વીર સંવત ૨૪૬૩. મુદ્રણસ્થાન નિર્ણયસાગર પ્રેસ, મુંબઈ, ભાગ ૪થામાં પૃષ્ઠ સંખ્યા ૫૪૨ થી ૫૮૯, સર્ગ ૩૪ થી ૩૭. કિંમત રૂા. ૧-૦૦. ભાષા સંસ્કૃત.

કુલ નકલો ૧૦૦૦, વિષય સંપૂર્ણ, ભા. ૧ પ્રથમ લોકદ્રવ્ય સર્ગ ૧ થી ૧૧, પૃષ્ઠ ૧ થી ૧૩૦, ભા. ૨જો દ્વિતીય લોકક્ષેત્ર. સર્ગ ૧૨ થી ૨૭, પૃષ્ઠ ૧૩૧ થી ૩૬૮, ભા- ૩જો તૃતીયલોકકાલ, સર્ગ ૨૮ થી ૩૩ પૃષ્ઠ ૩૬૯ થી ૫૪૧, ગ્રંથદ્રવ્ય, ક્ષેત્ર, કાલ, ભાવનું વિસ્તારપૂર્વક સ્વરૂપ દર્શાવતો આકરગ્રંથ છે. સં. ૧૭૦૮માં જીર્ણદુર્ગપુરે (જુનાગઢ) રચના કરાયેલ છે. કુલ્લે ખર્ચ રૂા. ૨૦૦૦ થયો છે. ભા.૧-૨-૩ સ્ટોકમાં નથી. આગલા ગ્રંથો જેની પાસે હોય, તેઓને ભેટ આપવામાં આવશે. મંગાવવા વિનંતિ છે.

૩ ગ્રથાંક ૮૭. ભરતેશ્વરબાહુબલિવૃત્તિ, ભા. ૨ જો.

શ્રી મુનિસુંદરસૂરિશ્વરજી શિષ્ય શ્રી શુભશીલગણિએ વૃત્તિ સાથે રચેલ છે. સંશોધક આચાર્યશ્રી વિજયદાનસૂરિ અને તેમના શિષ્ય ઉપાધ્યાયશ્રી ધર્મવિજયજી. પ્રકાશક જીવણચંદ સાકેરચંદ ઝવેરી. મુદ્રણકાલ વિક્રમ સંવત ૧૯૯૩, ઇ. સં. ૧૯૩૭, વીર સંવત ૨૪૬૨, મુદ્રણસ્થાન-નિર્ણય સાગર પ્રેસ, મુંબઈ, પૃષ્ઠ સંખ્યા ૧૮૭-૩૬૮, કિંમત રૂા. ૨-૦૦, કુલ્લે નકલો ૧૦૦૦, વિષય ભા. ૨ જો. મહાસતીઓના ચરિત્ર. ભાષા-પ્રાકૃત-સંસ્કૃત, કુલ ખર્ચ રૂા. ૪૦૦૦ થયો છે. ભા. ૧ લો હોય તેઓને બીજો ભાગ ભેટ આપવામાં આવશે. મંગાવવા વિનંતિ છે.

૪ ગ્રથાંક ૯૦. ગૌતમીય કાવ્ય.

આ ગ્રંથના કર્તા વાચનાચાર્ય શ્રી દયાસિંહગણિ શિષ્ય પાઠક-શ્રી રુપચન્દગણિ છે. ગૌતમીય પ્રકાશ ટીકા સાથે શ્લોકોના અકરાદિ ક્રમસૂચી સહિત, તેના કર્તા વાચનાચાર્યશ્રીમદ્ અમૃત ધર્મ ગણિ શિષ્ય ઉપાધ્યાય શ્રીક્ષમાકલ્યાણગણિ છે, રચના કાલ વિ. સ. ૧૮૦૭, જોધપુર. સંશોધક-આચાર્યશ્રી વિજયરામચંદ્રસૂરિ શિષ્ય મુનિશ્રી કનક વિજય. પ્રસ્તાવના-પંડિત નારાયણરામ આચાર્ય કાવ્ય તીર્થ લખી

છે. પ્રકાશક-જીવણચંદ સાકેરચંદ ઝવેરી. મુદ્રણકાલ-વિ. સં. ૧૯૯૬, ઈ. સં. ૧૯૪૦, વીર સંવત ૨૪૬૬, મુદ્રણ સ્થાન-નિર્ણયસાગર પ્રેસ, મુંબઈ. કિં. ૧-૫૦ કુલ નકલો ૭૫૦ ભાષા-સંસ્કૃત. કુલ ખર્ચ રૂા. ૨૨૦૦ થયો છે.

૫ ગ્રંથાંક ૯૧. વૈરાગ્યશતકાદિગ્રન્થ પંચક-સટીક.

પૃથક્ પૃથક્ મુનિવર્યોથી ગુમ્ફિત થયેલા વૈરાગ્યશતકાદિ વૃત્તિ-છાયા સહિત આ પાંચ ગ્રંથો છે, સંશોધક શ્રી બુદ્ધિસાગરગણિ. પ્રકાશક-જીવણચંદ સાકેરચંદ ઝવેરી. મુદ્રણકાલ, વિ. સં. ૧૯૯૭, ઈ. સં. ૧૯૪૧, વીર સંવત ૨૪૬૭, મુદ્રણસ્થાન-નિર્ણયસાગર પ્રેસ, મુંબઈ. ભાષા-પ્રાકૃત-સંસ્કૃત. કિં. રૂા. ૧-૦૦ કુલ નકલો ૭૫૦ કુલ ખર્ચ રૂા. ૧૫૦૦ થયો છે.

૬ ગ્રંથાંક ૯૨. અભિધાન ચિન્તામણિકોશ :

આ ગ્રંથના કર્તા કલિકાલ સર્વજ્ઞ શ્રીમદ્‌હેમચન્દ્રાચાર્ય છે. આ ગ્રંથનો વિષયક્રમ (૧) લિંગાનુશાસન (૨) એકાક્ષરકોષ (૩) અભિધાન ચિન્તામણિ (૪) શેષનામમાલા (૫) નામમાલા શિલોઞ્છ (૬) નિઘંટુશેષ (૭) અભિધાન ચિન્તામણિકોશની અકારાદિ અનુક્રમણિકા છે. એકાક્ષર નામમાલા સુધાકુશલ વિરચિત. નામમાલાશિલોઞ્છ જિનદેવસૂરિવિરચિત છે.

સંશોધક-આચાર્ય શ્રી આનંદસાગરસૂરિ. પ્રકાશક-શ્રી હીરાચંદ કસ્તુરચંદ ઝવેરી અને મોતીચંદ મગનભાઇ ચોકસી. મુદ્રણકાલ વિ. સં. ૨૦૦૨ ઇ. સ. ૧૯૪૬, વીર સં. ૨૪૭૨. મુદ્રણસ્થાન-નિર્ણયસાગર પ્રેસ, મુંબઇ, વિષય શબ્દ સંગ્રહ, ભાષા-સંસ્કૃત, પૃષ્ઠ સંખ્યા ૭૮૮ કિં. રૂા. ૪-૦૦ કુલ નકલ ૧૨૫૦ કુલ ખર્ચ રૂા. ૧૦૦૦૦ થયો છે.

७ ગ્રથાંક ૯૩ જૈનકુમાર સંભવ મહાકાવ્ય

આ ગ્રંથના કર્તા અંચલગચ્છિય આચાર્યશ્રી જયશેખરસૂરિ છે. ટીકાકાર આચાર્યશ્રી ધર્મશેખર સૂરિ સંશોધક શ્રીમદ્ વિજયક્ષમાભદ્ર સૂરિ અને આચાર્યશ્રી વિજયલબ્ધિસૂરિ શિષ્ય મુનિશ્રી વિક્રમવિજયજી. પ્રકાશક શ્રી હીરાચંદ કસ્તુરચંદ ઝવેરી અને મોતીચંદ મગનભાઈ ચોકસી. પ્રસ્તાવના મુનિશ્રી વિક્રમવિજયજીએ લખી છે. આભારદર્શક શ્રી હીરાચંદ કસ્તુરચંદ ઝવેરી. મુદ્રણકાલ વિક્રમ સંવત ૨૦૦૨ ઈ. સ. ૧૯૪૬, વીર સંવત ૨૪૭૨. મુદ્રણ સ્થાન-નિર્ણયસાગર પ્રેસ, મુંબઈ. વિષય મહાકાવ્ય ચરિત્ર. ભાષા સંસ્કૃત. પૃષ્ઠ સંખ્યા ૩૯૬, કિંમત રૂા. ૨-૫૦ કુલ નકલ ૭૫૦ કુલ ખર્ચ રૂા. ૫૦૦૦ થયો છે.

૮ ગ્રથાંક ૯૪ સિદ્ધહેમચન્દ્ર-શબ્દાનુશાસન-બૃહદ્વૃત્ત્યવચૂર્ણિ.

(બૃહદ્વૃત્તિદુર્ગપદ-વિવરણ નવપાદી.) આ ગ્રન્થના કર્તા આચાર્યશ્રીહેમચન્દ્રસૂરિજી છે. દુર્ગપદવિવરણ-અવચૂર્ણિના કર્તા શ્રી જયાનંદસૂરિના શિષ્ય શ્રી અમરચન્દ્ર મુનિ છે. સંશોધક-આચાર્યશ્રી ચન્દ્રસાગરસૂરિજી છે. પ્રકાશક શ્રી મોતીચંદ મગનભાઈ ચોકસી. મુદ્રણકાલ-વિ. સં. ૨૦૦૪ ઇ. સ. ૧૯૪૮ વીર સંવત ૨૪૭૪ મુદ્રણસ્થાન-મહોદય મુદ્રણાલય, ભાવનગર. પૃષ્ઠ સંખ્યા ૩૧૨, કિંમત રૂા. ૫-૦૦ વિષય-સંસ્કૃત વ્યાકરણ. કુલ નકલ ૫૦૦ કુલ ખર્ચ રૂા. ૭૫૦૦ થયો છે. વિશેષ આગમોદ્ધારક આચાર્ય શ્રી આનંદસાગર સૂરિશ્વરજી હસ્ત લિખિતકૃતિ જે અત્યાર સુધી અપ્રસિધ્ધ હતી તે ધ્વત્રિંશિકા પ્રતિકૃતિ (ફોટો) આમાં દાખલ કરી છે. આદિમાં શ્રી ચન્દ્રકાન્તસાગરજીએ પં. શ્રીચન્દ્રસાગરગણિની ચાતુર્માસ નોંધ આપી છે.

૯ ગ્રથાંક ૯૫. વીતરાગસ્તોત્ર.

આ ગ્રંથના કર્તા-કલિકાલ સર્વજ્ઞ-આચાર્યશ્રી હેમચન્દ્ર સૂરિ છે. શ્રી વિશાલરાજસૂરિ શિષ્ય શ્રીસોમોદયગણિ કૃત અવચૂર્ણિ, શ્રીદેવભદ્રમુનિન્દ્ર શિષ્ય શ્રી પ્રભાનન્દસૂરિ કૃત વિવરણ અને મુનિ શ્રીચન્દ્રપ્રભસાગર કૃત મૂલનો ગુજરાતી અનુવાદ સહિત. સંપાદક-સંશોધક અનુવાદક મુનિશ્રી ચન્દ્રપ્રભસાગર છે. પ્રકાશક મોતીચંદ મગનભાઇ ચોકસી. મુદ્રણકાલ વિ. સં. ૨૦૦૬, ઇ. સ. ૧૯૪૯ વીર સંવત ૨૪૭૬. મુદ્રણ સ્થાન મહોદય મુદ્રણાલય ભાવનગર. ભાષા-સંસ્કૃત-ગુજરાતી. કિં. રૂા. ૧-૫૦ કુલ નકલ ૧૦૦૦.

૧૦ ગ્રંથાંક ૯૯. શ્રમણ સૂત્રાદિ અવચૂરિ.

સાધુ સાધ્વીઓને ઉપયોગી શ્રી શ્રમણસૂત્ર પાક્ષિકસૂત્ર-ક્ષામણકસૂત્રો અવચૂરિ સહિત પ્રકાશિત કર્યા છે. સંશોધક-આચાર્ય શ્રી વિજયલબ્ધિસૂરિ શિષ્ય મુનિ શ્રી લલિતાંગવિજય. પ્રકાશક. મોતીચંદ મગનભાઈ ચોકસી. મુદ્રણકાલ. વિ. સં. ૨૦૦૭ ઈ. સ. ૧૯૫૧. વીર સંવત ૨૪૭૭. મુદ્રણસ્થાન. સરસ્વતી મુદ્રણાલય. સુરત. કિં. રૂા. ૧-૦૦. કુલ નકલ ૫૦૦ કુલ ખર્ચ રૂા. ૧૨૫૦ થયો છે.

૧૧ ગ્રથાંક ૧૦૦. વન્દન પ્રતિક્રમણ. અવચૂરિ.

પૂર્વના મહર્ષિએ રચેલી આ અવચૂરિ વન્દન પ્રતિક્રમણ નામની છે. પ. પૂ. આચાર્ય પ્રવર શ્રી દેવેન્દ્રસૂરિ કૃત વન્દારુવૃત્તિ તથા આચાર્ય શ્રી રત્ન શેખરસૂરિકૃત અર્થદીપિકા જે છે, તેમાંથી કથાઓ વગેરે છોડીને અવચૂરિ રૂપ જે ટીકાનો ભાગ તે આ ગ્રન્થમાં લેવામાં આવેલો છે; તેથી આ અવચૂરિ કહેવાય છે, આ અવચૂરિના કર્તાએ કોઈ જગ્યાએ પોતાના નામનો ઉલ્લેખ કર્યો નથી. તેથી આ અવચૂરિ અનિર્દિષ્ટ નામવાળી છે. સંપાદક-આચાર્ય શ્રી આનન્દસાગરસૂરિના અંતેવાસિ મુનિશ્રી કંચનવિજય તથા શ્રી

ક્ષેમંકરસાગર. પ્રકાશક-મોતીચંદ મગનભાઈ ચોકસી. મુદ્રણકાલ- વિ. સં. ૨૦૦૮ ઈ. સ. ૧૯૫૨ વીરસંવત. ૨૪૭૮. મુદ્રણસ્થાન-નિર્ણય સાગર પ્રેસ. મુંબઇ. વિષયવન્દન-ષડાવશ્યક. ભાષા પ્રાકૃત-સંસ્કૃત. કિ. રૂા. ૧=૫૦ કુલ નકલ ૫૦૦ કુલ ખર્ચ ૫૫૦૦ થયો છે.

૧૨ ગ્રથાંક ૧૦૨. આદ્ય (શ્રાવકધર્મ) પંચાશકચૂર્ણિ.

આચાર્ય શ્રી હરિભદ્રસૂરિ કૃત પંચાશકગ્રંથમાંનું એક શ્રાવક ધર્મ પંચાશક પ્રકરણ શ્રી યશોદેવસૂરિ કૃત ચૂર્ણિસહિતનું આ પ્રકાશન પ્રથમવારજ થાય છે. સંપાદક-આચાર્ય શ્રી આનન્દસાગરસૂરિના અંતેવાસિ મુનિ શ્રી કંચનવિજય તથા શ્રી ક્ષેમંકરસાગરજી. પ્રકાશક- મોતીચંદ મગનભાઈ ચોકસી. મુદ્રણકાલ- વિ. સં. ૨૦૦૮ ઇ. સ. ૧૯૫૨. વીર સંવત ૨૪૭૮. મુદ્રણસ્થાન- મહોદય મુદ્રણાલય. ભાવનગર. કિં. રૂા. ૨=૫૦ કુલ નકલ ૫૦૦ કુલ ખર્ચ રૂા. ૨૫૦૦ થયો છે.

૧૩. ગ્રથાંક ૧૦૩. શ્રી દશવૈકાલિકસૂત્ર.

આ ગ્રંથના કર્તા શ્રી શય્યંભવસૂરિજી છે. ટીકાકાર. શ્રી સુમતિસાધુસૂરિજી છે. સંપાદક- શ્રી આનન્દસાગરસૂરિના અન્તેવાસિ મુનિ શ્રી કંચન વિજય તથા શ્રી ક્ષેમંકરસાગરજી. પ્રકાશક- મોતીચંદ મગનભાઈ ચોકસી. મુદ્રણકાલ- વિ. સં. ૨૦૧૦. ઈ. સં. ૧૯૫૪ વીર સંવત. ૨૪૮૦, વિષય. સાધુ-સાધ્વીના આચાર. ભાષા. પ્રાકૃત-સંસ્કૃત. મુદ્રણસ્થાન- મહોદય મુદ્રણાલય. ભાવનગર. કિં. રૂા. ૩=૦૦ કુલ નકલ ૫૦૦ કુલ ખર્ચ રૂા. ૩૦૦૦ થયો છે.

૧૪. ગ્રથાંક ૧૦૪. શ્રી ઉત્તરાધ્યયન અવચૂરિ ભા. ૧ લો.

આ અવચૂર્ણિના કર્તા ચિરંતનાચાર્ય છે. આ સકથાનક લઘુ વૃત્તિ છે. આ ગ્રંથના ૩૬ અધ્યયનો છે, તેમાંથી આ પ્રથમ ભાગમાં ૨૩. અધ્યયનો આપવામાં આવ્યાં છે. સંપાદક- આચાર્ય શ્રી આનંદસાગરસૂરિજીના ઉપસંપદા પ્રાપ્ત મુનિ શ્રી કંચનવિજયજી પ્રકાશક- મોતીચંદ મગનભાઇ ચોકસી. મુદ્રણકાલ- વિ. સં. ૨૦૧૬ ઇ. સ. ૧૯૬૦ વીર સંવત ૨૪૮૬. મુદ્રણ સ્થાન- નિર્ણયસાગર પ્રેસ. મુંબઈ. ભાષા. પ્રકૃત-સંસ્કૃત. કિ. રૂા. ૪=૦૦ કુલ નકલ ૫૦૦. કુલ ખર્ચ રૂા. ૪૦૦૦ થયો છે.

૧૫ ગ્રથાંક ૧૦૫. શ્રી પિણ્ડનિર્યુક્તિ. અવચૂરિ.

શ્રી શય્યંભવસૂરિકૃત શ્રી દશવૈકાલિકસૂત્રમાં પાંચમું અધ્યયન પિણ્ડૈષણા છે. તેની નિર્યુક્તિ શ્રી ભદ્રબાહુસ્વામી મહારાજે રચેલી છે, તેજ આ પિણ્ડનિર્યુક્તિ નામનો ગ્રંથ છે. તેના ઉપર આ અવચુરિ શ્રી જયકીર્તિસૂરિના શિષ્ય શ્રી ક્ષમારત્નજીએ રચી છે. શ્રી વીર ગણિરચિત શિષ્યહિતા નામની વૃત્તિનો આદિઅંત ભાગ પરિશિષ્ટ ૯માં આપવામાં આવ્યો છે. અંચલગચ્છીય શ્રી મેરુતુંગ સૂરિના શિષ્ય શ્રી માણિક્યશેખરસૂરિ રચિત દીપિકાનો આદિઅંત ભાગ પરિશિષ્ટ ૧૦માં આપવામાં આવ્યો છે. આનુ પ્રકાશન પ્રથમવાર થાય છે. સંપાદક. આચાર્ય શ્રી આનન્દસાગરસૂરિજીના ઉપસંપદા પ્રાપ્ત મુનિ શ્રી કંચનવિજયજી. પ્રકાશક- મોતીચંદ મગભાઈ ચોકસી, મુદ્રણકાલ- વિ. સં. ૨૦૧૪. ઇ. સ. ૧૯૫૮. વીર સંવત ૨૪૮૪. કિં. રૂા. ૩=૦૦ ભાષા. પ્રાકૃત. સંસ્કૃત. મુદ્રણસ્થાન- મહોદય મુદ્રણાલય. ભાવનગર. કુલ નકલ ૫૦૦ કુલ ખર્ચ રૂા. ૧૫૦૦ થયો છે.

૧૬ ગ્રથાંક ૧૦૬. શ્રી શ્રાદ્ધવિધિ પ્રકરણ. શ્રાદ્ધવિધિ કૌમુદીવૃત્તિસહિત

આ ગ્રંથના કર્તા શ્રી રત્નશેખરસૂરિ છે. તેના ઉપર સ્વોપજ્ઞ 'શ્રાદ્ધવિધિ-કૌમુદી' વૃત્તિ છે. સંશોધક- શ્રીમદ્‌વિજયલબ્ધિસૂરિ શિષ્ય પં. શ્રી વિક્રમવિજયગણિ અને મુનિ શ્રી ભાસ્કર વિજયજી. આદ્વિતીય સંસ્કરણ છે.

પ્રકાશક. મોતીચંદ મગનભાઇ ચોકસી. મુદ્રણકાલ વિ. સં. ૨૦૧૬ ઇ. સં. ૧૯૬૦ વીર સંવત ૨૪૮૬, મુદ્રણસ્થાન-નિર્ણયસાગર પ્રેસ, મુંબઈ. વિષય-શ્રાવક ધર્મ અંગે વિધિવાદનું નિરૂપણ. ભાષા, પ્રાકૃત-સંસ્કૃત. કિં. રૂા. ૪-૦૦ કુલ નકલ ૫૦૦ કુલ ખર્ચ રૂા. ૪૦૦૦ થયો છે.

સાત ગ્રંથો પ્રેસમાં છે

(૧) નંદીસૂત્ર અવચુરિ ભા. ૧. (૨) આવશ્યક અવચુરિ ભા. ૧ (૩) જમ્બુદ્વિપપ્રજ્ઞપ્તિચૂર્ણિ (૪) આવશ્યક અવચુરિ ભા. ૨. (૫) નંદીસૂત્ર અવચૂરિ ભા. ૨. (૬) ઉત્તરાધ્યયન અવચુરિ, ભા. ૨. (૭) અલ્પપરિચિતસૈદ્ધાન્તિક શબ્દ કોષ ભા. ૨.

શ્રીમતી આગમોદય સમિતિના પ્રકાશનો	કિં. રૂા. ન. પૈ.
૧૯ આવશ્યક ભા. ૨ જો મલયગિરિકૃત ટીકાયુકત	૨ – ૫૦
૨૦ જીવસમાસ પ્રકરણ શતક	૧ – ૫૦
૨૧ લોકપ્રકાશ ભા. ૧ લો દ્રવ્યલોક સર્ગ ૧ થી ૧૧ ભાષાંતર સહિત	૩ – ૫૦
૨૨ ,, ભા. ૨ જો-ક્ષેત્રલોક સર્ગ ૧૨ થી ૨૦ ભાષાંતર સહિત.	૩ – ૫૦
૨૩ નંધાદિગાથાદ્યકારાદ્યિુતો (સપ્તસૂત્ર) વિષયાનુંક્રમ.	૨ – ૦૦
૨૪ ભકતામરસ્તોત્ર પાદપૂર્તિરૂપ કાવ્ય પ્રથમ વિભાગ ટીકા ભાષાંતર.	૩ – ૦૦
૨૫ ,, દ્વિતીય વિભાગ ,,	૩ – ૫૦
૨૬ સ્તુતિ ચતુર્વિંશતિકા સચિત્રા શ્રી શોભનમુનિ કૃતા સંસ્કૃતા.	૮ – ૦૦
૨૭ ,, શ્રી બપ્પભટ્ટિસૂરિકૃતા ભાષાંતર યુકતા.	૬ – ૦૦
૨૮ ,, કવિધનપાલ કૃતા વ ઐન્દ્ર સ્તુતિ.	૬ – ૦૦
૨૯ ચતુર્વિંશતિકાજિનાનંદ સ્તુતિ સચિત્રા મેરૂવિજયકૃતા ભાષાંતર સમેતા.	૬ – ૦૦